नं० ४६३२

नाम – तन्त्रसारः

कर्ता – कृष्णानन्द वागीश भट्टाचार्यः

पत्रसंख्या – २८८ पत्राणि सं० १७४३

विषयः – तन्त्रम्

४९३२

गकुनाम २६५
कृष्ण २६२
शिवावलि २७४
मंत्रास्नासुधिजागरस्नाकालो २४८
अक्षुपचारः २४७
रुद्राक्ष २४६
मुद्रा

४९३२

तं॰सा॰
१

ॐ नमः कृष्णाय॥ ॥नत्वा कृष्णपदद्वंद्वं ब्रह्मादिसुरवंदितं। गुरुं च ज्ञानदातारं कृष्णानंदेन धीमता॥ तंत्रं कृष्णगतौ वाक्या न्नानार्थं प्रतिप नू॰१
न्नवासो कर्यार्थं च संक्षेपात्तंत्रसारं प्रतन्यते॥ उच्यते प्रथमं तत्र लक्षणं गुरुशिष्ययोः। विनते इश्वरो शांतो दांतः कुलीनश्च विनीतः
शुद्धवेषवान्। शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान्। आश्रमी ध्याननिष्ठश्च मंत्रतंत्रविशारदः। निग्रहानुग्रहे शक्तो गुरु
रित्यभिधीयते॥ इति गुरुलक्षणं॥ शिष्यलक्षणं यथा। शांतो विनीतः शुद्धात्मा श्रद्धावान् धारणाक्षमः। समर्थश्च कुली
तः सच्चरितो यती। एवमादिगुणैर्युक्तः शिष्यो भवति नान्यथा। गुरुता शिष्यता चापि तयोर्वत्सरवासतः। तथा चोक्तं सारसंग्र
गुरुः स्वाश्रितं शिष्यं वर्षमेकं परीक्षयेत्। स्वप्ने तु न कालनियमः। स्वप्ने तु नियमो नहीति नारदवचनात्। तत्रैव राज्ञि मा
घः पत्नीपापं स्वभर्त्तरि। तथा शिष्यार्जितं पापं गुरुः प्राप्नोति निश्चितं। दिव्यागमे शिववाक्यं। गुरुः शप्याप्लनं यानं पादुके पानपा
स्नानोदकं तथा छायां लंघयेन्न कदाचन। गुरोरग्रे पृथक्पूजामौद्धत्यं च विवर्जयेत्। दीक्षां व्याख्यां प्रभुत्वं च [illegible] गुरोरग्रे प राम
रित्यजेत्। तथा योगिनीतंत्रे। पितृमित्रे न गृह्णीयात्तथा मातामहस्य वा। सोदरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च। तथा गोलाशवि १

मर्षिरण्यां॥ यतेर्दीक्षा पितुर्दीक्षा दीक्षा च वनवासिनः। विकीर्णच्छ्रमिणो दीक्षा न सा कल्याणदायिका। इत्यादिनिषेधवचनात्॥ एभ्यो मंत्रं
न गृह्णीयात्। इदं तु सिद्धमंत्रेतरपरं सिद्धमंत्रे नादुष्यतीति वचनात्। सिद्धयामले। यदि भाग्यवशेनैव सिद्धविद्यां लभेत् प्रिये। तदैव
तां तु दीक्षेत तत्यक्त्वा गुरुविचारणं। प्रमादाच्च तथाज्ञानात्पितुर्दीक्षां संचरेत्। प्रायश्चित्तं ततः कृत्वा पुनर्दीक्षां समाचरेत्। पितुरित्युपल
क्षणं। मातामहादीनामपि। रुद्रयामले। न पत्नीं दीक्षयेद्भर्ता न पिता दीक्षयेत्सुतां। न पुत्रं च तथा भ्राता भ्रातरं न च दीक्षयेत्। शक्तिया
मले। सिद्धमंत्रो गुरुः सर्वमयोग्यं योग्यतां नयेत्। इत्युक्तः सिद्धमंत्रे गुरौ न दोषः। प्रायश्चित्तं त्वत्र तु तत्सावित्रीजपः सर्वत्र तथा दर्शि
नात्। तथा मत्स्यसूक्ते। निर्वीजैव पितुर्मंत्रे शैवशाक्ते न दुष्यतीति कौलिकमंत्रदीक्षापरं॥ योगिनीतंत्रे॥ शक्तिवि[illegible]धिकृ
त्य दीक्षानिषेधात्। यत्तु शाक्तीतरविद्यापरं मत्स्यसूक्ते। तारामधिकृत्य तथा प्रतिपादनात्॥ तथा च निजकुलतिलकाय [illegible]
चाय दद्यात्। महातीर्थेऽपरागे सति सर्वत्र न दोषः। तथा वैशम्पायनीयसंहितायां विष्णुपुराणे तथा विष्णुमंत्रमधिकृत्य साम
साधु पृष्टं त्वया ब्रह्मन्शृणु वक्ष्यामि सकलं तव॥ ब्रह्मणा कथितं पूर्वं वसिष्ठाय महात्मने। वसिष्ठोपि स्वपौत्राय मत्स्ये चेद
त्रवान्स्वयं। प्रसन्नहृदयः स्वकः पिता मे। करुणानिधिः। कुरुक्षेत्रे महातीर्थे सूर्यपर्वणि दत्तवान्। इत्यादि वैशम्पाय

तं.सा. २

नसंहितायांशौनकंप्रतिव्यासवचनं।योगिनीतंत्रे।निवीर्य्यंचपितुर्मंत्रंतथामातामहस्यच।स्वप्नलब्धंस्त्रियादत्तंसंस्कारेणैव
शुध्यति।यन्तुसाध्वीचैवसदाचाररतागुरुभक्तिजितेंद्रिया।सर्वमंत्रार्थतत्त्वज्ञासुशीलापूजनेरता।गुरुयोग्याभवेत्साहिविधवा
परिवर्जिता।तथास्त्रियोयोग्याःशुभाःप्रोक्तामातुश्चाष्टगुणाःस्मृताः।इतितद्गुरोरुपासितमंत्रपरंतन्तुस्वीयविद्यादीक्षागुरु
याभैरवीतंत्रे।स्वीतंत्रे।स्वीयमंत्रोपदेशेनकुर्य्याद्गुरुचिंतनं।मातुरितिगुरूपासितेऽष्टगुणाअनुपासितेशुभफलदे[illegible]ः
सिद्धमंत्रविषयंवा।वस्तुतःस्त्रियादत्तमित्यत्रस्त्रीपदंविधवापरं।एकवाक्यत्वात्।तथास्वप्नलब्धेचश्कलौगुरोःप्राणनि
वेदयेत्।वटपत्रेकुंकुमेनलिखित्वाग्रहणंशुभं।ततःशुचिमवाप्नोति।अन्यथाविफलंभवेत्।इदंतुसद्गुरोरभावेतत्संभवेत
स्मादेवशुद्धीयात्।तंत्रांतरेगृहीतमंत्रस्त्यक्त्वागुरुस्थेदोषसंयुतः।महापातकयुक्तोवा।गुरुस्त्वेद्वैवनिंदकः।यामले।गुरुस्त्या
गाद्भवेन्मृत्युर्मंत्रत्यागाद्दरिद्रता।गुरुमंत्रपरित्यागाद्रौरवंनरकंव्रजेदिति।अत्रइस्यमंत्रविशेषेनिषेधमाहतंत्रांतरेप्रणवाद्यंन
दातव्यंमंत्रंशूद्रायसर्वथा।आत्ममंत्रंगुरोर्मंत्रंमंत्रंचैवाजपसंज्ञकं।स्वाहाप्रणवसंयुक्तंशूद्रेमंत्रंददद्द्विजः।शूद्रोनिरयगामी रत्म २
स्याद्ब्राह्मणोयात्यधोगतिं।तथादिव्यज्ञानंयतोदद्यात्कुर्य्यात्पापस्यसंक्षयं।तस्माद्दीक्षेतिसाप्रोक्तामुनिभिस्तत्त्ववेदि

भिः। सर्वाश्रमेषु दीक्षाया आवश्यकत्वं। यथा दीक्षा मूलं जपं सर्वं दीक्षा मूलं परं तपः। दीक्षामाश्रित्य निवसेद्यत्र कुत्राश्रमे वसन्।
अदीक्षिता ये कुर्वंति जपपूजादिकाः क्रियाः। न भवंति प्रिये तेषां शिलायामुप्तबीजवत्। देवि दीक्षाविहीनस्य न सिद्धिर्न च सद्
गतिः। तस्मात्सर्वप्रयत्नेन गुरुणा दीक्षितो भवेत्। अदीक्षितोपि मरणे रौरवं नरकं व्रजेत्। तस्माद्दीक्षां प्रयत्नेन सदा कुर्या
च्छ्रुतांत्रिकात्। कल्पे दृष्टानुमन्त्रे वै योगः क्रमागतिर्न राधमः॥ मन्वंतरसहस्रेषु निष्कृतिर्नैव जायते नादीक्षितस्य कार्यं स्यात्तपोभि
र्नियमव्रतैः। न तीर्थगमने नापि न च शारीरयंत्रणैः। अतः सद्गुरोराहितदीक्षः सर्वकर्माणि साधयेत्। तत्राप्यनुकूलमंत्रदीक्षे
न यथा। स्वताराराशिकोष्ठो नामनुकूलान्न भजेन्मन्त्रान्। तथा वाराहीतंत्रे ऋणधनिचक्रं नाम चक्रं तथैव च। अत्र चैतत्सततं गुणं गुरुज्ञाना
न्याश्चक्रं विचारयेत्॥ इति तु प्रधानतया गोद्धव्यं। तथा धनिमंत्रे नरसिंह्याद कुलं च तथैव च। इत्यादिदर्शनात्। तन्नक्षत्र कारविचारादेव
श्यकत्वात् प्रथमं तन्निरूप्यते। तत्र चन्द्रसिंहार्कवराहाणां पासादं प्रणवस्य च। इत्यादिदर्शनात्। तत्र चक्रविचारस्यावश्यकत्वात्
प्रथमं तन्निरूप्यते। तत्र चन्द्रसिंहार्कवराहाणां प्रासादं प्रणवस्य च। सपिंडाक्षरमंत्राणां सिद्धादीन्नैव शोधयेत्। स्वप्नलब्धे स्त्रियादत्ते
मालामंत्रे च त्र्यक्षरे। वैदिकेषु च सर्वेषु सिद्धादीन्नैव शोधयेत्। मालामंत्रास्तु वाराहीये। विंशत्यर्णाधिकामंत्राः मालामंत्राः

तं·सा· ३ मालामंत्राः प्रकीर्त्तिताः । नपुंसकस्य मंत्रस्य सिद्धादी नैव शोधयेत् । हंसस्याष्टाक्षरस्यापि तथा पंचाक्षरस्य च । एकद्वित्र्यादिबीज
स्य सिद्धादी नैव शोधयेत् । एकाक्षरस्य मंत्रस्य मालामंत्रस्य पार्वति । वैदिकस्य च मंत्रस्य सिद्धादी नैव शोधयेत् । गवाक्षतंत्रे । न
दाविद्योपरी क्षेत्रपदित्रिपुरुषं यजेत् । इत्यादिवचनादेतेषु विचारो नास्ति । वस्तुतस्तु देवप्रशंसापरे सर्वत्र विचारस्यावश्य
कत्वं दुरदृष्टवशात् कदाचित् वैरिमंत्रस्य स्वप्ने दोषाश्यात् तद्दोषस्य दृष्टत्वादिति सांप्रदायिकाः । तत्र कुलाकुलस्य भेदः । व
क्ष्यामि संक्षिप्तमिह निर्बंधे । वाय्वग्निभूजलाकाशाः पंचाशल्लिपयः क्रमात् । पंचह्रस्वाः पंचदीर्घा बिंदुताः संधिसंभवाः । काद
यः पंचवर्गाः शषहकुलसहिताः समीरिताः । अ आ ए क च ट त प य षा मारुताः । इ ई ऐ ख छ ठ थ फ र क्षा आग्नेयाः । उ ऊ ओ ग ज ड द ब ल सा
पार्थिवाः । ऋ ॠ औ घ झ ढ ध भ व वा वारुणाः । ऌ ॡ अं ङ ञ ण न म ह ळा नाभसाः । साधकस्याक्षरं पूर्वं मंत्रस्यापि तदक्षरं । यद्येकभूतं दै
वतं जानीयात् स्वकुलं हि तत् । पोमस्य वारुणं मित्रं आग्नेयस्यापि मारुतं मारुतं पार्थिवानां च आग्नेयस्याभसारिपुः । नाभसं सर्वमि
त्रं स्याद्विरुद्धं नैव शीलयेत् । चकारात् सांग्नेयं पार्थिवानां च ॥ ॥ इति कुलाकुलचक्रविचारः ॥ ॥ अथ राशिचक्रं आगमकल्पद्रुमे ॥ रम
अ आ इ ई मेषः । उ ऊ ऋ वृषः । ॠ ऌ ॡ मिथुनः । ए ऐ कर्कटः । ओ औ सिंहः । अं अः श ष स हः कन्या का । कवर्गस्तुला । चवर्गो वृश्चिकः । ३

टवर्गो धनुः तवर्गो मकरः पवर्गः कुंभः यं वं र्गो मीनः रेखाद्वयं पूर्वपरेण कुर्य्यात् ततन्मध्यतो याम्यकुबेरभेदात् एकैकमीशाननिशाचरेषु द्व
ताश्च वायौ विलिखेत्तन्तोर्णा वेदाग्निवह्नियुगलश्च वर्णाद्भिः संख्यान् । पंचेषुबाणशरपंचचतुष्टयार्णान् मेषादितश्च गणयेत्स्वविलिखेत्स
कलांस्तावर्णान् ॥ कन्यागतान् पृविलिखेद्दथशादिवर्णान् अत्र च नु भ्रियादिभिः सार्द्धस्यात् तत्काकारस्तु मीनगद्दति प्रपंचसारात् तस्यैका
रस्य मीनेराशौ तां स्फुटता ज्ञेया ॥ त्यजेच्च तं तुस्मृतिगृर्णां स्वराशेर्भ त्रराशं तं नागणनीयं विविचक्षणैः । यदा तु स्वराशेर ज्ञानं तदा साधकनामाद्य
क्षरसंबंधिनं राशिं शुद्धी त्वाराशये त् । स्वनामराशिको ष्टानामनुकूलं भजेन्मन्त्रं नु साधकनामाद्यर्द्धराशिदिभीरामा र्चन चद्रिकायां एकपं
चनवं बांधवाः स्मृताः । दोच षट्च दशमाश्च सेवकाः वह्नि रुद्र मुणाय स्तुपोषकाः । द्वादशाष्टचतुरस्तु घातकाः इति विज्ञ विषय
रामा र्चन चंद्रिका धृतत्वात् । शक्त्या हीन षष्ठ वर्जनीयं । षष्टाष्टम द्वादशानि वर्जनीयानीति वचनात् । तथा लग्नाधने भ्रातवं धु
पुत्र शत्रु कलेकाः मरणं धर्म कर्माय व्यया द्वादश राशयः विस्फु विषये वं धुस्थाने शत्रुः शत्रु स्थाने वंधुरिति पाठः । तथा
जैतेन मंत्राद्यवर्णेन नाम्नो चाद्य क्षरेण चागणयेत्थ दिषष्ठं वा व्यष्टम द्वादशं तु वा । रिपु मंत्राद्यवर्णः स्यात्तेन न तस्य हितं चरेत् ॥ ॥
इति राशि चक्रं ॥ ॥ अथ नक्षत्र चक्रं ॥ ॥ अश्वाश्विनी देवगणः इ भरणी मानुषः ई ग्र ऊ कृत्तिका राक्षसः । ऋ ॠ ऌ ॡ रोहि

तं॰सा॰ ४

५

गीमानुषः। ए मृगशिरो देवः। ऐं आर्द्रा मानुषः ओ औ पुनर्वसुर्देवः। क पुष्यो देवः ख ग अश्लेषा राक्षसः घ ङ मघा राक्षसः। च पूर्वफल्गुणी
मानुषः। झ ञ हस्तो देवः। ट ठ चित्रा राक्षसः ड स्वाती देवः ढ ण विशाखा राक्षसः त थ द अनुराधा देवः। ध ज्येष्ठा राक्षसः। न प फ मूला रा
क्षसः। ब पूर्वाषाढा मानुषः। भ उत्तराषाढा मानुषः। म श्रवणा देवः। य र धनिष्ठा राक्षसः। ल शतभिषा राक्षसः। व श पूर्वभाद्र[पदा] मा
नुषः। ष स ह उत्तरभाद्रपदा मानुषः। अं अः ल क्ष रेवती देवः। तथा च निबन्धे। पूर्वोत्तरात्रयं चैव भरण्यार्द्रा च रोहिणी। द्व[...]णि मा
नुषाण्याहुर्नक्षत्राणि मनीषिणः। ज्येष्ठा शतभिषा मूलं धनिष्ठाश्लेषकृत्तिका। चित्रा मघा विशाखा च सुतारा राक्षसदेवता। अश्विनी
रेवती पुष्यः स्वाती हस्त पुनर्वसुः। अनुराधा मृगशिरः श्रवणा देवतारकाः। तथा स्वजातौ परमा प्रीतिर्मध्यमा भिन्नजातिषु। रक्षोमानुषयो
र्नाशो वैरं दानवदेवयोः। जन्मसंपद्विपत्क्षेमप्रत्यरिः साधको वधः। मित्रं परममित्रं च जन्मादिनि पुनः पुनः। जन्मतृतीयपंचमसप्तमानि
वर्जनीयानि नक्षत्राणि। तथा रसाष्टनवभद्राणि युग्मायुग्मतान्यपि भूतराशिनभद्राणि। इत्यादि पुनक्षत्रादेवनक्षत्रगणनीयं। स्वनक्षत्रा
ज्ञाने स्वनामाद्यक्षरसंबंधिनक्षत्रादेवनक्षत्रगणनीयमिति। द्वादशैर्येन गणयेत्साधकाद्यक्षरात्सुधीभिरिति। तथापि गेला राम
यां पुकरंटप्यस्य जन्मर्क्षं तस्य जन्मर्क्षतो भवेत्। वनष्टजन्मभं यस्य तस्य नामाद्यक्षतो भवेत्॥ ॥इति नक्षत्रचक्रे॥ ॥अथाकथहचक्र ४

कं॥ ॥चतुरस्रे लिखेद्वर्णांस्त्र चतुःकोष्ठसमन्वितान् चतुःकोष्ठे षोडशकोष्ठ इति यावत् तथा नं त्र राजेष्टाक्प्रत्यगदक्षिणोदकसूत्रपंचक
योगतः।कोष्ठानां षोडशैवं स्युस्तेषु वर्णान् क्रमाल्लिखेत्।तत्र षोडशकोष्ठे अकारादिवर्णान् दक्षिण्येन लिखेत्॥तत्र क्रमः। इंद्वग्निरुद्र
नवनेत्रयुगार्कदिक्ऋत्वष्टषोडशचतुर्दशभौतिकेषु।पातालपंचदशवह्निहिमांशुकोष्ठे वर्णान् लिखेल्लिपिभवान् क्रमशस्तु
धीमान्।नामाद्यक्षरमारभ्य यावन्मंत्रादिमक्षरं।चतुर्भिः कोष्ठैरेकैकमिति कोष्ठचतुष्टयं।पुनः कोष्ठगकोष्ठेषु सव्यतो नामस्त्रादि
तः सव्यतो दक्षिणतः तथा च विश्वसारे। दक्षिणावर्त्तयोगेन कोष्ठवर्णान् लिखेत् क्रमात्।येनैव लिखनं कुर्यात्तेनैव गणनं स्मृतं।
सिद्धः साध्यः सुसिद्धोरिः क्रमात् ज्ञेया विचक्षणैः। [illegible] सिद्धः सिध्यति कालेन साध्यस्तु जपहोमतः। सुसिद्धो ग्रहणमात्रेणारिस्तु
मूलनिकृंतनः। सिद्धार्णा बांधवाः प्रोक्ताः साध्यास्ते सेवकाः स्मृताः। सुसिद्धाः पोषकाः ज्ञेयाः शत्रवो घातकाः स्मृताः। जपेन दंम
सिद्धः स्यात् सेवकोधिकः सेवया। सुखानि पोषकोऽभीष्टं घातको नाशयेत् ध्रुवं। पिंगलायां। सिद्धसिद्धोर्द्धयोजनेन द्विगुणात् सि
द्धसाध्यकः। सिद्धसुसिद्धोऽर्द्धजपात् सिद्धारिर्हंति बांधवान्। साध्यसिद्धो द्विगुणतः साध्यसाध्यो निरर्थकः। तत्सुसिद्धो द्विगुणा
ज्जपात् साध्यारिर्हंति गोत्रजान्। सुसिद्धसिद्धोऽर्द्धजपात् साध्यो द्विगुणाधिकात्। तत्सुसिद्धो ग्रहादेव सुसिद्धारिः स्वगोत्रहा। अ

नं·सा· रिसिद्धः सुतान्हन्याद रिसाध्यं तु कन्यकां। तत्र सुसिद्ध स्वपत्नाघ्नः तदरिर्हन्ति साधकं। एषु दोषेषु सर्वत्र मायां काममथापि वा। ह्रिं ह्रावा
५ दोऽग्रिये दद्यात्तद्वर्णविमुक्तये इति भद्रः॥ ॥अथ अकडमचक्रं॥ ॥रेखाद्वयं पूर्वपरेण कुर्यात् न्नम ध्यतो याम्यकुबेरभेदात्। महे
शरकोणविपतिक्रमेण तिर्यक्तथा वायुहुताशनेन। अकारादीन्हकारांतान् लीवहीनाल्लिखेत्ततः। एकैकक्रमतो लेख्यानूमे
५ षादिषु कूषादिषु द्वं धेतकान्। गणयेत्क्रमतो भद्रे नामादिवर्णकादिकान्मेषादितो मीनांतान्गणयेत्क्रमशः सुधीः। सिद्धसा
ध्यसुसिद्धारीन्पुनः सिद्धादयः पुनः। नवैकपंचमे सिद्धः साध्यः षड्दशपुत्रमके। ससिद्धस्त्रिसप्तकेशद्वेवदाष्टद्वादशेऽरिः। रा
अ६ एतत्ते कथितं देवि अकडमादिकमुत्तमं। इदं तु गोपालविषयकमेव वो हितं त्वे। तारशुद्धिर्विशेषवानीको ष्ठशुद्धिः। शिवस्य वा।
राम्भुद्विस्त्रिपुरागोपाले अकडमः स्मृतः। कोष्ठशुद्धिर्विराहे महालक्ष्मीः कुले। नामादिचक्रे सर्वेषां भूतचक्रे तथैव च॥ ॥इति
वचनात्॥ ॥अथ ऋणधनिचक्रं॥ ॥तच्च यथा कोष्ठान्येकादश ज्ञेयववेदेन पूरितानि च। अकारादिहकारांतं लिखेत्त
कोष्ठेषु तत्त्ववित्। प्रथमं पांच कोष्ठेषु ह्रस्वदीर्घक्रमेण तु। द्वयं द्वयं लिखेत्तत्र विचारे खलु साधकः। ऋॠ षष्ठे एकैकश्चो वर्णा राम
न्क्रमतस्तु लिखेत्सुधीः। ह्रो ह्रो स्वरान्पंचसु कोष्ठेषु शेषान्षट्सु स्वरैकमेकं॥ कादीन्शेषान्विलिखेत्ततो रणे नैक ५

कमेकाङ्कशास्तु त्रिकेषुाघङ्कालकालचियदग्निसमुद्रवेदखाकाशशून्यदहनाः खलु साध्यवर्ग्यः। युग्मद्विपंचवियदस्व[illegible]र्कशशांक
यौमाद्विवेदशशिनः खलु साधकार्णाः। नमोन्कालादकठवाङ्कजभुक्तघोघज्ञात्वोभयोरधिकशेषमृणंधनं स्यात्॥ अस्यार्थः। साध्यवर्गा
न्स्वरव्यंजनरूपेन पृथक्कृतान् पङ्कालाद्यंकैर्गुणितान् तथा साधकनामाद्यक्षरान्स्वरव्यंजनरूपेण पृथक्कृतान् युग्माद्यैर्गुणयित्वा अ
ष्टसंख्याभिर्हृत्वा उभयोः साध्यसाधकयोरधिकं ऋणं धनं ज्ञात्वा मंत्रं दद्यात्। यदा मंत्रस्य ऋणी भवति तदा मंत्रः शुभदः। मंत्रः शु
भदो मंत्रः शुभदायको भवति धनी चेन्न जपेत्। तथा च तंत्रांतरमंत्रो यद्यधिकाकः स्यात्तदा मंत्रं जपेत्सुधीः। समेपि च जपेन्मंत्रं न ज
पेत्तु ऋणाधिकं शून्ये मृत्युं विजानीयात्तस्मात्तच्छून्यं परित्यजेत्। रुद्रयामले। साध्यांकान् साधकांकश्च पृथग्हृत्संख्या ऽभिस्त
हृत्वा ऽकानयच्छेषयोर्जयेत्स्फुटं तदंकं कथयाम्यधुना एकादशागृहेऽस्थि तत्तथा इ[illegible]ऽर्कौ त्रयविपंचवेदशान्नवेदवंशाएधाष्टने भिर्गु
णितां ऋसाध्यानां दिग्भूतिरिश्कृतिगजाग्निमुनीषुवेदषड्कूपोथ गुणितान नषु साधकार्णान्। वामा च हरत्वा द्विवचनं। विज्ञवि
षयं रामार्द्धं नं चेद्विकाधृतं त्वादिति। केचित्तु रुद्रैः तस्यैव विवरणं तथानामाद्यं कोष्ठाकमथाभिहत्यात्। एकादिरुद्रांकगतं के
हेणअन्यत्र तथा नामाद्यक्षरमारभ्य यावन्मंत्रादि संभवेत्। त्रिधा कृत्वा स्वरे भिन्नं तत्तदन्यद्विपरीतकं। अस्यार्थः। साधकनामाद्यक्षरा

नं ४

तं॰सा॰ ६

तो गणनया मंत्राद्यक्षरांतं यावत्संख्या भवति तदंकं त्रिगुणितं सप्तभिर्हरेत्तात् तदन्यदिति मंत्राद्यक्षरमारभ्य साधकाक्षरमारभ्य साधकाक्ष
रपर्यंतं यज्जवति तत्सप्तगुणं त्रिभिर्हरेत् । अधिकं ऋणं न्यूनं चेद्धनं । तथा साध्यनाम द्विगुणितं साधकेन समन्वितं । अष्टभिश्च हरेच्छेषं
तदन्यद्विपरीतकं । अस्यार्थः । साध्यनामवर्णान् स्वरव्यंजनभेदेन द्विगुणीकृत्य साधकनामवर्णयुक्तान् कृत्वा अष्टभिर्हरेत् ॥ इति
साध्यनिर्णयः ॥ तदन्यदिति साधकनामवर्णान् स्वरव्यंजनभेदेन द्विगुणीकृत्य साध्यनामवर्णयुतं कृत्वा अष्टभिर्हरेत् ॥ इति कुमा
रसंहितायां । पितृमातृकृतं नामत्यक्त्वा शर्मादिवर्णकान् । स्त्रीवर्णं च ततो विद्वान् पुत्रेषु योजयेत् क्रमात् । अथ दीक्षाकालः ॥ मं
त्रारंभस्तु चैत्रे स्यात् समस्तपुरुषार्थदः । वैशाखे रत्नलाभः स्यात् ज्येष्ठे तु मरणं भवेत् । आषाढे बंधुनाशः स्यात् पूर्णायुः श्राव
णे भवेत् । प्रजानाशो भवेद्भाद्रे आश्विने रत्नसंचयः । कार्तिके मंत्रसिद्धिः स्यात् मार्गशीर्षे तथा भवेत् । पौषे तु शत्रुपीडा स्यात् न्मा
घे मेधाविवर्द्धनं । फाल्गुने सर्वकामाः स्युर्मलमासं विवर्जयेत् । चैत्रे तु गोपालविषयं गोतमप्युक्तवान् । मधुमासे भवेद्दीक्षा
डः स्वायेति वचनात् । नान्यत्र । इति वचनाच्चान्यत्राषाढनिषेधोपि श्रीविद्यातिरिक्ते । यथा यामिनीहृदये । ज्येष्ठमस्तु प्रसा राम ६
चैव आषाढे धनसंपदः । अथ वारनियमः ॥ रविवारे भवेद्वित्तं सोमे शांतिर्भवेत्किल । आयुरंगारके हंति तत्र दीक्षां विवर्जयेत्

6

तुषे सौंदर्य्यमाप्नोति ज्ञानं स्यात्तु वृहस्पतौ। शुक्रे सौभाग्यमाप्नोति यशोहानिः शनैश्चरे त्तु गडतंत्रे। गुरुवारे सुखं विंद्यात् शाके चार्कं प्रशं
स्यते॥ शैवे तु गुरुवारः स्यात् सौरे चार्कः प्रशस्यते। बुधे तु सफलादीक्षा मरणं शनिभौमके॥ ॥अथ तिथिनियमः॥ ॥आगमकल्पद्रुमे॥
प्रतिपत्तिर्द्वितीयायां तृतीयायां शुचिर्भवेत्। चतुर्थ्यां वित्तनाशः स्यात् पंचम्यां बुद्धिवर्द्धनं। षष्ठ्यां ज्ञानक्षयः सौख्यं लभते सप्तमीदिने।
अष्टम्यां बुद्धिनाशः स्यान्नवम्यां वपुषः क्षयः। दशम्यां राजसौभाग्यं एकादश्यां शुचिर्भवेत्। द्वादश्यां सर्वसिद्धिः स्यात् त्रयोदश्यां दरिद्रता। ति
र्थ्यां योनिश्चतुर्दश्यां हानिर्म्मीसमावान। के। पक्षांते धर्मवृद्धिः स्याद् अमावास्यां विवर्जयेत्। संध्यागर्जितनिर्घोषभूकंपोल्कानिपातने।
एतानन्यांश्च दिवसान् श्रुत्वान्यदिवृर्जयेत्। द्वितीया पंचमी चैव षष्ठी चापि विशेषतः। द्वादश्यामपि कर्त्तव्यं त्रयोदश्यामथापि वा॥ इ
ति त्रयोदशीविधानं विष्णुविषयं प्राधान्येन चाद्रुकाद्य तत्वात्। त्रयोदशी च दशमी प्रशस्ता सर्वकामदा॥ इति सनत्कुमारवचनात्॥ अथ
नक्षत्रनिर्णयः॥ अश्विन्यां सुखमाप्नोति भरण्यां मरणं ध्रुवं। कृत्तिकायां भवेद्दुःखी रोहिण्यां वाक्पतिर्भवेत्। मृगशीर्षे सुखावाप्तिरार्द्रा
यां वै धुनाशनं। पुनर्वसौ धनाढ्यः स्यात् पुष्ये शत्रुविनाशनं। अश्लेषायां भवेन्मृत्युः मघायां दुःखमोचनं। सौंदर्यं पूर्वफल्गुन्यां प्राप्नो
ति वनसंश्रयः। ज्ञानं चोत्तराफल्गुन्यां हस्तायां च धनी भवेत्। चित्रायां ज्ञानसिद्धिः स्यात् स्वात्यां शत्रुविनाशनं। विशाखायां सुखं वाप्त उरा

तं.स्रा. ७ भार्यां वंधुवर्द्धनं। ज्येष्ठायां सुतहानिः स्यान्मूलायां कीर्त्तिवर्द्धनं। पूर्वाषाढोत्तराषाढे भवेतां कान्तिदायिके श्रवणायां भवेद्दुःखी धनिष्ठायां दरिद्रता। द
क्षिः शतभिषायां स्यात् पूर्वभाद्रे सुखी भवेत्। सौख्यं चोत्तरभाद्रे च देवत्यां कीर्त्तिवर्द्धनं। अश्विनी भरणी स्वाती विशाखा हस्तभेषु च। ज्येष्ठोत्तरत्र
येष्वेवं कुर्य्याद् दीक्षाप्रवर्त्तनं कृष्णगस्य संहितायां राम विषयं॥ अथ योगनिर्णयो योगनिर्णयो विश्वसारे। शुभः सिद्धश्च युष्मा तद्ध्रुवयोग
स्ततः परं प्रीतिः सौभाग्ययोगश्च वृद्धियोगस्ततः परं हर्षणश्च तथा योगाः सर्वे चेंद्रशुभावहाः। बवबालवकौलवतैतिलगरवणिजस्तद
नंतरं। करणानि शुभान्येव सर्वतन्त्रेषु भाविनि॥ ॥अथ लग्ननिर्णयः॥ ॥वृषसिंहे च कन्यायां धनुर्मीनाख्यलग्नके। चंद्रताराद्यनुकूले
च कुर्य्याद् दीक्षाप्रवर्त्तनं। स्थिरलग्ने विष्णुमंत्रे शिवमंत्रे च वरं शुभं। द्विःस्वभावगं तं लग्ने शाक्तिमंत्रेषु शस्यते शुक्लपक्षे शुभा दीक्षा कृष्णेप्या
पंचमादिनात्। निषिद्धमासे तु तद्विशेषो दिनभेदतः॥ आगमकल्पद्रुमे॥ षष्ठी भाद्रपदे दृष्टा तथा कृष्णा चतुर्दशी। कार्त्तिके नवमी शुक्ला
मार्गे शुक्ला तृतीयिका। पौषे च नवमी शुक्ला माघे शुक्ला चतुर्थिका। फाल्गुणे नवमी शुक्ला चैत्रे कामचतुर्दशी। त्रयोदशी तिवापा
वः। वैशाखे वाक्षया चैव ज्येष्ठे दशहरा तिथिः। आषाढे पंचमी शुक्ला श्रावणे कृष्णपंचमी। एतानि देवपर्वाणि तीर्थकोटिफलं लभ
भेत्। अन्यच्च स्मृतं। चैत्रे त्रयोदशी शुक्ला वैशाखे कामी सिता॥ ज्येष्ठे चतुर्दशी कृष्णा आषाढे माघपंचमी। श्रावणे कादशा भाद्रे ७

हिणीसंयुतांष्टमी। आश्विने च महापुण्या महाष्टम्यभीष्टदा। कार्त्तिके नवमी शुक्ला सिता षष्ठी चतुर्द्दशी पौषे माघेप्येकादशी सि
ता। फाल्गुणे च सिता षष्ठी चेति कालविनिर्णयः॥ योगिनीतन्त्रे॥ अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः। रविसंक्रांति दिवसे युगा
द्यायां सुरेश्वरि। मन्वंतरासु सर्वासु महापूजादिने तथा। चतुर्थी पंचमी चैव चतुर्द्दश्यष्टमी तथा। तिथयः शुभदाः प्रोक्ता द्वाद
दिवचना च चतुर्द्दश्यष्टमी तिथिः क्षितिविषये पंचतुर्थी तारोशाविषयं तत्स्कल्पो कैत्वा तु। निषिद्धेष्वपि कालेषु दीक्षां तु ग्रहणे शुभा।
सूर्यग्रहणकालस्य समानो नास्ति भूतले। तत्र यत्क्रियते सर्वमनंतफलदं भवेत्। रविसंक्रमणे चैव सूर्यस्य ग्रहणे तथा। तैलस्ना
दिकं किंचिन्न विचार्य्य कथंचन। रविसंक्रमणे चैव नान्यदन्वेषितं भवेत्। न वारं न तिथिं मासादि शोधनं सूर्यपर्वणि। एवं चंद्र
ग्रहणेपि तथा। अमावास्या सोमवारे भौमवारे चतुर्द्दशी। सप्तमी रविवारे च सूर्यपर्वशतैः समा। यामले। न कुर्यात्तत्र शांतिकी दी
क्षामुपरक्तेपि भावसौ। न कुर्याद्वैष्णवी दीक्षां यदि चंद्रमसो ग्रहः। पुण्यतीर्थे कुरुक्षेत्रे देवीपीठचतुष्टये। प्रयागे श्रीगिरौ का
श्यां कालाकालं न शोधयेत्। विष्णुयामले। देवीबोधं समारभ्य यावत्स्यान्नवमी तिथिः। कृतास्तासु बुधैर्दीक्षाः सर्वाभीष्टफल
प्रदा॥ तथा बोधने चैव दुर्गायाः कालाकालं न शोधयेत्। अशोकाख्याष्टमी यत्र रामाख्या नवमी तथा। लग्नेवाप्यथवा लग्नेप्यत्र

नं·मा·
८
तत्रतियावपि। गुरोराज्ञानुरूपेणदीक्षाकार्य्याविशेषतः॥ समयातंत्रे॥ युगाद्यायांजन्मदिनेविवाहदिवसेतथा॥ विषुवेऽयनयोर्द्वंवि
नैवकिंचिद्विचारयेत्। शिष्यमाहूयगुरुणाकृपयादीयतेयदा तदालग्नादिकंकिंचिन्नविचार्यंकथंचन। तथा। सर्वेवाराग्रहाःसर्वेन
१ क्षत्राणिचराशयः। यस्मिन्नहनिसंतुष्टोगुरुःसर्वेशुभावहाः। योगिनीतंत्रे॥ ग्रहणेचमहातीर्थेनास्तिकाल[illegible]निर्णयः॥ तथा। तथा
यांभास्करकेतौचविरजेचंद्रपर्वके। चंद्रकुलेचमत्तंगेचतथाकन्याश्रमेषुच। मगधेत्रीयान्नतोदीक्षांतीर्थेष्वेतेषुपार्वति॥ वाराहीतंत्रे॥
शुक्लास्तोपदिवावृद्धोगुर्वादित्योभवेद्यदि। मिषवृश्चिककसिंहेषुतत्रदोषोनविद्यते॥ महाविद्यासुचनकालनिर्णयः॥ तथामुंड
मालायां॥ कालीतारामहाविद्याषोडशीभुवनेश्वरी। भैरवीछिन्नमस्ताचविद्याधूमावतीतथा॥ वगलामुखीसिद्धविद्यामातं
गीकमलात्मिका। एतादशमहाविद्याःसिद्धविद्याःप्रकीर्त्तिताः। नात्रसिद्धाद्यपेक्षास्तिनक्षत्रादिविचारणं। कालादिशोध
श्रि· नंनास्तिनचामित्रादिदूषणं॥ ॥अथमालानिर्णयः॥ ॥सनत्कुमारसंहितायां। तर्जनीमध्यमाऽनामीकनिष्ठाचेतिताःक्रमा
त्। तिस्रोऽगुल्यःपर्वाणिमध्यमाचैकपर्विका। पर्वद्वयंमध्यमायामेरुत्वेनोपकल्पयेत्। अनामामध्यमारभ्यकनिष्ठादितएव राम
च॥ तर्जनीमूलपर्यंतंदशपर्वसुसंजपेत्। तथासनत्कुमारसंहितायां। अनामामूलमारभ्यकनिष्ठादितएवच। तर्जनीमध्य ८

पर्य्यंतमष्टपर्वसु संजपेत्। एतद्वचनद्वयंतु अष्टोत्तरशतविषयं। शक्तिविषये पुनः अनामिकात्रयंपर्वकनिष्ठादित्रिपर्विका। मध्यमायाश्च
त्रितयं तर्ज्जनीमूलपर्वणि। तर्ज्जन्यग्रे तथा मध्ये यो जपेत्स तु पापकृत्॥ ॥इति श्रीक्रमवृचनात्॥ ॥हंसपारमेश्वरे। पर्वत्रयं मनामायां प
रिवर्तेन वै क्रमात् पर्वत्रयं मध्यमायास्तर्जन्येकं समाहरेत्। शक्तिमाला समाख्याता सर्वमंत्रप्रदीपिका। तथा अनामामूलमारभ्य प्रादक्षिण्य
क्रमेण वामध्यमामूलपर्य्यंतं जपेदष्टसु पर्वसु। इदमपि तथैव तंत्रांतरे। अनामामूलमारभ्य प्रादक्षिण्यक्रमेण तु। तर्जनीमूलपर्यंतं
जपेन्नवसु पर्वसु। मध्यमांगुलितयं ग्राह्यमनामामूलमेव च। अनामामध्यमापर्वमेकत्वानलंघयेत्। तर्जन्यग्रे तथा मध्ये यो जपेत्तत्र रुं ८
मानवः। चत्वारि तस्य नश्यंति आयुर्विद्या यशो बलं। इत्यपि शाक्तो अष्टोत्तरशते। अन्यत्रापि अंगुल्यग्रेषु यज्जप्तं यज्जप्तं मेरुलंघ
ने। पर्वसंधिषु यज्जप्तं तत्सर्वं निष्फलं भवेत्। सनत्कुमारसंहितायां। अंगुलीस्तन विश्लेषीन किंचिदाकुंचिते तले। अंगुलीनां वियो
गे च छिद्रेषु स्रवते जपः। पणानाविधिमुल्लंघ्य यो जपेन्न जपं यतः। गृह्णंति राक्षसास्तेन [illegible] गलयेत्सर्वथा बुधः॥ तंत्रे हृद
ये हस्तमारोप्य तिर्य्यक्कृत्वात्वंगुलीः। आच्छाद्य वाससा हस्तौ दक्षिणेन सदा जपेत्॥ यामले। अनामामध्यमायाश्च मूलाग्रंच द्व
यं द्वयं। कनिष्ठायाश्च तर्ज्जन्याश्चयंपर्व महेश्वरि। अनामामध्यमायाश्च मेरुः स्यादिति यं शुभं प्रदक्षिणक्रमाद्देवि जपेत्त्रिपुरसुंदरी॥

तं·मा·
९

क्रमोत्क्रमगतैर्माला मातृकार्णैः क्रमेरकैः ॥ सबिंदुकैः ॥ साष्टवर्गैरंतर्यजनकर्मणि ॥ अत्रादिकुचुटतपयशरोष्टोपकीर्त्तिताः ॥ तद्यथा प्रथ
मं अकारादीन् लकारांतान् सबिंदुकान् पुनर् लकारादीन् विलोमतः ॥ सबिंदुकान् प्रत्येकमुच्चार्य मंत्रं जपेत्ततः ॥ अकारादीनां वर्णानां कवर्गा
दीनां पेयांतिमवर्णासानुस्वारं कृत्वा पूर्वमुच्चार्य मंत्रं जपः कार्यः ॥ अनेन प्रकारेणाष्टोत्तरशतार्यंजनेसु पलकृतं ॥ सबिंदुवर्णांतःसंख्यजपो
भवति ॥ अन्यत्र ॥ सबिंदुवर्णमुच्चार्य पश्चान्मंत्रं जपेद्बुधः ॥ अकारादिक्षकारांतं बिंदुयुक्तं विभाव्य च ॥ वर्णमाला समाख्याता अनुलो
मिका ॥ इति नारदवचनात् ॥ ॥ अथ मालायां मणिनियमः ॥ ॥ पद्मजीवादिभिर्माला बहिर्यागे प्रकीर्त्तिताः ॥ रुद्राक्षशंखपद्माक्ष
पुत्रजीवकमौक्तिकैः ॥ स्फाटिकैर्मणिवज्रैश्च सौवर्णैर्विद्रुमैस्तथा ॥ राजतैः कुशमूलैर्वा गृहस्थस्याक्षमालिका ॥ अंगुलीगणनादे
कं पर्वणाष्टगुणं भवेत् ॥ पुत्रजीवैर्दशगुणं शतं शंखैः सहस्रकं ॥ प्रवालैर्मणिरत्नैश्च दशसाहस्रिकं स्मृतं ॥ तदेव स्फाटिकैः प्रोक्तं मौक्ति
कैर्लक्षमुच्यते ॥ पद्माक्षैर्दशलक्षं स्यात् सौवर्णैः कोटिरुच्यते ॥ कुशग्रंथ्या कोटिशतं रुद्राक्षैः स्यादनंतकं ॥ सर्वैर्विरचिता माला नृणां मु
क्तिफलप्रदा ॥ भैरवीविद्यायां तु ॥ वाराहीतंत्रे ॥ सुवर्णमणिभिर्मालां स्फुटिकीं शंखनिर्मितां ॥ प्रवालैरेव वा कुर्यात् पुत्रजीवं विवर्ज राम
येत् ॥ पद्माक्षं चैव रुद्राक्षं पिंडाक्षं च विशेषतः ॥ त्रिपुरामंत्रजपादौ तु रक्तचंदनबीजादिभिरिति प्रशस्ता तथा तंत्रराजे रक्तचंदनमा ९

लानुभोगदशमोक्षसमवेता॥ तथा गोतमीये। रुद्राक्षैरपि पद्माक्षैः पुत्रजीवकचंदनैः। स्फाटिकैश्च प्रवालैश्च कुशग्रंथितरैस्तथा। तथामलक
संभूतैस्तुलसीकाष्ठनिर्मितैः। एभिश्च मालिकां कुर्यात्प्रतिमान्नूलवेममो। तथा वैष्णवे तुलसीमाला गजदंतैर्गणेश्वरे। त्रिपुरया जपे श
स्ता रुद्राक्षैः रक्तचंदनैः। महीशंखवास्तंत्रांतरे ललाटास्थिखंडरचिता जपमालिका महाशंखमयी ज्ञाया तरा प्रजपेत्सदा। कंठनेत्रांतरस्थास्थि
महाशंखा प्रकीर्तिता। कामनाभेदेनु पद्माक्षैर्विहिता माला शत्रूणां नाशिनी मता। कुशग्रंथिमयी माला सर्वपापप्रनाशनी। पुत्रजीवफलैः
रु= कृप्ता कुरुते पुत्रसंपदं। निर्मिता रूप्यमाला त्वभिजेपमलिप्सितप्रदा॥ प्रवालैर्विहिता माला प्रयच्छेत्पुष्कलं धनं। मालानियमस्तु मुंडमाला
यां। अन्योन्यसमरूपाणि नातिस्थूलकृशानि वै। कीटादिभिरदुष्टानि नजीर्णानि नवानि वै। गोतमीये पंचाशन्मणिभिर्माला विहिता सर्व
कर्मसु। अकारादिक्षकारांता अक्षमाला प्रकीर्तिता॥ क्षार्णमेकं सुमेरुत्वे तत्र कल्पयेन्मुनिसत्तम॥ अनया सर्वमंत्राणां जपः सर्वसमृद्धिदः।
चामुंडातंत्रे॥ नित्यं जपं करे कुर्यान्न तु काम्यमतोधनात्। काम्यमपि करे कुर्यान्मालाभावे पि सुंदरि। तेन मालायाः प्राधान्यं। कामनाभेदेन तु गो
तमीये। समासेनाक्षसूत्रस्य विधानमिह कथ्यते। पंचविंशतिभिर्मोक्षं त्रिंशद्भिर्धनसिद्धये। सर्वार्थीः सप्तविंशत्या पंचदशभ्याभिचारिके। पं
चाशद्भिः काम्यश्च काम्यसिद्धिः स्यात्तथा चतुरुत्तरैः। अष्टोत्तरशतैः सर्वसिद्धिस्तु कामनीषिभिः॥ ॥अथासनभेदाः॥ ॥काष्ठार्थंकंबलं

तं॰सा॰ १० चैवश्रेष्ठं वरक्तकंबलं । कृष्णाजिने ज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्म्मणि । कुशासने मंत्रसिद्धिर्नात्र कार्य्या विचारणा । धरण्यां दुःखसंभूतिर्दौर्भाग्यं
दारुजासने । वंशासने दरिद्रः स्यात्पाषाणे व्याधिपीडनं । तृणासने यशोहानिः पल्लवे चित्तविभ्रमः । जपध्यानतपोहानिं निर्वस्त्रासनं करोति हि । अ
त्रवस्त्रासनं केवलमेव निषिद्धं । वस्त्रासनं रोगहरमित्यादिवचनेन विशिष्टफलजनकत्वाभिधानात् चैलाजिनकुशोत्तरमिति भगवद्वच
नाच्च । तथा गौतमीये तथा धृत्वासने मंत्री पटाजिनकुशोत्तरे इति भगवद्वचनात् ॥ ॥ अथ मालासंस्कारः ॥ ॥ तथा नित्यतामाह यामले ॥ ॥
अप्रतिष्ठिताभिर्मालाभिर्म्मंत्रं जपति यो नरः । तत्सर्वं निष्फलं विद्यात्क्रुद्धा भवति देवता । सनत्कुमारे । कार्पाससंभवं सूत्रं धर्म्मका
मार्थमोक्षदं । तत्र विप्रेंद्रकन्याभिर्निर्म्मितं च शुभशोभनं । यथा शुक्लं तथा रक्तं पट्टसूत्रमथापि वा । शांतिवश्याभिचारेषु मोक्षै
श्वर्य्यजयेषु च । शुक्लं रक्तं तथा पीतं कृष्णं वर्णेषु च क्रमात् । सर्वेषामेव वर्णानां रक्तं सर्वेप्सितप्रदं । त्रिगुणं द्वित्रिगुणं द्वित्रिगुणी
कृत्य ग्रंथयेच्छिल्पशास्त्रतः । एकैकं मातृकावर्णं सतारं प्रजपन्सुधीः । मणिमालायसूत्रेण ग्रंथयेन्मध्यमध्यतः । ब्रह्मग्रंथिं विधा
येत्थं मेरुं च ग्रंथिसंयुतां । ग्रंथयित्वा पुरो मालां ततः संस्कारमाचरेत् । गौतमीये । यामले च । मुखं तु संयोज्य पुच्छे पुच्छं तु योजयेत् । गो राम १०
पुच्छसदृशी माली यद्वा सर्प्पाकृतिः शुभा । एवं निर्म्माय मालां वै शोधयेत्परमेश्वरि । अश्वत्थपत्रैर्नवकैः पद्माकारं तु कल्पयेत् ।

भृवे॰

सद्योजातेन ८

तन्मध्ये स्थापयेन्मालां मातृकां मूलमुच्चरन्। कालयेत्यं चमध्ये नैसज्ञलैः। सद्योजातमंत्रस्य। ॐ सद्योजातं प्रपद्यामि सद्योमि सद्योजा
तायवैनमः। भवेभवेनादिभवे भजस्वमां भवोद्भवाय नमः। चंदनागुरुगंधाद्यैर्वामदेवमंत्रस्य। ॐ वामदेवाय नमो ज्येष्ठाय नमो रुद्राय नमः काला
यनमः। कलविकरणाय नमो बलविकरणाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः॥ धूपयेत्तामघोरेणमंत्रस्य। ॐ अ
घोरेभ्योथघोरेभ्यो घोरघोरतरेभ्यः सर्वतः सर्वसर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥ लेपयेत्तत्पुरुषेण तु मंत्रस्य। ॐ तत्पुरुषाय विद्महे महादेवाय धीम
हि तन्नो रुद्रः प्रचोदयात्। मंत्रयेत्यं चमिनैव प्रत्येकं तु शतं शतं मिलित्वं मंत्रयेच्चैव मन्तुनाच शतं शतं॥ पंचमं मंत्रस्य। ॐ ईशानः सर्वविद्यानामी
श्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिः शिवो मे अस्तु सदाशिव। पंचेत्येकं तु सकृत्सकृदितिक्रिया। तत्रैव प्रत्येकं मंत्रयेन्मंत्री पंचमेन
संकृत सकृत। तथा गोतमीये। समुदायमालामधिकृत्य पंचमिनैव सूक्तेन शतान्यूनं मंत्रयेदिति दर्शनात्। मालायां वा शतजपः। तत्रा
वाह्य यजेदेवं यथाविभवविस्तरैः। मालायाः प्राणप्रतिष्ठानंतरं देवतां पूजयेत्। तथा च सनत्कुमारसंहितायां संस्कृत्यैवं बुधो मालां
तस्याणं संस्थापयेत्। मूलमंत्रेण तां मालां पूजयेद्विजसत्तमं। वाराहीतंत्रे। ॐ मालेमाले महामाले सर्वतत्वस्वरूपिणि चतुर्वर्ग
स्त्वयिन्यस्तास्तस्मान्मे सिद्धिदा भव। मायाबीजादिकं कृत्वा रक्तपुष्पैः समर्चयेत्। शक्तिविषये दूतिमंत्रेण च। वारमवं च तथाल

क्ष्मीदिमालिकां ततः ऐं॰ तां हृदयवर्णितां मंत्रेण नेन पूजयेरिति। मंत्रये मंत्रयेमयोगतेः॥ तथैव मातृकावर्णैः मंत्रयेत्तां तु तत्त्ववित्। योगि-
नीहृदये। होमकर्म ततः कुर्याद्देवताभावसिद्धये। अष्टोत्तरशतं हुत्वा संपाताज्ज्ञक्षविनिक्षिपेत्। होमकर्मण्यशक्तश्चेद्द्विगुणं जपमा-
चरेत्। नान्यमंत्रं जपेन्मंत्री कंपयेन्न विधूनयेत्। कंपनात् सिद्धिहानिः स्याद्धूननं बहुदुःखदं। शब्दे जाते भवेद्रोगः करभ्रष्टा विना-
शकृत्। छिन्ने सूत्रे भवेन्मृत्युः तस्माद्यत्नपरो भवेत्। त्वं माले सर्वदेवानां सर्वसिद्धिप्रदा मता। तेन सत्येन मे सिद्धिं देहि मातर्नमो-
स्तु ते। इत्युक्त्वा परिपूज्याथ गोपयेद्यत्नतो यदि। स्वकं दमाहिश्वरे। द्वादश्यां वैष्णवी माला कर्त्तव्या सोपवासकैः॥ शाक्ती नाम पिकर्त्त-
व्या रात्रौ भुक्त्वा तथा विधिः। अष्टम्यां च नवम्यां च चतुर्दश्यां तथैव च। त्रयोदश्यां तथा कुर्यात् शिवस्यापि सुरेश्वरि॥ कामनाभेदे तु
अंगुलिनियमः॥ तथा च गौतमीये तर्जन्यंगुष्ठयोगेन शत्रूच्चाटनमारकं। अंगुष्ठमध्यमायोगान्मंत्रसिद्धिः सिद्धिः सुनिश्चिता।
अंगुष्ठानामिकायोगाद्वश्याद्यौ ह्लादने मता। ज्येष्ठाकनिष्ठायोगेन शत्रूणां नाशनं मतं। जीर्णे हि सूत्रे पुनः सूत्रं ग्रथयित्वा शतं ज-
पेत्। प्रमादात्पतिते हस्तात् शतमष्टोत्तरं जपेत्। जपे त्रिविधिसिद्धं संस्पर्शे क्षालयित्वा यथाविधि। तो छिन्ने प्यष्टोत्तरशतं जपः कर-
भ्रष्टच्छिन्नयोः स्फुल्यफलत्वात्॥ ॥अथ पुरश्चरणं॥ ॥योगिनीहृदये॥ ॥गुरोरात्तां समादाय प्रभातः करणोत्करः॥ ततः पुर-

स्त्रियं कुर्य्यान्मंत्रसंसिद्धिकाम्यया। जीवहीनो यथा देही सर्वकर्मसु न क्षमः। पुनश्चरणहीनोपि तथा मंत्रः प्रकीर्त्तितः। तस्मादादौ
स्वयं कुर्य्याद्गुरुं वा कारयेद्बुधः। गुरोरभावे विप्रं वा सर्वप्राणिहितं।। क्षिरंशं शास्त्रविदं मित्रं नानागुणसमन्वितं स्त्रियं वा सद्गुणोपे
तां सपुत्रां विनियोजयेत्। गोतमीये। चैत्रे मासेथवा कुर्य्यात्तच्छुभर्क्षे गुरोस्तथा सनातन। द्वादश्यां शुक्लपक्षे च माधवे मासि तत्तिथौ।
आरभेद्रमात्मानां वै पुरश्चर्य्यां सुसिद्धये। वैसंपायनसंहितायां। चंद्रतारानुकूले च शुक्लपक्षे शुभेहनि। आरभेन्मकरादौ
च सुप्तेविष्णोऽह्नि च। आदौ च सुप्तेविष्णोऽह्नि च। आदौ पुरस्क्रियां कर्त्तुं स्थाननिर्णय उच्यते। कुलार्णवे। पुण्यक्षेत्रं नदीतीरं गुहा
पर्वतमस्तकं। तीर्थप्रदेशाः सिंधूनां संगमः पावनं वनं। उद्यानानि विविक्तानि विल्वमूलं तटं गिरेः। तुलसीकाननं गोष्ठं वृषशून्यं
शिवालयं। अश्वत्थामलकामूलं गोशाला जलमध्यतः। देवतायतनं कूलं समुद्रस्य निजं गृहं। तथा गृहे शतगुणं विद्यात्क्षे
त्रे लक्षगुणं भवेत्। कोटिर्देवालये पुण्यमनंतं शिवसन्निधौ। म्लेच्छदुष्टमृगव्यालशंकातंकविवर्जिते। एकांते पावने निं
दारहिते भक्तिसंयुते। स्वदेशे धार्मिके देशे सुभिक्षे निरुपद्रवे। रम्ये भक्तजनस्थाने निवसेत्तापसाश्रये। गुरूणां सन्निधाने
च चित्तैकाग्र्यस्थले तथा। एषामन्यतमं स्थानमाश्रित्य जपमारभेत्। यत्र ग्रामे भवेन्मंत्री तत्र कूर्मं विचिंतयेत्। गोतमीये।

तं·सा·
१२

पर्वते सिंधुतीरे वा पुण्यारण्ये नदीतटे। यदि कुर्यात् पुरश्चर्यां तत्र कूर्मं न चिये त्। ग्रामे वा यदि वा स्वीये गृहे नं च विचिंतयेत्॥ ॥अ
थ पुरश्चरणे भक्ष्यादिनियमः॥ ॥अगस्त्यसंहितायां। दधि क्षीरं घृतं गव्यमैक्षवं गुडवर्जितं। तिलाश्चैव सिता मुद्गाः कंदं केमुकवर्जि
ताः। नारिकेलफलं चैव कादलीलवली तथा। आम्रमामलकं चैव पनसं च हरीतकी। व्रतांतरे प्रशस्तं च हविष्यं मन्यते बुधैः। व्रतां
तरद्वितिहैमंतिकं सितास्थिरन्नमित्यादि। भुंजानो वा हविष्यान्नं शाकं यावकमेव वा। पयोमूलफलं वापि यत्र यत्रोपलभ्यते। उ
त्तुयोमिनीतंत्रे॥ चिंचा चनालिकाशाकं कलायं निकुचं तथा। कर्दवं नारिकेलं च व्रते कुष्मांडकं त्यजेत्॥ ॥इति व्रतांतरविध
यं॥ ॥अथ वर्ज्यानि॥ ॥विवर्जयेन्मधु क्षारं लवणं तैलमेव च। तांबूलं कांस्यपात्रे च दिवाभोजनमेव च॥ क्षारं च लवणं मांसं
गृंजनं कांस्यभोजनं। माषाटकीमसूरांश्च कोद्रवांश्चणकानपि। कौटिल्यं क्षौरमभ्यंगमनिवेदितभोजनं। असंकल्पितकृत्यं च
वर्जयेन्मर्दनादिकं। स्नापास्वपं चगात्रेन केवलामलकेन वा। अंत्यजप्रान्नपानीये स्नानाचमनभोजनं। कुर्यात्त यथोक्तविधि
नाचिसंध्यं देवतार्चनं। अपवित्रकरो नग्नः शिरसि प्रावृतोपि वा। प्रलपन्प्रजपेद्यावत्तावन्निष्फलमुच्यते। कुलार्णवेपि। राम
यस्यान्नपानैः पुष्टांगः कुरुते धर्मसंचयं। अन्नदातुः फलस्यार्द्धं कर्तुश्चार्द्धं न संशयः। तस्मात्सर्वप्रयत्नेन परान्नं वर्जयेत्सुधीः। १२

पुरश्चरणकालेतुसर्वकर्म्मसुशुभंभवि। जिह्वा हाभापराद्धेनकरौदाक्षौइतियहात्। मनोदग्धंपरस्त्रीभिः कथंसिद्धिर्वरानने। परान्नंभिक्षान्नं
न्नेनतत्त्वविषयं। भिक्षान्नंयांतस्यसत्वोस्यादात्। तथाचवैदिकाचारयुक्तानांशुचीनांश्रीमतांसतां। सत्कुलस्थानजातानांभिक्षाग्राह्याचायजन्म
नां। सकृदुच्चरितेशाद्देषएवंसमुदीरयेत्। प्रोक्तेपरापरेशादेषाणायामंसकृच्चरेत्। वदुषुलीपीत्वाचम्यन्यस्तांगानिततोजपेत्। कृतेष्येवं
तथास्पृश्यस्थानानांस्पर्शनेपिच। एवमादींश्चनियमान्पुरश्चरणकृच्चरेत्। विन्मूत्रोत्सर्गसंस्कादियुक्तःकर्म्मकरोतियः। जपार्च्चना
दिकंसर्व्वमपवित्रंभवेत्प्रिये। मलिनांवरकेशादिमुखदौर्गंध्यसंयुतः। योजपेत्तंदहत्याशुदेवतागुप्तसंस्थिता। आलस्यंजृंभणंनि
द्रांक्षुतंनिष्ठीवनंभयं। नीचांगस्पर्शनंकोपंजपकालेविवर्जयेत्। एवमुक्तविधानेनविलंबंत्वरितंविना। उक्तसंख्यंजपंकुर्यात्पुरश्चर
णसिद्धयेदेवतागुरुमंत्राणामैक्यंसंभावयन्धिया। जपेदेकमनाःप्रातःकालंमध्यंदिनावधि। यत्संख्ययासमारब्धंतत्कर्तव्यमहर्दि
शं। यदिन्यूनाधिकंकुर्याद्व्रतभ्रष्टोभवेन्नरः॥ कुलार्णवेपि॥ न्यूनातिरिक्तकर्म्माणिनफलंतिकदाचन। यथाविधिकृतान्येवसत्क
र्म्माणिफलंतिहि। भूशय्याब्रह्मचारित्वंमौनंचाचार्यसेविता। नित्यपूजानित्यदानंदेवतास्तुतिकीर्तनं। नैमित्तिकार्च्चनंचैवविश्वासो
गुरुदेवयोः जपनिष्ठादशैतेधर्म्माःसुमंत्रसिद्धिदाः॥ स्त्रीशूद्रपतितव्रात्यनास्तिकोच्छिष्टभाषणं। असत्यभाषणंजिह्मभाषणंपरि

तं॰सा॰
१३

13

वर्जयेत्॥ सत्येनापि न भाषेत जपहोमार्चनादिषु। अन्यथानुष्ठितं सर्वं भवत्येव निरर्थकं॥ योगिनीहृदये। शयीत कुशशय्यायां शुचिव
स्त्रधरः सदा। प्रत्यहं क्षालयेच्छय्यामेकाकी निर्भयः स्वपेत्॥ असत्यभाषणं वाचं कुटिलां परिवर्जयेत्॥ सत्येनापि न भाषेत पहोमा
र्चनादिषु। वर्जयेद्गीतवाद्यादिश्रवणं नृत्यदर्शनं। अभ्यंगं गंधलेपं च पुष्पधारणमेव च॥ त्यजेदुष्णोदकस्नानं अन्यदेवप्रपूजनं।
तत्रैव नैकवासा जपेन्नार्द्रवद्वासा कुल्लोपि वा। पतितानामंत्यजानां च दर्शने भाषणेऽक्षुते। कुते। धोवायुगमने जृंभने जपमु
त्सृजेत्॥ तथा तस्य च तत्स्त्रीकौ प्राणायामं षडंगकं। कृत्वा सम्यक्जपेच्छेषं यद्वा सूर्यादिदर्शनं। आदित्याद्यां वह्निं ब्राह्मणं च॥ तं चा
तरे। मनःसंहरणं शौचं मौनं मंत्रार्थचिंतनं। अव्यग्रत्वमनिर्वेदो जपसंपत्तिहेतवः। उष्णीषी कंचुकी नग्नो मुक्तकेशो गलावृतः।
अपवित्रकरोऽशुद्धः प्रलपन्न जपेत्क्वचित्। अनासनः शयानो वा गच्छन्भुंजान एव वा। रथ्यायामशिवस्थाने न जपेत्तिमिरांतरे।
उपानद्गूढपादो वा यानशय्यागतस्तथा। प्रसार्य न जपेत्पादौ उत्कटासन एव च। मार्जारं कुक्कुटं क्रौंचं श्वानं शूद्रं कपिं खकपिंव
रां दृष्ट्वा च मध्ये जपेत्कर्म स्पृष्ट्वा स्नानं विधीयते। सर्वत्र जपेऽयं नियमः। मानसे तु न। पुरश्चरणे। तथा मन्त्रशुचिर्वाऽशुचिर्वापि गच्छन् राम
तिष्ठन्स्वपन्नपि। मंत्रैकशरणो विद्वान्मनसैव सदाभ्यसेत्। न दोषो मानसे जप्ये सर्वदेशेऽपि सर्वदा। जपनिष्ठो द्विजश्रेष्ठोऽविलय १३

त्तफलं लभेत्॥ ध्यानादि विद्याजपेनु तत्तंत्रे विशेषो वक्तव्यः॥ जपफलमाह शिवधर्मे॥ जपनिष्ठो द्विजश्रेष्ठो ऽखिलयज्ञफलं लभेत्॥ स
र्वेषामेव यज्ञानां जायते सो महाफलः॥ जपेन देवता नित्यं स्तूयमाना प्रसीदति॥ प्रसन्ना विपुलान्कामान् दद्यान्मुक्तिं च शाश्वतीं॥ यक्ष
रक्षः पिशाचाश्च ग्रहाः सर्पाश्च भीषणाः॥ जापिनं नोपसर्पंति भयभीताः समंततः॥ यावंतः कर्मयज्ञाः स्युः प्रदिष्टानि तपांसि च॥ सर्वे ते
जपयज्ञस्य कलां नार्हंति षोडशीं॥ माहात्म्यं वाचिकस्यैतत् जपयज्ञस्य कीर्तितं॥ अस्मादुच्चगुणो पांशुः सहस्रो मानसः स्मृतः॥ मानसः
सिद्धिकामानां पुष्टिकामैरुपांशुकः॥ वाचिको मारणे चैव प्रशस्तो जप ईरितः॥ गौतमीये॥ ध्यात्वा त्रिपर्वनस्त्रानं अन्यं शोदे सकृत्सर्वं वा॥ त्रि
संध्यं प्रजपेन्मंत्रं पूजनं तस्य संभवेत्॥ संध्यात्रये प्रजप्तां गत्वात जपसहोत्तरशत मित्यर्थः॥ एकदा वा भवेत् स्नानं जपे स्नानं विना॥ जपां ते वा
भवेत्स्नानं पूजां ते वा जपेन्मनुं॥ प्रातः समारभ्य जपेन्मध्यंदिनावधीति न नियमपरं किंत्वधिककालव्यवच्छेदपरं अन्यथा नत्समजप
नियमे कदाचिज्जिह्वाजाड्येन समाप्तिर्दिवसे प्रतिनियत दिवसीय जपसंख्याया अपूर्णत्वे अधिकत्वे चाशीघ्रत्वेन अधिकत्वे वा निय
मभंगः स्यात्॥ मनः संहृत्य विषयान्मंत्रार्थगतमानसः॥ न द्रुतं न विलंबं च जपेन्मौक्तिकपंक्तिवत्॥ जपः स्यादक्षरावृत्तिर्मानसो
पांशुवाचिकैः॥ धिया यदक्षरश्रेण्या वर्णास्वरपदात्मिका॥ उच्चरेदर्थमुद्दिश्य मानसः स जपः स्मृतः॥ जिह्वौष्ठौ चालयेत्किंचिद्देवताग

नं॰सा॰
१४

तमानसः। किं चित्तश्रवणयोग्यः स्यादुपांशुः स जपः स्मृतः। मंत्रमुच्चारयेद्वाचा वाचिकः स जपः स्मृतः। उच्चैर्जपादिविशिष्टः स्यादुपांशुर्वि
शतैर्गुणैः। जिह्वाजपः शतगुणः सहस्रो मानसः स्मृतः। मंत्रांतरे। उच्चैर्जपोऽधमः प्रोक्त उपांशुर्मध्यमः स्मृतः। उत्तमो मानसो देवि
त्रिविधः कथितो जपः। अतिह्रस्वो व्याधिहेतुरतिदीर्घो वसुक्षयः॥ अक्षराक्षरसंयुक्तं जपेन्मौक्तिकहारवत्। मनसा यः स्मरेत्
स्तोत्रं वचसा वा मनुं जपेत्। उभयं निष्फलं याति भिन्नभांडोदकं यथा। गौतमीये। पशुभावे स्थिता मंत्राः केवला वर्णरूपिणः। सौषुम्न्या
ध्वनुच्चारिताः प्रभुत्वं प्राप्नुवंति ते। मंत्राहंकारशक्तिविच्छेत्तोऽशोतानि परिभावयेत्। तामेव परमव्योम्नि परमामृतबृंहिते। दर्शयेत्यात्मस
द्भावं पूजाहोमादिभिर्विनेति। ज्ञानार्णवेपि। मनोऽन्यत्र शिवोऽन्यत्र शक्तिरन्यत्र मारुतः। न सिध्यंति वरारोहे कल्पकोटिजपादपि॥
जातसूतकमादौ स्यान्मृते च मृतसूतकं। सूतकद्वयसंयुक्तो यो मंत्रः स न सिध्यति। गुरोस्तत्र हितं कृत्वा मंत्रया च जपक्रिया। सू
तकद्वयसंयुक्ताः स मंत्राः सर्वसिद्धिदः॥ तत्रैव ब्रह्मबीजं मनोर्दत्वा साद्यंते परमेश्वरि सप्तवारं जपेन्मंत्रं सूतकद्वयमुक्तये। मंत्रा
र्थं न च चैतन्यं यो न मुद्रां न वेत्ति यः। शतकोटिजपेनापि तस्य सिद्धिर्न जायते। लुप्तबीजाश्च ये मंत्रा न दास्यंति फलं प्रिये। मंत्रा
श्चैतन्यसहिताः सर्वसिद्धिकराः स्मृताः। मंत्राश्चैतन्यरहिताः सर्वसिद्धिहराः स्मृताः। चैतन्यरहिता मंत्राः प्रोक्ताः वर्णास्तु केवलं राम १४

फलंनैवप्रयच्छंतिलक्षकोटिजपैरपि।मंत्रोच्चारेकृतेयस्यतत्स्वरूपंप्रथमंभवेत्।शतेसहस्रेलक्षेवाकोटिजापेनतत्फलं।हृदयेग्रंथि
भेदश्चसर्वावयववर्द्धनं।आनंदाश्रूणिपुलकोदेहावेशःकुलेश्वरि।गद्गदोक्तिश्चसहसाजायतेनात्रसंशयः।सकृदुच्चरितेप्येवं
मंत्रेचैतन्यसंयुते।दृश्यंतेप्रत्ययायत्रपारंपर्य्यंतदुच्यते।मासमात्रंजपेन्मंत्रंभूतलिप्यानुसंपुटं।क्रमोत्क्रमसहस्रंचतस्य
सिद्धोभवेन्मनुः।।तत्रभूतलिपिःपंचह्रस्वाःसंविवर्णाव्योमषाग्निजलंधराः।अंत्यमाद्यंद्वितीयंचचतुर्थंमध्यमंक्रमात्।पंच
वर्गाक्षराणिस्युर्वीतश्चैतैर्द्वभिःसह।एषाभूतलिपिःप्रोक्ताद्विचत्वारिंशदक्षरैः।गौतमीये।।एवंजपंपुराकृत्वातेजोरूपंसमर्पयेत्।
देवस्यदक्षिणेहस्तेकुशपुष्पाक्षवारिभिः।सफलंतद्विधायैवप्राणायामंसमाचरेत्।जपस्यादौजपांतेचत्रितयात्त्रितयंचरे
त्।।शक्तिविषयेवामहस्ते।तथाचएवंजपंपुराकृत्वागंधाक्षतकुशोदकैः।तत्पूर्वंसमर्पयेद्देव्यावामहस्तेविचक्षणः।जपांतेप्र
त्यहंसंवीहोमयेत्तद्दशांशतः।तर्पणंचाभिषेकंचतद्दशांशंततोमुने।यत्पदंभोजयेद्विप्रान्न्यूनाधिकप्रशांतये।अथवासर्वपू
र्वंपूर्वोक्तंचहोमादिकमथाचरेत्।पस्यपावान्नृजपःप्रोक्तःसहस्रांशामनुक्रमात्।तत्तद्द्विगुणोजपांतेचहोमंकुर्याद्दिनेदिने।तथा
होमाद्यशक्तौचासनस्थोमारीय।यद्यदंगंभवेद्व्यंग्रंतत्तत्संख्याद्विगुणोजपः।होमाभावेजपःकार्योहोमसंख्याचतुर्गुणः।विप्रा

न.सा.
१५
15

णां तु क्षत्रियाणां च रससंख्यागुणः स्मृतः । वैश्यानां वसुसंख्या क्रमेषां स्त्रीणामयं विधिः । पंचवर्णीमाश्रितः शूद्रः सचनस्य विधिं चरेत् ।
अच्छाप्यशक्तिश्चेत्तदानुयोगिनी हृदये । होमकर्मण्यशक्तानां विप्राणां द्विगुणो जपः । इतरेषां तु वर्णानां त्रिगुणादिसमन्वितः । ए
तेन स्त्रीशूद्राणां होमाधिकारः । तथा च शूद्राणां त्र्यस्रमिति कुंडप्रकरणे शारदायां ॥ स्त्रीणां होमाधिकारे च तत्रैलाजैस्त्रिमधुरो
पेतैर्होमः कन्यां प्रयच्छति । अनेन विधिना कन्या वरमाप्नोति वांछितं । इति वचनेभ्यः । तच्च ब्राह्मणद्वारा ॐकारोच्चारणाद्धोमात्तु शा
लग्रामशिलार्चनात् । ब्राह्मणीगमनाच्चैव शूद्रश्चांडालतां व्रजेदिति साक्षान्निषेधात् । तथा स्त्रीणामपि सर्ववैदिककर्मसु शूद्र
तुल्यत्वप्रतिपादनात् । स्त्रीशूद्रकरसंस्पर्शो वज्रपातसमो मम । इति भगवद्वचनात् । तथा नारायणकल्पे । अष्टाक्षरो महामंत्रः
सप्तार्णस्तु स्त्रीशूद्रयोः । प्रणवादिश्चैव यो मंत्रो न स्त्रीशूद्रेषु प्रयुज्यते ॥ ॥ इति सर्वत्र स्त्रीणां शूद्रवत्तव्यवहारः । सर्वेषां वा द्वि
गुणाज्जपः । तथा च वासिष्ठे । शूद्रयोषोपद्यदंगं विहीयेत तत्संख्याद्विगुणो जपः । कर्तव्यश्चांगसिद्ध्यर्थं तद्दशांशेन भक्तितः । न चेदं
गं विहीयेत न सिद्धिमवाप्नुयात् । तथा अगस्त्यसंहितायां । यदि होमे न शक्तः स्यात्तज्जपान् तर्पणेऽपि वा । तावत्संख्या जपे
नैव ब्राह्मणाराधनेऽपि वा । भवेदंगादयेनैव पुरश्चरणमार्यवै । ततश्च गुरवे दक्षिणां दद्याद्भोजनाच्छादनादिभिः । गुरुसंतोष

राम
१५

मात्रेणमंत्रसिद्धिर्भवेद्ध्रुवं।सम्यक्सिध्यैकमंत्रस्यपंचांगोपासनेनचासर्वेमंत्राश्चसिध्यंतित्वत्प्रसादात्कुलेश्वरि।गुरुमूलामदंसर्वमिन्ना
द्भुतंचवेदिनः।एकयामेस्थितोनित्यंगत्वावदेत्तवैगुरुंगुरुरेवपरंब्रह्मतस्मादादौतमर्चयेत्।मिष्टान्नंवटुसत्कार्यंभुंजीतवटुभिःसहाए
वंसिद्धमंत्रस्तुमंत्रीसाधयेत्सकलेप्सितान्॥अथवान्यप्रकारेणपुरश्चरणमुच्यते।ग्रहणेऽर्कस्यचेन्दोर्वाशुचिःपूर्वमुपोषितः।न
द्यांसमुद्रगामिन्यांनाभिमात्रोदकेस्थितः।स्पर्शादिमुक्तिपर्यंतंजपेन्मंत्रमनन्यधीः।नद्यभावेतत्रैवायत्रवापुण्योदकेस्नात्वाशुचिः
पूर्वमुपोषितः।ग्रहणादिविमोक्षांतंजपेन्मंत्रंसमाहितः।तत्पूर्वासासंभवेत्॥ ॥अथवान्यप्रकारेणपौरश्चरणिकोविधिः।चं
द्रसूर्योपरागेचस्नात्वाप्रयतमानसः।स्पर्शाद्विमोक्षपर्यंतंजपेन्मंत्रंसमाहितः।दृष्ट्वास्नात्वाससंकल्पोविमोक्षांतंजपंचरेत्।ज
पाद्दशांशतोहोमस्तथाहोमात्तुतर्पणं।एवंकृत्वातुमंत्रस्यजायतेसिद्धिरुत्तमा।गोपालमंत्राणांहोमतुल्यंतर्पणं।इदंगोपा
लमंत्राणांतर्पणंहोमसंख्यमितिसुकोसनत्कुमारे॥दृष्ट्वास्नात्वाससंकल्पोविमोक्षांतंजपंचरेत्।तावद्योमारिकंकुर्याद्भूह
णांतेशुचिःपुमान्।इतिजपान्मंत्रसिद्धिर्भवत्येवनसंशयः।आस्वादेरस्तुरोधेनयदिजीर्यत्यजेन्नरः।सभवेद्देवताद्रोहीपितृ
न्नयत्यधः।इतिसनत्कुमारीयवचनाज्जपस्यमुख्यत्वं।वस्तुतःआरब्धपुरश्चरणविषयमिदंस्यात्।आरब्धपुरश्चरणेयदियहणं

तं·सा·
१६

भवेत्तत्तरीश्राद्धानुरोधेन नजपश्यागः॥ योगिनीहृदये कल्पोक्तविधिना मंत्री कुर्याद्धोमं समाहितः॥ अथवा तद्दशांशेन होमादींश्च
समाचरेत्॥ तथाशक्तेन तद्दशांशेन क्रमाद्धोमादिकं चरेत्॥ तदंते महतीपुजां कुर्यात् ब्राह्मणभोजनं॥ ततो मंत्रप्रसिध्यर्थं गुरुं
संपूज्य तोषयेत्॥ एवं च मंत्रीसिद्धिः स्यात् देवता च प्रसीदति॥ यच्च पि पुरश्चरणं पंचांगपरं तथा च जपहोमतर्पणाभिषे
को ब्राह्मणभोजनं॥ पंचांगोपासनं लोके पुरश्चरणमुच्यते तत्तथा विग्रहणादौ पुरश्चरणपदं जपमात्रपरं सूर्योदयं समा
रभ्य [redacted] यावत्सूर्योदयावधि इत्यादौ तथादर्शनात्॥ नत्र होमादेरभावात् तत्तर्हि कथं ग्रहणपुरश्चरणे होमादि॥ व
चनादेव जायते॥ न च पुरश्चरणस्य पंचांगत्वात् सर्वत्र तदेवस्यादिति वाच्यं॥ ग्रहणे पुनस्तद्विधानमनर्थकं स्यात् किंच ग्र
हणे होमादिनियमात्॥ मान्यत्र होमादि ग्रहणपुरश्चरणे होमादिविधानं तु प्रकृतीभूतपुरश्चरणतुल्यताबोधनाय अत
एव पंचांगस्वरूपपुरश्चरणे कृते मुख्यप्रयोगेष्वधिकार इति प्रकटीकृतं॥ तदकरणे पुनः केवलजपमात्रपुरश्चरणे ना
धिकार इति सर्वसम्मतमिति॥ ॥अथ पुरश्चरणप्रयोगः॥ ॥तत्र तावद्भूमेः परिग्रहं कृत्वा पुरश्चरणप्राक् तृतीयदिवसे दो
रादिकं विवाय वेदिकाया श्चतुर्दिक्षु कोणे कोणे पदं वा दैवं चतुरसंस्राहारादि विहारार्थं परिकल्प्य तत्र कूर्मचक्रानुगुणं म

राम
१६

डुपंविधायएकभुक्तंचकुर्य्यात्तत्रअपरदिनेस्नात्वानीदिकंविधायशुद्धःसन्अश्वत्थोडुंबरप्लक्षाणामन्यतमस्यचितत्तिमात्रान्दशकी
लकान्ॐअस्त्रायफडितिमंत्रेणशोधनंरशनाभिमंत्रितान्दशदिक्षुॐयेचात्रविघ्नकर्त्तारोभुविदीव्यंतरीक्षगाः।विघ्नभूताश्च
येचान्येममंत्रस्यसिद्धिषु।ममैतत्कीलकंदेवैःपरित्यज्यविदूरतः।अपसर्पन्तुतेसर्वेनिर्विघ्नसिद्धिरस्तुमे।इत्यनेननिखन्य
तेषुॐसुदर्शनायअस्त्रायफडितिमंत्रेणस्वसंपूर्वादिक्रमेणइंद्रादिलोकपालान्पूजयेत्।ॐभूर्भुवःस्वःइंद्रलोकपालइ
हागच्छस्वाहाइत्यावाह्यपंचोपचारैःपूजयेत्।एवमन्यानपि।तथाचपुरश्चरणेचादिकंगत्वाकुर्य्याद्भूमिपरिग्रहं।तथाहिमुकमंत्र
स्यपुरश्चरणसिद्धये।मयायंगृह्यतेभूमिर्मंत्रोयंसिद्ध्यतामिति।ग्रामेक्रोशमितंस्थानंनचाशेषंसकलमतानारादावपि
क्रोशंक्रोशार्धंगव्यूतमथापिवा।आहारादिविहारार्थंनातिक्रमेद्भूमिमाक्रमेत्।ह्रींरिष्टेक्रोशवानूकीलान्
अस्त्रमंत्राभिमंत्रितान्।निखनेद्दशदिग्भागेतेष्वेवचप्रपूजयेत्।लोकपालान्पुनस्तेषुगंधाद्यैःपूजयेत्सुधीरिति।त
तोमध्यस्थानेक्षेत्रपालंवास्तोष्पतिंचसंपूज्यसर्वविघ्नविनाशार्थंगणपतिंपूजयेत्।यथाॐअद्येत्यादिअमुकगोत्रो।मुक
देवशर्म्माहंअमुकमंत्रपुरश्चरणकर्म्मणिविघ्नानाशार्थंगणेशपूजामहंकरिष्ये।इतिसंकल्प्यवेदिमध्येपंचोपचा

तं.सा.
१७

रैर्गणेशं प्रपूजयेत्तानड्कं क्षेत्रपालादिकं तु प्रपूजयेद्विधिवत्ततः॥ क्षेत्रेशं वास्तुनामानं विघ्नराजं समर्च्चयेत्॥ दिक्पतिभ्यो ब
लिं दद्यात्ततः क्षेत्रं समाविशेत्॥ ततो माषभक्तादिना पूजितदेवताभ्यो बलिं दद्यात्॥ ततः ॐ ये रौद्रा रौद्रकर्म्माणो रौद्रस्थाननि
वासिनः। मातरो युग्ररूपाश्च गणाधिपतयश्च ये। विघ्नभूताश्च ये चान्ये दिग्विदिक्षु समाश्रिताः। सर्वे ते प्रीतिमनसः प्रतिगृह्ण
न्त्विमं बलिं इत्यनेनाष्टदिक्षु भूतेभ्यो बलिं दद्यात्॥ ततो गायत्रीं जपेत्॥ तथा प्रातः स्नात्वा च गायत्र्याः सहस्रं प्रयतो जपेत्॥ ता
न्नात्ता तस्य पापस्य क्षयार्थं प्रथमं ततः। इति विद्याधराचार्य्यः॥ यत्तु प्रातः स्नात्वा च सावित्र्या अयुतं प्रयतो जपेत्॥ ततः पुनरसं
न्नपापशंकया ॐ अद्येत्यादि अद्येत्यादि अमुकगोत्रः श्री अमुकदेवशर्म्माहं ज्ञाताज्ञातपापक्षयकामोऽष्टोत्तरसहस्रसावित्रीज
पमहं करिष्ये इति संकल्प्य। तत्र उपवासं हविष्यं वा कुर्य्यात्॥ तत्परदिने त्रिषसिस्नानादिकं कृत्वा स्वस्तिवाचनपूर्वकं संकल्पं
कुर्य्यात्॥ विष्णुः ॐ अद्येत्यादि अमुकगोत्रः श्री अमुकदेवशर्म्मा अमुकदेवताया अमुकमंत्रसिद्धिप्रतिबंधकाशेषदुरितक्ष
यपूर्वकतन्मंत्रसिद्धिकामो द्यारभ्य यावत्कालेन सिद्धिस्तावत्कालममुकमंत्रस्येयत्संख्यजपतद्दशांशहोमतद्दशांशतर्प एम
णं तद्दशांशाभिषेकतद्दशांशब्राह्मणभोजनरूपं पुरश्चरणमहं करिष्ये॥ इति संकल्प्य जपं कुर्य्यात्॥ नित्यनैमित्तिकका १०

17

मंसापेक्षं पूर्ववत्तः। अन्यथा चेद्गवेद्धत्तं कुर्य्यादापत्तपरंपरामिति कुलार्णवे। ततो होमसमत्तन्तर्प्पणं॥ तर्प्पणं तु ततः कुर्य्यात्तीर्थ्योदकैश्च दनाभि
तैः। जले देवं समावाह्य पाद्यार्घ्यदकात्मकैः। संपूज्य विधिवद्भक्त्या परिवारसमन्वितं। एकैकमंत्रलिंगेन ये परिवारान्प्रतर्प्पयेत्। ततो हो
मदशांशेन तर्प्पयेत्परदेवतां। तर्प्पणवाक्यं तु स्नानप्रकरणे वक्ष्ये। अभिषेकवाक्यं तु मूलमुच्चार्य्य नमोऽन्तममुकदेवतामहमभिषि
चामि इति कलशमुद्रया स्वमूर्द्धि अभिषिंचेत्। तथा च नमोऽन्तं मंत्रमुच्चार्य्य तदंते देवताविधां। द्वितीयांतामहं पश्चादभिषिंचाम्य
नेन तु। अभिषिंचेत स्वमूर्द्धानं तोयैः कुंभाख्यमुद्रया। शक्तिविषये निलिनेत्रे मूलीनेतामवोच्चार्य्य सिंचामि च नमः पदं। ततो दक्षि
णा। अथ कृतैतत्तदमुकदेवताया अमुकमंत्रपुरश्चरणकर्म्मणः सांगतार्थं दक्षिणामिदं काचनं यथानामगोत्राय गुरवे तुभ्यमहं सं
प्रददे। ततोऽच्छिद्रावधारणं कुर्यात्॥ ॥अथ ग्रहणपुरश्चरणसंकल्पः॥ ॥तद्यथा ॐ अद्येत्यादि अमुकगोत्रः श्री अमुकदेवशर्म्मा
राहुग्रस्ते निशाकरे दिवाकरे वा अमुकदेवताया अमुकमंत्रसिद्धिकामो ग्रासादिविमुक्तिपर्य्यंतं जपरूपपुरश्चरणमहं करि
ष्ये इति संकल्प्य जपेत्। तद्दिने तत्परदिने वा स्नानादिकं विधाय ॐ अद्येत्यादि अमुकमंत्रस्य कृतैतत्तद्ग्रहणकालीनजपत
संख्यजपदशांशहोमतत्तद्दशांशतर्प्पणं तद्दशांशाभिषेकतद्दशांशब्राह्मणभोजनकर्म्माण्यहं करिष्ये। इति संकल्प्य होमा

तं॰सा॰
१८

दिकं कुर्य्यात्तादक्षिणदिकं तु पूर्ववत्॥ ॥अथ कूर्म्मचक्रं॥ ॥दीपस्थानं समाश्रित्य कृतं कर्म्म शुभप्रदं। चतुरस्रां भुवं भित्वा कोष्ठानां
नवकं लिखेत्। पूर्वकोष्ठादि विलिखेत् सप्तवर्णाननुक्रमात्। लक्ष्मीशौ मध्यकोष्ठे स्वरान्युग्मानुक्रमाल्लिखेत्। दिक्षु पूर्वादि
तो यत्र क्षेत्राद्य कूर्मसंस्थितिः। मुखं तत्र तस्य ज्ञानीयात्कल्लाद्युभयतः स्थितौ। कोष्ठे कुक्षी उभे पार्श्वे पृष्ठे पुच्छमीरितं। क्रमे
णानेन विभजेन्नाम्यस्य मपि भागतः। मुखस्थो लभते सिद्धिं करस्थः स्वल्पजीविनः। उदासीनः कुक्षिसंस्थ पार्श्वस्थो दुःख
माप्नुयात्। पुच्छस्थः पीड्यते मंत्री वंधनोद्घाटनादिभिः। कूर्म्मचक्रमिदं प्रोक्तं मंत्राणां सिद्धिसाधकं। कूर्म्मचक्रमविज्ञाय
यः कुर्य्याज्जपयज्ञकं। तस्य फलं नास्ति सर्वानर्थाय कल्पते॥ ॥अथ मंत्राणां दशसंस्काराः॥ ॥अथ गौतमीये॥ ॥जननं जी
वनं पश्चात्ताडनं बोधनं तथा॥ अथाभिषेको विमलीकरणाप्यायनं पुनः॥ तर्पणं दीपनं गुप्तिर्दशैता मंत्रसंस्क्रियाः।
स्वर्णादिपात्रे संलिख्य मातृकामंत्रमुत्तमं। काश्मीरचंदनेनापि भस्मना वीथ सुव्रत। काश्मीरं घ्राणसंस्कारे चंदनं वै
श्वेवैष्णवे भस्म समाख्यातं मातृकामंत्रलेखने। मंत्राणां मातृकामध्यादुद्धारो जननं स्मृतं। पंक्तिक्रमेण विधिनानु राम
निमिस्तत्र निश्चितं। प्रणवांतरितान्कृत्वा मंत्रवर्णान्जपेत्सुधीः। प्रत्येकं शतवारं तु जीवनं तदुदाहृतं। मंत्रवर्णान्समा १८

लिख्य ताडयेच्चन्दनाम्भसा प्रत्येकं वायुबीजेन पूर्ववत्ताडनं मतं। विलिख्य मन्त्रवर्णांस्तु प्रसूनैः करवीरजैः तन्मन्त्रवर्णसंख्यातैर्ह
न्याद्रेफेण बोधनं। तत्तत्तन्त्रोक्तविधिना ऽभिषेकः प्रकीर्तितः॥ अश्वत्थपल्लवैः सिंचेन्मन्त्री मन्त्रार्णसंख्यया। संचिन्त्य मनसा मन्त्रं
सुषुम्नामूलमध्यतः। ज्योतिर्मन्त्रेण विधिवद्दहेन्मलत्रयं यती। तारं व्योमाग्निमनुयुक्दंडी ज्योतिर्मनुर्मतः। मनुरौकारदंडी अनु
स्वारः व्योम हकारः अग्नी रेफः स्वर्णेन कुशतोयेन पुष्पतोयेन वा तथा। तेन मन्त्रेण विधिवदाप्यायनविधिः स्मृतः॥ मन्त्रेण वा
रिणा मन्त्रेण तर्पणं तर्पणं मतं। मधुना शाक्तितन्त्रे तु वैष्णवे चेदुमज्जातैः॥ शैवे घृतेन दुग्धेन तर्पणं सम्यगीरितं। अभिषेकेपि तथा।
तारमायारमायोगे मनोर्दीपनमुच्यते। जप्यमानस्य मन्त्रस्य गोपनं चाप्रकाशनं। संस्कारा दश संप्रोक्ताः सर्वतन्त्रेषु गोपिताः। यान्कृ
त्वा संप्रदायेन मन्त्री वांछितमाप्नुयात्। मलत्रयमिति आनव्यं मायिकं कार्मणं। मायिकं नाम यो वीर्थः पौरुषं कर्मणे मलं। आ
नव्यं तदर्थं ज्ञेयं निषिद्धं तन्मलत्रयं। तारमायारमायोगादिति तारमायारमाबीजपुटितं मन्त्रमष्टोत्तरशतं जपेदित्यर्थः। तथा च
विश्वसारे॥ तारमायारमाबीजपुटितेन जपेन्मनुं। शतमष्टोत्तरं चैव दीपयेत्साधकोत्तमः॥ ॥अथ कलावतीदीक्षाप्रयोगः॥ शिष्यः
पूर्वमुपोषितः कृतनित्यक्रियः स्वस्तिवाचनपूर्वकं संकल्पं कुर्यात्। ॐ अद्येत्यादि अमुकगोत्रश्री अमुकदेवशर्माहं धर्मार्थकाममो

तं·सा·
१९

19

दीक्षाख्रिकामोऽमुकदेवतायाऽमुकदेवतायाऽमुकमंत्रदीक्षामहं करिष्ये इति संकल्प्य गुरुं वृणुयात् । ॐ साधु भवानास्तां ॐ साध
हमासे ॐ अर्चयिष्यामो भवंतं ॐ अर्चय ततो गंधपुष्पवस्त्रालंकारादिभिर्गुरुमभ्यर्च्य दक्षिणजानुं भूत्वा पवित्रः शिष्यः ॐ अद्येत्यादि
अमुकगोत्रः श्री अमुकदेवशर्मा अमुकदेवतायामत्कर्तृकामुकमंत्रदीक्षाकर्मणि अमुकगोत्रं अमुकदेवशर्माणं एभिः पाद्या
दिभिरभ्यर्च्य गुरुत्वेन भवंतमहं वृणे । ॐ वृतोऽस्मीति प्रतिवचनं । यथाविहितं कर्म कुरु यथाज्ञानतः करवाणीति प्रतिवचनं
। ततो गुरुराचमनादि देशसामान्यार्घ्यं कुर्यात् । तथा ह्यावामे स्वत्रिकोणवृत्तभूबिंबं विलिख्य आधारशक्तये नम इति संपूज्य फडिति
मंत्रेण पात्रं प्रक्षाल्य साधारं तत्र निधाय नम इति मंत्रेण संपूज्य । कुंभमुद्रया सूर्यमंडलात् ॐ गंगे च यमुने चेत्यादिना तीर्थमा
वाह्य ॐ इति गंधपुष्पाभ्यां संपूज्य धेनुमुद्रां प्रदर्श्य ॐ इत्यष्टधा दशधा वा जप्त्वा फडिति तज्जलेन द्वारमभ्युक्ष्य द्वारपूजां समाच
रेत् । तथा च त्रिकोणवृत्तभूबिंबमंडलं रचयेत् ततः आधारशक्तिं संपूज्य तत्राधारं विनिक्षिपेत् । अस्त्रेण पात्रं संशोध्य हन्मंत्रे
ण पूरयेत् । निक्षिपेत्तीर्थमावाह्य गंधादीन् प्रणवजप्तान् । दर्शयेद्धेनुमुद्रां च सामान्यार्घ्यमिदं स्मृतं । मंत्रेण स्वपवेनैव सामान्या राम
र्घ्यमिदं स्मृतमिति गौतमीयवचनात् । अष्टधा प्रणवजपः विशेषार्घ्ये तथा दर्शनात् । अपामादो दशधा जपः तदर्घ्ये तथा दर्शनात् । १९

ऊर्ध्वोडुंबरे विघ्नाय नमः। ॐ महालक्ष्म्यै नमः सरस्वत्यै नमः दक्षिणशाखायां क्षेत्रपालौ यत्तयोः पार्श्वे गंगायै यमुनायै देहल्यां अ
स्त्राय नमः इति पुष्पवारिभिः पूजयेत्। अथ शाक्तश्च द्वारदेवताभ्यो नमः इत्येतन्मात्रं त्रिपुरादिपूजादिषु। स्वतंत्रे गणेशं क्षेत्रपालं च व
टुकं योगिनीं तथा गंगां च यमुनां चैव लक्ष्मीं वाणीं ततो यजेत् इति विघ्नेशः। वैष्णवे तु नंदः सुनंदश्च चंडश्च प्रचंडो बल एव च प्रबलो भद्र
माच सुभद्रो विघ्नवेश्मवाः। प्रणवादिनमोंतेन तन्नाममंत्रेण पूजयेत्। ततो दक्षिणपादपुरःसरं वामशाखां स्पृशन् दक्षिणांगं संको
चयन् मंडपांतः प्रविश्य नैर्ऋत्यां वास्तुपुरुषाय नमः। ॐ ब्रह्मणे नमः। ततो देयमंत्रेण दिव्यदृष्ट्यावलोकनाद्दिव्यान् विघ्नानुत्सार्य अ
स्त्राय फडिति जले नांतरीक्षगान् वामपार्ष्णिघातत्रयेण भौमान् फडिति सप्तजप्तान्विकिरानादाय ॐ अपसर्पंतु ते भूता ये भूता भु
वि संस्थिताः। ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया इति तान्विकिरेत्। निवेश्य लाजचंदनसर्षपभस्मदूर्वाकुशान्तनी विकि
री इति निर्दिष्टः सर्वविघ्नौघनाशकी। अस्त्रांतत्र आदौ विघ्नसमुत्सार्य पश्चादासनकल्पनं। अथवा वासने स्थित्वा विघ्नानुत्सारयेत्तु
वाः। ततः ह्रीं आधारशक्तिकमलासनाय नमः इत्यासनं संपूज्य आसनमंत्रः मेरुपृष्ठ ऋषिः सुतलं छंदः कूर्मो देवता आसनपरिग्रहे
विनियोगः। ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां नित्यं पवित्रं चासनं कुरु इति पठित्वा स्वस्तिकादिक्रमेण

तं॰सा॰ पविशेत्। ततः पंचगव्येन मंडलं शोधयेत्। पंचगव्यप्रयाणं तु गौतमीये। पंचगव्येन तद्देहं मंडलं च विशोधयेत्। पलमात्रं दुग्धमांगं गोमू
२० त्रं तावदिष्यते। घृतं च पलमात्रं स्याद्गोमयं तोलकद्वयं। दधिप्रसृतिमात्रं स्यात्पंचगव्यमिदं स्मृतं। अथवा पंचगव्यानां समानो भाग
20 उच्यते। मूलमंत्रेण संमंत्र्य तेनैव परिशोधयेत्। तेन सर्वविशुद्धिः स्यात्सर्वपापनिकृंतनं। दक्षिणभागे पूजाद्रव्याणि वामे सुवासित
पूर्णकुंभं जलं हस्तप्रक्षालनार्थं पात्रांतरं पृष्ठभागे स्थापयेत्। सर्वदिक्षु घृतदीपांश्च पुष्पांजलिं धृत्वा वामे गुरुभ्यो नमः। दक्षिणे
ॐ गणेशाय नमः मध्ये ॐ श्रीमुकुंददेवतायै नमः। तथा च कृतांजलिपुटो भूत्वा वामे गुरुत्रयं पूजयेत्। गुरुं च परमादिं च परमेष्ठिगुरुं
तथा। दक्षिणे च गणेशानं मूर्ध्नि देवं विभावयेत्॥ ततो भूतशुद्धिः। ततो मातृकान्यासः। ततः प्राणायामः। ततः पीठन्यासः। ततः
ऋष्यादिन्यासः ततो मंत्रन्यासः ततो मुद्राप्रदर्शनं ततो ध्यानं। ततो मानसपूजा। ततोऽर्घ्यस्थापनं वामे त्रिकोणमंडलं कृत्वा तत्र त्रि
पदिकामारोप्य फट् इति शंखं प्रक्षाल्य तदुपरि संस्थाप्य नमः इति मंत्रेण। गंधपुष्पाक्षतदूर्वादि तत्र निक्षिप्य विमलजलेन सं
लं हं सं षं शं वं लं रं यं मं भं बं फं नं धं दं थं तं णं ढं डं ठं टं ञं झं जं छं चं ङं घं गं खं कं अः अं औं ओं ऐं एं ॡं लृं ॠं ऋं ऊं उं ईं इं आं अं इत्यनेन मूलेन च राम
पूरयेत्। मं वह्निमंडलाय दशकलात्मने नमः त्रिपदिकायां ॐ अं सूर्यमंडलाय द्वादशकलात्मने नमः शंखे उं सोममंडलाय षो २०

डशकलात्मनेनमः इति जले ॐ गंगे च यमुने चेत्यंकुशमुद्रया तीर्थमावाह्य अमुकि इदावह हागच्छ रइह इति च स्वहृदयदेवतां तत्रावाह्य
हुमित्यवगुंठ्य च वषडिति गालिनीमुद्रां प्रदर्श्य वौषडिति तज्जलं वीक्ष्य पुनरंगमंत्रैः सकलीकृत्य नमइति गंधपुष्पाद्यैः तत्र देवतां संपूज्य
त्तदुपरि मत्स्यमुद्रयाच्छाद्य मूलमंत्रमष्टधा जपेत्। तथा च गौतमीये। गंधपुष्पं समभ्यर्च्य कृत्वा स्वधामयोजयेत्। अष्टकृत्वो जपेन्मं
त्रं शिखायां गालिनीं न्यसेत्। अत्र कृष्णपदं तत्तद्देवतापरं ततो धेनुमुद्रां प्रदर्श्य स्वेन संरक्ष्य तस्मात् किंचिज्जलं प्रोक्षणीपात्रे नि
क्षिप्य तेनोदकेनात्मानं पूजोपकरणं चाभ्युक्ष्य पीठन्यासक्रमेण शरीरे धर्मादीन् पूजयेत्। तद्यथा दक्षिणस्कंधे ॐ धर्माय नमः वा
मे ॐ ज्ञानाय नमः वामोरौ वैराग्याय नमः दक्षिणोरौ ऐश्वर्याय नमः। मुखे ॐ अधर्माय नमः। वामपार्श्वे अज्ञानाय नमः नाभौ ॐ अ
वैराग्याय नमः दक्षिणपार्श्वे अनैश्वर्याय नमः हृदि ॐ अनंताय नमः ॐ पद्माय नमः ॐ अर्कमंडलाय द्वादशकलात्मने नमः ॐ
सोममंडलाय षोडशकलात्मने नमः मं वह्निमंडलाय दशकलात्मने नमः सं सत्वाय नमः रं रजसे नमः तं तमसे नमः आं आत्मने
धा हलाः। सिद्धार्थपायसाज्यानि द्रव्याष्टौ। त्रिमधुधाः। त्रिस्वादूनि घृतमधुशर्करा इति। वाग्भवं शम्भुबीजेन तारबीजत्रयं त्वकं
पि त्रैसमुद्धरेन्मंत्री त्रिवर्गफलसाधनं। न्यासपूजादिकं सर्वं पूर्ववत्समाचरेत्। करांगन्यासे तु विशेषः॥ ऐं क्लीं अंगुष्ठाभ्यां नमः
ऐं क्लीं तर्जनीभ्यां स्वाहा। ऐं क्लीं मध्यमाभ्यां वषट्। ऐं क्लीं कनिष्ठाभ्यां वौषट्। ऐं क्लीं करतलपृष्ठाभ्यां फट्। एवं ऐं क्लीं हृदयाय नमः इत्यादिन
या च षडंगं॥ भाजाबीजेन वाग्भवाद्येन कल्पयेत्। यानि जातिषु क्लीं लिंदेहं क्लीकः॥ ध्यानं तु॥ सिंहारूढां विग्रहां त्रिनयनां मालिक्य
मौलिं स्फुरत्तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहां। पाणिभ्यां मणिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं सौम्यां रत्नघटस्थ
सव्यचरणां ध्यायेत्परामंबिकां॥ इति ध्यानं॥ अस्य पुरश्चरणं जपो द्वादशलक्षमानतः। तथा च रविलक्षं जपेन्मंत्रं पायसैर्मि
पुरोक्तैः। तद्दशांशेन जुहुयान्मंत्री संस्कृतहव्यवाहे हव्यवाहनेत्यादिवचनात्॥ वाग्बीजपुटिता माया विधेयं त्र्यक्षरी मता।
अस्य मंत्रस्य पूर्ववन्न्यासः॥ करांगन्यासस्तु ऐं क्लीं ऐं अंगुष्ठाभ्यां नमः इत्यादि। ऐं क्लीं ऐं हृदयाय नमः इत्यादिना च। तथा च मध्येन दी

र्घयुक्तेन वाक्युकृपुटेन प्रकल्पयेत्॥ ध्यानं तु श्यामांगीं शशिशेखरां निजकरैर्दानं वरं त्र्यलं सत्त्वाधं चसकं परं भयहरं संविभ्रतीं श्वाभ्य
तीं॥ मुक्ताहारजसत्पयोधरनतां नेत्रत्रयोल्लासिनीं विदेहंसुरपूजितां हरवधूरक्तारविंदस्थितां॥ एवं ध्यात्वा पूर्ववद्यजेत्॥ अष्टपत्रेषु वि
शेषः॥ अं रं त्रां ह्रैं ईं माहेश्वर्यै॥ उं कौमार्यै॥ ऋं वैष्णव्यै॥ लृं वाराह्यै॥ ऐं रंद्रां ऐं औं चामुंडायै॥ अः महालक्ष्म्यै॥ अं असितांगाय रुरवे॥ चंडाय
क्रोधाय॥ लृं उन्मत्ताय॥ ऐं कपालिने॥ औं भीषणाय॥ अं संहाराय॥ पद्मं अं अं असितांगब्राह्मीभ्यां इं नमः इत्यादि वा॥ तथा चदीर्घा मात
रः पूर्वोक्ताः स्वाधाभैरवाः॥ ताः अन्यत् सर्वं वक्ष्ये॥ अस्य पुरश्चरणं जपो दशलक्षः मधुरान्वितैः पालाशपुष्पैर्दशांशहोमः॥ तथा च त
त्वदं जपेल्लक्षं मधूत्याच्च दशांशतः॥ पलाशपुष्पैः स्वादुक्तैः पुष्पैर्वा राजवृक्षजैः॥ तत्त्वलक्षं दशलक्षं मतरंगत्वादिनिगुरवश्चतु
र्विंशतिलक्षं मितिकेचित्॥ ॥अनंतो विंदुसंयुक्तो मायाब्रह्माग्नितारवान्॥ पाशादिब्रह्मरोमेत्रः सर्वैव शफलप्रदः॥ अस्य एकाक्ष
रस्य पिंडं सोदेवता न्यासः॥ अंगामेव स्फुर्द्रौं अंगुष्ठाभ्यां नमः इत्यादिं हृदयाय नमः इत्यादि नाच सर्वत्र बीजेन कारांगन्यासो कुर्या
त्॥ तथा चनिवचे॥ अष्टाधा पूर्वयुक्ताः स्युर्बीजेनांगक्रिया मताः॥ ध्यानं॥ रांकुशौ पाशमभीतिमुद्रां करैर्वहंतीं कमलासनास्थ्या
वालार्ककोटिप्रतिमां त्रिनेत्रां भजहमाद्यां भुवनेश्वरीं तां॥ अस्य फजापकारवतां षट्दलेष्वाह्यादिपुगालं पूर्ववत्तत्पूजयेत्॥

षोडशदलेषु पूजायाम् उक्तत्वात् षोडशदलाभावः। अस्य पुरश्चरणं जपो दशलक्षः दधिमधुघृताक्ताभिः अश्वत्थोदुंबरप्लक्षाणां स
मिद्भिस्तिलैर्दुग्धाक्तैर्दशसहस्रहोमः। तथा चाह विधिभुकजपेन्मंत्रं दशलक्षं जितेन्द्रियः। तत्सहस्रं जुहुयात् पायसं जपांते मंत्रवित्तमः। दधि
क्षौद्रघृताक्ताभिः समिद्भिः क्षीरभूरुहां। ततस्संख्यया तिलैः शुद्धैः पयोक्तैर्जुहुयात्ततः। अत्र तत्त्वशब्देन दशांशो वांते शाक्तैर्दश तत्त्वमिति
वचनात्। अन्ये भुवनेश्वरीमंत्रान् न लिखिता अप्रसिद्धत्वात्॥ ॥अथान्नपूर्णामंत्राः॥ ॥मायाहृद्भगवत्यन्ते माहेश्वरिपदं ततः। अ
न्नपूर्णे ठयुगान्तं मनुः सप्तदशाक्षरः। कल्पप्रणवाद्यायदा दृष्टितत्सा सा प्रशा हरी। अन्नदा मोहसमर्चैव सदाचिभववर्द्धिनी। श्रीवी
जाद्या पददिवित्तदा सुखविवर्द्धिनी। वाग्वीजाद्याय दा विद्या वाणी शास्त्रप्रदायिनी। कामाद्या चपदा विद्या सर्वकामप्रदायिनी। तारा
मायादिका विद्या मोक्षमोहैककदायिनी। मायाश्री युग्मवीजाद्या सदाऽखिलभवदायिनी। श्रीमाया युग्मवीजाद्या सर्वसंपत्प्रपूरणी
॥अस्य पूजाप्रयोगः॥ प्रातःकृत्यादि पीठन्यासांतं कर्म विधाय हृत्पद्ममध्ये केसरिवमध्ये च भुवनेश्वरीपीठमन्त्रं तं पीठशक्तीः
र्विन्यस्य ऋष्यादिन्यासं कुर्यात्। यथा शिरसि ब्रह्मणे ऋषये नमः। मुखे पंक्तिछंदसे नमः। हृदि अन्नपूर्णादेवतायै नमः। त
त्रैव एतेषां मंत्राणां नानाऋषिर्ब्रह्मा अभिधीयते। पंक्तिः छंदः समाख्यातं देवतान्नपूर्णिका। ततः करांगन्यासः। क्रीं अगुष्ठाभ्यां न

तं.सा. मइत्यादिएवमंगन्यासः ह्रां हृदयायनमइत्यादिसर्वत्रवीजेनकुर्य्यात्॥ अंगानि मायया कुर्य्यात्॥ ततो देवीं विचिंतयेत्॥ कल्पे च य
५२ दीजाघाभवेद्दिघातद्वीजेनांगकनांगकल्पने॥ ततो ध्यानं॥ रक्तां विचित्रवसनांनववंचंद्रकडामत्रपद्दानविरतांस्तनभारनम्रां न्
त्र्यंतमिंदुशकलाभरणां विलोक्य हृष्टां भजे भगवतीं भवदुःखहंत्री॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्य्यात्॥ ततः सामान्यो
क्तपीठपूजां विधाय भुवनेश्वरीमंत्रोक्तजपादिपीठमंत्रेतपूजां विधाय पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्य्यंतं॥ कर्म्म विधा
यश्चावरणपूजामारभेत्॥ केशरेषु कस्थिकोणे ह्रीं हृदयाय नमः नैऋते ह्रीं हृदयाय नमः नैऋते ह्रीं शिरसे स्वाहा वायव्ये ह्रीं शि
खायै वषट्॥ ऐशान्यां ह्रीं कवचाय हुं मध्ये ह्रीं नेत्रत्रयाय वौषट् चतुर्दिक्षु ह्रीं अस्त्राय फट्॥ ततोऽष्टदलेषु पूर्वादिक्रमेण ब्राह्मी
न मोऽतेन पूजयेच्चैवदलेषु पूजयेदेता ब्राह्म्याद्याः क्रमतः सुधीः॥ अष्टदुस्य प्रणवश्चतुर्दश स्वरो विंदुयुक्तः॥ तथा च कालिका
पुराणे॥ मंत्रस्य सेतुकरणो३ कृत्वा॥ ततः इंद्रादीवज्रादीःश्च पूजयेत्॥ ततो धूपादि विसर्जनांतं कर्म्म समापयेत्॥ अस्य पुरश्चरणं ज
पः षोडशसहस्रसंख्यः तथा च यथाविधि जपेन्मंत्रं वसुयुग्मसहस्रकं॥ माद्ध्योनाज्ञेन जुहुयाच्च दशांशमनंतरं॥ ॥अथ त्रिपुरा राम
॥ ॥श्रीमायामदनैः प्रोक्तो मंत्रो वीजत्रयात्मकः॥ अस्य पूजाप्रयोगः॥ प्रातः कृत्यादि सामान्यपद्धत्युक्तपीठन्यासांतं भुवने ५२

श्वरीमंत्रोक्तजपादिपीठमन्वंतं विन्यस्य ऋष्यादिन्यासं कुर्य्यात्। तत्र यथा शिरसि संमोहनाय ऋषये नमः मुखे गायत्री छंदसे
नमः। हृदि त्रिपुटायै देवतायै नमः। ततः करांगन्यासौ श्रीं अंगुष्ठाभ्यां नमः ह्रीं तर्ज्जनीभ्यां स्वाहा क्लीं मध्यमाभ्यां वषट् श्रीं अनामिका
भ्यां हुं ह्रीं कनिष्ठाभ्यां वौषट्। क्लीं करतलपृष्ठाभ्यां फट् एवं श्रीं हृदयाय नमः ह्रीं शिरसे स्वाहा क्लीं शिखायै वषट् श्रीं कवचाय हुं ह्रीं ने
त्रत्रयाय वौषट्। क्लीं अस्त्राय फट्। तथा च निबंधे। त्रिपुटाख्यविद्रूकैस्तैर्बीजैरंगानि षट्क्रमात्। ततो ध्यानं॥ पारिजातवनमध्ये मंड
पे मणिकुट्टिमे। रत्नसिंहासने रम्ये पद्मे षट्कोणशोभिते। अधस्तात्कल्पवृक्षस्य निषण्णां देवतां स्मरेत्॥ चापपाशांबुजसरसि
जान्यंकुशं पुष्पबाणान्। विभ्राणां करशिरसिजैः रत्नमौलिं त्रिनेत्रां। हेमाभ्रां कुचभरनतां रत्नमंजीरकांचीग्रैवेयाद्यैर्विलसित
तनुं भावयेत् शक्तिमाद्यां। चामरादर्शतांबूलकसमुद्गकानावहंतीभिः कुब्जाभिः सिद्धीभिः परिवारितां। करुणापूतवर्षिण्या पश्यं
तीं साधकं दृशा। अंबुजे पद्मेन तु शंखदधतीपमपुगलमिति दक्षिणपूर्वं विवर्णीत। संपूज्य शंखस्थापनं कुर्य्यात्। ततः सामान्योक्त
पीठपूजां विधाय केशरेषु भुवनेश्वरी मंत्रोक्तजपादिपीठमन्वंते संपूज्य नत्वा ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधाया
वरणपूजां कुर्य्यात्। तत्र यथा अग्न्यादिचतुष्कोणेषु ऐं लक्ष्म्यै नमः एवं कमलायै हरये गौर्य्यै शिवायै परायै कामायै षट्कोणेषु मयपार्श्वयोः

तं·सा· ५२ शंखनिधये पद्मनिधये सर्वत्र प्रणवादि नमोन्तेन पूजयेत्। केशरेषु अग्न्यादि चतुष्कोणेषु मध्ये दिक्षु च श्री हृदयाय नम इत्यादि
नांगानि पूजयेत्। पत्रेषु ब्राह्म्यादि मातरः पूज्यास्तद्बहिरिंद्रादीन् वनितारूपान् पूजयेत्। तथा च निबंधे भोकेशान् वनिता
रूपान् अर्च्चयेत् सौम्यविग्रहान्। ततो धूपादि विसर्ज्जनान्तं कर्म समापयेत्। अस्य पुरश्चरणं जपो दशलक्षः। तथा चेमां तु लक्षं जपे
द्दूनेन मधुनाज्यवत्सहस्रकं। बिल्वोत्थैरथवा संभूतैर्मधुराक्तैः समिद्वरैर्जवापुष्पैर्घृतद्रुपाक्तो घयेद्दशपुनीगुहां। आराधः सो नालुः
अपं मंत्रस्त्रिधा पवादिकी। यवादिः कामादिकी भवेदयं॥ इति दक्षिणामूर्त्तिवचनात्॥ ततोऽभिधास्ये दुरितान्तकरि तं फलदायिनं।
तारमायावर्मबीजं आह्रीं पुष्टारान्वितः। कूर्मस्तदंते भगवान्नैरूप्तादीर्घतनुर्वर्द्धं। संवर्त्तो भगवान्मायापरं ततो द्वादशाक्षरः
मायावीतं भुवनेश्वरी। वर्मं हुं आद्रिः खकारः ईश्वरः एकारः कूर्मश्चकारस्तदंते नसुकारः भगवान् एकारः नप्सुन्नः हौं ह्री
स्वरूपं दीर्घतनुर्वर्द्धे दं हुं संवर्त्तो हकारः भग एकारस्तप्युन्नः॥ अस्यार्जुनो मुनिर्विराट् छंदस्त्वरिता देवता पुरुषार्थसिद्धये वि
नियोगः। तथा च निबंधे। मुनिरर्जुन माख्यातो विराट्छंद उदाहृतं। देवता त्वरिता प्रोक्ता पुरुषार्थफलप्रदा॥ अस्य पूजा पञ्च राम ५२
तिः प्राप्तः कृत्यादि पीठन्यासांतं कर्म विधाय हृन्मः। तथा च निबंधे। संवर्त्तको विंदुयुतः कवचेऽकेशीरसु भुवनेश्वरी जयादि पीठश

43

त्तिर्विन्यस्य मध्ये ह्रं ह्रुं हं वज्रदेह घुरु घुरु हिं गुलु गुलु हिं गुलु गर्ज गर्ज हें हैं ह्रीं पंचाननाय नमः। तथा च निबंधे संवर्तको बिंदुयुतः कव
चं सकल वियत्। वज्रदेह घुरु स्फुं दमाभीष्य हिंगुल दयं। गर्ज युग्मं वियत्तसे ड्डु वर्मान्त्य दीर्घ बिंदुमान्। पंचाननाय हृदयं पीठमंत्रः प्र
कीर्तितः॥ ततः ऋष्यादिन्यासः शिरसि ब्रह्मर्षये नमः मुखे विराट् छंदसे नमः हृदि त्वरितायै देवतायै नमः ततो मंत्रन्यासः मूर्ध्नि श्रं न
मः भाले ह्रुं नमः हृदि थं नमः नाभौ ह्रुं नमः गुह्ये ह्रूं नमः ऊर्वोः क्षीं नमः जान्वोः ह्रुं नमः जंघयोः ह्रूं नमः पादद्वये फट् नमः। तथा
च निबंधे। माया विवर्जितान् वर्णान् मूर्ध्नि भाले गले हृदि। नाभि गुह्योरु युग्मेषु जानुजंघापदेषु च। विन्यस्य व्यापकं कुर्यात्
समस्तेनैव साधकः॥ ततो मूलेन व्यापकं कुर्यात्। ततः करांगन्यासः च अंगुष्ठाभ्यां नमः ह्रुं तर्जनीभ्यां स्वाहा ह्रं ह्रीं मध्यमा
भ्यां वषट् ह्रीं ह्रुं अनामिकाभ्यां हुं ह्रूं कनिष्ठाभ्यां वौषट् ह्रें ह्रौं करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। तथा च निबंधे कूर्म्या
द्यैः सप्तभिर्वर्णैः पूर्वपूर्व वि-वर्जितैः॥ द्वाभ्यां द्वाभ्यां षडंगानि कुर्यात्साधकसत्तमः। ततो ध्याने॥ श्यामांगं वर्हिकलापशेखर यु
तामाबद्धपर्णांशुकां गुंजाहारलसत्पयोधरभरामष्टाहिपान् बिभ्रती। ताडंकांगदमेखलागुणरणन्मंजीरभां प्रापितान्कैरा
तीन्वैरदाभयं घत्तकराग देवी त्रिनेत्रोंपजे। एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्। ततः सामान्योक्तपीठपूजां विधाय

तं॰ सा॰ ५५ पद्मस्य केशरेषु पूर्वादिक्रमेण ॐ जयायै नमः एवं विजयायै अपराजितायै नित्यायै विलासिन्यै दोग्ध्र्यै अघोरायै मध्ये ह्रं ह्रुं ह्रं वज्र
देहयुक्तकपुरुगर्जद्‌ ह्रुं ह्रुं ह्रुं पंचाननाय नमः ततः पूर्ववत्‌ ध्यात्वा आवाहनादिपुष्पांजलिदानपर्यंतं विधाय पश्चादावरणपूजां कुर्या
त्। तत्र स्वाग्न्यादिकेशरेषु मध्ये दिक्षु च ह्रुं गायत्र्यै हृदयाय नमः। ह्रुं गायत्र्यै शिरसे स्वाहा ह्रुं ह्रीं गायत्र्यै शिखायै वषट्। ह्रौं
ह्रुं गायत्र्यै कवचाय हुं। ह्रुं ह्रैं गायत्र्यै नेत्रत्रयाय वौषट्‌ वौषट्‌। दिक्षु ह्रैं फट्‌ गायत्र्यै अस्त्राय फट्॥ तथा च नित्यं। अंगैः प्रणीतांमा
यंत्री केशरेषु विन्यसेत्‌ क्रमात्। दलेषु फजये देवताः श्रीवज्राद्याः सुपूजिताः। पूर्वादिष्टदलेषु श्रीं ह्रुंकारी श्री खेचरी श्री चं डा
श्री चंडी श्री छेदनी श्री क्षेपणी स्त्रि स्त्रिपश्री ह्रुंकारी श्री ह्रैंमकारी पूजयेत्। वा कंचुश्री ह्रुंकार्यै नमः इत्यादि वा ह्येऽग्रतः फट्‌का
रिण्यै नमः ततो द्वारस्योभयपार्श्वयोः ॐ जयायै नमः ॐ विजयायै नमः। तद्वा ह्ये किंकराय रक्षारदुरितान्नाशय त्वा भव ह्रुं फट्‌ इ
ति मंत्रेण किंकरं पूजयेत्। अत्र इंद्रादिपूजा नास्ति अनुक्तत्वात्। ततो धूपादिविसर्जनांतं कर्म समापयेत्। अस्य पुरश्चरणं जप ग्वर १
पो तद्दशांशतो बिल्वपत्रैः। तद्दशांशं बिल्वसमिद्भिः घृत मधु अक्ते होमयेत्। तथा बलिं दत्वा संजप्य मंत्र होमं मंत्रमेणं जितं द्विपः दशांशं राम
शं जुहुयाद्बिल्वैस्त्रिमध्वक्तैः समिद्वरैः॥ ॥अथ नित्यामंत्राः॥ ॥वाग्भवं कामबीजं च नित्यक्लिन्ने मदद्रवे स्वाहा वह्निर्धूमं ५५

त्रैघादशगर्णोयमीरितः॥ अस्य पूजाप्रयोगः॥ प्रातःकृत्यादि पीठन्यासांतं कर्म्म विधाय केशरेषु मध्ये च पूर्वादिक्रमेण जयादि
ह्रीं आसनाय नमः इत्यंतं विन्यस्य अर्घ्यादिन्यासमाचरेत्॥ तत्र यथा ग्लां स्वाहा। ऐं मध्यमाभ्यां वषट्। ऐं अनामिकाभ्यां हुं। ऐं कनिष्ठा
भ्यां वौषट्। एवं ऐं हृदयाय नमः इत्यादि षडंगेषु न्यसेत्॥ तथा च निबंधे॥ वाचा कृत्वा षडंगानि न्यां ध्यायेद्यथाविधि॥ ततो ध्यानं॥ अ
र्द्धेंदुमौलिमरुणाममराभिवंद्यामंभोजपाशसृणिपूर्णकपालहस्तां॥ रक्तांगरागवसनाभरणां त्रिनेत्रां ध्यायेच्छिवस्य वनितां मद
विह्वलांगीं॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्य्यात्॥ ततः पीठपूजां विधाय केशरेषु जयादि पीठशक्तीः संपूज्य॥ मध्ये
ह्रीं आसनाय नमः इति संपूज्य पुनर्ध्यात्वा वाहनादि पंच पुष्पांजलिदानांतं विधायावरणपूजां कुर्य्यात्॥ तत्र यथा केशरेषु अ
ग्न्यादिकोणचतुष्टयेषु मध्ये दिक्षु च ऐं हृदयाय नमः। ऐं शिरसे स्वाहा। ऐं शिखायै वषट्। ऐं कवचाय हुं। ऐं नेत्रत्रयाय वौषट्। दिक्षु
ऐं अस्त्राय फट्। अष्टपत्रेषु पूर्वादिक्रमेण ॐ नित्यायै नमः। एवं निरंजनाक्लेदिनीक्लिन्नामदनातुरामदद्रवाद्राविणीद्राविणीद्रा
विणीः सर्वत्र प्रणवादिनमोंतेन पूजयेत्॥ तदा हो हं द्रां द्रीं नूवग्रादीश्च पूजयेत्॥ ततो धूपादि विसर्जनांतं कर्म्म समापयेत्॥ अ
स्य पुरश्चरणं च त्रिलक्षं जपः॥ तथा च त्रिलक्षं जपित्वा च मधुराक्तमधूककजैः॥ कुसुमैरयुतं हुत्वा तोषयेद्रुतात्मनः॥ ॥

तं. प्र
४५

अथ वक्रप्रस्तारिणी ॥ ॥ वाग्भवायानंतरं नित्यक्लिन्ने भ्रूयो मदद्रवे स्वाहा ह्रां ज्ञो रविसंख्यातो मंत्रो वश्यप्रदायकः ॥ अस्य पूजायंत्रं ॥
षट्कोणद्वादशदलं वसुद्वारं चतुरस्रं च । ततः पूजा । प्रातः कृत्यादि पीठन्यासांतं विधाय केशरेषु जयादि पीठमंत्रं विन्यस्य ऋ-
ष्यादिन्यासं कुर्यात् । शिरसि श्रीगिरिसे ऋषये नमः । मुखे ष्टुपछंदसे नमः । हृदि वक्रप्रस्तारिण्यै देवतायै नमः । ततः करांगन्यासौ
ऐं अंगुष्ठाभ्यां नमः इत्यादि ऐं हृदयाय नमः इत्यादौ च । तथा च निबंधे । वाग्भवेन षडंगानि विदध्यान्मनुवित्तमः । ततो ध्यानं ॥
रक्तां रक्तपोतेरविदलकमलाभ्यंतरे मञ्चिषण्णां रक्तांगीं रत्नमौलिस्फुरितशशिकलां स्मेरवक्त्रां त्रिनेत्रां । वीणां पूरेषु पा-
शांकुशमदनधनुः सत्कपालानि हस्तैर्बिभ्राणामानतांगीं स्तनभरनमितामंबिकां गाश्रयामः । एवं ध्यात्वा मानसैः संपूज्य
शंखस्थापनं विधाय पूर्ववत्पीठपूजां कृत्वा पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानं विधायावरणपूजामारभेत् । तत्र-
था । अग्न्यादिकोणमध्ये दिक्षु च ऐं हृदयाय नमः इत्यादिना संपूज्य द्वादशदलेषु पूर्वादि ॐ ह्रूं ह्लें खायै नमः । एवं क्लें दि-
नी क्लिन्नी ह्रौं भिणी मदनातुरी । निरंजना वदिवत्तावती मदनावती मेखला द्राविणी वेगावत्स्मरा ततो बहिः ब्राह्म्यादि मातरः । राम
पूजयेत् । तद्बहिरिंद्रादिलोकपालान् पूजयेत् । तथा च निबंधे मातरो दिग्विदिक्स्थिताः पूज्या भ्राग्ने दिशी स्वरीः ततो ४५

धूपादिविसर्जनांतं कर्म्मसमापयेत्॥ अस्य पुरश्चरणं लक्षजपः तथा मम मंत्रं मंत्री जपेल्लक्षं जपांते तु दशांशतः। अयुतैरान
वृक्षोत्थैः दर्शांतत्रिशीतैः समिद्वरैः राजवृक्षः सोनालुः॥ ॥अथ दुर्गामंत्राः॥ ॥माया त्रिः कर्णो विकर्णो द्योः भूयो सेसर्गवान्भवेत्॥
पंचांतकः स्थितिच्छायावान् मारुतो मौलिकासनः। मायाद्यं हृदयांतो यं मंत्रो वस्वक्षरात्मकः। अत्रिर्दकारः कर्णा उकारः पंचां
तको णकारः स्थितिच्छाया आकारः मारुतो यकारः। मौलिक ऐकारः॥ अस्य पूजाप्रयोगः॥ प्रातः कृत्यादि पीठन्यासांतं कर्म्म वि
धाय केशरेषु मध्ये पीठशक्तिर्विन्यसेत्। ओं प्रभायै नमः। ईं मायायै ॐ जयायै एं सूक्ष्मायै ऐं विशुद्धायै ॐ नंदिन्यै। ओं सुप्रभायै
ओं विजयायै अ सर्वसिद्धिदायै॥ तदुपरि ॐ वज्रनखदंष्ट्रायुधाय महासिंहाय हुं फट् नमः इति न्यसेत्। ततः ऋष्यादिन्यासः
तद्यथा शिरसि नारद ऋषये नमः। मुखे गायत्री छंदसे नमः॥ हृदि दुर्गायै देवतायै नमः ततः करांगन्यासो ॐ ह्रीं दुं दुर्गायै अंगु
ष्ठाभ्यां नमः॥ ह्रां ॐ ह्रीं दुं दुर्गायै तर्जनीभ्यां स्वाहा॥ ह्रूं ॐ ह्रीं दुं दुर्गायै मध्यमाभ्यां वषट्॥ ॐ ह्रीं दुं दुर्गायै अनामिकाभ्यां हुं ह्रैं ॐ
ह्रीं दुं दुर्गायै कनिष्ठाभ्यां वौषट् ह्रः ॐ ह्रीं दुं दुर्गायै करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु तथा च विनिवेशयेत्। नमस्कारवियुक्तेन
मूलमंत्रेण देशिकः ह्रीमाद्यैः सह कुर्वीत जातियुक्तं षडंगकं॥ तन्मोध्यानं॥ सिंहस्थां शशिशेखरां मरकतप्रख्यां चतुर्भि

नं॰पि॰ ५६ जैः॥ शंखचक्रधनुःशानीश्च दधतीनैत्रैः त्रिभिः शोभितां॥ आमुक्तांगदहारकंकणरणत्कांचीक्वणन्नूपुरां दुर्गां दुर्गतिहारिणीं
भवतु नो रत्नोल्लसत्कुंडला। एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ ततः पीठपूजां कृत्वा केशरेषु पूर्वादिमध्ये च
ओं प्रभायै नमः एवं ईं मायायै ऊं जयायै ऐं सूक्ष्मायै ऐं विशुद्धायै ओं नंदिन्यै ओं सुप्रभायै ओं विजयायै ओंः सर्वसिद्धिदायै। तत
पद्मिरत्नेन खड्गदंष्ट्रायुधाय महासिंहाय हुं फट् नमः इति पूजयेत्॥ ततः ध्यात्वा विधिवत्। अङ्गि दूं स्वचयत्नी वरहितैः पूजयेदिमाः।
प्रणवानंतरं वज्रदंष्ट्रायुधाय महासिंहाय वह्निः तति संहः पुनर्ध्यात्वा वाहनादिषु बांजलिदानपर्यंतं विधायावरण
पूजामारभेत॥ तत्प्रथा॥ अग्निनैर्ऋतवायुवीशानकोणेषु मध्ये दिक्षु च ह्रां ओं ह्रीं दुर्गायै हृदयाय नमः इत्यादिना पूजयेत्।
ततः पत्रेषु पूर्वादिकं जयायै नमः एवं विजयायै कीर्त्यै प्रीत्यै प्रभायै श्रद्धायै मेधायै श्रुत्यै पत्राग्रेषु ओं शं
खाय चक्राय गदायै खड्गाय पाशाय अंकुशाय पानपात्राय चापाय तद्वाह्यं इंद्रादीन् वज्रादींश्च पूजयेत्॥ ततो धूपादि विसर्जनां
तं कर्म समापयेत्। अस्य पुरश्चरणं अष्टलक्षसंख्यः। तथा च वसुलक्षं जपेन्मंत्री तिलैर्मधुरलोडितैः। पयोन्नसारान्दु राम
यात्तत्सहस्रं जितेंद्रियः॥ तेन वा चतिकोऽष्टसहस्रहोमः॥ ॥अथ महिषमहिषमर्दिनीमंत्राः। तंत्रविशेषे नयनं श्रीको ५६

मर्द्दिनि ठद्वयं। अष्टादशी समाख्याता विद्या महिषमर्द्दिनी। सैषा मंत्रा रापणी नंत्रे। विषं हि मज्जाकालो ग्निरत्रिर्निष्ठो निरुद्धयं वि
षं यं म श्कारः परेन्तु एत द्वचनादि कारयुक्तो दकारश्चयं मंत्र स्तारादि र्मायादिः कामादि र्वाग्भवादि र्वा पृथ्वीजादि कवचादि र्वा।
न वा क्वैरो भवति। तथा च तिं। तथा च विश्वसारे ब्रणवाद्यां जपेद्विद्यां मायाद्यं वाजपेत्सुधीः। वधूवीजादिकां वापि कवचा
द्यां जपेत्तथा। सर्वकालेषु सर्वत्र कामाद्यां प्रजपेत्सुधीः। वाग्भवाद्यां जपेत्तां तु देवी वाक्यविशुद्धये। विना वीजेन मीहाविद्या
निर्विजा परिकीर्त्तिता। तुटिती वीजयुग्मेन मुखे पुत्यं च देशाकैः। दशाद्धरी समानास्ति विद्या त्रिभुवनेश्वरी। वर्णं वं चतत
तो मायाभवेद्विद्या पुनर्द्दशाः कामीवर्ण वर्मित्युक्तो भवेद्विद्या पुनर्दश। अस्य पूजा प्रातःकृत्यादि पीठन्यासांतं समाप्य केश
रेषु मध्ये च उग्रीमं त्रो कपीठशक्तीः पीवम तुं च न्यसेच कृत्वा करांगन्यासो कुर्यात्। तद्यथा ह्रीं हिंसि हुं फट् अंगुष्ठाभ्यां न
मः महिषशत्रोः शार्विवं फट् तर्ज्जनीभ्यां स्वाहा। महिषं हेषय हुं फट् मध्यमाभ्यां वषट्। महिषं हन हन देवि हुं फट् अनो
मिकाभ्यां हुं॥ महिष सूदनि हुं फट् कनिष्ठाभ्यां फट्। महिष हिंसिके हुं फट् हृदयाय नमः। महिषशत्रोः शार्विं हुं फट्
शिरसे स्वाहा॥ महिषं हेषय हुं फट् शिखायै वषट्। महिषं हन रदेवि हुं फट् कवचाय हुं। महिष सूदनि हुं फट् अस्त्रा

तं॰ कृ॰

यफट्॥ ततो ध्यानं॥ गोरुगेपलसन्निभां मणिमौलिकुंडलमंडितां। नौमि भाललचिलोचनां महिषोत्तमांगनिषेदुषीं शंखचक्रकृ
पाणखेटकबाणकार्मुकशूलकावृतत्रिशूलिनीमपि विभ्रतीं निजबाहुभिः शिशेखरीमेवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं
कृत्वा पीठपूजां विधाय केशरेषु मध्ये च पूर्वोक्तपीठशक्तीः पीठमनुं च पूजयेत्॥ ततः पुनर्ध्यात्वा वाहनादि पंचपुष्पांजलि
दानपर्यंतं विधाय आवरणजामारभेत्॥ अग्निमिनुं च पूर्वे नैर्ऋत वायव्ये ईशान पूर्वादिक्रमेण षडंगं पूजयेत्॥ ततः पत्रेषु पूर्वादि अं
दुर्गायै नमः ईं वरवर्णिन्यै ॐ आर्यायै ॐ कनकप्रभायै॥ ततः कृत्तिकायै ॐ अभयप्रदायै ऐं कन्यायै पद्मायै षु पंचक्रा परं शंखये॥
तत्र खड्गाय खेटकाय शंबाणाय शंचापाय पांपशाय अंकुशाय शूलाय हंतत्रिनेत्रे तद्बहिरिंद्रादीन् वज्रादींश्च पूजयेत्॥ ततो धूपादि वि
सर्जनांतं कर्म समापयेत्॥ एहिएहि पदं हुं फट् हुं हूं पदद्वयं साधयपदितयं ब्रूयात् खादय पदितयं पुनः सर्वसिद्धिपदं देहि तदा स्वा
हापदं वदेत्॥ बलिदानस्य मंत्रोयं मदीरिताः परिकीर्तितः॥ अनेन मंत्रेण जपसमर्पणात् परं कृत्रप्या दिशि त्रिकोणमंडलं कृ
त्वा बलिं दद्यात्॥ अस्य पुरश्चरणं अष्टलक्षजपः॥ ॥अष्टसहस्रं तिलहोमः॥ ॥तथा च अष्टसहस्रं जपेन्मंत्रं तत्सहस्रं सह राम
स्रं तिलैः शुभैः इत्यादिवचनात्॥ ॥अथ जपदुर्गामंत्रः॥ ॥तारो दुर्गे युगं रक्षिणी स्वाहांतात्यसलोचनां॥ दिश्यां ततो जपदुर्गायै वि ४७

57

घावेशादशाक्षरी। अस्य पूजा॥ प्रातःकृत्यादि दुर्गायंत्रोक्तं ऋष्यादिन्यासांतं कर्म कृत्वा करांगन्यासौ कुर्यात्। तत्र जप्य यथा ॐ दुर्गे ॐ अंगु
ष्ठाभ्यां नमः॥ दुर्गे तर्जनीभ्यां स्वाहा। दुर्गायै मध्यमाभ्यां वषट्। भूतरक्षिणि अनामिकाभ्यां हुं। ॐ दुर्गे दुर्गे रक्षिणि कनिष्ठाभ्यां वौषट्।
ॐ दुर्गे रक्षिणि अस्त्राय फट्। एवं हृदयादिषु। तथा च निबंधे। तारादि दुर्गे हृदयं दुर्गे शिरस्तु रीरितं। दुर्गायै स्याच्छिखा वर्म भूत
रक्षिणि कीर्तितं। तारादिदुर्गे युगलं रक्षिण्यस्त्रमुदीरितं॥ ततो ध्यानं॥ कालाभ्राभां कटाक्षैररिकुलभयदां मौलिबद्धेंदुरेखां
शंखं चक्रं कृपाणं त्रिशिखमपि करैरुद्वहंतीं त्रिनेत्रां॥ सिंहस्कंधाधिरूढां त्रिभुवनमखिलं तेजसा पूरयंतीं ध्यायेद्दुर्गां ज
याख्यां त्रिदशपरिवृतां सेवितां सिद्धसंघैः॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा पूर्वोक्तपीठपूजां विधाय पु
र्ववत्तत्पूजां कुर्यात्। अस्य पुरश्चरणं पंचलक्षं जपः॥ हुतेन दशांशहोमः॥ तथा च निबंधे॥ बाणलक्षं जपेन्मंत्रं हुतेन
ज्ञे कृपाचरुतः। दशांशसंख्यातेव दौ ब्राह्मणान् विभोजयेत्। अष्टाक्षरी दिने पीठे पूजयेत् पूर्ववत् सुधीः। ज्वलेत् शूलिनि
दुष्टग्रह हुं स्वाहा। ज्वलनपदस्थाने शूलिनीति पदं ततः। दुष्टग्रह हुम त्वा तेन वह्निजायावधिर्मंत्रः॥ अस्य पूजा॥ प्रातःकृत्या
दि दुर्गामंत्रोक्तपीठन्यासांतं कर्म कृत्वा ऋष्यादिन्यासं कुर्यात्। शूलिनि दुर्गे हुं फट् अंगुष्ठाभ्यां नमः। शूलिनि वरदे हुं

तं॰ प्र॰ ५४

...ट् तर्ज्जनीभ्यां स्वाहा। शूलिनि विंध्यवासिनि हुं फट् मध्यमांभ्यां फट्। शूलिनि असुरमर्द्दिनि सुरप्रिये त्रासय दं हुं फट् अनामिकाभ्यां हुं
शूलिनि देवसिद्धसुरपूजिते नंदिनि रक्ष महायोगेश्वरि हुं फट् कनिष्ठाभ्यां फट्। एवं हृदयादिषु तथा च निबंधे दुर्गे हृद् वरदे शीर्षे
विंध्यवासिनि तच्छिखा। असुरीं तेमर्द्दिनि स्यायुद्धपूर्वप्रियेनमः। त्रासय द्वितयं वसिद्धसुपूजिते। नंदिनि स्याद्वक्त्रयुगं महायो
गेश्वरि क्रमात्। शूलिन्याद्या हुं फडंताः पंचांगमनवः क्रमात्। ततो ध्यानं॥ अध्यारूढां मृगेंद्रं सजलजलधरश्यामलां हस्तप
द्मैः शूलं वाणं कृपाणं त्वरिजलजगदाचापपाशान्वहंती। चंद्रोत्तंसां त्रिनेत्रां चतसृभिरसिभिः खेटकं विभ्रतीभिः कन्याभिः से
व्यमानां प्रतिभटभयदां शूलिनीं भावयामि। एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कुर्य्यात्। ततः पूर्वोक्तपीठपूजां विधाय
पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्य्यंतं कृत्वावरणपूजां कुर्य्यात्। कोणदिक्ष्वग्रगानि त्वष्टपत्रेषु पूर्वादि ॐ दुर्गा
यै नमः। एवं वरदायै विंध्यवासिन्यै असुरमर्द्दिन्यै युद्धप्रियायै नंदिन्यै महायोगेश्वर्य्यै। ततः पत्राग्रेषु तदस्त्राणि शंखचक्रम
सिं पुनः। गदेषुचापशूलीनि पाशं पश्चाद्दिशोधिपान्। अस्य पुरश्चरणं पंचदशलक्षजपः। यथा मधुमिनं जपेन्मंत्री राम ४८
वर्णलक्षं विचक्षणः सर्पिषान्नेन वा होमस्तद्दशांशमितो भवेत्॥ अथ वर्णितं तत्त्ववद्धे विश्वबोधविधायिनी। यस्या मनुपल

ज्ञायं सर्वमेतज्जगज्जडं ॥ ॥ अथ वागीश्वरीमंत्राः ॥ ॥ अग्निर्वृतुणसंहृष्टोवदवाग्वादिनिवदयं। सरस्वत्याद्यक्षरैर्णं यं वागीश्वर्य
फलप्रदः। तथा भुवनेशी संपुटो यं महासारस्वतप्रदः ॥ अस्य पूजार्थ यंत्रं ॥ व्योमं होरसवर्णिकर्णिकमत्वा दं देः स्फुरत्तकेशरं
पत्रांतर्गतपंचवर्गयशात्लाणि दिक्षु वर्गक्रमात्। आशासु त्रिषु लांवतत्वांठगलियुजा क्षौणीपुरेण वृतं पद्ममिति ॥ अस्य
पूजा ॥ प्रातःकृत्यादि पीठन्यासांतं कार्यं विधाय केशरेषु मध्ये च ॐ मेधायै नमः प्रज्ञायै प्रभायै विद्यायै धृत्यै स्मृत्यै बुद्ध्यै विघे
श्वर्यै नम इति मध्ये वर्णपद्मासनाय नमः ॥ ततश्च ष्यादिन्यासः शिरसि कण्वऋषये नमः ॥ मायापुटित भ्वृत। बृहस्पतये ऋ
षये ॥ मुखे विराट् छंदसे नमः ॥ हृदि वागीश्वर्यै देवतायै नमः ॥ अथ मंत्रन्यासः ॥ शिरसि वं नमः श्रवणयोर्ईं नमः वं नमः चक्षु
षोः दें नमः वां नमः नासिकयोः वां नमः दिं नमः मुखे निं नमः लिंगे स्वां नमः गुह्ये हों नमः मातृकायाः करांगन्यासौ कुर्यात्। ततो
ध्यायेत्। तथा च निवंधेन्यस्य वर्णानुषडंगानि मातृकोक्तं कल्पयेत्। ततो ध्यायेत्। तरुणसकलमिंदोर्बिभ्रती शुभ्रकांतिः कु
चभरणमितांगी सन्निषण्णा सिताब्जे। निजकरकमलोद्यल्लेखनी पुस्तकश्रीः सकलविभवसिद्ध्यै पातु वाग्देवता वः। एवं ध्या
त्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्। ततः पीठपूजां कृत्वा केशरेषु मध्ये च मेधादिपीठमन्वंतं संपूज्य पुनर्ध्यात्वा आ

तं.सा. ४९ नादिपंचपुष्पांजलिदानपर्य्यन्तं विधायावरणपूजां कुर्य्यात्। अग्निकोणे अं कं खं गं घं ङं आं हृदयाय नमः नैरृते इं ईं शिरसे स्वाहा वायुको
णे उं टं। ऊं शिखायै वषट्। ईशाने एं तं ऐं कवचाय हुं मध्ये ओं पं औं नेत्रत्रयाय वौषट्। दिक्षु अं यं १० अः अस्त्राय फट्। पत्रेषु पूर्वादि ओं
योगायै नमः। एवं सत्यायै विमलायै ज्ञानायै क्रियायै बुद्ध्यै स्मृत्यै मेधायै प्रज्ञायै इत्यादि केशरेषु ब्राह्म्याद्याः पूज्याः। तद्बहिरिन्द्रादीन् वज्रादीं
श्च पूजयेत्। ततो रूपादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं दशलक्षजपः। तथा च दशलक्षं जपेन्मंत्रं दशांशं जुहुयात्ततः
पुंडरीकैः पयोभ्यक्तैस्तिलैर्वा मधुरप्लुतैरिति॥ मंत्रांतरं॥ हृदयांते भगवति वद द्वयं ततः। वाग्देवि वह्निजायांतं वाग्भवाद्यं समुद्ध
रेत्। अस्य पूजा॥ प्रातःकृत्यादि पीठन्यासांतं विधाय केशरेषु मध्ये च पूर्वोक्तपीठशक्तीः पीठमंत्रेण च न्यसेत्। ततः पूर्वोक्तऋष्या
दिकं कृत्वा करांगन्यासौ कुर्य्यात्। तद्यथा ऐं अंगुष्ठाभ्यां नमः। नमस्तर्जनीभ्यां स्वाहा भगवति मध्यमाभ्यां वषट् वद वद ऐं अनामिका
भ्यां हुं। वाग्देवि कनिष्ठाभ्यां वौषट् स्वाहा करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु तथा च विन्यसेत्। मनोः षड्भिः पदैः कुर्य्याज्जातियुक्तं षडंग
कं॥ ततो ध्यानं॥ शुभ्रां स्वच्छविलेपमाल्यवसनां शीतांशुखंडोज्वलां व्याख्यामक्षगुणं सुधाढ्यकलशं विद्यां च हस्ताम्बुजैः। बिभ्राणां
कमलासनां कुचनतां वाग्देवतां सुस्मितां। वंदे वाग्विभवप्रदां त्रिनयनां सौभाग्यसंपत्करीं। एवं ध्यात्वा मीनसेः संपूज्य पंचस्वस्थाप राम ४९

नं कुर्य्यात्॥ ततः पूर्वोक्तक्रमेण पूजयेत् किंत्वं गमन्त्रो विशेषः॥ अस्य पुरश्चरणमष्टलक्षजपः। यथाह विष्णुः श्रीजपेन्मंत्रं वसुलक्षमनन्यधीः॥ द
शांशं जुहुयाद्दत्ते तिलै राज्यपरिप्लुतैः॥ तारो मायाधरो विंदुः शक्तिस्तारः सरस्वती ईं तानं घतिको मंत्रः प्रोक्त एकादशाक्षरः॥ अस्य पूजा॥ प्रातः
कृत्यादि पूर्वोक्तपीठमन्वर्त्तं विन्यस्य पूर्वोक्तप्राणायामादिन्यासं कुर्यात्॥ ततो मंत्रन्यासः ॐ नमो ब्रह्मरंध्रे ह्रीं नमो भ्रूमध्ये ऐं नमः ह्रीं नमः वक्त्रयोः
ॐ नमः सं नमः कर्णयोः वं नमः स्वं नमः नासिकयोः ईं नमः स्वं नमः मुखे नेमः लिंगे मं नमः गुह्ये नं नमः ततः करांगन्यासौ कृत्वा ऐं अंगु
ष्ठाभ्यां नमः इत्यादि एवं हृदयादिषु तथा च निबंधे ब्रह्मरंध्रे भ्रूवोर्मध्ये नवरंध्रेषु च क्रमात्॥ मंत्रवर्णान्न्यसेन्मंत्री वाग्भवेनांगकल्प
नेत्यादि॥ ततो ध्यानं॥ वाणीं पूर्णनिशाकरोज्ज्वलमुखीं कर्पूरकुंदप्रभां चंद्रार्द्धांकितमस्तकां निजकरैः संबिभ्रतीमादरात्॥ वीणा
मक्षगुणं सुधाढ्यकलशं विद्यां च तुंगस्तनीं दिव्यैराभरणैर्विभूषिततनुं हंसाधिरूढां परां॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थाप
नं कुर्यात्॥ ततः पीठपूजां विधाय केसरेषु मध्ये च पूर्वोक्तरूपीठमनुं च पूजयेत्॥ पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यं
तं विधायावरणपूजां कुर्यात्॥ देव्याद्दक्षिणे ॐ संस्कृतायै वां ऽन्यभ्ये वामे प्राकृतायै। वाऽग्रे ततः केशरेषु अग्निकोणे ऐं हृदयाय न
मः मैं ऋतं ॐ शिरसे स्वाहा वायव्यें ॐ शिखायै वौषट् ईशाने ऐं कवचाय हुं मध्ये ऐं नेत्रत्रयाय वौषट् दिक्षु ॐ अस्त्राय फट् ततः

सा. ५० पूर्वपत्रेषु पूर्वादिशं प्रज्ञायै मेधायै श्रुत्यै शान्त्यै स्मृत्यै वागीश्वर्यै मत्यै स्वस्त्यै ततः पत्राग्रेषु ब्राह्म्याद्याः पूजयेत् ॥ जयहरिद्रादीन्व
ज्रादींश्च पूजयेत् ॥ ततो धूपादि विसर्जनान्तं कर्म समापयेत् ॥ अस्य पुरश्चरणं द्वादशलक्षजपः ॥ यथा जपेद्वादश लक्षाणि तत्सह
स्रं सितांबुजैः ॥ नागचंपकपुष्पैर्वा जुहुयात् साधकोत्तमः ॥ वाचस्पतेऽमृते भूर्भुवः स्रु इति कीर्तितः ॥ वाग्घोमन्त्र संख्यातो रुद्रसंख्या
करोपरः ॥ अस्य पूजादिकं पूर्ववत् तत्र ध्यादिन्यासस्तु ऐं अंगुष्ठाभ्यां नमः वाचस्पते तर्जनीभ्यां स्वाहा अमृते मध्यमाभ्यां वषट् भूर्भुव
अनामिकाभ्यां हुं स्रुः च कनिष्ठाभ्यां वौषट् एवं हृदयादिषु तथा चलिवेधो कुर्याद्दंता निविधि वर्णानां घैः पंचभिः पदैः ॥ ध्यानं तु
आसीना कमले करै जपवटीं पद्मद्वयं पुस्तकं बिभ्राणा तरुणेंदुबद्धमुकुटा मुक्तेंदुकुंदप्रभा भालोन्मीलितलोचना कुचभरा
नाभवद्भूतये भूयाद्वागधिदेवता मुनिगणैरासेव्यमानानिशं ॥ पूजादिकं तु पूर्ववत् ॥ अस्य पुरश्चरणमेकादशलक्षजपः तथा च
रुद्रलक्षं तपेन्मंत्रं दशांशेन तु पायसैः ॥ मंत्रांतरमाह ॥ तोयपद्मस्थयने विष्णोः स केवलचतुर्मुखं अपीसंपुतो वह्निर्विंदुसंयु
तु मानन्दभृगुः ॥ तोयं वकारः विष्णुशोधनं माकारः केवलेन अकाररहितेन चतुर्मुखेन ककारेण युक्तं तेन वाक इति तेन च वाग्भ राम
वं लक्ष्मीं तेत्परेतु लक्ष्मणे लक्ष्मणा भयानता ॥ निरूढलक्षणयोः शक्तितुल्यत्वात् वाक्यवाग्भवमिति पर्यायः ॥ वक्तते तत्र ॥ द्वादशाक्ष ५०

50

रमुद्धृत्य विष्णुनापरिभूषितं। विंदुनादसमायुक्तं वह्निबीजं स मुद्धरेत्। षष्ठस्वरसमायुक्तं द्वितीयं बीजमुद्धरेत्। चंसड्बीजं समुद्धृत्य वह
एं योजयेत्ततः आकारयुक्तो वकारः केमस्तके वलइति ख्युत्यहृत्या केवलोऽनुस्वारः चतुर्मुखः ककारस्तथ्यांसहितं नकाम इति वदंति। तच्च
दशस्वराहृदं विंदुनादविभूषितं इति विश्वसारवचनात् वाग्भवबीजमेव अस्य पूजा पूर्ववत्। करांगः न्यासस्तु दिस्तैः त्रिपिंडीजैर्विध्य
यातथावलिवंधे अंगानि कल्पयेत्। मंत्री दितक्रैर्मुणोनि सप्तैः। ध्यानं तु मुक्ताहारावदातां शिरसि घ्राशिकलालंकृतां वा कुंधिःस्तैर्व्याख्यां
वर्णीं क्षमालांमणिमयकलसंयुक्तकंचोद्धृहंतीं। आपीनोत्तुंगवक्षोरुहभरविलसन्मध्यदेशामधीशां वाचामीडे विरायत्रिभुव
ननमितां पुंडरीके निषण्णां॥ अस्य पुरश्चरणे अक्षरलक्षं त्रिलक्षं जपः। त्रिलक्षं प्रजपेन्मंत्रं जुहुयात्तद्दशांशतः। पायसेराज्यसंसिक्तैः सं
स्कृते हव्यवाहने॥ ॥अथ पारिजातसरस्वती मंत्रः॥ ॥मंत्रदेवप्रकाशिकायां सवत्रणवहृल्लेखासंपुटित हकारसकारैकार विं
दुयुक्तः सरस्वती॥ ङेंतानतिः॥ अस्य पूजा प्रातः कृत्यादिपीठमंत्रं तन्यासमस्तमुण्यादिन्यासं कुर्यात्। शिरसि कर्णे व्यंबयेन मः भु
खे वृत्तपुंसे नमः हृदि सरस्वत्यै देवतायै नमः॥ तमोमातृकोक्त करांगन्यासं विद्ध्यात्। ततो मूर्धि भ्रूमध्ये नेत्रे कर्णे नासा पुट
पवदनगुह्यपादद्वयेषु एकादशाक्षरन्यासः। दक्षिणमूर्तिसंहितायां तु संपत्प्रदायां भैरव्यां वाग्भवं बीजमालिख्य तः। नारेलपर

नं.सा. पादेविसंपुटीकृत्य मंत्रवित्त। सरस्वत्यै हृदंतोयं फड्डा ऐं मनुरीरितः। दक्षिणामूर्त्तिः संप्रोक्तो गायत्री छंद ईरितं। पारिजातेश्वरी वाणी देवता
परिकीर्त्तिता। तत्री पंच दिती पंचवीजं शक्ती चतारकं। कीलकं परमेशानि महासारस्वतप्रदा। षड्दीर्घस्वरसंभिन्नवीजैरंगानि विन्यसेजा। ता
तो ध्यानं हंसारूढा हरहसितहारेंदुकुंदावदाता वाणि मंदस्मितरुचिमुखी मौलिबद्धेंदुरेखा। विद्यावीणामृतमयघटामक्षमालादीप्तह
स्ता शुभ्राब्जस्याभवदमपितप्राप्तमेभारती या तु। अस्य पूजादिकं पूर्वोक्तकादशाक्षरीवत्। पुरश्चरणं तु द्वादशलक्षजपः। अर्कपु
ष्पैभागचंपकैर्वा गुर्जुरूपा द्वादशसहस्रकमिति॥ सरस्वतीमंत्राः॥ ॥अथ लक्ष्मीमंत्राः॥ ॥अथ वक्ष्ये श्रियो मंत्रान् श्रीसौभाग्यफल
प्रदान्। यस्याः कटाक्षमात्रेण त्रैलोक्यमपि वर्द्धते॥ वांतं वह्निसमारूढं वामनेत्रेंदुसंयुतं। वीजमेतत् भृगुश्रियः प्रोक्तं सर्वकामफलप्र
दं॥ अस्य पूजाप्रयोगः॥ प्रातः कृत्वा द्विपीठन्यासांतं कर्म्म विधाय केशरेषु मध्ये च अं विभूत्यै नमः उन्नत्यै कांत्यै सृष्ट्यै कीर्त्यै सरस्व
त्यै पुष्ट्यै तुष्ट्यै [illegible] मध्ये श्री कमलासनाय नमः। तत ऋष्यादिन्यासं कुर्यात्। शिरसि भृगवे ऋषये नमः मुखे निवृच्छंदसे नमः हृ
दि श्रियै देवतायै नमः ततः करांगन्यासः श्रां अंगुष्ठाभ्यां नमः श्रीं तर्जनीभ्यां स्वाहा श्रूं मध्यमाभ्यां वषट् श्रैं अनामिकाभ्यां हुं श्रौं कनिष्ठा राम
भ्यां वौषट् श्रः करतलपृष्ठाभ्यां फट् एवं हृदयादिषु तथा च ∴ निवंधे सांगानि षड्दीर्घयुक्तेन नमा वीजेन कल्पयेत्। ध्यानं कांत्या कांच ५१

नमस्त्रिभां। हिमगिरिप्रख्यैश्चतुर्भिर्गजेंद्रैर्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां श्रियं। बिभ्राणां वरमब्जयुग्ममभयं हस्तैः कीरीटोज्वलां
क्षौमाबद्धनितंबबिंबललितां वंदेरविंदस्थितां। एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्। ततः पीठपूजां विधाय केसरेषु विभूत्यादि
पीठमन्वंतं संपूज्य पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजां कुर्यात्। तद्यथाग्नेय्यादिकोणकेसरेषु मध्ये श्री
हृदयाय नमः इत्यादिना संपूज्य दिक्दलेषु दमकाय सलिलाय पशुगानलवे कुरंटकाय ततो देव्या दक्षिणे शंखनिधये वसुधारायै वामे प
द्मनिधये वसुमत्यै पत्राग्रेषु पूर्वादि वासुदेवाय शंकर्षणाय प्रद्युम्नाय अनिरुद्धाय बलाकै विमलायै कमलायै वनमालिकायै वि
भीषिकायै मलिकायै शांकर्यै वसुमालिकायै ततः बहिरिंद्रादीन् वज्रादींश्च पूजयेत्। ततो धूपादिविसर्जनांतं कर्म समापयेत्। अस्याः
पुरश्चरणं द्वादशलक्षजपः। तथा च भानुलक्षं जपेन्मंत्रं दीक्षितो विजितेंद्रियः। ततस्सम्यग्जुहुयात्कमलैर्मधुरोक्षितैः। जपान्ते जु
हुयान्मंत्री त्रिमध्वक्तैर्विल्वैः। विल्वैः फलैर्वा जुहुयात् श्रियमिच्छति वा साधकोत्तमः॥ मंत्रांतरमाह॥ वाग्भवं वनिताबीजं सौम्यायामकर
केतनः। चतुर्बीजात्मको मंत्रः सर्वाभीष्टफलावहः॥ अस्य पूजादिकं पूर्ववत् केवलं ध्याने तु विशेषः। ध्यायेत्। माणिक्यप्रतिम
प्रभां हिमनिभैस्तुंगैश्चतुर्भिर्गजैर्हस्ताग्राहितरत्नकुंभसलिलैरासिच्यमानां सदा हस्ताब्जैर्वरदानमंबुजयुगाभीतिर्दधानां क

२ रैकां तां कांक्षितपरिजातलतिकं सरोजावंदे सनं ॥ अस्यपुरश्चरणं द्वादशलक्षजपः। तथाच भानुलक्षं हविष्याशी जपेद्दत्तसरोरुहैः। जु
हूयाद्दसतोः पद्मैस्तत्सहस्रं जितेन्द्रियः। नमः कमलांते वासिन्यै ठद्वयमिति प्रोक्तो दशाक्षरः॥ तथाच निबंधे। नदीर्घामयादि विसर्गी तो वृ
त्तो भानुर्वसुधरावांतो सिन्यैप्रियावद्भूर्ममनुः प्रोक्तो दशाक्षरः। पूर्ववत्तत्पीठमन्त्रं तं विन्यस्य ऋष्यादिन्यासं कुर्यात्। शिरसि दक्षिणामूर्त्ति
ऋषये नमः। मुखे विराट् छंदसे नमः। हृदि श्रियै देवतायै नमः। ततः करांगन्यासो जप्यथा ॐ देव्यै नमोऽङ्गुष्ठाभ्यां नमः। पद्मिन्यै नमस्त
र्जनीभ्यां स्वाहा। विष्णुपत्न्यै मध्यमाभ्यां वषट्। वरदायै नमोऽनामिकाभ्यां हुं। कमलरूपायै नमः कनिष्ठाभ्यां फट्। एवं हृदयादिषु। तथा
च निबंधे। देव्यै हृदयमाख्यातं पद्मिन्यै शिव ईरितं। विष्णुपत्न्यै शिखा प्रोक्ता वरदायै तनुच्छदं। अस्त्रं कमलरूपायै नमोऽन्ताः प्रणवा
दिका॥ ततोध्यानं॥ आसीना सरसीरुहे स्मितमुखी हस्तांबुजैर्बिभ्रती दानं पद्मयुगाभये च वपुषा सौदामनी सन्निभा। मुक्ताहारविराज
मानपृथुलोत्तुंगस्तनोद्भासिनी। पायाद्वः कमला कटाक्षविभवैरानंदयंती हरिं। एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं पीठमन्त्रवत्
पीठपूजां कृत्वा पुनर्ध्यात्वा पुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत्। अग्न्यादिकोणचतुष्के पु देव्यै नमो हृदयाय नमः। प राम
द्मिन्यै नमः शिरसे स्वाहा। विष्णुपत्न्यै नमः। शिखायै वषट्। वरदायै नमः। कवचाय हुं। दिक्षु कमलरूपायै नमोऽस्त्राय फट्। ततः ५२

पूर्वादिदले तेषु बलाकादि पूजयेत् । तद्बहिरिंद्रादीन् वज्रादींश्च पूर्ववत् । संपूज्य धूपादि विसर्ज्जानं कर्म्म समीपयेत् । अस्य पुरश्चरणं द
शलक्षजपः । तथा वदशलक्षं जपेन्नित्यं मंत्रविद्विजितेंद्रियः । दशांशं जुहुयान्मंत्री मधुराक्तैः सरोरुहैः ॥ वाग्भवं शंभुवनितारमामकर
केतनः । तार्तीयं व जगत्पार्श्वं वह्निवीजसमुज्वलः । अघोशाहो भृगुस्त्येहृन्नं चोयं पादशान्तरः । महालक्ष्म्याः समुद्दिष्टा स्तारा घाः
सर्व्वसिद्धिदाः । अस्य पूजापात्रं कृत्वादिश्रीवीजोत्तपीठन्यासं विधाय ऋष्यादिन्यासं कुर्यात् । शिरसि ब्रह्मणे ऋषये नमः । मुखे गा
यत्री छंदसे नमः । हृदि महालक्ष्म्यै देवतायै नमः । ततो मूलेन करौ संशोध्य अंगुष्ठादिक्रमेण प्रत्यकं तारादिनमोऽन्तानि पंच वी
जानि विन्यसेत् । यथा ॐ ऐं तमः ॐ ह्रीं नमः ह्सौं नमः ह्सें नमः ॐ जगत्प्रसूत्यै नमः करतले ततो मस्तकादिचरणं यावत् मूलेन
व्यापकं न्यसेत् । तो मूर्द्धास्य हृदयगुह्यपादेषु पंचवीजानि न्यसेत् । शेषाक्षराणि हृदये सप्तधा नुषु । तथा च निवं धेहस्तौ संशो
ध्य मूलेन तारादिहृदयान्तिकं । वीजानां पंचकं न्यसेदंगुलीषु यथाक्रमं । मंत्रशेषं न्यसेन्मंत्री तलयोरुभयोरपि । मूर्द्धादिचर
णं यावत् मंत्रेण व्यापकं न्यसेत् । मूर्द्धास्य वक्त्रगुह्येषु पंचवीजानि विन्यसेत् । शेषाण्यसेत तत्सप्तवर्णान् हृदये सप्तधा नुषु ।
ततः करांगन्यासोऽर्तानायमंगुष्ठाभ्यां नमः ह्रीं ऐं श्रवर्ण्याय तर्ज्जनीभ्यां स्वाहा ह्रौं श्रीप्राक्त्येय मध्यमाभ्यां वषट् ह्रौं वल्लीयमनामिका

म्यां हृत्स्यैः वीर्य्यायकनिष्ठाभ्यां वौषट् जगत्त्रस्तस्त्यैनमस्तेजसे करतलपृष्ठाभ्यां फट् एवं हृदयादिषु तथा च निवेद्य मन्त्रं निपंव
भिर्वीजैरस्त्रैः शोषाह्नैरुर्भवेत्। ज्ञानैश्वर्य्यादिभिर्युक्तैश्चतुर्थ्यैतैः सजातिभिः ज्ञानमैश्वर्य्यशक्तीच बलवीर्य्यसतेजसी। ज्ञानैश्व
र्य्यादयः प्रोक्ताः षट् क्रमादंगदेवताः। ध्यानं वालार्कद्युतिमिंदुखंडविलसत्कोटीरहारोज्ज्वलीरत्नाकल्पविभूषितां कुचन
तां शालिः करैर्व्यंजरीं। पद्मं कौस्तुभरत्नमप्यविरतं संबिभ्रतीं सस्मितां। फुल्लांभोजविलोचनत्रयपुतां ध्यायेत्परांमविकां।
इति ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं विधाय श्रीवीजोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदा
न पर्य्यन्तं विधायावरणपूजामारभेत्। देव्या दक्षिणे ॐ श्रीं करनंदनायनमः। वामे पुष्पधन्वने नमः अग्न्यादिकोणमध्ये द्विक्त
चर्यं ज्ञानामद्यादिना पूजयेत्। पत्रेषु पूर्वादितमायै श्रियैसरस्वत्यै गायत्र्यै देव्यै उपायै दक्षिणे जरूपुस्ततायै वामे सूर्यसुता
यै तथा शौखनिधये पद्मनिधये पश्चिमे स्तातापत्रवरुणं पूजयेत्। तदा हे दादशशाशीननवगाहानुपत्येकेन पूजयेत्।
तदा हेगज्ञानं ऐरावतपुंडरीकवामनकुमुदांजनपुष्पदंतसार्वभौमसुप्रतीकादीन पूजयेत्। ततः इन्द्रादीन् वज्रादींश्च सं
पूज्य धूपादि विसर्जनांतं कर्म समापयेत् द्वन्म्रसपुरश्चरणं द्वादशलक्षजपः। तथा च भानुलक्षं जपेन्मंत्रं दशांशं जुहु

याघृतैः।जुहुयात्श्रीफलैः पद्मैः प्रत्येकमयुतद्वयं।तर्पयेत्सलिलैः शुद्धैः सुगंधैरयुतद्वयं।अयुतद्वयमिति तु वाचनिकत्वानुस्या॥ध्यं
भुपद्मोश्रियास्त्वाकमोभगवतिमलहो।ब्रह्मादिस्थोधरादीर्घालक्ष्मी दिर्भगवान्नमस्तस्मै।प्रसीदयुगलंभूयः श्री रुरुभुवनेश्वरी महा
लक्ष्मी नमोनमः स्यात्प्रणवादिरयं मनुः॥अस्यार्थः महीलकारः भगवतीएकारयुता ब्रह्माककारः आदिम्यो मकारः।धरालकारः दी
र्घाकारयुक्ता लक्ष्मीदिर्ह्रींकारः।मस्तत्पकारः।भगवान् रएकारयुक्तः।अस्य पूजा प्रातः कृत्यादि पूर्वोक्ता।न्यासादिन्यायं विधाय करां
गन्यासो कुर्यात्।श्रीं ह्रीं श्रीं कमले श्रीं ह्रीं श्रीं अंगुष्ठाभ्यां नमः।इ कमलालये रे तर्जनीभ्यां स्वाहा॥३ प्रसीद ३ मध्यमाभ्यां वषट् २ प्र
सीद २ अनामिकाभ्यां हुं।३ एमहालक्ष्मी ३ कनिष्ठाभ्यां फट्।एवं हृदयादिषु।निवेशः।कमले हृदयं प्रोक्तं शिवः स्यात्कमलालये।
शिखा प्रसीदनेत्रे वकचचंचतुरक्षरैः।अस्त्रमेतैः पदैः कुर्यात्तत्त्रिवीतत्पुटितैः क्रमात्।ततो ध्यानं॥ सिंदूरारुणकांतिमब्जव
सतिं सौदर्यवारां निधिं कोटीरांगदहारकुंडलकटीसूत्रादिभिर्भूषितां।हस्ताब्जैर्वसुपत्रमब्जयुगलादर्शौ वहंतीपरां आवीतां प
रिचारिकाभिरनिशं ध्यायेत्प्रियां शार्ङ्गिणः॥एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्।पूर्ववत्।पीठपूजां विधाय
पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यन्तं विधायावरणपूजामारभेत्।कोणाग्रेषु अग्न्यादिकोणे दिग्दलेषु च श्रीं ह्रीं

श्री.
५४
54

श्रीकमले श्रीं ह्रीं श्रीं हृदयाय नम इत्यादिना पूजयेत्। दलमूले पूर्वादि ॐ श्रीधराय नमः हृषीकेशाय वैकुण्ठाय विश्वरूपाय वासु
देवाय संकर्षणाय प्रद्युम्नाय अनिरुद्धाय दलमध्ये पुभारा हैशक्तेदयकाय सलिलाय गुग्गुलवे कुरंटकाय दलाग्रे पुन्नसुरगा
य लक्ष्मीवाणाय पूर्ववीधिश्रीवादाय विजयाय वल्लभाय मदाय हरीशाय तेजसे इत्यष्टौ लक्ष्मीवाणान् पूजयेत्। अन्य अरागं विसंवादं विज
पं वल्लभं मदं हर्षं वर्जनेते जइतिमहालक्ष्मीवाणान् पूजयेत्। अनुरागाय महालक्ष्मीवाणाय नम इत्यादि मंत्रः। तद्वहिरिन्द्रादी
न्वज्राद्यांश्च पूजयेत्। ततो धूपादि विसर्जनांतकर्म समापयेत्॥ अस्य पुरश्चरणे लक्षजपः। तथा लक्षं जपेत् फलैर्बिल्वैर्मु
द्रूपान्मधुरोक्षितैः। दशांशं श्रीसप्कन्नेव हुत्वा शाक्षौ क्षौने वव तर्पिना॥ ॥इति लक्ष्मीयंत्राः॥ ॥अथ वक्ष्ये गणपतेर्मंत्रान् स
वीर्थसिद्धिदान्। पान्ता तात्मा नत्वा नित्यं साधयंति मनोरथान्। पश्चात्कंमशिखिधरबीजं गणपतेर्विदुः॥ पंचांतकं गकाराः॥
अस्य पूजाप्रान्तः कृत्वादि पीठन्यासांतं विधाय केशरेषु मध्ये वतीव्रायै ज्वालिन्यै नंदायै भोगदायै कामरूपिण्यै उग्रायै तेजा
जोवत्यै सत्यायै विघ्ननाशिन्यै नमस्तदुपरि सर्वशक्तिकमलासनाय नमः। ततः ऋष्यादिन्यासः। यथाविधि ऋषिर्गणकऋ
षये नमः मुखे निचृच्छंदसे नमः हृदि गणेशाय देवतायै नमः॥ ततः॥ करांगन्यासौ गां अंगुष्ठाभ्यां नम इत्यादि एवं हृदया

राम
५४

माणिक्यकुंभवक्त्रविनिस्सृतैः रत्नवर्षैः प्रीणयंतं साधकान् मदविह्वलं। माणिक्यमुकुटोपेतं रत्नाभरणभूषितं एवं ध्यात्वा मानसैः सं
पूज्य शंखस्थापनं कुर्यात् अस्य पूजनाय यंत्रं। त्रिकोणं षट्कोणं चवहिर्न्यस्त सर्वं मातृकायंत्रं च वस्त। ततः शंखस्थापनं कृत्वा पीठपूजां विधा
य पूर्वोक्तपीठशक्तीः पीठमनुं च संपूज्य पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत। त्रिकोणबाह्ये पूर्वा
दिचतुर्दिक्षु पूर्वं विल्ववृक्षाधः। श्रियं श्रीपतिं दक्षिणे वटवृक्षाधः गौरीं गौरीपतिं पश्चिमे पिप्पलवृक्षाधः रतिं रतिपतिं उत्तरे प्रियंगुवृ
क्षाधः महीवराहं देवताग्रे लक्ष्मीगणनायकं षट्कोणेषु पूर्वकोणे सिद्धिसहितं आमोदं अग्निकोणे समृद्धिसहितं प्रमोदं नैरृते कां
तिसहितं सुमुखं पश्चिमे मदनावतीसहितं दुर्मुखं ईशानकोणे मदद्रवासहितं विघ्नं। वायव्ये द्राविणीसहितं विघ्नकर्तारं पूजये
त्। षट्कोणपार्श्वयोः वसुधासहितं शंखनिधिं वसुमतीसहितं पद्मनिधिं ततः केशरेषु अग्न्यादिकोणेषु मध्ये दिक्षु च
षडंगं संपूज्य तो हृदयाय नमः इत्यादिना पूजयेत् तदा पत्रमध्येषु ब्राह्म्याद्यैः संपूज्य भूगृहे इंद्रादीन् वज्रादींश्च पूजयेत्। ततो धूपादि वि
सर्जितं कर्म समापयेत्। अस्य पुरश्चरणं चतुश्चत्वारिंशत्सहस्राधिकचतुर्लक्षं जपः। वर्णाद्ध्यापनं मंत्रं जपेन् मंत्री चतुर्लक्षं
समाहितः। चतुःसप्तकं चत्वारिंशत्सहस्रकं। दशांशं जुहुयाद्दुग्धैः एभिर्यथा दकादिभिः॥ ज्ञानं रुद्रं निजं बीजं महागणपतिं

सा. ५६

56

वदेत्। ऊत्तमर्षिर्वध्नः श्रीकामैत्रोयं द्वादशाक्षरः॥ अस्य पूजनप्रयोगः॥ प्रातः कृत्यादितीर्थादि पीठशक्तीः पीठमनुसहितपीठन्यासं विधाय
ऋष्यादिन्यासं कुर्यात्। शिरसि गणकऋषये नमः मुखे निचृद्गायत्री छन्दसे नमः। हृदि शक्तिगणाधिपतये नमः। ततः करांगन्यासौ
ह्रीं अंगुष्ठाभ्यां नमः ॐ गं तर्जनीभ्यां स्वाहा ह्रीं मध्यमाभ्यां वषट् गिहा गणाधिपतयेऽनामिकाभ्यां हुं स्वाहा कनिष्ठाभ्यां वौषट् स मुः
दायमुच्चार्य करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु निवेश्य तैः समस्तैर्व्यस्तैः पदैरंगानि कल्पयेत् ततो ध्यानं मुक्तागौरं मदगज
मुखं चंद्रचूडं त्रिनेत्रं हस्तैः स्वीयैर्दधतमरविंदांकुशौ रत्नकुंभं स्वं कस्याः पाः सरसिजरुचेस्तत्र जातं विपालेर्दैव्या योनौ विनिहितक
रं रत्नमौलिं भजामः। एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्। ततः पीठपूजां विधाय तीर्थादि पीठमन्त्रेण पूजयेत्। पुनर्ध्या
त्वावाहनादि पंच पुष्पांजलिदानपर्यन्तं विधायावरणपूजां कुर्यात्। पूर्वोक्तं चत्वारि मिथुनानि षट्कोणेष्वामोदादीन् केशरे
ष्वंगान्याग्नेयादि कोणेषु दिक्षु च क्रौं हृदयाय नम इत्यादिना षडंगानि संपूज्य पत्रेषु ब्राह्म्यादि मातृकाः तद्बहिरिंद्रादीन् वज्रादी
श्च संपूज्य धूपादि विसर्जनान्तं कर्म समापयेत्॥ अस्य पंचलक्षं महागणपतियंत्रवत्॥ अस्य पुरश्चरणं लक्षं तपः। तथा च लक्ष राम
मेकं जपेन्मंत्रं मन्त्री ये तद्दशांशतः। अजद्रव्यादर्च्चितेन वह्नौ दिनेशो देवयर्च्चयेत्॥ शक्तिरुद्धेति जं बीजं वशमानय ठठं पानाराद्यो ५६

मनुराख्यातोरुद्रसंख्याद्वारान्वितः॥ अस्य पूजा पूर्ववत् अंगमंत्रस्तु एकेन त्रिभिर्द्वाभ्यां त्रिभिर्द्वाभ्यां समस्तेन कल्पयेत्॥ तथा च निबं-
धे एकेनादौ त्रिभिर्द्वाभ्यां त्रिभिर्द्वाभ्यां पुनस्तरां समस्तेनास्त्रमाख्यातं अंगक्लृप्तिरियं मता एतानि अंगुष्ठा॥ दिषु न्यसेत्॥ ततो ध्या-
नं॥ हस्तैर्बिभ्रतमिक्षुदंडवरदौ पाशांकुशौ पुष्करं पुष्पस्वर्णमदावरांगमनया श्लिष्टं धुजायस्थशाग्याविष्टतातुर्यत्रिनयनं चंद्रा-
र्द्धचूडं प्रवारक्तं हस्तिमुखं वस्वाभिमतं तं भोगातिलोलं विभुं॥ अस्य पुरश्चरणे लक्षं चपत्तपत्था च लक्षं चयं जपेन्येच्च ई इ कृंदं दै ईं शांभा-
तः॥ अष्टपैर्जपसंयुक्तं वीजं हयामंत्रसिद्धये॥ ॥अथ हेरंबमंत्रः॥ ॥सच्चकोरसंयुक्तो गकारः सविंदुः त्रणवादिनमोंऽगतः चतुरक्ष-
रः चतुर्वर्गफलप्रदः॥ तथा च निबंधेपं चांतको विंदुसुतो वामकर्णविभूषितः॥ तारादिहृदयांतोयं हेरंबमंत्ररीरितः॥ चतुर्वर्णात्मको
नृणां चतुर्वर्गफलप्रदः॥ अस्य पूजाप्रयोगः प्रातःकृत्यादि पूर्वोक्तपीठशक्तिपीठन्यासं कृत्वा ऋष्यादिन्यासं कुर्यात्॥ षड्दीर्घभाजा
वीजेन षडंगानि प्रकल्पयेत्॥ अस्य गणक ऋषिर्गायत्री छंदो हेरंबो देवता गकारो वीजं विंदुः शक्तिः गां गीं गूं गैं गौं गः इत्येतैः षडंगानि॥
ध्यानं॥ मुक्ताकांचननीलकुंदघुसृणच्छायैस्त्रिनेत्रान्वितैर्नागास्यैर्हरिवाहनं शशिधरं हेरंबमर्कप्रभम्॥ दृप्तं दानमभीतियोदकर
दानूरं कं शिरोक्षमालिन्तां कोमालां मुकुरं मकुशं त्रिशिखरं दोर्भिर्दधानं भजे॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ ग

णेशोक्तपीठशक्त्यंतपीठपूजां च विधाय ॐ हुं हुं पहासिंहापगौ हेरंबासनाय नमः इति पूजयेत्। तथा च निबंधे। प्रणवं कवचं दद्यं महा
सिंहाय गां ततः। हेरंबेति पदं पश्चादासनाय हृदंततः। न्यासे विन्यसेन्मंत्रः ततो गमिति मंत्रेण मूर्तिं संकल्पयेत्। तथा च निबंधे। तारी दि
विघ्नवीजेन मूर्तिं तत्स्वप्रकल्पयेत्। ततः पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत्। तत्र प्रथमा
। अग्न्यादिकोणे मध्ये दिक्षु च गौं हृदयाय नमः इत्यादिना पूजयेत्। पत्रेषु लोकपालान् तद्वहिः रिज्ञादीर्घ ग्रादींश्च पूजयेत्। ततो धूपा
दि विसर्जांतं कर्मसमापयेत्। अस्य पुरश्चरणं। उक्तं त्रपजपः। नक्तं चैवं जपेन्मंत्रं दशांशं तु हूयात् ततः। संवर्त्तकोनेत्रयुतः पंच
वर्णासने स्थितः। प्रसादनाय हृन्मंत्रस्ववीजाद्योदशाक्षरः॥ अस्य पूजा प्रातः कृत्यादि गणेशोक्तपीठन्यासांतं कर्म्म समाप्य ऋष्या
दिन्यासं कुर्यात्। शिरसि गणकऋषये नमः मुखे विराट्छंदसे नमः हृदि श्रीप्रसादनीयदेवतायै नमः एकांकुरवतकरांगन्या
सौ कृत्वा ध्यायेत्। पाशांकुशौ कल्पलतां विषाणं दधत्स्वशुंडाहितवीजपूरः। रक्तस्त्रिनेत्रस्तरुणेंदुमौलिर्वीरोज्ज्वलो हस्ति
मुखोवताद्वः॥ इति ध्यात्वा मानसैः संपूज्य शंखस्थापनं पीठपूजां च कृत्वा पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यं राम
तं विधायावरणपूजां कुर्यात्। अग्न्यादिकोणेषु हृदयाय नमः इत्यादि पूजयेत्। पत्रेषु विघ्नं विनायकं शूरं वीरं वरदं सत्तकं। ५७

रमवक्त्रं चैकरदं लंबोदरं च पूजयेत्। पश्चादेषु आह्लाद्या मातरः पूज्या वहिरिंद्राद्यांश्च पूजयेत्। ततो धूपादि विसर्जनांतं कर्म समाप
येत्॥ अस्य पुरश्चरणं लक्षजपः। तथा च लक्षं जपं जपसीतेजुहूयाद् दशांशतस्तिलैः। मधुयत्रितयैर्वापि द्रव्यैर्द्रष्टभिरीरितैः॥ ॥
अथ हरिद्रागणेशमंत्रः॥ ॥ तथा च निबंधे॥ पंचांतकोधरासंस्थो विंदुभूषितमस्तकः। एकाक्षरो महामंत्रः सर्वकामफल
प्रदः। वसिष्ठोस्य ऋषिर्गायत्री छंदो हरिद्रागणपतिर्देवता। गकारो वीजं लकारः शक्तिः। वीजेन षडंगानि। ध्यानं हरिद्राभं चतुर्बा
हुं हारिद्रवसनं विभुं। पाशांकुशधरं देवं मोदकं दंतमेव च। एवं ध्यात्वा गणपतिं पूजयेत्। आवरणपूजा विनियोगादिकमेकाक्ष
रमणपतिवत्। अस्य चतुर्लक्षं जपः पुरश्चरणं। त्रिमधुरयुक्तहरिद्राचूर्णमिश्रितैस्तंदुलैर्होमः। तंत्रांतरे मंत्रोद्धारमहं वक्ष्ये श्रृणुष्व
कमलानने। इंद्रवीजं समुद्धृत्य निजवीजसमुद्धरेत्। चतुर्दशस्वरेणाढ्यं विंदुभूषितमस्तकं। एकाक्षरी महाविद्या कथिता
पद्मयोनिना। अस्य पूजादिकं सर्वं महागणपतिवत्। करांगन्यासः स्वस्ववीजेन षड्दीर्घयुक्तेन। अस्य भेदांतरं लक्ष्मीद्यो वाक्
वींद्यो वा मायाद्यो वा जपेत्सुधीः। कामाद्यो वा वधूवीजाद्यो वा प्रजपेत्स सांग्रं काराद्या महाविद्या निजवीजादिकां तथा। षदेरी च
महाविद्या त्र्यक्षरी वा स्वसंयुता। चतुर्वर्णात्मिका विद्या वर्द्धिजाया वधिः प्रिये। एषा विद्या महाविद्या त्रैलोक्ये च सुदुर्लभा। च

नं.स्ता. र्वगप्रदा साक्षान्महापातकनाशिनी। एतासां पूजादिकं महागणपति मंत्रवत्तकार्यं॥ ॥अथास्य कवचं॥ ॥ईश्वर उवाच॥ ॥शृ
५८ णु वक्ष्यामि कवचं सर्वसिद्धिकरं प्रिये। पठित्वा धारयित्वा च मुच्यते सर्वसंकटात्। अज्ञात्वा कवचं देवि गणेशस्य मनुं जपेत्। सिद्धिर्न जा
यते देवि कल्पकोटिशतैरपि। ॐ आमोदश्च शिरः पातु प्रमोदश्च शिखोपरि। सम्मोदो भ्रूयुगे पातु भ्रूमध्ये च गणाधिपः। गणक्री
डश्चक्षुर्युगं नासायां गणनायकः। गणः क्रीडान्वितः पातु वदने सर्वसिद्धये। जिह्वायां सुमुखः पातु ग्रीवायां सुमुखः पातु ग्रीवायां दु
र्मुखः सदा। विघ्नेशो हृदये पातु विघ्ननाथश्च वक्षसि। गणानां नायकः पातु बाहुयुग्मं सदा मम। विघ्नकर्ता च उदरे विघ्नहर्ता च
लिंगके। गजवक्त्रः कटीदेशे एकदंतो नितंबके। लंबोदरः सदा पातु गुह्यदेशे ममारुणः। व्यालयज्ञोपवीती मां पातु पादयुगे स
दा जापकः सर्वदा पातु जानुजंघे गणाधिपः। हारिद्रः सर्वदा पातु सर्वांगे गणनायकः। य इदं प्रपठेन्नित्यं गणेशस्य महेश्वरि
॥ कवचं सर्वसिद्धाख्यं सर्वविघ्नविनाशनं। सर्वसिद्धिकरं साक्षात्सर्वपापविमोचनं। सर्वसंपत्प्रदं साक्षात्सर्वश
त्रुक्षयकरं ग्रहपीडा ज्वरा रोगा ये चान्ये गुह्यकादयः। पठनात् श्रवणादेव नाशमायांति तत्क्षणात्। धनधान्यकरं दे
वि कवचं सुरपूजितं। समो नास्ति महेशानि त्रैलोक्ये कवचस्य च। हारिद्रस्य महेशानि कवचस्य च भूतले। किमन्यैर राम ५८

सद्वालो पैर्ययज्ञापुत्क्रयनामिथात्॥ ॥इति विश्वसारतंत्रे हारिद्रगणेशकवचं समाप्तं॥ ॥अथ सूर्यमंत्रः॥ ॥तारो घृणिश्च सूर्यःप
श्चाद्यामकर्णविभूषितः। ब्रह्मा स नो मरुत्क्षेपः सने वोडित्यपश्चिमः॥ अष्टाक्षरो मनुः प्रोक्तो भानोरभिमतप्रदः। अस्य संज्ञा जाप्यातः काम
दिप्राणायामं विधाय पीठन्यासं कुर्य्यात्। तत्र तंत्रे विशेषः॥ हृदयस्य पूर्वादिदिक्षु भूतं विमलं सारं समाराध्यमनं तकं परमादि
मुखं पीठस्य वीजात्तं प्रकल्पयेत्। ततः केशरेषु मध्ये च दीप्तायै नमः। सूक्ष्मायै जयायै भद्रायै वैं विभूत्यै विमलायै
रं विद्युतायै सर्वतोमुख्यै तदुपरि ब्रह्मविष्णुशिवात्मकाय सौराय योगपीठाय नमः। ततः ऋष्यादिन्यासः। शिरसि देवभा
गऋषये नमः। मुखे गायत्रीछंदसे नमः। हृदि आदित्यदेवतायै नमः। ततः करांगन्यासो सत्यायते जोज्वालामालिनि कुपु
ट् स्वाहा अंगुष्ठाभ्यां नमः। एवं ब्रह्मणे ठं॥ तर्जनीभ्यां स्वाहा। विष्णवे तें मध्यमाभ्यां वषट्। रुद्राय ठं १० अनामिकाभ्यां हुं अग्नये ठं
१० कनिष्ठाभ्यां वौषट्। सर्वाय ठं १० करतलपृष्ठाभ्यां फट्॥ एवं हृदयादिषु ततो मूर्त्तिन्यासः। तद्यथा शिरसि ॐ आदित्याय
नमः। मूर्द्धि रवये मुखे हृदये ॐ भानुगुह्ये ॐ भास्करं स्वरणयोः ॐ सूर्य्यं तथा चानिवधेत्यादितो विन्यसेन् मूर्द्धि रविं च मुख
तो न्यसेत्। हृदये भानुतामानेभास्करं मुखदेशतः। सूर्यं च करणयोर्न्यस्य वर्णन्यासादिपंचभिः। ततो मंत्रन्यासः मूर्द्धि ॐ नमः

मुखे ष्टं नमः ॥ कंठे निर्नमः हृदि स्तूं नमः कुक्षौ र्यां नमः नाभौ ग्रां नमः लिंगे ह्रिं नमः पादयोस्त्यं नमः ॥ ततो ध्यानं ॥ रक्ताब्जयुग्माभयदानहस्तं
केयूरहारांगदकुंडलाढ्यं माणिक्यमौलिं दिननाथमीडे बंधूककांतिं विलसत्त्रिनेत्रं ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा गुरुपं
क्तिं पूजां कृत्वा पंचतत्त्वेन कृतध्रूपादिसहितपीठपूजां कृत्वा ॐ खखसोल्काय नमः इति मंत्रेण मूर्तिं संकल्प्य पुनर्ध्यात्वा वाहनादि पंचपु
ष्पांजलिदानपर्यंतं विधाया वरणपूजां कुर्यात् ॥ पद्मानि वक्ष्ये ॥ तारादि खखसोल्काय मनुना मूर्तिकल्पना ॥ साक्षिणं सर्वलोकानां
तस्यामावाह्य पूजयेत् ॥ केसरेषु अग्न्यादिकोणमध्ये दिक्षु च सत्याय तेजोज्वालामालिने हुं फट् स्वाहा हृदयाय नमः ॐ ब्रह्मणे शि
रसे स्वाहा विष्णवे शिखायै वषट् रुद्राय कवचाय हुं अग्नये नेत्रत्रयाय वौषट् सर्वाय अस्त्राय फट् दिक्पत्रेषु ॐ आदि
त्याय नमः एं रविं तुं भास्करं विदिक्पत्रेषु अग्न्यादि ॐ उषायै नमः एवं पंचज्ञायै प्रभायै संध्यायै ॥ निर्वंधे अंगानि पूजयेत् दलेषु दिक्पत्रे
षु अर्कमूर्तये आदित्याद्याश्च तत्रो ग्रहाः श्रान्तयः कोणपत्रगाः ॥ स्वस्ववर्णादिवर्णाः स्युस्तासां वीजान्यनुक्रमात् ॥ ततः पद्माग्रे शुक्रा
द्याग्रहाः संपूज्य पुरतोऽरुणमर्चयेत् ॥ तत्रोह्ये पूर्वादि चंद्रादीन् पूजयेत् ॥ चंद्रं बुधं गुरुं भृगुं कुजं मंदं निराहु केतुं ततो बहिरिंद्रान् पम ५९
वज्रादींश्च प्रणवादि नमोंतेन संपूज्य धूपादि विसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं मूलमंत्र लक्षजपः ॥ तथा चैव वसुलक्षं जपेन्मं

59

त्रंसमिद्भिः ह्रीरक्षाविनांतन्तसहस्रं प्रजप्तु हुपात ह्रीं शक्ताधिजितेन्द्रियः। वाचनिकाप्रसहस्रहोमः। आकाशमग्निदीर्घेंदुसंयुक्तं भुवनेश्व
री। सर्गान्वितो भृगुर्भानोस्याक्षरोयमुदीरितः। अथ पूजा प्रातः कृत्यादि पूर्वोक्तपीठन्यासान्तं विधाय पूर्वोक्तत्र्यष्यादिन्यासं कुर्यात्। ततो
मंत्रन्यासः। आधारादिपादपर्य्यन्तं ह्रां नमः। कंठादाधारपर्य्यन्तं सः नमः। कंठादाधारपर्य्यन्तं सः नमः॥ ध्यानं॥ रक्ताम्बुजासनमशेषगुणैकसिं
धुंभानुं समस्तजगतामधिपं त्रिनेत्रं। पद्मद्वयाभयवरान्दधतं कराब्जैर्माणिक्यमौलिमरुणांगरुचिं कं दिं त्रिनेत्रं। इति ध्यात्वा मानसैः संपूज्य शं
खस्थापनं विधाय पूर्वोक्तक्रमेण मूर्त्तिं संकल्प्य पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्य्यन्तं विधाय आवरणपूजां कुर्यात्। अग्निनिर्ऋ
तिवायवीशानकोणेषु मध्ये दिक्षु च ह्रां हृदयाय नम इत्यादि प्रजपेत्। पश्चादिंद्रादीन् तद्बहिरिंद्रादीन् वज्रादींश्च पूजयेत्। ततो धूपादि विस
र्ज्जनान्तं कर्म समापयेत्। अस्य पुरश्चरणं द्वादशलक्षजपः। भानुलक्षं जपेन्मंत्रं आज्यनच दशांशतः। तिलैर्वा मधुरासक्तैर्जुहुयाद्विजि
तेन्द्रियः। आकाशमग्निपवनसंस्थातार्धीविंदुमत्। मार्त्तण्डभैरवं नाम बीजमेतदुदाहृतं। पुरितं। पुरितं वायुबीजेन सर्वकामफलप्रदं
टां तं दहनने त्रैं दुंसहितं तत् उदाहृतं। अस्य पूजा प्रातः कृत्यादि तत्तंत्रोक्तपीठन्यासांतं कर्म विधाय पूर्ववत् ऋष्यादिन्यासं कुर्यात्।
ततो बीजन्यासः। ठां सूर्याय नमः अंगुष्ठयोः। ठीं भास्कराय नमः तर्जन्योः। ठं भानवे नमो मध्यमयोः। ठ्रैं रवये नमः अनामिकयोः। ठौं दिवाक

रायनमः कनिष्ठयोः ततः शिरसि वदने गुह्ये पादेषु तास्तन्त्रबीजादिकान्न्यसेत् । तथा च निबन्धे पंचह्रस्वाद्यबीजेन पंचमूर्त्तीः प्रविन्यसेत् । अंगुष्ठा
दिकनिष्ठान्तमंगुलीषु क्रमादिमाः । सूर्य्यस्तु भास्करौ भानुस्तता रविदिवाकरौ । शिरोवदनहृद्गुह्यपादद्वन्द्वेषु तेः पुनः । करांगन्यास एव यथा । बं
अंगुष्ठाभ्यां नमः इत्यादि एवं हृदयादिषु । तथा च निबन्धे । दीर्घयुक्तेन बीजेन नेत्रांगानि विन्यसेत् । ततो मूलबीजेन व्यापकं कृत्वा ध्यायेत् । तथा
च तेन व्यापकं मूलबीजेन कुर्वीत तदनन्तरं । ध्यानं । हेमांभोजप्रवालप्रतिमनिजरुचिं चारुखट्वांगचापौ चक्रं शक्तिं सपाशं सृणिमतिरुचिरा
मक्षमालां कपालं । हस्तांभोजैर्दधानं त्रिनयनविलसद्वेदवक्त्राभिरामं मार्त्तण्डं वल्लभार्द्धं मणिमयमुकुटहारदीप्रं भजामः । एवं ध्यात्वा मान
सैः संपूज्य शंखस्थापनं कुर्यात् । ततः पूर्वोक्तपीठक्रमेण पीठं संपूज्य पूर्व्वादिषु कर्णिकायां ॐ उषायै नमः प्रज्ञायै प्रभायै संध्यायै इति
संपूज्य मूलेन मूर्त्तिं संकल्प्य तत्र पूर्ववत् ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्य्यन्तं विधायावरणपूजामारभेत । तथा च निबन्धे । पीठे दी
प्तादिभिर्युक्ते कर्णिकायामुषादिकाः । पूर्वादिदिक्षु संपूज्य मूर्त्तिं मूलेन कल्पयेत् । ततः पूर्वादिदिक्षु सूर्य्यं भास्करं भानुं रविं च पूजयेत्
कोणेषु दिवाकरं । ततः अग्निनिर्ऋतिवायवीशानेषु षां हृदयाय नमः इत्यादि पूजयेत् । देवताग्रे तु नेत्रत्रयाय वौषट् । ततः पूर्ववद्वज्रा राम
दीन् लोकपालान् पूजयेत् । तथा च निबन्धे । ग्रहानष्टौ ततो बाह्ये लोकपालांस्ततः परं । ततो धूपादिविसर्जनान्तं कर्म्म समापयेत् । अस्य पु ६०

रश्चरणं लक्षजपः। तथा चलक्षत्रयं जपेन्मंत्री वीजं विवं पुटीकृतं। दशांशं कमलैः पुष्पैर्जुहूयान्मधुरोक्षितैः। इमं मंत्रं जपन्मर्त्यः कांतिं पु
त्रान्नवलं धृतिं। वीक सिद्धिमचिराल्लक्ष्मीसौभाग्यमपि साधयेत्। विय दर्घेड ललितं नतदादिसर्गसंयुतः। अजपाख्योमनुः प्रोक्तो व्यक्ताः सुरपा
दपैः। अस्य पूजाप्रातः कृत्यादि पूर्वोक्तपीठमन्वंतं समाप्य अस्यादिन्यासं कुर्यात्। शिरसि ब्रह्मणे ऋषये नमः। मुखे देवीगायत्री छंदसे न
मः। हृदि श्रीगितितिजापतये देवतायै नमः। ततः करांगन्यासः। हसां अंगुष्ठाभ्यां नमः। हसीं तर्जनीभ्यां वषट्। हसें अनामिकाभ्यां वषट्। हसः
करतलपृष्ठाभ्यां फट्। हसां हृदयाय नम इत्यादि तथा च निबंधे। हसां षड्दीर्घयुक्तेन कुर्यादंगक्रियां मनोः। ध्यानं। उद्यद्भानुस्फुरित्तडिताका
रमर्दांचिकेशं पाशाभीतीवरदपरशुं संदधानं कराब्जैः। दिव्याकल्पैर्नवमणिपैः शोभितं विश्वमूलं सौम्याग्नेयं वपुरवतु वश्चंद्रचूडं त्रिने
त्रं। एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्। एतन्मंत्रोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधाया
वरणपूजां कुर्यात्। तत्र अग्निनिर्ऋतिवायुदेशान दिक्षु हसां हृदयाय नम इत्यादिना पूजयेत्। ततो दिग्दलेषु श्रीतं वंसुनरं वरं विदिग्दले
षु अनंतजा गोजा अर्वजा अद्रिजाः पूजयेत्। तद्वहिरिंद्रादीन् वज्रादींश्च पूजयेत्। ततो धूपादि विसर्जनांतं कर्म समापयेत्। अस्य पुरश्चरणं
पादशलक्षजपः। घृतयुक्तपायसेन दशांशहोमः। तथा च मातुलक्षं जपेन्मंत्रं पायसेन ससर्पिषा। दशांशं जुहूयात्सम्यगूततः सि

नं ५० स्मृ॰ ११

ध्योभवेन्मनुः॥ ॥अथ वक्ष्ये महामंत्रान् विष्णोः सर्वार्थसाधकान्। यथ्यं संस्मरणान्मर्त्यसंतो भवाब्धेः पारमाश्रिताः॥ ॥अथ विष्णुमंत्राः॥ तत्र वैष्ण-
वाचमनं गौतमीये। केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत्करौ। द्वाभ्यां मेष्ठौ च संमृज्य द्वाभ्यां मृज्यान्मुखं ततः। एकेन हस्तं प्रक्षाल्य पादा-
वपि तथैकतः। संप्रोक्ष्यैकेन मूर्धानं ततः संकर्षणादिभिः। आस्यनासाक्षिकर्णांश्च नाभ्यूरुकं भुतौ तथा। एष शैवं भवेत्। आचमनं च
वैष्णवाख्यये। एवमाचमनं कृत्वा साक्षान्नारायणो भवेत्। केशवादयस्तु केशवनारायणमाधवगोविंदविष्णुमधुसूदनत्रिविक्रमवाम-
नश्रीधरहृषीकेशपद्मनाभदामोदरसंकर्षणवासुदेवप्रद्युम्नानिरुद्धपुरुषोत्तमअधोक्षजनृसिंहाच्युतजनार्दनउपेंद्रहरिविष्णवः
वाक्यं तु केशवायनमः इत्यादि तथा च सचतुर्थीनमोन्तश्च नाममपि विन्यसेत्सुधीः॥ ॥अथ मंत्रः॥ ॥तारं नमः पदे ब्रूयात्ततो दीर्घस-
मन्वितो। पवनोनाय मंत्रोऽयं प्रोक्तो वसुवर्णः परः॥ ॥अथ पूजाप्रयोग॥ ॥प्रातः कृत्यादिकं सर्वं समाप्य केशवकीर्त्यां। दिव्या संकुर्यात्त
॥ ॥ध्यानं॥ ॥उद्यत्प्रद्योतनशतरुचिं तप्तहेमावदातं पार्श्वद्वंद्वे जलधिसुतया विश्वधात्र्या च युक्तं नानारत्नोल्लसितविवि-
भा ॥ अस्य पूजा पुर्योगः ॥ प्रातः कृत्यादि प्राणायामं तं कृत्वा करन्यासं कुर्यात् । दक्षिणामूर्तिऋषिः पंक्तिश्छंदः कालीदेवता । शि
रसि दक्षिणामूर्तये ऋषये नमः ॥ मुखे पंक्तिछंदसे नमः ॥ हृदि कालिकायै देवतायै नमः ॥ ततो ध्यानं ॥ चतुर्भुजे कृष्णवर्णां मु
ण्डमालाविभूषितां ॥ खड्गं च दक्षिणे पाणौ बिभ्रतीं दीवरद्वयं । कर्त्रिं च खर्परं चैव क्रमाद्वामेन बिभ्रतीं । द्यां लिखंतीं जटामेकां बिभ्र

तं॰सा॰ १४२ तीं शिरसा द्वयां मुंडमालां धराशीर्षे ग्रीवायाम पि चापरां कट्टस्तात्रीगहारं च विभ्रतीं रक्तलोचनीं। कृष्णवस्त्रधरां कर्णव्याघ्राजिनस
मन्वितां। वामपादं शववक्षसि दक्षिणं पदं। विन्यस्यासिं हपृष्ठे तु लेलिहानां शवस्वयं। सादृहासां महाघोरां वपुषां सुभीषणां। एवं ध्यानं न्य
न्यस्य सर्वं दक्षिणावत्। पूर्वोक्तानां च मंत्राणां सर्वं दक्षिणावद्बोध्यं। अस्याः पुरश्चरणं लक्षद्वयं। अन्येषां मंत्रवर्णसंख्यालक्षं जपः। तत्
दृशांशं तत्रैव। लक्षद्वयं जपेद्विद्यां पुरश्चरणकर्मणि। अन्येषां वर्णलक्षं तु कथितं पद्मयोनि। निजवीजं माया लज्जा दक्षिणे कालि
के वह्निवल्लभा। निजवीजं कूर्चं लज्जा दक्षिणे कालिके फट्। मूललवीजद्वयं कूर्चद्वयं लज्जाद्वयं दक्षिणे कालिके पूर्वघट्
बीजानि वह्निवल्लभा। एवं पूजा। प्रातःकृत्यादि प्रातःकृत्यादि प्राणायामान्तं विधाय पत्रन्यासादिन्यासं कुर्यात्। एषां दक्षिणा का
लिकादेवस्य न्यासं सर्वं पूजादिकं दक्षिणावद्बोध्यं। निजवीजं कूर्चं मायां दक्षिणे कालिके द्वयं॥ मूलवीजं कूर्चं। निजवीजं
वह्निवल्लभा॥ अस्य ऋषिः पूर्ववत्॥ मूलवीजं स्वाहा। निजवीजं द्वयं कूर्चद्वयं लज्जाद्वयं वह्निवल्लभा। मूलवीजं कूर्चं लज्जा
वह्निवल्लभा। मूलवीजं दक्षिणे कालिके वह्निवल्लभा। निजवीजं त्रयं कूर्चयुगं लज्जा पूर्ववीजत्रयं स्वाहा। मूलद्वयं कूर्चद्वयं राम
मायाद्वयं पञ्चन्यासान्येव वह्निवल्लभा। मूलभा॥ मूलत्रयं कूर्चद्वयं लज्जाद्वयं पञ्चन्यासान्येव वह्निवभा। हृदयवा॥ मवे मूलद्व १४२

142

ता

पवशिसकापेठहृदयं।एतासांश्चाद्यादिन्यासंपूजादिकंचसर्वंदक्षिणांवत्।अस्याःपुरश्चरणंलक्षजपः॥१४॥पूजायंत्रमुंडमालातंत्रेना
ग्निर्वाकपालेवाश्मशानेवाकाष्ठानिर्मिते।शानिभौमदिनेवापिशरीरेमृतसंभवे।वर्णैःसंस्थाप्यवालोहेचक्रकार्थ्यप्रयत्नतः॥कालीतं
त्रेअपरेत्रिकोणंविन्यस्यत्रिकोणंतद्बहिर्न्यसेत्।ततोवैविलिखेन्मंत्रीत्रिकोणत्रयमुत्तमं॥ततोवैवृत्तंसमालिख्यलिखेदष्टदलं
ततः।वृत्तंविलिख्यविधिवद्विलिखेद्भूपुरमेककं।कालीहृदये।यथाशक्तिसमालिख्यरेवृक्तांसुलक्षणं।एतत्तुविलिखेद्वेत्रामंत्रवंद
नागुरुःलिखितेकुमारीकल्पेमध्येतुदेवेदचंवकंविंदुमायाविभूषितं।एतासांविद्यानांप्रमाणंविश्वसारतंत्रे।अथपंचाक्षरीवि
द्यांश्रृणुषकमलाननेप्रजापतिसमुद्धृत्यवद्धारूढंततः।द्वितीयंचतुर्थस्वरसंयुक्तंसद्धितंतत्रसमन्वितं।वीजत्रयंक्रमेणैवततं
नेठद्विसुंदरी।पंचाक्षरीमहाविद्याकथितापरमयोगिना॥षडक्षरीमहाकालीवक्ष्यामिश्रृणुपार्वति।वीजत्रयंसमुद्धृत्य
अस्त्रवर्णंसमुद्धरेत् वह्निजायावधिःप्रोक्ताविद्यात्रैलोक्यमोहिनी अष्टाक्षरीमहाविद्याकथ्यतेश्रृणुपार्वती वीज
त्रयंक्रमेणैवपुनर्वीजत्रयंसुधीः स्वाहांताकथिताविद्या चतुर्वर्गफलप्रदा एकादशाक्षरीविद्याकथ्यतेश्रृणुपार्वति
वाग्भवंहृदयंपश्चाद्ब्रह्मारूढंप्रजापतिं चतुर्थस्वरसंयुक्तंनादविंदुविभूषितं द्विगुणंचततःलज्जांङेंतेचकालिकाय

मं॰सां॰ दं स्वाहांता कथिता विद्या प्रिये चैकादशाक्षरी ऋषिः स्याद्दक्षिणामूर्त्तिः पंक्तिश्छंद उदाहृतं परात्परतरा शक्तिः का
१४३ लिका देवता स्मृता: एकादशाक्षरी विद्या कालिकायाः सुदुर्लभा लक्षद्वयं जपेद्विद्यां पुरश्चरणकर्मणि अन्यत्सर्वं
(?)लं स्यात्कथितं पद्मयोनिना अस्या ध्यानं चतुर्भुजां कृष्णवर्णां मुंडमालाविभूषितां खड्गं च दक्षिणे पाणौ बिभ्र
तीं दीवरद्वयं कर्त्तृं च खर्परं चैव क्रमाद्वामेन बिभ्रतीं शिरसा द्वयीं मुंडमालाधरां शीर्षे ग्रीवायामपि चापरां वक्षसा
नागहारं च बिभ्रतीं रक्तलोचनां कृष्णवस्त्रधरां कट्यां व्याघ्राजिनसमन्वितां वामपादं शवहृदि संस्थाप्य दक्षिणं पदं
विलाप्य सिंहपृष्ठे तु लेलिहानां शवद्वयं सा(?)ट्टहासां महाघोररावयुक्तां सुभीषणां अन्यत्सर्वं दक्षिणावत् पूर्वोक्ता
नां मंत्राणां च भुजादिकं दक्षिणे बोध्यं मूलवीजं ततो मायां लज्जावीजं ततः परं दक्षिणे कालिके चेति दंते वह्निसुंदरी
एकादशाक्षरी काली चतुर्वर्गफलप्रदा कवचं मूलविद्यां च जपेद्भुवनेश्वरी दक्षिणे कालिके चेति अस्त्रांता समुदीरिता
अष्टादशाक्षरीं प्रवक्ष्यामि विद्यां विंशतिवर्णिकां यस्याः प्रसादाद्देवेशि भवेद्भूमिपुरंदरः मूलवीजद्वयं ब्रूयात्ततः कूर्चद्वयं वदे राम
त् लज्जायुगं समुद्धृत्य संबुद्ध्यंतं पदद्वयं पूर्ववत्तच्च तथा वीजान्यंते च वह्निसुंदरीं ऋषिः स्याद्दक्षिणामूर्त्तिः पंक्तिश्छं १४३

दृग्दाहौ हंस्वतासङ्गिनु दिष्टाकालीदक्षिणपूर्विका अथापरांप्रवक्ष्यामिविद्यांत्रिभुवनेश्वरी निजवीजंसमुद्धृत्यतदंतेव
ह्निसुं कौ भैरवोस्यऋषिःप्रोक्तः सर्वतंत्रसमन्वितः अष्टाक्षरीतुयाप्रोक्तासर्वतंत्रेषुगोपिता निजवीजद्वयंकूर्चद्वयंलज्जा
द्वयंततः स्वाहांताकथिताविद्याकालीसर्वफलप्रदा निजवीजकूर्चंतथालज्जांतदंतेवह्निसुंदरीं पंचाक्षरीमहाविद्यापंच
वक्त्रऋषिःस्मृतः नवाक्षरींमहाविद्यांमृणुषकमलानने निजवीजंत्रयंकूर्चयुगंलज्जायुगंततः स्वाहांताकथितावि
द्यासर्वसंपत्प्रदामता अथापरांप्रवक्ष्यामिविद्यांतांचनवाक्षरीं मूलवीजंसमुद्धृत्यसंबुद्ध्यंतंपदद्वयं स्वाहांताकथिता
विद्यासर्वशत्रुभयंकरी अथवाष्टाक्षरीविद्यांमृणुषकमलानने निजवीजंततःकूर्चंतथालज्जासमुद्धरेत् पुनस्ता
न्येवचोच्चार्य्यस्वाहांतामोक्षदायिनी अथापरांप्रवक्ष्यामिदशाक्षरसमन्वितां मूलद्वयंकूर्चयुगंतथालज्जाद्वयंततः
पुनस्तान्येववीजानितदंतेवह्निसुंदरीं चतुर्दशाक्षरीविद्याचतुर्वर्गफलप्रदा ब्रह्मत्रयंसमुद्धृत्यरतिवह्निसमन्वितं नाद
विंदुसमायुक्तंलज्जाकूर्चद्वयंतथा पुनःक्रमेणचोद्धृत्यवह्निजायावधिर्म्मनुः षोडशीयंसमाख्याताविद्याकल्पद्रुमोपमा
मायातंत्रेहृदयंवाग्भवंदेविनिजवीजयुगंततः कालिकायैपदंचोक्त्वातदंतेवह्निसुंदरीं तंत्रांतरेनमःपाशांकुशौद्वेथाप

तं॰सा॰
२४४

144

स्वाहा कालिकालिके दीर्घतनुद्धृदं कालीमनुः पंचदशाक्षरः एतासां प्रजनं चैव दक्षिणा वत्सुरेश्वरि लक्षसं
ख्य जपं कुर्यात् पुरश्चरणसिद्धये एतासां यंत्रं कालीतंत्रे आदौ त्रिकोणं विन्यस्य त्रिकोणं तद्बहिर्न्यसेत् ततो वै वि
लिख्य लिखेदष्टदलं ततः वृत्तं विलिख्य विधिवल्लिखेद्भूपुरमेककं कुमारीकल्पमध्ये तु वैदं वं चक्रं वीजमाया
विभूषितं यंत्रनिर्माणपात्रं मुण्डमालातंत्रे तान्त्रपात्रे कपाले वा श्मशानकाष्ठनिर्म्मिते शनिभौमदिने वापि शरीरे
मृतसंभवे स्वर्णरूप्येऽथवा लोहे चक्रं कार्य्यं विधानतः अथ गुह्यकाली विश्वसारे अथ वक्ष्ये महेशानि विद्यां
सर्वसमृद्धिदां चतुर्वर्गप्रदां साक्षान्महापातकनाशिनीं सर्वसिद्धिप्रदां नित्यां भुक्तिमुक्तिप्रदायिनीं गुह्यकाली
महाविद्या त्रैलोक्ये चातिदुर्लभा इंद्रादिरूढं वर्गाद्यं रतिविंदुसमन्वितं त्रिगुणं च ततः कृत्वा ईशानं च समुद्धरेत् षष्ठ
स्वरसमायुक्तं नादविंदुविभूषितं द्विगुणं च ततः कृत्वा ईशाद्वयं समुद्धरेत् वामाक्षिवह्निसंयुक्तं नादविंदुकलान्वितं तत्गु
ह्यकालिके प्रोक्ता चाथवा दक्षिणे वदेत् सप्तवीजं पुनः सर्वं क्रमेण योजयेत्ततः वह्निजायावधिः प्रोक्ता विद्या त्रैलोक्यमो राम
हिनी भावयेति गुह्यकालिके दक्षिणे कालिके वा मंत्रः कामवीजं तथा कूर्च्चं तदंते भुवनेश्वरी गुह्ये च कालिके वापि तथा २४४

वीजंद्वयंवदेत् स्वाहांताकथिताविद्या सर्व्वतंत्रेषुगोपिता एषानुषोडशीविद्याचतुर्वर्गफलप्रदा अस्यार्थः आदौनिजवी
जंततः कूर्च्चंततोमायांततः संवोधनपदद्वयं ततोनिजवीजद्वयंकूर्च्चद्वयंमायाद्वयंवह्निवल्लभा कामवीजद्वयंहित्वाभ
वेद्विद्याचतुर्दशी अस्यमंत्रस्येतिशेषः सप्तवीजंपुराप्रोक्तंगुह्येचकालिकेपुनः स्वाहांताकथिताविद्यासर्वतंत्रेषुगोपि
ता एषापिचतुर्दशाक्षरी एतासांपूजनंतुतत्रैवपूर्ववन्न्यासवर्गस्तुपूर्ववत्पूजयेच्छिवां पूर्ववज्जपेद्विद्यांसर्वंपूर्ववदेव
हि वलिदानंतथायंत्रंपूर्ववत्परिकल्पयेत् वलिमंत्रस्तु एहिएहिजगन्मातर्जगतांजननिगृह्ण २ इमंवलिंसिद्धिंदेहि २ शत्रु न
नुद्वयंकुरु २ ह्रूं २ क्लीं २ ह्रूं २ ठ ठ ॐ कालिकायैनमः फट्स्वाहा यद्वागुह्यकाल्या अयंवावलिमंत्रः एहिएहिगुह्यकालि
गृह्ण २ ममशत्रुन्नाशय २ वादपर २ मुरु २ स्फुर २ छिंधि २ सिद्धिं देहि २ ह्रूं २ स्वाहा तथान्यं आसमंत्रः ॐ ह्रूं सदाशिवमहा
प्रेतायगुह्यकाल्यासनायगुह्यकाल्यै ह्रूं नमः भद्रकाल्याद्यो विद्याः कथ्यंतेशृणुसुंदरी कामवीजादिकंवीजंसर्वपूर्वापरे
यजेत् भद्रकालींतथाङेतां तेवीजमध्येनियोजयेत् स्वाहांताकथिताविद्याविंशद्वर्णात्मिकापरा चतुर्वर्गप्रदाविद्याभद्र
कालिशुभानने सप्तवीजंसमुद्धृत्यश्मशानकालिकेतथा पुनर्वीजंक्रमेणैवस्वाहांतासर्वसिद्धिदा विंशत्येकाधिकावि

तं०स्ता० १४५

श्मशानकालिकामता वीजानि चोच्चरेत्ततः पूर्वंमहाकालिपदंततः तदंते सप्तवीजानि स्वाहांता सर्व्वसिद्धिदा विं
शत्यर्णामहाविद्येयं महाकाली प्रकीर्त्तिता एवासां जपपूजनं दक्षिणावत् विशेषस्तु भूपुरे इंद्रादीन् वज्रादींश्च पूजयेत् भू
गृहे स्याच्चर्व्वादि चतुर्द्वारेषु विष्णुशिवंसूर्य्यंगणेशं च पूजयेत् तत्रैव भूगृहे लोकपालाः स्युस्तदस्त्राणि चतद्बहिः।
भूगृहेषु चतुर्दिक्षु जपेत् क्रमतः सुधीः विष्णुशिवं तथा सूर्य्यं गणेशं पूजयेत्ततः तथा यंत्रंतु त्रिकोणं चैव षट्कोणं
नवकोणं मनोहरं त्रिवृत्तं साष्टपत्रं तु सुकिंजल्कमनोहरं भूपुरत्रित्रियायुक्तं योनिमंडलमंडितं त्रिपंचारमिदं चक्रं सर्व
तत्त्वसमन्वितं ध्यानं तु महामेघप्रभां देवीं कृष्णवस्त्रपिधायिनीं ललज्जिह्वां घोरदंष्ट्रां कोटराक्षीं हसन्मुखीं नागहा
रलतोपेतां चंद्रार्द्धकृतशेखरां घांलिखंतीं टज्जाग्निकोलेलिहानां शवद्वयं नागयज्ञोपवीतांगीं नागशय्यानिवेदुषीं
पंचाशन्मुंडसंयुक्तनरमालां महोदरीं सहस्रफणसंयुक्तमनंतं शिरसोपरि चतुर्दिक्षु नागफणवेष्टितां गुह्यकालिकां तक्ष
कसर्पराजेन वामकंकणभूषितां अनंतनागराजेन कृतदक्षिणकंकणां नागेन रशनाभारकल्पितां रत्ननूपुरां द्विभुजां चिं राम
नये देवीं नागयज्ञोपवीतिनीं नरदेहसमारब्धकुंडलश्रुतिमंडलां प्रसन्नवदनां सौम्यां नवरत्नविभूषितां नारदाद्यैर्मुनिगणैः १४५

सेवितांशिवगेहिनीं अट्टहासां महाभीमां साधकाभीष्टदायिनीं घोलिखतीं जटामेकां धारयंतीमितिशेषः अनंतांशिर
सोपरिदधतीमतिशेषः इतिश्यामाप्रकरणं अथताराप्रकरणं अथभेदान्वक्ष्यामितारिण्याः सर्वसिद्धिदान् येषांवि
ज्ञानमात्रेण जीवन्मुक्तस्तु साधकः कवितालभतेसम्यग्द्यामनर्गलविजृंभितां पांडित्यंसर्वशास्त्रेषु धनेधनपतिर्भवेत् राज
द्वारेसभायां च विवादव्यवहारके सर्वत्रजयमाप्नोति वृहस्पतिरिवापरः तथाचमत्स्यसूक्तेमायावीजंतृतीयंचफट्कारांतद
नंतरं संपूर्णसिद्धिमंत्रस्तु रश्मिपंचकसंयुतं रश्मिपंचकवर्णपंचकं लीलयावाक्प्रदाचेतितेनलीलसरस्वती तारकत्वा
त्सदातारासुखमोक्षप्रदायिनी उग्रापत्तारिणीयस्मादुग्रताराप्रकीर्तिता तारार्णवविवसिष्ठाराधिताविधानत्वंशीघ्र
फलायतः अतस्तेनापिमुनिना शापोदत्तःसुदारुणः ततःप्रभृतिविद्येयंफलदात्रीनकस्यचित् चंद्रवीजंत्रपांतस्थं
वीजोपरिनियोजयेत् ततःप्रभृतिविद्येयंवधूरिवयशस्विनी तथाचोद्धारव्यंजनं वह्निवामाक्षिविंदुसंयुतं चंद्रवी
जसमारूढंवधूवीजमिदंस्मृतं चंद्रःसकारः फलिनीसर्वविद्यानांजयिनीजयकारिणं विपक्षक्षयकरीविद्याप्र
तत्वप्रदायिनी मंत्रस्यज्ञानमात्रेणविजयीभुविजायते एकवीरकल्पेपिलज्जावीजंवधूवीजंकूर्चवीजंतथाहिफट्

तं०सा० एवंपंचाह्लरीविद्यापंचमृतप्रकाशिनी वध्रवीजंस्त्रींकारंविम्घसारेसनरींचमहेशानिवध्रवीजंप्रकीर्त्तितं नीलतंत्रेता
१४६ राद्यापंचवर्णेयंश्रीमन्नीलसरस्वती सर्वभाषामयीस्तुद्धासर्वाम्नायैर्नमस्कृता तारालेवेपि अनुत्तरंसमुद्धृत्यमायोत्त
रमतःपरं यपंचमममममायुक्तंपं चरश्मिप्रकीर्त्तितं जीवनीक्लीमध्यमापश्चादेकाह्नातदनंतरं उग्रदर्प्पतनोदद्याद
166 स्त्रंदेविप्रकाशितं एकाह्नीस्त्रींएतेनसर्द्धत्रप्रापोद्वारःपंचाह्लरीमधिष्ठाप्यतंत्रे श्रीवीजाद्यायदाविद्यातदाश्रीःसर्व
तोमुखी एषैवहिमहाविद्यामायाद्यासकलेष्टदा वाग्भवाद्यायदाविद्यावागीशत्वप्रदायिनी विनारेकजटाचैषा
महामुक्तिप्रदायिनी नाशस्त्ररहिताअर्णेमहानीलसरस्वती कुल्लुकेयंसमाख्यातासर्वतंत्रेषुगोपिता एषाक्रमगता
प्राम्नामतभेदादनेकधा एषापंचाह्लरीनदेवाह पंचाह्लरीएकजटा ताराद्यातुभवेद्देवि श्रीमन्नीलसरस्वती उग्रतारा
चम्पहरीम्महानीलसरस्वती अन्यासांविद्यानामेकजटैवदेवताप्रकृतित्वात् एतासांसाधनस्थानंनीलतंत्रेएकलिंगे
श्मशानेवाशून्यागारेचतुःपथे तत्रस्थःसाधयेद्योगीविद्यांत्रिभुवनेश्वरीं नत्रैवपंचक्रोशांतरेयत्रनलिंगांतरमीक्ष्य राम
ते तदेकलिंगमाख्यातंतत्रसिद्धिरनुत्तमा अन्यत्रापिउज्जटेपर्वतेवापिनिर्ज्जनेवाचतुःपथे देवागारेचशून्येचनिर्ज्ज १४६

नैकांतवेश्मनि वीरतंत्रेपि शून्यागारे श्मशाने यदि जपति जनस्त्विह कलिं गते ङ्गो गंगागर्भे गिरौ वा सुचिरमलमति सर्वदा
भक्तियुक्तः विद्याश्रीनीलवाण्या भुवनजनपतिः सर्वशास्त्रार्थवेत्ता देहांते योगिमुख्यः परमपदसुखं ब्रह्मनिर्वाणे
मेति अथ ताराचमनं ताराभेदैस्त्रिभिः पीत्वा मायया क्षालयेत्करं स्त्रीं हूं ॐ श्रो ह्रिं रूं म उ फट् फूत्कारैः क्षालयेत्
करं आस्यनासे दृशौ श्रोत्रे नाभिवक्षः शिरो भुजान् वैरोचनादिभिः स्पृष्ट्वा सर्वपापैः प्रमुच्यते आचम्य भैरवो भूत्वा
वसेदात्मा प्रपश्यति ताराभेदैरिति तारा[illegible]भेदत्रिभिः उग्रा इति तारा १ एकजटा २ चतुराक्षरा पंचाक्षरा त्र्यक्षरा पिता १॰
महानीलसरस्वती ३ इत्यर्थः भेदैरिति ताराउग्रं एकजटावैरोचनशोकपांडरपद्मनाभ अक्षितनाभनामकमामकतारकपां
डरपद्मांतकयमांतकविघ्नांतकनरांतकाः सचतुर्थी प्रणवादिनमोंतिकाः अस्यपूजा प्रातःकृत्यादि स्नानांतकूर्मसमा
प्य यागस्थानं गत्वा ॐ वज्रोदके हूं फट् स्वाहा इति जलमंत्रेण जलमभिषेचयाय एतज्जलं पूजार्थं विधाय किंचिदन्यजलेनिः
क्षिप्य तेन वारिणा ॐ क्लीं विशुद्धधर्मगात्रि सर्वपापानि शमय अशेषविकल्पमपनय हूं फट् स्वाहेति हस्तपादौ प्रक्षाल्य कुल
कुशान् स्वर्णरजतरूप्यान् तर्जन्यनामास्वथ यासंख्येन धृत्वा ॐ क्लीं स्वाहेति चम्पवीठं चिंतयेत् कुलकुशान् सुवर्णरज

तं०सा० तंचैवजपयज्ञादिकर्म्मसु कुशकार्य्यकरंप्रोक्तंननुवन्याःकुशाः पीठंयथाक्रमशानंतत्रसंचिंत्यतत्रैकल्पद्रुमंस्मरेत् तन्म
१४१ लेमणिपीठंचनानामणिविभूषितं नानालंकारभूषाढ्यंमुनिदेवैश्चभूषितं शिवाभिर्विकृमांसास्थिमोदमानाभिरंततः च
तुर्दिक्षुशवानमुंडैश्चितांगारास्थिभूषितं तन्मध्येभावयेद्देवीं यथोक्तंध्यानयोगतः इतिध्यात्वामणिधारिणिवज्रिणि
महाजलसेकाद्भूमिंशोधयेत् ॐसर्वविघ्नानुत्सारयहूंफट्स्वाहेतिनाराचमुद्रयाहतप्रक्षेपेणदिग्यांतरीक्षभौमान्
विघ्नानुत्सारयेत् ॐपवित्रवज्रभूमेहूंफट्स्वाहेतिवज्रिणिमहाप्रतिसरेहुंफट्स्वाहेतिशिखावंधनंकुर्य्यात् ॐरक्षर
क्षहूंफट्स्वाहेतिगंधपुष्पादिनामभ्यर्च्यस्वस्तिकादिक्रमेणतत्रोपविशेत् तदुक्तंमत्स्यसूक्ते मृदुकोमलमासीनोऽन्येषुक
वलेषुच विष्टरंवासमासीनःसाधयेत्सिद्धिमुत्तमां कोमलादिलक्षणमाह श्रीक्रमे पंचवर्षांतरंयावन्मृतंवालमचूडकं
षण्मासाभ्यंतरंयावद्दशमासाद्यपूर्वकं गर्भच्युतंमृतंवालंगर्भाद्यमपुरःसरं एतत्कोमलमित्याहुर्विष्टरेषुवा तथानीलतं
त्रेश्राव्यत्र चूडकोवालोहीनोपनयतःपुमान् योमृतःपंचमेवर्षेतमेवकोमलंविदुः पंचमेवर्षेपंचवर्षपूर्णेएकहस्तंद्विहस्तंवाम्
वाचतुरस्त्रंसमंततः विष्टुद्धेआसनेकुर्य्यात्संस्कारंपूजनंबुधः तत्रसारव्याघ्रचर्म्मायत्रशवप्राणप्रतिष्ठांकुर्यात्पित्रा १४१

पभूमिमामंत्र्यतत्रकंवलकोमलविष्टराद्यासनानियथासाधनान्यास्तीर्य ॐ आसुरेरेखेवज्ररेखेहूंफट्स्वाहेति

सनंतदुक्तं रक्षःसारद्वीपिचर्माश्रचूडकमित्यादिविष्टरेष्वित्यादिकुशपत्रशतेनवटुकं निर्म्मायेत त्रिशतेनवटुकं निर्म्मायेत त्रिशवप्रा
णप्रतिष्ठां कुर्यात् ॐ मलिधरिलिवज्रिणिमहाप्रतिसरेरक्ष रक्ष मां हुं फट् स्वाहेति वस्त्रांचलेरक्षाग्रंथिं वंधयेत् ॐ श्रां हुं फट् स्वाहे
त्यादिव्यापक न्यासवाक्कायचित्तं शोधयेत् ॐ पुष्पकेतुराजार्हते शतायसम्यक्संबधाय ॐ पुष्पेमहापुष्पेसुपुष्पेपुष्पशोभिने पुष्प
चयावकीर्णे हुं फट् स्वाहेति पुष्पमामंत्रयेत् ततः स्वर्णादिपीठे गोरोचनादिलिप्ते ॐ श्रां: सुरेखे वज्ररेखे हुं फट् नम इति मंत्रेणाधो
मुखत्रिकोणगर्भाष्टदलपद्मं चतुरस्रं चतुर्द्वारयुक्तं मंत्रमुद्धरेत् पद्मस्य पूर्वादिदले मंत्राक्षराणि लिखेत् सयोनिचंदनेनाष्टदलप
द्मं वृत्तं लिखेत्ततः महासनं समासाद्य मायां पूर्वदले लिखेत् मध्ये वीजं द्वितीये च फमुत्तरे पश्चिमे तुरं मध्ये वीजं लिखेत्तारं भूतसुद्धि
मयाचरेत् द्वितीये दक्षिणे तारं हूंकारं तारा प्रणवत्वात् मध्ये षट्कोणं तत्तितपञ्चमितिके चित् तदुक्तं षट्कोणं तर्गतं पद्मं भूविंव
द्वितयं पुनः चतुरस्रं चतुर्द्वारमेवं मंडलमालिखेत् वीजलिखनं तु पूर्ववत् नीलतंत्रे तु सारस्वततार्चिनां विशेषयंत्रमाह व्योमेंद्वे
रसनार्णकर्णिकमचांद्वद्वैः स्फुरत्केशरं वर्गाढ्यासिवसुच्छदं वसुमतीगेहेन संवेष्टितं ताराधीश्वरवारिववर्णविलसद्दिक्कोणसंशो
भितं यंत्रं नीलतनोः परं निगदितं सर्व्वार्थसिद्धिप्रदं एवं यंत्रमालिख्य पीठमर्च्चयेत् यथा पीठस्य पूर्वद्वारे ॐ ह्रीं गां गणपतये नमः

नी०स०
१४८

एवंपीठस्यदक्षिणे ॐ ह्रींवांवटुकायनमः पीठस्यपश्चिमे ॐ ह्रींक्षांक्षेत्रपालायनमः पीठस्योत्तरे ॐ ह्रींयांयोगिनीभ्योनमः मध्ये
ॐ श्मशानायनमः एवंकल्पवृक्षायतन्मूलेमणिपीठायनानालंकारेभ्योमुनिभ्योदेवतेभ्योवक्त्रमांसास्थिमोदमानशिवाभ्यः
चतुर्दिक्षुशवमुंडचितांगारास्थिभ्यः ततोऽष्टदलेषुपूर्वादि ॐ लक्ष्म्यैनमः एवंसरस्वत्यैरत्यैप्रीत्यैकीर्त्यैशांत्यैतुष्ट्यैपुष्ट्यैतन्म
ध्येहसौः सदाशिवमहाप्रेतपद्मासनायनमः तदुक्तंसिद्धसारस्वतेलक्ष्मीसरस्वतीचैवरतिः प्रीतिस्तथैवच कीर्त्तिः शांतिश्च
तुष्टिश्चपुष्टिरित्यष्टशक्तयः देव्यानीलसरस्वत्याः पीठशक्तयईरिताः वीरतंत्रेतन्मध्येपूजयेद्देव्यावाहनंशवमेवच ततोमू
लेनतत्रमूर्त्तिंसंकल्प ततोभूतशुद्धिंकुर्य्यात् यथास्वांकेउत्तानौकरौकृत्वाहंसइतिमंत्रेणकुंडलिनींजीवात्मानंविलोमेन
पृथिव्यप्तेजरूपादिनाषट्त्रिंशत्तत्वानिसुषुम्नावर्त्मनापरमात्मनिसंयोज्यवामनासयापूरकेनह्रींकारंरक्तवर्णंध्यात्वानाभौ
तदुद्भूतेनअग्निनालिंगशरीरंसंदह्यकुंभकेनस्त्रींकारंपीतवर्णंहृदिविचिंत्यतदुद्भूतेनवायुनाभस्मप्रोत्सार्य्यरेचकेनदक्षनासयारेच
येत् ततोश्वेतवर्णंठंकारंशिरसिविचिंत्यतदुद्भूतेनअमृतेनतदस्थिप्लावितंकृत्वासमस्तमपगतव्याधिंदिव्यंशरीरंआप्लावयेदम
त तथाचश्रुतिः षट्त्रिंशत्तत्वानिशरीरेमिलितानिततआत्मानमपगतव्याधिंनिर्मलंदेवताभेदेनध्यायेत् तस्मिन्विश्वव्यापक । १४८

वारिएणि आःकाराद्रक्तपंकजं ध्यात्वा तदुपरि यंकाराच्छ्वेतपंकजं विचिंत्य तदुपरि नीलसन्निभं हूंकारं ध्यात्वा तदुपरि हूं वीजभूषितां
कर्त्रिकां ध्यायेत् तदुपरि आत्मानं तारिणीमयं ध्यायेत् ओं ह्रीं स्त्रीं स्वाहेत्येकादशाक्षरं जपन् प्राणान् प्रतिष्ठाप्य ध्यायेदिति तदुक्तं
के त्वकारी येमायां नाभौ रक्तवर्णं ध्यात्वा तज्जातवह्निना शुष्ककर्म्मात्मकं देहं दग्धं संचिंतयेत्ततः स्त्रींकारं हृदि पीताभं तदुद्भूते
न वायुना भस्म प्रोत्सारितं स्वाललाटे चिंतयेत्ततः कूर्च्चं तुषारवर्णाभं तदुद्भूतामृतेन च तदस्थि प्लावितं कृत्वा तदात्मानं विचिं
तयेत् भूतशुद्धिं विधायेत्थं मूर्त्यं विघ्नं विचिंतयेत् निर्लेपनिर्गुणं शुद्धमात्मानं देवतामयं अंतरीक्षे ततो ध्यायेदाकाराद्रक्तप
कजं भूयस्तस्योपरि ध्यायेत् यंकारात् श्वेतपंकजं तस्योपरि पुनर्ध्यायेत् हूंकारं नीलसन्निभं ततो हूंकारजां पश्येत् कर्त्रिकां
वीजभूषितां कर्त्रिःपरिगतां ध्यायेदात्मानं तारिणीमयं प्रत्यालीढपदां घोरां मुंडमालाविभूषितां खर्व्वां लंबोदरीं भीमां व्याघ्रच
र्म्मावृतां कटौ नवयौवनसंपन्नां पंचमुद्राविभूषितां चतुर्भुजां ललज्जिह्वां महाभीमां वरप्रदां खड्गकर्त्रिसमायुक्तसव्येतरभुजद्वयां
कपालोत्पलसंयुक्तसव्यपाणिद्वयान्वितां पिंगोग्रैकजटां ध्यायेन्मौलावक्षोभ्यभूषितामिति पंचमुद्राविभूषितामिति ललाटेस्थिता
स्थिपट्टिकाचतुष्टयान्वितकपालपंचकतयान्वितां मिमर्थं श्रीशंकराचार्य्येणाप्युक्तं विचित्रास्थिमालं करालं कपालं लला

तं०सा० रेचयेत्पवान्वितं धारयंतीं मितितः ततः प्राणायामः वामनासापुटे मूलं चतुर्वारं जप्त्वा वायुं पूरयेत् तदनु नासापुटौ धृत्वा षोड
१४९ शवारजपेन कुंभयेत् तदनु दक्षनासापुटेन वाराष्टकावर्त्तेन रेचयेत् पुनर्दक्षिणेनापूर्य्य वामेन रेचयेत् पुनर्वामेनापू
र्य्य दक्षिणेन रेचयेत् इति प्राणायामत्रयं भवेत् ततः ऋष्यादिन्यासः यथा शिरसि अक्षोभ्यऋषये नमः मुखे बृहती छंदसे
149
नमः हृदि श्रीमदेकजटायै देवतायै नमः मूलाधारे हूं बीजाय नमः पादयोः फट् शक्तये नमः शेषाण्यक्षराणि पुन्नाम्य सर्वांगे
कीलकाय नमः तदुक्तं वीरतंत्रे अक्षोभ्यऋषिरेतस्या बृहती छंद ईरितं नीलसरस्वती देवी त्रिषु लोकेषु गोपिता हूं बीजं
अस्त्रशक्तिः स्याच्चतुर्वर्गफलप्रदा ततः कालीतंत्रोक्त मातृकान्यासः तथा चोक्तं यथा काली तथा नीला ततः क्रमान्मातृ
कान्यसेत् तद्यथा अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं नमो हृदि एं ऐं ओं औं अं अः कं खं गं घं ङं नमो दक्षभुजे ङं चं छं जं झं ञं टं ठं डं ढं न
मो वामभुजे णं तं थं दं धं नं पं फं बं भं मं नमो दक्षजंघायां यं रं लं वं शं षं सं हं ळं क्षं नमो वामजंघायां ततः करांगन्यासो क्रों अखिल
वाग्रूपिण्यै अंगुष्ठाभ्यां नमः क्रों अखंडवाग्रूपिण्यै तर्जनीभ्यां स्वाहा हूं ब्रह्मवाग्रूपिण्यै मध्यमाभ्यां वषट् ह्रैं विष्णुवाग्रूपिण्यै राम
अनामिकाभ्यां हुं क्रों रुद्रवाग्रूपिण्यै कनिष्ठाभ्यां वौषट् ह्रः सर्ववाग्रूपिण्यै करतलपृष्ठाभ्यां फट् एवं हृदयादिषु अंगुलीनि १४९

यमस्तु पूर्वमेवोक्तः अयं तु नीलसरस्वती पक्षे तथा च तामधिकृत्य सिद्धसारस्वते अखिलवाग्रूपिणीं प्रोच्य हृदयाय नमो व
देत् अखंडवाग्रूपिणीं स्वपि शिरसे वह्निवल्लभा ब्रह्मवाग्रूपिणीमुक्त्वा शिखायै वषडित्यपि विष्णुवाग्रूपिणीं प्रोच्य कव
चाय हुं मुच्चरेत् रुद्रवाग्रूपिणीं नेत्रत्रयाय वौषडित्यपि सर्ववाग्रूपिणीमुक्त्वा अस्त्राय फडिति स्मरेत् षड्दीर्घयामाय
यवबीजांतेनाभियोजयेत् सर्वत्र ह्रां एकजटायै अंगुष्ठाभ्यां नमः ह्रीं तारिण्यै तर्जनीभ्यां स्वाहा हूं वज्रोदके मध्यमाभ्यां
वषट् ह्रैं उग्रजटे अनामिकाभ्यां हुं ह्रौं महाप्रतिसरे कनिष्ठाभ्यां वौषट् ह्रः पिंगोग्रैकजटे करतलपृष्ठाभ्यां फट् एवं हृ
दयादिषु तथा च एकजटामधिकृत्य नीलतंत्रे वीजांते एकजटायै हृदयं परिकीर्तितं तारिण्यै शिरसे ज हृद वज्रोदके
शिखा तथा उग्रजटे कवचं महाप्रतिसरे तथा पिंगोग्रैकजटे तत् छन्नेत्रास्त्रं परिकीर्तितं अत्र वर्णन्यास पीठन्यासौ न
लिखितावनुक्तत्वात् तथा च फेत्कारीये अंगन्यासकरन्यासौ कुर्याद् इत्येव केवलं अत्रो क्रमाचरेत् सम्यक् नान्यत्संचारयेद् बु
धः फलार्थिना तारा षोढान्यासः काली षोढान्यासो वा कर्तव्यः ततो मूलमुच्चार्य शिर आदि पादपर्यंतं पादादि शिरोंतं
हृदयादि मुखमिति व्यापकं कृत्वा ऽर्घ्यस्थापनं कुर्यात् तथा स्ववामे त्रिकोणवृत्तचतुरस्रमंडलं कृत्वा तत्र साधारं पात्रं स्था

तं०सा० पयित्वा मूलविद्यया शुद्धजलादिना सूर्य्यरक्तचंदनविल्वपत्राक्षतादीनि क्षिप्य अर्घ्यस्थापनीशामुखवायुमध्ये दिक्षु च षडं
१५० अखिलवा अग्न्यादिषु हृदयाय नमः इत्यादि क्लीं एकजटायै हृदयाय नमः इत्यादि वा षडंगानि विन्यस्यार्घ्यपात्रं मत्स्यमुद्र
150 याच्छाद्य मूलं दशधा जपेत् तेजोमयं तज्जलं विभाव्य किंचित् प्रोक्षणीयपात्रे निःक्षिप्य तेनोदकेनात्मानं पूजोपकर
णं चाभ्युक्ष्य पूजामारभेत् भूतशुद्ध्यनंतरं वा तथा च फेत्कारीयतंत्रे भूतशुद्धिं विधाय तत्यमर्घ्यादिस्थापनं चरेत् प्राणा
यामं ततः कृत्वा ऋष्यादिन्यासमाचरेत् ततः पुष्पांजलिं विरच्यात्माभेदेन देवीं ध्यायेद्यथा प्रत्यालीढपदार्पितां घ्रिशिवहृ
द्घोराट्टहासा रवा खड्गेंदीवरकर्त्रिखर्प्परभुजा हूंकारबीजोद्भवा खर्व्वा नीलविशालपिंगलजटाजूटैकनागैर्युता जाड्यं
न्यस्य कपालिके त्रिजगतां हंत्युग्रतारा स्वयं एवं विभाव्य करकलित दूर्व्वाक्षत चंदन मिलित दिनकरकिरणारुणकुसुमांज
लौ मातृकायंत्रं ध्यात्वा हृदयान्मूलमंत्रेण तेजोमयीं षट्चक्रभेदेन शिरःस्थित सहस्रदलकमलकर्णिकांतर्गतपरमशि
वं प्राप्य क्रियासमभिव्याहारेण तदमृतांबुधौ विश्राम्य तदमृतलोलीभूतां चैतन्यानंदमयीं तां प्रवहन्नासापुटां जलावा राम
नीयमलेन कल्पितमूर्त्तौ वावाहयेत् देवेशि भक्तिसुलभे परिवारसमन्विते यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भ १५१

व ततः पूर्वोक्तक्रमेणावाहनादिकं कृत्वा आं ह्रीं क्रों स्वाहेति प्राणप्रतिष्ठां कुर्यात् ततो मूलमुच्चार्य्य श्रीमदेकजटे वज्रपुष्पं प्रती
छ हूं फट् स्वाहेत्यनेन षोडशोपचारादिना पूजयेत् अस्याः पूजामंत्रस्तु आदौ मूलं एतन्मंत्रं उच्चार्य्य हृदं ङ वं अमुकदेव्यै नमः त
द्याचपेत् कारीये श्रीमदेकजटे तु स्को वज्रपुष्पं प्रतीछ च तारादि वह्निजायां नमुदीर्य्य यजनं चरेत् तारकूर्चं तदादि हूं फडि
त्यर्थः सच वह्निजायां तः ततो योनिमुद्रां प्रदर्श्य देवि आज्ञापय भगवत्पावरणं ते पूजयामीति प्रार्थ्य आवरणपूजां कुर्यात् यथा
केशरेष्वग्नीशासुरवायुमध्ये दिक्षु च षडंगानि पूजयेत् ह्रां एकजटायै हृदयाय नमः इत्यादिनीलसरस्वतीपक्षे तु ह्रीं अखिल
वा। वंग्र त्रिलपे हृदयाय नमः इत्यादिक्रमेण देव्या मौलौ अक्षोभ्य वज्रपुष्पं प्रतीछ हूं फट् स्वाहेति पूजयेत् तदुक्तं फेत्कारीये
वज्रपुष्पं प्रतीछेति हूं फट् स्वाहेति मंत्रतः एतन्मंत्रेण नाममात्रं भिन्नं चैव न संशयः अनेन मनुना सर्वान् परिवारान् समर्
च्चयेत् सर्वादौ प्रणवस्तदु ह्यांत त्रैवप्रणवं वह्निजायांतं वज्रपुष्पं विनिक्षिपेदिति ततः पीठस्योत्तरे वायव्यादीशपर्य्यंतं गु
रुपंक्तित्रयं यजेत् ॐ हूं केशानंदनाथ वज्रपुष्पं प्रतीछ हूं फट् स्वाहा एवं व्योमकेशानंदनाथ वृषध्वजानंदनाथ एते दिव्यौ
घाः वशिष्ठानंदनाथ कूर्मनाथानंदनाथ मीननाथानंदनाथ महेश्वरानंदनाथ हरिनाथानंदनाथ पूजयेत् एते सिद्धौघाः । २

एवंतारावत्यंवभानुवत्यंवजयांवविद्यांवमहोदर्य्यंवसुखानंदनाथपरमानंदनाथपारिजातानंदनाथविरूपाक्षानंदना
थफरवंवा एतेमानवौघाः अथ क्रमोक्तं अल्पमात्रं पूजयेत् तदुक्तं भावचूडामणौ अथतारागुरून्वक्ष्ये दृष्टादृष्टफ
लप्रदान् ऊर्द्ध्वकेशोव्योमकेशोनीलकंठोवृषध्वजः दिव्यौघाः सिद्धिदाः वक्ष्ये सिद्धौघान्शृणुतत्वतः वशिष्ठः कूर्मनाथश्च
माननाथोमहेश्वरः हरिनाथोमानवौघान्शृणुवक्ष्यामिसद्गुरून् तारावतीभानुमतीजयाविद्यामहोदरी सुखानंदपरानंद
पारिजातकुलेश्वरः विरूपाक्षः फेरवीचकथितंतारिणीकुलं ततः पूर्वादिदलमूलेमहाकाल्यथरुद्राणीउग्राभीमात
थैवच घोराचभ्रामरीचैवमहारात्रिश्चसप्तमी अष्टमीभैरवीप्रोक्तायोगिनीस्ताः प्रपूजयेत् ततः पूर्वादिचतुर्दलेवामावर्त्तेनवैरो
चनशंखपांडरपद्मनाभअसितांभान्प्रपूजयेत् अग्न्यादिकोणदलेषुनामकमामकपांडरतारकान्पूजयेत् तथाचसिद्ध
सारस्वते ततोवैरोचनंशंखपांडरंपद्मनाभकं असिताभान्यजेन्मंत्रीदिक्ष्वैंद्रादिचतुर्दले नामकंमामकंचैवपांडरंता
रकंतथा वह्न्यादिषुचतुष्कोणेमंत्रैःस्वैःस्वैःपृथक्पृथक् नीलतंत्रेवामावर्त्तक्रमेणैवप्रपूजयेदंगदेवताः ततःपूर्वादिद्वारसम
चतुष्टयेषुवामावर्त्तेनपद्मांतकयमांतकविघ्नांतकंसमभ्यर्च्यपूजयेन्नरकांतकं ततोवलिंदद्यात्तदुक्तंफेतकारीयेपूजांतेभोज १५१

नादौ च बलिं मंत्रेणोदापयेत् तत्र क्रमः स्ववामे चतुरस्रमंडलं कृत्वा पुष्पैः समभ्यर्च्य तत्र विहितद्रव्यभरितं साधारं पात्रं विधाय
तद्धामांगुष्ठानामिकाभ्यां स्पृष्ट्वा ॐ ह्रीं ऐं एकजटे महायक्षाधिपतये मम उपनीतं बलिं गृह्ण २ गृह्णापय २ मम सर्वशांतिं कुरु २ पर
विद्यां मा क्षपय २ छिंधि २ ह्रीं स्वाहेति त्रिः पठित्वा बलिं दद्यात् तदुक्तं नीलतंत्रे प्रणवं पूर्वमुच्चार्य हृल्लेखां च ततः परं ए
कजटे पदांते च महाशब्दमुदीरयेत् यक्षाधिपदमाभाष्य पतये पदतो मम उपनीतं बलिं चोक्त्वा गृह्ण गृह्णेति च द्विधा गृ
ह्णापय द्विधा प्रोक्तो मम सर्वपदं तथा शांतिं कुरु पदं चैव परविद्यामनंतरं द्विधा क्षपयेति च ब्रूयात् तत् छिंधीति च द्विधा मा
यया स्वाहया युक्तो मंत्रो बलिविधौ स्मृतः ततो रहस्यमालया निगदेनोपांशुना मानसेन वाष्टोत्तरसहस्रं शतं विंशतिं वा ज
पेद् रहस्यमालया अत्र जपरहस्यं यथा मूलाधारस्वाधिष्ठानमणिपूरकेषु यथासंख्यं बीजत्रयमनंततडित्कोटिस
मप्रभं परस्परानुस्यूतं विभाव्य ततो जोमयं फट्कारं विश्रांतिरूपं हृदि ध्यात्वोच्चरेत् तथा च नीलतंत्रे मंत्रध्यानं प्रवक्ष्यामि
जपासर्वस्वदायकं मंत्रध्यानान्महेशानि शुध्यंति ब्रह्महादयः मूलं च केतु हृल्लेखां कोटिसूर्यसमप्रभां स्वाधिष्ठाने पीतव
र्णां द्वितीयं तु विभावयेत् नाभौ जीमूतसंकाशं कूर्चबीजं महाप्रभं अस्त्रबीजं हृदि ध्यायेत् कालाग्निसदृशप्रभं मूलादिब्र

तं०सा० ब्रह्मरंध्रे तु सर्वां विद्यां विभावयेत् सूर्यकोटिप्रतीकाशां योनिभिर्द्दष्टसर्द्धिकां इत्येवं यथाशक्ति जप्त्वा तेजोरूपं जपं समर्प्य
१५२ येत् अस्याः पुरश्चरणं लक्षजपः तथा च एवं कृत्वा हविष्याशी जपेल्लक्षमनन्यधीः तथा रहस्यमालामादाय जपेल्लक्षमिति
रहस्यमाला यथा अकस्मादीहितानि सिद्धिर्म्महाशंखाख्यमालया पंचाशन्मणिभिर्म्माला निर्मिता सर्वसिद्धिदा तथा च कां
तेन रचिता सिद्धिर्म्महाशंखाख्यमालया पंचाशन्मणिभिर्म्माला निर्मिता सर्वसिद्धिदा महाशंखाभावे स्फाटिकी कर्त्तव्या त
थामहाशंखे प्रशस्ते स्फाटिकीमालया जपेत् तारामंत्रेषु कुल्लुकायाः ज्ञानमावश्यकं तथा च मत्स्यसूक्ते कुल्लुका
यो न जानाति महामंत्रं जपेन्नरः पंचत्वं जायते तस्य यद्वा वातुलो भवेत् मायातंत्रे कुल्लुकां धारयेच्छीर्षे लिखित्वा भूर्जप
त्रके राजद्वारे सभायां च विजयी भवति ध्रुवं एवमुक्तेन जप्त्वा तद्दशांशहोमस्तद्दशांशतर्प्पणं तद्दशांशाभिषेक तद्दशांशब्रा
ह्मणभोजनं गुरुदक्षिणां चरेत् तदुक्तं सिद्धसारस्वते एवं जपं पुरा जप्त्वा दशांशमसितोत्पलैः आज्याक्तैर्जुहुयान्मंत्री वैत्वे
र्वी जुहुयात्ततः कालागरुद्रवोपेतैर्निर्म्मलैर्गंधवारिभिः तर्प्पयेच्च परां देवीं तत्प्रकारमिहोच्यते जलेवावाद्यविधिवत् राम
पाद्यैरुदकात्मकैः संतर्प्य विधिवद्देवीं परिवारान्समंततः सकृत् अभिषेको यथा देवीं बुद्ध्वा स्वमात्मानं संपूज्य साधकोत्तमः १५२

तारिणीसिद्धिं चयामीति जलं मूर्ध्नि विनिः क्षिपेत् अथ मंत्रभेदाः एकवीराकल्पे लिखेत् खं कूर्च्चसंयुक्तं रौद्रं त्रैगुण्यमेवच विधि
विष्णुमहेशानां खप्राक्तयाक्रमयोगतः एषामतामहाविद्या सर्व्वसिद्धिप्रदायिका रौद्रं प्रासादं त्रैगुण्यं प्रणवं विधिशक्तिवा
ग्भवं विष्णुशक्तीरमावीजं महेशशक्तिर्भुवनेशानीवीजं पानार्थ्यनप्रयोगाश्चतारिण्याः पूर्व्ववद्भवेत् प्रणवं भुवनेशानी हां
कूर्च्चवीजं नमस्तारायै सकलदुस्तरं तारय२ प्रणवयुग्मं वह्निवल्लभा तदुक्तं नीलतंत्रे प्रणवं पूर्व्वमुद्धृत्य हल्लेखा वाजमुद्धरेत्
गगनं शेषसंयुक्तं विंदुनादविभूषितं कूर्च्चवीजं चहृदयं तारायै च समुद्धरेत् सकलदुस्तरं तारय तारयेति तथापुनः तारयुग्मं
वह्निजायामंत्रोयं सुरपादपः ध्यानपूजादिकं सर्व्वं पूर्व्ववद्यं समाचरेत् किंत्वस्य पुरश्चरणं चतुर्लक्षजपः तदुक्तं तंत्रे वच
तुर्लक्षजपेनास्याः सिद्धयोष्टौ भवंति हि मायातंत्रे श्रीभगवानुवाच तारा चोग्रा महोग्रा च वज्रा नीला सरस्वती कामेश्वरी
भद्रकाली इत्यष्टौ तारिणी मताः उग्रमवर्ग्गगतो जीवो निगमस्वरसंयुतः नादविंदुसमाक्रांतस्तत्स्वरश्रीसमन्वितः कपि
लावामकर्णस्थं नादाढ्यं विंदुशेखरं पार्श्वांस्यं चतया त्रांतं शरांतं परिकीर्त्तितं मध्याद्यि मायाकवचं द्वितीयं मंत्रमुद्धृतं विप
रीतं त्रिधाक्षरं कूर्च्चाद्यं चतुरीयकं मायादिकवचांतं चपंचमं परिकीर्त्तितं मायामध्यगतं षष्ठं द्वितीयांतसप्तमं अष्टमं कव

चंमध्यंस्यादेवंभेदाष्टकंभवेत् उष्मवह्नीरेफः अवीजोहकारः निगमस्वरईकारः तत्वरश्मिवधूवीजंकपिलाहकारः शशांतं
फडंतं एतेनपंचाक्षरःप्रकृतिः मध्यादीतिवधर्म्मायाकूर्च्चफटविपरीतमिति कूर्च्चंवधूर्म्मायाफट् कूर्च्चंकूर्च्चंमायावधूफट्मा
यादीतिमायावधूफट् कूर्च्चमायेतिवधूमायाफट् कूर्च्चंद्वितीयेतिमायाकूर्च्चंवधूफट् अष्टममितिवधूकूर्च्चंमायाफट् ऋ
षिः स्यादष्टकच्छंदोनुष्टुब्देवतातथा शंभुपत्नीमहेशानि चतुर्वर्गेषुयोजयेत् कालचक्रंजपेन्मंत्रमेवमुक्तेनवर्त्मना ध्या
नपूजादिकंसर्वंपूर्ववत्समाचरेत् अक्षरस्यैवंभेदोयंफरोयत्रनतत्रवैजपेत् अक्षरंज्ञेयंन्यासेसर्वप्रतिष्ठितं प्रणवंतारे
तुत्तारेवह्निवल्लभा तदुक्तंगांधर्वेप्रणवंपूर्वमुच्चार्यतारेतुत्तारेचवतथा तुरेस्वाहेतिमंत्रोयंदशाक्षरउदाहृतः अस्याध्यानंस्व
तंत्रतंत्रेश्यामवर्णांत्रिनयनांद्विभुजांवरपंकजे दधानांवकुवर्णाभिर्विकृतरूपाभिरावृतां शक्तिभिःस्मेरवदनांस्मरमौक्तिकभूष
णां रत्नपादुकयोर्न्यस्तपादांवुजयुगंस्मरेत् अस्याःपूजादिकंसर्वंपूर्ववत्समाचरेत् पुरश्चरणंतुदशलक्षजपः तदुक्तंतंत्रे
वर्णलक्षंजपेद्धीमान् नियमेनयथाविधि दशांशंजुहुयान्मंत्रीघृताक्तैरक्तपुष्पकैः मंत्राक्षरं वाग्भवंभुवनेशानीप्रणवंवाग्भ
वंभुवनेश्वरीफट्स्वाहा तदुक्तंमातृकार्णवेवाग्भवंकुलवीजंचतारकंवाग्भवंतथा हृल्लेखाचास्त्रमंत्रांतेवह्निजायावधिर्मं १५३

नुः अष्टाक्षरो मनुः प्रोक्तो वेदमातुरनुत्तमं पंचांगान्यस्य मंत्रस्य पंचवीजैः प्रकल्पयेत् स्नानं अशेषाक्षरैर्न्यस्य लक्षलक्षसो भवेन्न
रः ध्यानपूजादिकं सर्वं पूर्ववत्तु समाचरेत् मत्स्यसूक्ते प्रणवं पूर्वमुक्त्वा पद्मयुग्मं तथैव च महापद्मे पदं अस्यान्ते पद्मावति
पदं ततः मायोस्वाहेति मंत्रोयं प्रोक्तः सप्तदशाक्षरः पूजा पूर्ववदुद्दिष्टा अर्द्धरात्रे चतुष्पथे जपमस्याचरेद्यस्तु स लभेद्
नकविस्तरथा हंसः प्रणवं मायाव धूः कूर्चं हंसः अष्टाक्षरी महाविद्या हंसाद्येनाम होदया तदुक्तं स्वच्छंदसंग्रहे शिववीजं महे
शानि शान्तिवीजं ततः परं विंदुसर्गसमायुक्तं वेदाद्यंतं दधः क्रमात् मायालक्ष्मीं वर्मवीजांतं हंसवीजमुदाहृतं एषा लघ्वा
क्षरा विद्या कथिता भुवि दुर्लभा पंचाक्षरी च या विद्या हंसाद्यंता महोदया केवलं त्वत्प्रयत्नेन तव स्नेहात् प्रकीर्तिता अ
अनयोर्जपपूजादीन्पंचाक्षरीवदाचरेत् अथ रहस्यपुरश्चरणं यथा अथवान्यप्रकारेण पुरश्चरणमिष्यते कुजे वा शनि
वारे वा नरमुंडं समाहृतं पंचगव्येन सम्मिलितं चंदनाद्यैर्विशेषतः निःक्षिप्य होमो हस्तार्द्धमानतः कानने वने तत्र तद्दिवसे रात्रौ
सहस्रं यदि मानतः एकाकी प्रजपेन्मंत्रं स भवेत्कल्पपादपः अथवान्यप्रकारेण पुरश्चरणमिष्यते शवमानीय लक्षादि
तेनैव परिखन्य च तद्दिनात्तद्दिनं यावत्तावदष्टोत्तरं शतं स भवेत्सर्वसिद्धीशो नात्र कार्या विचारणा सूर्योदये समारभ्य या

तं॰ सा॰ वत्सर्योदयात्परं तावज्जपन्निरातंकः सर्वसिद्धीश्वरो भवेत् अथवान्यप्रकारेण पुरश्चरणमिष्यते शरत्काले चतुर्थ्यादिन
१५४ चम्यंतं विशेषतः भक्तितः पूजयित्वा तु रात्रौ तावत्सहस्रकं जपेकाकी विजने केवलं तिमिरालये अष्टम्यादिनवम्यंतमुप
वासपरायणः मुंडमालातन्त्रे कृष्णाष्टमीं समारभ्य यावत्कृष्णाष्टमी भवेत् सहस्रसंख्यं जप्त्वा तु पुरश्चरणमिष्यते कृष्णां
चतुर्दशीं प्राप्य नवम्यंतं महोत्सवे अष्टमीनवमीरात्रौ पूजां कुर्याद्विशेषतः दशम्यां पारणं कुर्यात् मत्स्यमांसादिभिर्युतं अ
ष्टसहस्रं प्रजपेन्नित्यं देव्या भक्तिपरायणः चतुर्दशीं समारभ्य यावदन्या चतुर्दशी तावज्जपेन्महेशानि पुरश्चरणमिष्यते
केवलं जपमात्रेण सिद्धमंत्रा भवंति हि सूर्योदयं समारभ्य यावत्सूर्यो ऽस्तगो भवेत् तावत्संख्यजपेनास्य पुरश्चरणमीष्य
ते ॥ अथ वीरसाधनं तदुक्तं वीरतन्त्रे अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि कृष्णपक्षे विशेषेण साधयेद्वीरसा
धनं तत्राद्य प्रथमे यामे गते च सुरसुंदरि शवं वापि चितां वापि नीत्वा गत्वा यथासुखं साधयेत्स्वहितं मंत्री मंत्रध्यानपरः शुचिः
भयं नैव च कर्तव्यं हास्यं तत्र विवर्जयेत् चतुर्दिशं नवीले तमंत्रमेवं समभ्यसेत् अस्य पूजाद्रव्यं सामिषान्नं गुडं छागं सूपया राम
यसपिष्टकं नानाफलं च नैवेद्यं स्वस्वकल्पोक्तसाधितं चितास्थानं समानीय सुहृद्भिः शस्त्रपाणिभिः समानगुणसंपन्नैः सा १५४

धको वीतभीः स्वयं योगिनी हृदयवल्पर्थं मांसमाषान्नं चगुडं छागं तथा मधु पिष्टकं परमान्नं च पयो मूलं फलं तथा सप्तपा
त्रे बलिं कृत्वा चतुष्पात्रं चतुर्दिशि पात्रत्रयं सदा शब्दे स्थापयेन्मनुनामुना गुरुर्वा भ्रातरं वापि ब्राह्मणेनानु वापि सुव्रतान् अप्या
न पिचरक्षार्थं कियद्दूरे निवेशयेत् चितालक्षणं यथा असंस्कृता चिता ग्राह्या नानुसंस्कारसंयुता चंडालादिषु संप्राप्ता केवलं
शीघ्रसिद्धिदा अथाधिकारिलक्षणं महाबलो महाबुद्धिर्महासाहसिकः शुचिः महाक्षोभो दयावांश्च सर्वभूतहितेर
तः ततः सामान्यार्घ्यं विधाय स्वस्तिवाचनं कृत्वा संकल्पं कुर्यात् यथा ॐ अद्येत्यादि अमुकगोत्रः श्री अमुकदेवशर्माश्म
शानसाधनमहं करिष्ये इति संकल्प वस्त्रालंकारभूषाधैर्यस्थितः पूर्वदिङ्मुखः अस्त्रान्तं मूलमंत्रेण प्रोक्षणं यागा
भूमिषु मूलमंत्रेण फट्कारान्तेनेत्पर्यः गुरुपादरजो ध्यात्वा गणेशं बटुकं तथा योगिनीमातृकां चैव वामपादपुरः स
रं अस्त्रमंत्रेणात्मानं संरक्ष्य यथा अस्त्रमंत्रेण मंत्रह्रोरक्षामात्मनि कारयेत् ततः पुष्पांजलित्रयं क्षिपेत् तदुक्तं वीरतंत्रे
ये चात्र संस्थिता देवा राक्षसाश्च भयानकाः पिशाचाः सिद्धयो यक्षा गंधर्वाप्सरसां गणाः योगिन्यो मातरो भूताः सर्वाश्च खे
चरस्त्रियः सिद्धिदास्ता भवं त्वत्र तथा च ममरक्षकाः प्रणम्य मनुनानेन पुष्पांजलित्रयं क्षिपेत् श्मशानाधिपतिं पश्चाद्दे

रवंकालरूपिणं महाकालंयजेत्तपश्चात्पूर्वादिदिक्चतुष्टये पाद्यादिभिश्चमंत्रतोवलिंपश्चान्निवेदयेत् यथापूर्वे
श्मशानाधिपतिं पंचोपचारैः संपूज्यानेनमंत्रेणवलिंदद्याद्यथा ॐ हूं श्मशानाधिपइमं सामिषान्नंवलिंगृह्णप
घ विघ्ननिवारणंकुरुसिद्धिंमम प्रयच्छ स्वाहा ततोदक्षिणस्यांपूर्ववद्भैरवंसंपूज्य ॐ क्रौं भैरवभयानकइमंसामि
षान्नंवलिमित्यादिमंत्रेणचवलिंदद्यात् पश्चिमेपूर्ववत्कालभैरवंसंपूज्य ॐ हूंकालभैरवश्मशानाधिपइ
मंवलिमित्यादिमंत्रेणचवलिंदद्यात् उत्तरेपूर्ववन्महाकालंसंपूज्य ॐ हूं महाकालभैरवंश्मशानाधिपइमम्मि
त्यादि तथाचशब्दवीजंततः पश्चात्श्मशानाधिपतत्परं इममंते सामिषान्नंवलिंगृह्णततःपरं गृह्णगृह्ण
पयं हूंहूं विघ्ननिवारणं ततः कुरुसिद्धिंममयुतंप्रयच्छ स्वाहयान्वितं प्रणवाद्येनमनुनाप्रथमोवलिरीरितः
मायांतेभैरवःपश्चाद्भयानक ततःपरं वलिंहरेत् क्रमंते च महाकालात्पश्चात्पूर्ववदुच्चरेत् श्मशानाधिपपूर्वं
पूर्ववदुच्चपूर्ववद्वालिमुत्सृज्यदक्षिणेवालिमाहरेत् हूंमंतेकालशब्दांतेभैरवेतिततःपरं चितामध्येततोदद्याद्वलि एम
त्रयमनुत्तमां कालिकायैवलिंदत्वा परात्रिमहाकालिकालिकेघोरनिस्वने गृहाणेमंवलिंमातर्देहिसिद्धिमनुत्तमां १५५

त्लिं कालिकायैवलिं दत्वा भूतनाथाय दापयेत् शब्दांते श्मसानाधिपइत्यपि प्रणवाद्येन मनुना दापयेत् वलिमुत्त
मं ह्रूं शब्दांते सर्वगणनाथांते चाधिपाय च श्मशानमस्तके दत्वा पूर्ववत्समाचरेत् तारादेन वलिं दत्वा पंचगव्येन सुंदरि अ
द्भिः संप्रोक्षणं कृत्वा पीतवस्त्रे लिखेत्ततः भूर्जे वा वरपत्रे वा ततः पीठमंत्रं न्यसेत् पीठमास्तीर्य्य वै तस्मिन्नव रुवीरासने ततः
वीरार्दनेन देवेशि रक्षां दिक्षु प्रकल्पयेत् अस्यार्थः भूर्जपत्रादौ तु ततत्कल्पोक्त पीठमंत्रं लिखित्वा तत्र व्याघ्रचर्म्मादि पीठमा
स्तीर्य्य तत्र वीरासनक्रमेणोपविश्य वीरार्दनमंत्रेण चतुर्दिक्षु रक्षां कुर्य्यात् वीरार्दनमंत्रस्तु ह्रूं ह्रूं क्रीं क्रीं कालिके घोरदंष्ट्रे प्रचं
डे चंडनायिके दानवान्दारय २ हन २ शवशरीरे महाविघ्नं छेदय २ स्वाहा हूं फट् अनेन मंत्रितं लोष्ट्रं दशदिक्षु विनिक्षिपेत्
तन्मध्ये भैरवो देवो न विघ्नैः परिभूयते कूर्च्चद्वयं तथा देविमायायुग्ममतः परं कालिके घोरदंष्ट्रेति प्रचंडे चंडनायिके दा
नवान्दारयेत्युक्त्वा हनयुग्ममतः परं शवशरीरे महाविघ्नं छेदय द्वितीयं पुनः द्विठांतो वर्म्म अस्त्रांतो वीरार्दनमनुर्म्म
तः यदि प्रमादाद्देवेशि साधको भयविह्वलः ततस्तैस्तैः सुहृद्वर्गैः रक्षितो नाभिभूयते सितार्कसितवा ग्रालतूले वर्त्तिकां निर्मा
य दीपं संस्थाप्य देव्या अस्त्रेणानमद्रत्यस्त्रं संपूज्य अघ्य कुलदीपं निखनेत् तथा च अर्कें दुसितवाट्यालतूले निर्म्मितवर्त्ति

कां प्रदीपं तत्र संस्थाप्य अस्त्रं तत्र प्रपूजयेत् हतेतस्मिन्महादीपे विघ्नेश्च परिभूयते तदधश्चास्त्रमंत्रेण निरवलोत् कुलदी
पकं तत्रस्तत्रेत्कल्पोक्तभूतशुद्ध्यादिन्यासजालं विधाय इष्टदेवतां संपूज्य संकल्प्यमंत्रं जपेत् तथा च तत्र संकल्पस्तु ॐ
अद्येत्याद्यमुकगोत्रः श्री अमुकदेवशर्म्मा अद्यामुकमंत्रसिद्धिकामोऽमुकमंत्रस्यामुकसंख्यजपमहं करिष्ये इति संकल्प्य
देवताध्यानपरः सन् मंत्रं जपेत् तथा च तत्रतत्कल्पविधानेन भूतशुद्ध्यादिकं चरेत् पीठं वा यन्त्रं वापि विन्यस्य पूजयेत्
तः मंत्रध्यानपरो भूत्वा जपेन्मंत्रमनन्यधीः जपनियमस्तु एकाक्षरं यदि जपेदेकसहस्रं ततो जपेत् द्व्यक्षरेऽष्टसहस्रं
तु अक्षरे चायुतार्द्धकं अतः परं तु मंत्रद्वोग जातकसहस्रकं निशायां वा समारभ्य उदयांतं समाचरेत् गजांतकमष्टोत्तरसहस्र
मित्यर्थः यद्यसह्यं भयं कर्णे नेत्रे वस्त्रेण बंधयेत् ततोऽर्द्धरात्रपर्य्यंतं यदि किंचिन्न लभ्यते जयदुर्गाख्यमनुना तेनैव सर्षपान्
क्षिपेत् जयदुर्गामंत्रस्तु ॐ दुर्गे दुर्गे रक्षणि स्वाहा तिलोसि सोमदेवत्यो गोसवस्तृप्तिकारकः पितॄणां स्वर्गदाता त्वं मर्त्यानां मम
रक्षकः भूतप्रेतपिशाचानां विघ्नेषु शांतिकारक इति पठित्वा ईशानादिषु चतुर्दिक्षु निक्षिपेत् ततः सप्तपदं गत्वा पुनस्तत्रैव सं
विशेत् पुनर्देवतां संपूज्य जयेत् ततो यदि वरं वरयेति वदेत् तदा सत्यं कारयेत् वरं वरय इत्युक्ते साधकः स्थिरमानसः सत्यं च

कारयित्वानुवरयेद्दरमुत्तमं जपादौ तु वलिं दत्वा पश्चादपि वलिं हरेत् जपान्ते जपमध्ये वा देहि देहीति भाषिते तदापि च व
लिं दद्यान्महिषं वापि छागलं वलिं च यदपि सुमयेन यदा वलिं प्रार्थयते नरं कुञ्जरमेव वा दिनान्तरे च दा पूष्पा मिस्तीव लस्स्वग
हं व्रजेत् तथापि च वलिं दद्यात् पिष्टेन नरकुञ्जरान् पिष्टेनेति यवोद्भवेन धान्योद्भवेन सर्षपः तथा च तन्त्रान्तरे यवत्तोदमयं वा
पि धान्योद्भवमयं च वा चंद्रहासेन विधिवत् तन्मन्त्रेण घातयेत् योगिनीहृदये जपान्ते च वलिं दद्यादेवताये यथाविधि म
हिषं छागलं वापि गृहीत्वा वरमेव च गृहं गच्छेत् स्वसुहृद्दासार्दं स्मंहृष्टमानसः ततो दक्षिणां दद्यात् समाप्य साधनं देविद
क्षिणां विभवावधि गुरवे गुरुपुत्राय तत्पत्न्यै वा निवेदयेत् अथ श्मशानसाधनं तत्र स्थाननियममाह भावचूडामणौ
शून्यागारे पर्वते वापि निर्जने च तथापि वा विल्वमूले श्मशाने वा तत्समीपे वनस्थले अष्टम्यां च चतुर्दश्यां पक्षयोरुभयो
रपि भौमवारे तमिस्रायां साधयेत्सिद्धिमुत्तमं मांसभक्तं च वल्यर्थं धूपदीपादिकं तथा तिलाः कुशाः सर्षपाश्च स्थापनीयाः
प्रयत्नतः ततः पूर्वोक्तान्यतमस्थानं गत्वा सामान्यार्घं विधाय पूर्वमुखोपि फट्कारं कृत्वा भूमिं संप्रोक्ष्य गुरुगणेशं वटुकं
योगिनीं च चतुर्दिक्षु संपूज्य पूर्वोक्तवीरार्दनमन्त्रैः मन्त्रमो विलिख्य ये चात्र विघ्नकर्त्तार इत्यादि पूर्वोक्तमन्त्रेण भूमौ पुष्पांजलित्रयं

तं० सा०
१५७

दत्वा प्रणम्य श्मशानाधिपतिभ्यः पूर्वोक्तक्रमेण बलिं दत्वा अघोरमंत्रेण शिखाबंधनं कृत्वा सुदर्शनाख्येण मंत्रेणात्मानं रक्ष
२ हृदि हस्तं दत्वा स्वरक्षां कुर्य्यात् ततोऽघोरसुदर्शनमंत्रो तु ॐ स्फुर २ प्रस्फुर २ घोर २ घोरतर २ तनुरूप २ चट २ प्रचट २
कह २ रम २ बंध २ घातय २ हूं फट् ॐ सहस्रार हूं फट् ततः पूर्वोक्तक्रमेण भूतशुद्ध्यादिन्यासजालं विधाय जयदुर्गामंत्रेण दिक्षु
सर्षपान् विकीर्य्य तिलोसीति मंत्रेण तिलांश्च विकीर्य्य विहितशवसमीपं गच्छेत् अथ विहितशवोपयोग्यमदुष्टं भाव चूडा
मणौ यष्टिविद्धं शूलविद्धं खड्गविद्धं पयोमृतं रज्जुबद्धं सर्पदष्टं चंडालं चाभिभूतकं तरुणं सुंदरं शूरं रणे नष्टं समुज्वलं
पलायनविशून्यं तु संमुखे रणवर्तिनां भैरवतंत्रे तु यष्टिप्रभृतिविद्धं वा चाभिभूतं रणेन्मृतं शवमानीय कैश्चिन्नाहरेत्स्वेच्छया
मृतं स्त्रीवश्यपतितास्पृश्यपन्नगवर्जितं हि नवरं अव्यक्तलिंगं कुर्व्वीत वा द्विजभिन्नं शवं हरेत् न दुर्भिक्षमृतं चापि न पर्युषि
तमेव वा स्त्रीजनं चेद्दशांरूपं सर्वथा परिवर्ज्जयेत् कालीतंत्रे ब्राह्मणं गोमयं त्यक्त्वा साधयेद्वीरसाधनं महाशवाः प्रश
स्ताः स्युः प्रधाने वीरसाधने शूद्राः प्रयोगकर्तृणां प्रशस्ताः सर्वसिद्धये एवमुक्तं शवं गृहीत्वा मूलमंत्रेण पूजास्थानमा राम
नयेत् ततः शवसमीपं गत्वा हूं फडिति मंत्रेण शवमभ्युक्ष्य ॐ हूं मृतकाय नमः फडिति पुष्पांजलित्रयं दत्वा शवं स्पृष्ट्वा प्रणमे १५७

त् तदुक्तं भावचूडामणौ प्रणवाद्यस्त्रमंत्रेण शवस्य प्रोक्षणं चरेत् प्रणवं कूर्चबीजं च मृतकाय नमः अस्त्राय फट् पुष्पांजलित्रयं दत्वा
प्रणमेत् स्पर्शपूर्वकं प्रणाममंत्रस्तु वीरेश परमानंद शिवानंद कुलेश्वरः आनंदभैरवाकार देवीपर्यंकशंकर वीरोहं त्वां प्रपद्या
मि उत्तिष्ठ चंडिकार्चने अनेन प्रणम्य प्रक्षालयेत् ॐ हूं मृतकाय नमः इति प्रक्षालयित्वा सुगंधिजलेन स्नापयित्वा वाससा जल
मुत्तोल्य धूपैर्धूपितं कृत्वा चंदनादिना शवं प्रलिप्य कटिदेशे धृत्वा पूजास्थानमानयेत् तदुक्तं कालीतंत्रे तारं शवं मृतकाय न
मो नमः समुद्धरेत् शवस्नानमंत्रोयमिति भावचूडामणौ धूपेन धूपितं कृत्वा गंधादिना प्रलिप्य च रक्तादो यदि देवेशि मद्दयेत्
कुलसाधकं ततः कुशशय्यां कृत्वा पूर्वशिरः शवं स्थापयेत् तदुक्तं तत्रैव कुशशय्यायां परिक्षिप्य तत्रैव स्थापयेच्छवं ततः
लालवंग कर्पूर जातीखदिरसारकैः तांबूलं तन्मुखे दत्वा कुर्याच्छवमधोमुखं ततः पृष्ठं चंदनेनापि प्रलिप्य प्रयत्नतः सुधीः बा
हुमूलादिकं युतं चतुरस्रं विधाय च मध्ये पद्मं चतुर्द्वारं दलाष्टकसमन्वितं पीठमंत्रं लिखेन्मध्ये तत्कल्पविधानतः
ॐ ह्रीं फडिति मंत्रेण तत्कल्पोक्तपीठमनुं लिखेत् तदुपरि कंबलाद्यासनं न्यसेत् तत्रांतरे च गत्वा शवस्य सान्निध्यं धार
येत् कटिदेशतः यद्युपद्रावयेत् तस्य दद्यान्निष्ठीवनं मुखे पुनः प्रक्षालनं कृत्वा जपस्थाने समानयेत् पादस्यांगुलयस्तकाष्ठा

नं० स्तो० निन्नतो दश दिक्षु पूर्ववत्संस्थाप्य क्रमेण इंद्रादिदेवताः संपूज्य मासमिषान्नेन बलिं हरेत् तदुक्तं तंत्रांतरे द्वादशांगुलमानानि
१५८ यज्ञकाष्ठानि दिक्षु च संस्थाप्य प्रजयेत्तत्र इंद्रादि दश देवताः तत्र क्रमः लां इंद्राय सुराधिपतये ऐरावतवाहनाय वज्रह
स्ताय शक्तिया रिषिदाय परिवाराय सवाहनाय नम इति पाद्यादिभिः संपूज्य बलिं दद्यात् ॐ लां इंद्राय सुराधिपतये इमं
बलिं गृह्ण २ गृह्णापय २ विघ्ननिवारणं कुरु लाभं मम सिद्धिं प्रयच्छ स्वाहा एवमां सभक्तबलिं ॐ इंद्राय स्वाहा १ रां अग्नये
तेजोधिपतये मेषवाहनाय शक्तिहस्ताय सपरिवाराय सवाहनाय नम इत्यादि पूर्ववत्संपूज्य बलिं दद्यादनेन ॐ रां अग्न
ये तेजोधिपतये सायुधायेत्यादि पूर्ववत् २ ॐ यां यमाय प्रेताधिपतये दंडहस्ताय महिषवाहनाय सायुधायेत्यादिना गं
धादिभिः संपूज्य बलिं दद्यादनेन ॐ यां यमाय प्रेताधिपतये इत्यादिना ३ ॐ क्षां नैर्ऋताय रक्षोधिपतये असिहस्ता
य श्ववाहनाय नम इति संपूज्य बलिं दद्यादनेन ॐ क्षां निर्ऋतये इत्यादिना पूर्ववत् ४ ॐ वां वरुणाय जलाधिपतये
पाशहस्ताय मकरवाहनाय सपरिवारायेत्यादिना पूर्ववत्संपूज्य बलिं दद्यादनेन ॐ वां वरुणाय इत्यादिना पूर्ववत् ५ याम्
ॐ वायवे प्राणाधिपतये हरिणवाहनाय अंकुशहस्ताय सपरिवारायेत्यादिना पूर्ववत्संपूज्य बलिं दद्यादनेन यां वाय १५८

वेश्राणाधिपतये इमम् इत्यादिना पूर्ववत् ६ ॐ कुं कुवेराय यक्षाधिपतये गदाहस्ताय नरवाहनाय सपरिवाराये
मादिना पूर्ववत्संपूज्य वलिं दद्यादनेन ॐ कुं कुवेराय यक्षाधिपतये इमम् इत्यादि पूर्ववत् ७ ॐ हां ईशानाय भूताधि
पतये शूलहस्ताय वृषवाहनाय सपरिवारायेत्यादिना पूर्ववत्संपूज्य वलिं दद्यादनेन ॐ हां ईशानाय भूताधिप
तये इमम् इत्यादि पूर्ववत् ८ इंद्रेशानायोर्म्मध्ये ॐ आं ब्रह्मणे लोकाधिपतये हंसवाहनाय पद्महस्ताय सपरिवारा
येत्यादिना पूर्ववत्संपूज्य वलिं दद्यादनेन ॐ आं ब्रह्मणे लोकाधिपतये इमम् इत्यादि पूर्ववत् ९ निरृतिवरुणयोर्म्मध्ये ॐ अं
नंताय नागाधिपतये चक्रहस्ताय रथवाहनाय सपरिवारायेत्यादिना संपूज्य वलिं दद्यात् ॐ आं अनंताय नागाधिपतये
इमम् इत्यादि पूर्ववत् १० ततः सर्वभूतवलिं दद्यात् अत्र सर्वत्र समिषान्नेन वलिं दद्यात् ततश्च अधिष्ठातृदेवताभ्यो व
लिं च मुख्यां ततः चतुःषष्टियोगिनीभ्यो डाकिनीभ्योपि संदिशेत् अथ पूजासामग्रीसमीपे दूरे चोत्तरसाधकं संस्थाप्य मूलांते
क्लीं फट् शवासनाय नमः इत्यासनं संपूज्य क्लीं फडंतमूलमुच्चरन् अश्वारोहणक्रमेण शवोपरि उपविश्य पादतले कुशान्दत्वा शा
वके स्थान प्रसार्य गुटिकां वध्वा गुरुं गणपतिं देवीं च नमस्कृत्य प्राणायाम षडंगन्यासौ कृत्वा पूर्वोक्तवीरार्दनमंत्रेण दशदिक्षु

तं० सा० लोक्तनिदिष्यसंकल्पंकुर्य्याद्यथा अद्येत्याद्यमुकगोत्रः श्रीअमुकदेवशर्म्माअमुकदेवतायाःसंदर्शनकामोऽमुकमंत्रस्यामुकसंख्य
१५९ जपमहं करिष्ये इतिसंकल्प ॐ ह्रीं आधारशक्तिकमलासनायनमइत्यासनंसंपूज्य स्ववामे शवसमीपे अर्घ्यपात्रादिकंसंस्थाप्य
शवजुटिकायांपीठपूजादिकं कृत्वाषोडशोपचारैः पंचोपचारैर्वा देवींसंपूज्यशवमुखे देवीगंधादिनासंतर्प्पयेत् ततःशवादुत्थायसंमु
खेगत्वामंत्रंपठेत् यथा ॐ वशोमेभवदेवेशममवीरसिद्धिं देहि रमहाभागकृताश्रयपरायण ततःपट्टसूत्रस्परज्वाशवचरणौवंध
येत् मूलेनमहेशो भवदेवेशवीरसिद्धिकृतास्पद ॐ भीमाभीरुभयाभावभावलोचनभावुक त्राहिमांदेवदेवेशशवानामाधिपाधि
प इत्यनेनशवस्यपादतलेत्रिकोणंयत्रंमालिख्य ततःशवोपरिउपविश्यहस्तद्वयपार्श्वयोःप्रसार्यतदुपरिकुशान्दत्वातत्रस्वपा
दौनिधायप्राणायामंपुनःकृत्वाशिरसिगुरुंविभाव्यहृदिदेवींध्यात्वा ॐ इतिसंपुटीकृत्वाविहितमालयामौनीभूत्वाविभीर्जपये
त् अत्रश्मशानसाधनक्रमेणजपःकार्य्यः यद्यर्द्धरात्रपर्य्यन्तंकिंचिन्नलभ्यते तदापूर्ववत्सर्षपतिलविकिरणंसत्यपदग
मनंकृत्वाजपंकुर्य्यात् भयेजाते एवंपठेत् यथाशवाइयंनास्तिभयेजातेवदेत्ततः यत्प्रार्थयसेवलिंत्वंनदातव्यंकुंजराराम
दिकं दिनांतरेयुदास्यामिस्वनामकथयस्वमेइत्युक्त्वासंस्कृतेनैवनिर्भयःसन्पुनर्जपेत् ततश्चेन्मधुरंवक्ति वक्तव्यंमधुरंत १५९

तः ततः सत्यं कारयित्वा वरं च प्रार्थयेत्ततः यदि सत्यं न करोति वरं वा न प्रयच्छति तदा पुनर्जपेद्यजमानेकाग्रमनसोयथात्र
स्यार्थः यदि जपकाले छाका(?) गंगमा कुंजरादिकं प्रार्थयते तदा दिनांतरे दास्यामि मम मस्थाने स्वनामकं यय इत्युक्त्वा पुनर्जपेत् यदि स्व
नाममधुरं कथयति तदा अमुकं इति सत्यं कुरु कृते सत्ये वरं प्रार्थयेत् यदि कदापि सत्यं न करोति वरं वा न प्रयच्छति तदा पुनर्जपेत् स
त्ये कृते करलग्रामंत्य जेखड्गपादिकं फलं ज्ञानमिति ज्ञात्वा तु टिकामो चयेत्ततः शावं प्रक्षाल्य तस्याप्यमो चयेत्पादबंधनं पा
दचक्रमोचयित्वा पूजा द्रव्यं जले क्षिपेत् शावं जले वा गर्ते वा निःक्षिप्य स्नानमाचरेत् ततस्तु स्वगृहं गत्वा च लिं दद्यात् दिनां
तरे मंत्रस्तु अग्निमरात्रौ येषां यजमानो हन्ते गङ्क्ष्व(?) त्विमं बलिं अथ ये यांचितान अश्वान्नर कुंजरसूकरान् दत्वापि हमयानते कर्त
व्यं समुपोषणं ततः परेह्नि नित्यक्रियां कृत्वा पंचगव्यं पिबेत् पंचविंशति संख्यकान् ब्राह्मणान् भोजयेत् यथापरेह्नि नित्यमाच
र्य पंचगव्यं पिबेत्ततः ब्राह्मणान् भोजयेत्पंचविंशति संख्यकान् सप्तपंचविहीनान् वा त्रमेपैव दशावधि ततः स्नात्वा च भुक्त्वा
च निवसेदुत्तमस्थले यदि न स्यात् क्षिप्रं भोजनं तदा निर्धनतां व्रजेत् तेन चेन्निर्द्धनत्वं स्यात्तदा देवी प्रकुप्यति त्रिरात्रं वा थ षड्रात्रं
नवरात्रं तु गोपयेत् स्त्रीशय्यां यदि गच्छेत्तु तदा व्याधिं विनिर्दिशेत् गीतं श्रुत्वा च बधिरो निःचक्षुर्नस्य दर्शनात् यदि वह्निदिने वा

तं० सा० कंतदास्यमरकतामभवेत् पंचदशादिनंयावद्देहेदेवस्यसंस्थितिः नमस्कीकुर्यान्नृत्यपुष्पंवह्निर्यातियदातदा तदावस्त्रंपरित्य
१६० ज्यगृह्णीयाद्वसनांतरं गोब्राह्मणविनिंदांचनकुर्याच्चकदाचन दुर्जनंपतितंक्लीवंनस्पृशेच्चकदाचन देवगोब्राह्मणादी
श्चप्रत्यहंसंस्पृशेच्छुचिः प्रातर्नित्यक्रियांतेचबिल्वपत्रोदकंपिबेत् ततःस्नात्वातुगंगायांप्राप्तेषोडशवासरे स्वाहांतंमंत्रमु
च्चार्यतर्पणांतेनमःपदं एवंशतत्रयादूर्द्ध्वंदेवान्संतर्पयेज्जलैः स्नानतर्पणशून्यस्यनस्यादेवस्यतर्पणं इत्यनेनवि
धानेनसिद्धिंप्राप्नोतिसाधकः इहभुक्त्वावरान्भोगानंतेयातिहरेःपदं ततोदक्षिणांदत्त्वाऽच्छिद्रावधारणंकुर्यादि
तिवीरसाधनं अथविद्याभेदाः तंत्रकुब्जिकातंत्रे प्रणवंचततोमायांकूर्चबीजंसमुद्धरेत् शिवायेतिपदंतश्च
चंडोग्रायमहामनुः चंडोग्रशूलपाणिरयंसर्वार्थसाधकः अस्यब्रह्माऋषिर्गायत्रीछंदोमायाबीजंदेवश्चंडोग्रइरितः
षड्दीर्घभाजाबीजेनप्रणवाद्येनसंयुतेनषडंगकं शुद्धस्फटिकसंकाशंचतुर्वक्त्रंकिरीटिनं शूलंकपालंदक्षेतुवामेतुपाश
मंकुशंसुरापानसमाविष्टंसाधकाभीष्टदायकं ध्यात्वासंप्रजपेद्देवेशिपंचसहस्रंमनुंजपेत् दशांशंसंस्कृतेवह्नौहुनेद्भक्तोत् राम
पलेनच अथात्रप्रयोगः त्रिमध्वक्तैर्नलभतेकवितांधनवाग्भवेत् रक्तपद्मस्यहोमेनराज्ञोवशमहतोश्रियमाप्नुयात् पायस १६०

स्यन्तु होमेन शत्रून्नाशयतेऽचिरात् कुसुंभतैलहोमेन रिपून् हन्यान्नसंशयः करवीरस्य होमेन वाकस्तंभो जायते ध्रुवं गुग्गु-
पद्मस्य होमेन वशयेदखिलं जगत् षट्कोणषट्दलेपद्मं मध्ये मूलं प्रकल्पयेत् केवलं शुद्धभावेन हविष्याशी [illegible] वा जपेत् अ-
स्य पुरश्चरणमात्रेण न च विघ्नैर्विलिप्यते अस्यैव जपमात्रेण वाक्सिद्धं लभेत् ध्रुवं अथ वक्ष्ये महादेवीमातंगीं सर्वसिद्धिदां अ-
स्योपसनमात्रेण वाक्सिद्धिं लभते ध्रुवं वामकेश्वरतंत्रे इति चंडोग्रशूलपाणि परिच्छेदः प्रणवं च ततो माया कामबीजं च कूर्चकं
मातंगिनी ङेयुतास्त्रं च वह्निजायावधिर्मनुः ऋषिस्याद्दक्षिणामूर्त्तिर्विराट्छंदः प्रकीर्तितः मातंगी देवता देवी सर्वसिद्धिप्रदा
यिनी अंगन्यासकरन्यासौ कुर्यान्मंत्री समाहितः षड्दीर्घभाजा बीजेन प्रणवाद्येन कल्पयेत् षट्कोणषट्दलं पद्मं लिखेद्यन्मनोर-
रं ततः पूजा प्रकर्तव्या जवापुष्पेण मंत्रवित् अष्टशक्तीश्च वद्दले पूजयेत्सुसमाहितः रतिः प्रीतिर्मनोभवा क्रियाश्च शुलियः अन-
ङ्गकुसुमानंगमदनामंगनालसा इत्यष्टशक्तीः संपूज्या उपहारसमन्वितः ततो देवीं परां ध्यायेत्साधकः स्थिरमानसः श्यामांगीं शशिशेख- शा शे
रां त्रिनयनां रत्नसिंहासनस्थितां वेदैर्बाहुदंडैरसिखेटकपाशांकुशधरां एवं ध्यात्वा महादेवीं गंधपुष्पैर्मनोरमैः नैवेद्यं तु महादेव्यै
पायसं शर्करान्वितं पुरश्चरणकाले तु षट्सहस्रमनुं जपेत् तद्दशांशं कुंडे दद्यात् शर्करामधुभिः सह त्रलवृक्षोद्भवैः काष्ठैः साधकः

तं० सा०
१६१
161

शक्तिभिः सह एवं पुराश्रियां कृत्वा प्रयोगविधिमाहरेत् चतुःपथे श्मशाने वा कलामध्ये च मांत्रिकः मत्स्यं मांसं पिष्टकं च दद्याद्रूपं च यु
ग्गुलुं रात्रियोगेन कर्त्तव्यं सदा पूर्णफलसाधकः एवं प्रयोगमात्रेण लेकविता जायते ध्रुवं अग्निस्तंभं जलस्तंभं वाक्स्तंभं कारयेद्ध्रुवं मंत्रीऽ
यतिशत्रुं स्ववृतां दासीभोगिकुलं यथा शास्त्रवादे विवादे च सत्राया राजसंसदि सर्वत्र जयमाप्नोति सर्व्वथैव न संशयः अनेनैव
विधानेन मातंगी सिद्धिदायिनी नूनं नगरं हमागम्य कुबेरो दीयते वसु विना मत्स्यं विना मांसैर्नार्चयेत्परदेवतां इति मातंगी ॥
अथोच्छिष्टचांडालिमंत्राः तदुक्तं फेत्कारिण्यां उक्त्वा पुच्छिष्टशब्दं तु तथा चांडालिनीति च सुमुखी तु ततो देवीं कीर्त्तयेत्तदनंतं ति
रं महापिशाचिनीपश्चाद्ल्लुज्ञा वीजं ततः परं नादविंदुसमायुक्तं ठकारत्रितयं पुनः सविसर्गं महादेवि सर्व्वसिद्धिप्रदायकं मं
त्रांतरं तदुक्तं तंत्रांतरे अथोच्छिष्टचांडालिमातंगीपदमीरयेत् ततः सर्व्ववशं चांते करि ह्रूं ठ्ल्किवल्लभा एको नविंशतावर्णैः
सर्व्वाभीष्टकरो भवेत् इति मंत्रांतरं मंत्रदेवप्रकाशिकायां वाग्भवं माया कामः सौः ऐं ज्येष्ठमातंगिनमामि उच्छिष्टचांडालिनि त्रैलो
क्यवशंकरि स्वाहेति इमां विद्यां जपेद्देवि चापरा हूंसमाश्रिता इयं विद्या महाविद्या सर्वपापोपहारिणी स्वर्गदा मोक्षदा चैव राम
जयसौभाग्यप्रदायिका यां यां प्रार्थयते सिद्धिं हठात्तां तामवाप्नुयात् विधानं च प्रवक्ष्यामि शृणु देवि वरानने भोजनानंतरं देवि विने १६१

वाचमनेकृते वलिंदद्यात्प्रथमतोमूलमंत्रेणसाधकः ततोमंत्रंजपेत् ध्यात्वादेवींतामिष्टसिद्धये वलिमुच्छिष्टेनतथाचनति
थिर्नचनक्षत्रंनचांगन्यासमेवच नातिदोषोनवाविघ्नंनाशौचंनियमोनच यस्यातिष्ठतिमंत्रोयंनचविघ्नैःसबाध्यते ध्यानंतु
शवोपरिसमासीनांरक्तांवरपरिच्छदां रक्तालंकारसंयुक्तांगुंजाहारविभूषितां षोडशाब्दांचयुवतींपीनोन्नतपयोधरां क
पालकर्तृकाहस्तांपरंज्योतिःस्वरूपिणीं वामदक्षिणयोगेनध्यायेन्मंत्रविदुत्तमः उच्छिष्टेनवलिंदत्वा जपेत्तद्गतमानसः उ
च्छिष्टेनचकर्तव्योजपोऽस्याःसिद्धिमिच्छता उच्छिष्टजपमानस्य जायतेसर्वसिद्धयः अपरंचप्रवक्ष्यामिशृणुदेविफलप्रदं
होमंचतर्पणंचैवसर्वकामार्थसिद्धये स्थंडिलेमंडलंकृत्वाचतुरस्रंसमंततः पूजयेन्मंडलंदेविमूलमंत्रेणसाधकः ततोम
न्त्रमनुस्मार्घ्यमंडलायनम इतिमंत्रेणपूजयेत् ततोवह्निस्वरूपांदेवतांध्यात्वाहोमयेत् तथाचततोदेवींसमाधायवह्निरूपव्यव
स्थितां देवींध्यात्वाचरेद्धोमंदधिसिद्धार्थतंदुलैः सहस्रमात्रहोमेनराजानंवशमानयेत् मार्जारस्यतुमांसेनदद्याद्धोमंसमाच
रेत् सप्राप्नोतिपरांविद्यांसर्वशास्त्रवशीकृतां कुर्य्याच्छागस्यमांसेनहोमंमधुसमन्वितं सहस्रैकविधानेनभवंतिकुलसिद्धयः वि
द्याकामश्चरेद्धोमंशर्करायुतपायसैः नूनंतस्यभवेद्देविसद्योविद्याचतुर्दश विल्वपत्रैस्त्रिमध्वक्तैर्मासमेकंसमाहितः वंध्यापि

तं०सा० लभते पुत्रं चिरंजीविनमुत्तमं कर्कंधुकुसुमं कृत्वा रक्तं मधुसमन्वितं दुर्भगायाः हुत्वा देवि सौभाग्यं सुमदायकं रजस्वला यावस्त्रेण
१६२ मधुना पायसेन च होमं कृत्वा महादेवि त्रैलोक्यं वशमानयेत् इति पिष्टाकल्पिता विद्यास्तु पापप्रणाशिनी मंत्रस्योच्चारणाद्देवि सर्वसौभा
ग्यदायकं उच्छिष्टे हृद्गणेशं स्पृष्ट्वा स पवित्रे जपेन्मनुं अत्र यद्यपि पुरश्चरणं नोक्तं तथाप्यष्टोत्तरसहस्रं जपः तद्दशांशेन होमादिकं
वोद्धव्यं यथा येषां जपे च होमे च संख्या नोक्ता मनीषिभिः तेषामष्टसहस्राणि संख्यास्यात् जपहोमयोः इत्यभिधानादष्टाधिकस
हस्रमिति संप्रदायः आसां सिद्धविद्यात्वात् पुरश्चरणं नास्तीति निर्वंधारः अथ धूमावतीमंत्राः तदुक्तं फेत्कारिण्यां दांता
वधीश विंद्वंतौ वीजं धूमावती द्विठः धूमावतीमनुः प्रोक्तो वैरिनिग्रहकारकः अस्य पूजा प्रातः कृत्यादिकं कृत्वा भूतशुद्धिप्राणा
यामौ च कृत्वा ऋष्यादिन्यासं कुर्यात् यथा शिरसि पिप्पलाद ऋषये नमः मुखे निवृच्छंदसे नमः हृदि धूमावत्यै देवतायै नमः
ततः कराङ्गन्यासौ धां अंगुष्ठाभ्यां नमः धीं तर्जनीभ्यां स्वाहेत्यादि धां हृदयाय नमः इत्यादि च ततो ध्यानं विवर्णा चंचला दुष्टा दीर्घा
च मलिनांवरा विमुक्तकुंतला रूक्षा विधवा विरलद्विजा काकध्वजरथारूढा विलंवितपयोधरा सूर्यहस्तातिरूक्षाक्षा धृतहस्ता राम
वरान्विता प्रवृद्धघोणा तु भृशं कुटिला कुटिलेक्षणा क्षुत्पिपासार्दिता नित्यं भयदा कलहास्पदा विरलद्विजा विरलदंते सर्वः ज १६२

पेत् लक्षचतुर्दशपांपुरश्चरणसिद्धयेत् उपवासरतो मंत्री शून्यागारे दिवानिशं श्मशाने विपिने वापि जपेल्लक्षं तु वाग्यतः सो ऽपी
षः साईवासाश्च पुरश्चरणकर्मणि। आरव्योपरि लिखेॐ मांत्रं जन्मिन्यस्याप्य शिवं जयेत् अवष्टभ्य शिवं शत्रोर्न्नाम्ना नु प्रजपे
न्मनुं सहस्राद्र्दूर्द्धतः शत्रुं ज्वरेण परिगृह्यते पंचगव्येन शांतिः स्यात् ज्वरस्य पयसापि वा द्र्व्वं वज्रपं चोपचारैः संप्रज्ययेत् कृ
त्वा मंत्रे रिपोराख्यामरण्ये यामिनीदले उन्मादो जायते शत्रोर्मनो रयुतजापतः दग्धाकाकश्मशानागैौ न ड्रस्मादायमंत्रि
तं विरोधिनाम्नोष्टाशा सुसप्यउच्चाटनं भवेत् मंत्रितमष्टोत्तरशतमिति अष्टाशासु क्षिपेदिति शेषः श्मशानभस्मना कृत्वा
शिवं तस्योपरि न्यसेत् विरोधिनामसंरुद्धं तस्यपदे समर्च्चयेत् महिषीक्षीरधूपं च यस्यद्युत्तुविपत्करं महिषीरूपमास्याद्यस्व
प्ने शत्रुं विनाशयेत् मंत्रेणानेन लिखेत् ड्रस्म रिपुमंदिरे शत्रूनुच्चाटयेन्नूनं नात्र कार्य्या विचारणा श्मशानभस्मना लिं
गं कृत्वा पुष्पादिनार्चयेत् भगवन्निति संभाष्य मनसा कर्म्म चिंतयन् निंवकाकछदावेकीलस्य चाष्टशतं जपेत् दद्याद्धूपं साध्य
नाम्नासद्यो विद्वेषयेद्दीन् अस्यार्थः निंवकाकछदावेकी लसपलद्दुपतिअष्टोत्तरं शतं जप्त्वा तेन द्रव्येण मुक्त द्वेषयरमूलं तु चा
र्य्य धूपं दद्यात् दद्याच चितिकाष्टानले क्षीरहोमाच्छांतिः सदा भवेत् तथा रजो धूपप्रदानेन गर्धरूपेण कालिका मारयत्परि

मागत्यशांतिर्निर्म्माल्यधूपतः वराहकर्णधूपेन हस्ताच्छूकररूपिणी अश्वत्थपत्रधूपेन शांतिर्भवति नान्यथा शांतिः
सर्व्वाभिचारस्य पंचगव्येन जायते क्षीरेणवापि देवेशि मधुरत्रितयेन वा कालेसीरतरोर्विंदर्भपविलिखेन्मंत्रेण नाम सा
रं जप्त्वा लिख्य पदद्वयेनुनिखनेद्दुग्धाटनमित्यादि प्रयोगः अथ भद्रकाली मंत्रः प्रासादवीजमुद्धृत्य कालीतिपदमुद्धरेत् म
हाकालिपदं चोक्त्वा किलियुग्ममतःपरं अस्त्रमग्निप्रियांतो यं भद्रकालीमनुर्म्मतः आराध्य प्रजपेल्लिक्षमष्टोत्तरशतं मनुं
जयमाला विधातव्याऽष्टोत्तरशतेन च ध्यात्वैवं महाकाली देवी सर्व्वभयापहा आराधयेन्निर्भक्तश्चुद्धिं प्राणपामोत्तरुत्वपिंचो
पचारैः शिवलिंगे प्रजपेदित्यर्थः ध्यानं क्षुत्क्षामाकोटराक्षीमसिमलिनमुखीमुक्तकेशीं रुदंती नाहंतृप्ता वदंती जगदखि
लमिदं ग्रासमेकं करोमि हस्ताभ्यां धारयंती ज्वलदनलशिखासन्निभं पाशमुग्रं दंतैर्जंबूफलाभैः परिहरतु भयं पातु मां भद्र
काली प्रयोगमात्रं कर्त्तव्यं वैरिनिग्रहकारकं श्रृंदेवि महादेवी शत्रुनिग्रहकारिणी यथेष्टचिंतया चिंत्य धर्म्मकामार्थसिद्धिदा
अत्रपुरश्चरणादिकं दक्षिणकालीमंत्रवदिति केचित् वस्तुतस्तु पुरश्चरणमष्टोत्तरसहस्रजपः अथोच्छिष्टगणेशमंत्रः
तंत्रांतरे हस्तिपदं समुच्चार्य्य पिशाचीतिपदं ततः देवराजं सनेत्रं च कांतमीशास्वरान्वितं वह्निजायावधिर्म्मंत्रस्तारादयः सर्व्वकामदः

प्रणवस्थानेगमितिवाकेचित् तथा चन तिथिरिवित्वत्रं नोपवासं विधीयते यथेष्टचिंतयामंत्रः सर्वकामफलप्रदः अस्य पूजा
प्रातःकृत्यादिभूतशुद्धिप्राणायामांतंविधाय करांगादिन्यासंकुर्यात् अथाशिरसिसुधीरऋषयेनमः मुखेनिवृद्गायत्रीछंदसेनमः हृ
दिउच्छिष्टगणपतयेदेवतायैनमः ततःप्रणवेनकरांगन्यासौकृत्वा ध्यायेत् रक्तमूर्त्तिंगणेशानं सर्वालंकारभूषितं रक्तवस्त्रंत्रि
नेत्रंचरक्तपद्मासनस्थितं चतुर्भुजंमहाकायंद्विदंतंसस्मितानन‍ं इष्टंचदक्षिणेहस्ते दंतंचतदधःकरे पाशांकुशौचहस्ताभ्यां
जटामंडलवेष्टितं ललाटचंद्ररेखाढ्यं सर्वालंकारभूषितं एवंध्यात्वाकरस्थपुष्पेणमूलेनशिरसिसंपूज्य बहिःपूजामारभेत्
अष्टदलपद्मंलिखित्वापूजयेत् प्रथमंमूलेनार्घ्यपात्रंसंस्थाप्यदर्शयित्वाप्रजप्यतेनोदकेनात्मानंपूजोपकरणंचाभ्युक्ष्यपुनर्ध्या
त्वाअष्टदलपद्ममध्येस्थापयेत् ततःपंचोपचारैःसंपूज्यपत्रेषुपूर्वादिषु ॐ वक्रतुंडायस्वाहा एकदंतायस्वाहा लंबोदरायस्वा
हा विकटायस्वाहा विघ्नायगजवक्त्रायविनायकायगणपतयेमध्येहस्तिमुखायपुनर्देवंसंपूज्ययथाशक्तिजप्त्वासमर्प्यब
लिंनैवेद्यमानीयउच्छिष्टगणेशायमहाकालायएषबलिर्नमः इतिबलिंदत्त्वा आचमनीयादिकंदद्यात् विशेषफलकांक्षिभिः
पुनः ॐ क्रों ह्रीं हूं हुं फट् स्वाहेत्यनेनबलिंदद्यात् ततःपुष्पमेकंदक्षिणदिशिक्षिप्त्वाक्षमस्वेतिविसर्जयेत् अस्यपुरश्चरणंच

३७

गं०सा०

१६४ तुर्लक्षजपः तथा च सहस्रं हि जपेन्नित्यं यो वि नियमपूर्वकं स्नापयेन्मधुना नित्यं नैवेद्यं गुडपायसं भुक्त्वोच्छिष्टो जपेन्नित्यं गणेशो
ह्यस्य सदा प्रियः लक्ष्मीश्चतुर्थीमारभ्य यावच्छुक्लां चतुर्थिकां श्वेतार्कनाकृतिं कृत्वा रक्तचंदनकेन वा अंगुष्ठमात्रं प्रतिष्ठाप्य द्विजा
तिगुरुसन्निधौ जप्त्वा घोडशसहस्रं सिद्धमंत्रो भवेत् ध्रुवं यो विदिति यो वि दुपगमे नियतपुरस्सरमित्यर्थः ननु त्यागे नियमः
अप्रसंगादनौचित्यादित्यादिदर्शनात् अथात्र प्रयोगः राजद्वारे नयारण्ये सभायां गोत्रसंसदि विवादे व्यवहारे च संग्रामे शत्रुसंक
टे नौकायां विपिने चापि द्यूते च व्यसने तथा ग्रामदाहे चौरविद्धे सिंहव्याघ्रादिसंकटे स्मरणे देवदेवस्य सर्वविघ्नविद्रुतं भवेत् तत्संद
नश्यति क्षिप्रं सूर्येणैव तमो यथा तथा दोच्छिष्टगणेशानो यक्षराजकुराजेन धीमता आराधितः सोपहारैः सम्पादिष्टफलप्रदः एवं क
त्वा व्यवस्थां तु नदधने श्वरतां गतः अपामार्गसमिद्धोमैः सौभाग्यं लभते ध्रुवं तथा वानरास्थिसमुद्भूतं कीलं मंत्राभिमंत्रितं निखनेन्मंदि
रे यस्य भवेदुच्चाटनं परं अथ वीथ्यां खनेद्यस्य क्रयविक्रयनां हरेत् मानुषास्थिसमुद्भूतं कीलकं चाभिमंत्रितं निखनेन्मंदिरे यस्य मर
णं तस्य निश्चितं उद्धृतेषु भवेच्छांतिः स्वरूपयन ति यस्य नाम्ना जपेन्मंत्रं सहस्रं स वशी भवेत् पंचसहस्रहोमेन उदवहेत् वरां स्त्रियं सह राम
स्रदशहोमेन राजा सद्यो वशो भवेत् लक्षजपेन हैवाढिलक्षेरा जपं त्रयः दशलक्षेन तद्राष्ट्रं वश्यं तस्य च सर्वदा अणिमादिमहासिद्धिः १६५

कोटिजापान्नसंशयः खेचरत्वं भवेन्नित्यं सर्वज्ञत्वं च जायते मंत्रं विलिख्य शिरसि कंठे वा धारयेद्यदि सौभाग्यं तत्र रक्षा च भवेत्तत्र सुनि
श्चितं अथ धनदामंत्रः तत्तूर्य्यं विंदुनायुक्तं लज्जाबीजं सविंदुकं लक्ष्मीबीजं ततो देवि संबोध्या चरति प्रिया वह्निजायावधिः प्रोक्तो मं
त्रराजोत्तमोत्तमः तंत्रांतरे तत्तूर्य्यं विंदुसंयुक्तं लक्ष्म्येतो प्रणवमेव च मायाबीजं समुद्धृत्य संबोध्या चरति प्रिया वह्निजायावधिः प्रोक्तो मंत्र
राजोत्तमोत्तमः लक्ष्मीप्रणवं श्रीबीजं कुबेरमुमतेऽयं मंत्रः अस्य पूजा प्रातःकृत्यादि प्राणायामं तत्कृत्वा ऋष्यादिन्यासं कुर्यात् यथा
शिरसि कुबेरऋषये नमः मुखे पंक्तिश्छंदसे नमः हृदि धनदायै देवतायै नमः ततः करांगन्यासौ ह्रां अंगुष्ठाभ्यां नमः ह्रीं तर्जनीभ्यां स्वा
हेत्यादि एवं हृदयादिषु ततो ध्यानं कुंकुमारुणगर्भाभां किंचिद्यौवनशालिनीं मृणालकोमलभुजां केयूरांगदभूषितां तुलाकोटिप
रिष्कांतपादपद्मद्वयान्वितां मालिकाहारमुकुटकुंडलादिविभूषितां नीलोत्पलदृशां किंचिदुद्घनकुचविराजितां कराभ्यां भ्राम्यत्
कमलां रक्तवस्त्रां गरामिलीं हेमप्राकारमध्यस्थां रत्नसिंहासनोपरि ध्यायेत् कल्पतरोर्मूले देवीं तां धनदायिकां एवं ध्यात्वा मानसैः सं
पूज्य बहिः पूजामारभेत् अस्याः पूजायंत्रं नवकोणात्मकं चक्रं विलिखेत् कर्णिकोपरि दिग्दलं पद्ममालिख्य चतुरस्रं लिखेद्बहिः को
णेषु वज्रान् विलिख्य मध्ये बीजं समुद्धरेत् ततोऽर्घ्यस्थापनं पंक्तिपात्रं प्रक्षाल्य नमद्रूपेनेनापूर्य्य तत्र प्रणवेन गंधपुष्पादीन् निःक्षिप्य

तं० सा० तीर्थमावाह्य धेनुमुद्रां प्रदर्श्य तदुपरि मूलं दशधा जप्त्वा तज्जलं किंचित्प्रोक्षणीयपात्रे संस्थाप्य तेनोदकेनात्मानं पूजोपकरणं चास्त्र
१६६ मूलेन त्रिः संप्रोक्ष्य आधारशक्त्यादि ह्रीं ज्ञानात्मने नमः इत्यन्तं पीठपूजां विधाय ॐ पद्मासनाय नमः इति मध्ये संपूज्य पुनर्ध्यात्वावाह्य पं
चोपचारादिना पूजयेत् ततो योनिमुद्रां प्रदर्श्य केशरेषु अग्न्यादिकोणेषु मध्ये दिक्षु च ॐ ह्रां हृदयाय नमः इत्यादिना षडङ्गेन पूजयेत् ततो दले
षु पूर्वादिषु ॐ श्रीं लक्ष्म्यै नमः एवं पद्मायै श्रियै हरिप्रियायै कमलायै अब्जायै चंचलायै लोलायै मध्ये देवीं पुनः पूजयेत् ततो यथाशक्ति ज
प्त्वा जपं समर्प्य क्षमस्वेति विसर्जयेत् अस्य पुरश्चरणं लक्षजपः तथा च प्रजपेल्लक्षमन्त्रेण तन्त्रादिलतकेन च लक्षे जपे मंत्रसिद्धिः पुरश्च
र्य्यां समाचरेत् विनियोगात् यथा कुर्य्यात् साधकः स्वमनोरथान् रात्रौ चेज्जप्यते चाष्टसहस्रं सप्तवासरान् एतेनैव सुसिद्धः स्यात् पु
रश्चर्य्यादिको विधिः किमिहावनुत देवि सन्ध्ये यदि साधकः भुक्त्वा वाप्यभुक्त्वा वापि पायसान्नं प्रकल्पयेत् दशाक्तत्वो यवाः प्रोक्तं
हुत्वा वापि कुचेलस्त्वं यः स्मरेद्देवि विधांतां दारिद्र्यैर्नाभिभूयते कामदेवं यजेत् पार्श्वे देव्याः प्रत्यहमादरात् तेन देव्या महाप्रीतिर्वाञ्छितार्थं
प्रयच्छति पूजांते च समायाति रात्रौ देवी धनेश्वरी सर्वालंकारसंयुक्ता दत्वा याति निजालयं धनं च विपुलं दत्वा साधकस्य मनोरथान् राम
प्ररयित्वा महेशानि वशगा जायते शुभा यद्यानं ते महेशानि चंदनेनानुलेपिते सततं सर्वदा तस्मै नित्यं दारिद्र्यशांतये स्वयमाहेतियक्षि १६६

116

ली यो मां स्मरति नित्यशः तस्य दारिद्र्यसंन्यासं दासीजनकरवाएपहं महस्रं सप्तभिर्यावत्पुरश्चरणमुच्यते तथा घृतेन खंडेन मधुना
च दशांशतः होमोऽपि च विधातव्यः सदा दारिद्र्यनाशनाय पूजाकार्य्या महादेव्याः स्वंदनेनानुलेपिते ताम्रपात्रे तथा कार्य्यं मंडलं सुमनोह
रं तत्र पूजा विधातव्या देव्या एवं मनीषिणः कुवेदारिद्र्यसंकाश्यसहितः कोटीश्वरो भवेत् अंगन्यासकरन्यासौ नांगे चैवास्य देवता कुवेरस्य
मतेनास्याः पूजापि क्रियते यथा अथ श्मशानकाली तदुक्तं कालीतंत्रे वाणीमायां ततो लक्ष्मीं कामबीजं ततः परं कालिके संपु
टत्वेन च तुर्थ्यं बीजमालिखेत् एकादशाक्षरी देवेसि चतुर्वर्गप्रदायिनी अस्या यंत्रं पद्ममष्टदलं वृत्तं तद्बाह्ये धरणीतलं चतुर्द्वारसमा
युक्तं मध्ये मूलं समालिखेत् दलेष्वष्टसु लिखेत् कवर्गादिष्टवर्गकं धरण्यां विलिखेदाद्यं चतुष्कं च चतुष्के पूर्वादि उत्तरांतं
च मध्ये देवीं प्रपूजयेत् अस्याः पूजाक्रमः प्रातःकृत्यादि प्राणायामांतं कर्म्म कृत्वा ऋष्यादिन्यासं कुर्य्यात् यथा शिरसि भृगुऋषये न
मः मुखे निवृच्छंदसे नमः हृदि श्मशानकालिकायै देवतायै नमः गुह्ये वाग्बीजाय नमः पादयोर्म्मायाशक्तये नमः सर्वांगे कामराजाय कील
काय नमः ततः करांगन्यासौ ऐं अंगुष्ठाभ्यां नमः ह्रीं तर्ज्जनीभ्यां स्वाहा श्रीं मध्यमाभ्यां वषट् क्लीं अनामिकाभ्यां हुं कालिके कनिष्ठाभ्यां वौषट्
ह्रीमादि वाग्भवांतं करतलपृष्ठाभ्यां फट् एवं हृदयादिषु ततो ध्यानं अंजनाद्रिनिभां देवीं श्मशानालयवासिनीं रक्तनेत्रां मुक्तकेशीं शु

तं०सा०
१६१

छगमांसास्थिभैरवां पिंगलाक्षीं वामहस्तेन मद्यपूर्णं समांसकं सद्यःकृत्तशिरो दक्षहस्तेन दधतीं शिवां स्मितवक्त्रां सदा चाममांसचर्वणतत्प
रां नानालंकारभूषांगीं नग्नां मत्तां शिवां श्रये एवं ध्यात्वा यजेद्देवीं श्मशाने तु विशेषतः गृहे वापि गृहस्थोपि मत्स्यमांसैः सुशोभनैः नग्नो भूत्वा
महापूजां कुर्याद्रात्रौ समाहितः पूजनं तु ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कृत्वा पुनर्ध्यात्वा संपूज्य यंत्रेषु ब्राह्म्यादिकां पूजयेत् तद्बहि
सितांगादि पूजयेत् अस्य पुरश्चरणमेकादशलक्षजपः तथा च वर्णलक्षं जपेन्मंत्रं तद्दशांशेन होमयेत् मंत्रांतरं तंत्रेव कामबीजं समा
लिख्य कालिकायै समालिखेत् नमोंतेन च देवेशि सप्तार्णं मनुरुत्तमः षडंगं कालिकावदस्या अन्यत्सर्वं तु पूर्ववत् अथ वगलामुखी
तदुक्तं तंत्रांतरे च ब्रह्मास्त्रं संप्रवक्ष्यामि सद्यःप्रत्ययकारकं साधकानां हितार्थाय स्तंभनाय च वैरिणां यस्याः स्मरणमात्रेण पवनोपि
स्थिरायते प्रणवं स्थिरमायां च ततश्च वगलामुखि तदंते सर्वदुष्टानां ततो वाचं मुखं पदं स्तंभयेति ततो जिह्वां कीलयेति युगं ततः
बुद्धिं नाशय पश्चात्तु स्थिरमायां ततो लिखेत् लिखेच्च पुनरोंकारं स्वाहेति च पदं ततः षट्त्रिंशदक्षरी विद्या सर्वसंपत्करी मता स्थि
रमायाह्लीं पदं तथा च तंत्रांतरे वह्निहीनेंदुभूष्या युक् वगलामुखि सर्वयुक् दुष्टानां वाचं मुखं स्तंभय कीलयेत् जिह्वां राम
कीलय बुद्धिं च विनाशय पदं वदेत् पुनर्बीजं तत्तारं वह्निजायावधिर्भवेत् तारादिका चतुस्त्रिंशदक्षरी वगलामुखी रूमपि १६१

मंत्रांतरं अस्यपूजा प्रातःकृत्यादि प्राणायामं तं कृत्वा ऋष्यादिन्यासं कुर्य्यात् यथा शिरसि नारदऋषये नमः मुखे त्रिष्टुप्छंदसे नमः
हृदि वगलामुख्यै देवतायै नमः लिंगे ह्लीं बीजाय नमः पादयोः स्वाहा शक्तये नमः ततः करांगन्यासो ह्लीं अंगुष्ठाभ्यां नमः वगलामुखि त
र्जनीभ्यां स्वाहा सर्वदुष्टमध्यमाभ्यां वषट् मुखं स्तंभय अनामिकाभ्यां हुं जिह्वां कीलकाय कनिष्ठाभ्यां वौषट् बुद्धिं नाशय करतल
पृष्ठाभ्यां फट् एवं हृदयादिषु ततो मूलांते आत्मतत्वव्यापिनी श्रीपादुकां पूजयामीति मूलाधारे मूलांते विद्यातत्वात्मव्यापिनी व
गलामुखीं श्रीपादुकां पूजयामीति शिरसि मूलांते सर्वतत्वव्यापिनी वगलामुखीं श्रीपादुकां पूजयामीति सर्वांगे ततो ध्यानं
मध्ये सुधाब्धिमणिमंडपरत्नवेदी सिंहासनोपरिगतां परिपीतवर्णां पीतांबराभरणमाल्यविभूषितांगीं देवीं नमामि धृतमुद्गरवैरि
जिह्वां जिह्वाग्रमादाय करेण देवीं वामेन शत्रुं परिपीडयंतीं गदाभिघातेन च दक्षिणेन पीतांबराढ्यां द्विभुजां नमामि एवं ध्यात्वा
मानस्यैः संपूज्य वहिः पूजामारभेत् तत्र प्रथमतो र्घ्यस्थापनं तद्यथा अष्टांगुलचतुरस्त्रं विधाय ईशानादिकोणेषु गंधादिदिक्
च कुसुमाक्षतचंदनैः ग्लौं गणपतये नमः इत्यनेन गजाननं संपूज्य तेन मधुना चार्घ्यमापूरयेत् ततो वारत्रयं तद्विधया संपूज्यांगानि
विन्यसेत् ततो धेनुयोनिमुद्रे प्रदर्शयेत् तेनोदकेनात्मानं पूजोपकरणं चाभ्युक्ष्य पूजयेत् अस्याः पूजायंत्रं अस्त्रं खड्गं सत्वं त्राष्टभ्र

तं०सा० १६८

पुरान्वितं ततोमूलमुच्चार्य्याधारशक्तिकमलासनाय नमः एवंशक्तिपद्मासनाय नमः ततः पूर्ववद्ध्यात्वापीठे आवाह्य षडंगानिवि
न्यसेत् ततोमुद्राः प्रदर्श्य पूर्ववत् षडंगेन मंडलं यजेत् ततोमूलेन मंत्रयित्वा धेनुयोनिमुद्रे प्रदर्शयेत् ततोमुद्राः प्रदर्श्य पूर्ववत् षडंगे
न मंडलं यजेत् ततोमूलेन मंत्रयित्वा धेनुयोनिमुद्रे प्रदर्शयेत् ततआत्मविद्याशिवतत्त्वैर्विंदुत्रयमुखंहि ध्यात्वा तज्जलं स्वंगुरु रूपयोनौ
नमांगावरणांविगलामुखींतर्प्पयेत् ततोयथासंभवमुपचारैः पूजयित्वावरणपूजां कुर्य्यात् षट्कोणेषु पूर्वे ॐ सुभगायै नमः आग्नेको
णे ॐ भगसर्प्पिण्यै नमः ईशाने ॐ भगावहायै नमः पश्चिमे ॐ भगसिद्धायै नमः नैर्ऋते ॐ भगपातिन्यै नमः वायौ ॐ भगमालिन्यै नमः
अष्टपत्रेषु ब्राह्म्याद्यामातरः पूज्या पत्राग्रेषु ॐ जयायै नमः एवंविजयायै अजितायै अपराजितायै जंभिन्यै स्तंभिन्यै मोहिन्यै
आकर्षिण्यै ततो द्वारेषु भैरवाय नमः तद्बहिरिंद्रादीन् वज्रादींश्च संपूज्य मूलेन धूपादिकं दत्वा यथाशक्ति जपं विधाय त्रिशूलमु
द्रां प्रदर्श्य पुष्पांजलित्रयं देव्यै दत्वा योनिमुद्रां प्रदर्शयेत् ततो भैरवाय बलिं दद्यात् ततो विसर्जनांतं कर्म समापयेत् अस्य पुरश्चरणं
लक्षजपः तथाच्च पीतांवरधरो भूत्वा पूर्वाशाभिमुखः स्थितः लक्षमेकं जपेन्मंत्रं हरिद्राग्रंथिमालया ब्रह्मचर्य्यरतो नित्यं प्रयतो ध्यान
तत्परः प्रियंगुपायसेनापि पीतपुष्पैश्च होमयेत् अथ प्रयोगः कुरुते वाग्गतिस्तंभं दुष्टानां बुद्धिनाशनं जपहोमप्रयोगेन मनुं चाप्ययुतं ज १६८

पेत् हरिद्राहरितालाभ्यां लवणं तु कुर्यान्निशि स्तंभयेत् परसैन्यानि नात्र कार्या विचारणा अथवा पीतपुष्पैश्च त्रिमधुयुक्तैश्च होमयेत्
स्तंभनेषु च सर्वेषु प्रयोगः प्रत्ययावहः अथ कर्णपिशाचिमंत्राः तदुक्तं तंत्रांतरे कर्णपार्श्वसमालोचनो वकगतोऽनंतास्थिकारो वदान्ती
ताना गात शब्दयुक् भुवनेशी वह्निजायान्वितस्ताराद्यो मनुरेष लक्षजपतो व्यासेन संसेवितः सार्वज्ञं लभते चिरेण नियतं पेशाचिकी
भक्तितः ध्यानं कुष्मांडकं विलोचनां त्रिनयनां खर्वां चलंबोदरीं बंधूकारुणजिह्विकां वरकराभीतिकरामुन्मुखीं धूम्राच्छिद्रजटिलां कपा
लविलसत्पाणिद्वयां चंचलां सर्वज्ञां शवदेहकृतावधिवसतिं पैशाचिकीं तां नुमः अस्याः पूजा निशायामर्धरात्रौ चतुर्दिक्षु पिशाचि
कां दग्धमीनं बलिं दत्वा रात्रौ संस्कृत्य संजपेत् ॐ कर्णपिशाचि दग्धमीनं बलिं गृह्ण मम सिद्धिं कुरु स्वाहा इति दग्धमीनं बलिं दद्यात् र
क्तचंदनं धूपकं जवापुष्पादिकं च यत् अमृतं कुरु देवेशि स्वाहा इति प्रोक्षयेज्जलैः पूर्वाह्णे किंचिज्जप्त्वा मध्याह्ने एकभक्तं निरामिषं कृत्वा
रात्रावपि तत्संख्यं जपेत् जपस्य दशांशतर्पणं ॐ कर्णपिशाचीं तर्पयामि ह्रीं स्वाहा एवं क्रमेण लक्षमेकं जप्त्वा पुरश्चरणं कृत्वा दशांशं
होमयेत् तदभावे दशांशतर्पणं कृत्वा वरं प्रार्थयेत् मूलं रक्तचंदनेन लिखित्वा मंत्रोपरि इष्टदेवतां पूजयेत् सिद्धिलक्षणमुच्यते
गगने हुंकारादिश्रवणं दीर्घाग्निशिखारूपं संदर्शनात्सिद्धिर्भवतीति ज्ञात्वा तथा विधिमाचरेत् प्रणवं माया कर्णपिशाचि निमेक

ऌंकथयक्रुं फ्रू स्वाहा प्रदीपतैलं पादयोर्दत्त्वा रात्रौ लक्षं जपेत् ततः सर्वज्ञो भवति नास्य तज्ज्ञो ध्यानं तथा च तारं कामबीजं जयादे
विस्वाहा अस्यापि न्यासादरभावः पूर्वं लक्षं जप्त्वा गृहगोधिकानिपातं तदुपरि जयादेवीं यथाशक्ति संपूज्य तावज्जपेत् यावत्स जीव
तितः सिध्यति सिद्धिस्तु मानसादिप्रभेदा तत्ते सा आयाति तस्याः पृष्ठे सर्वं भूतभविष्यादिकं पश्यति अथ मंजुघोषः मंत्राः जा
ज्योध्वतिमिरध्वंससंसारार्णवतारकः श्रीमंजुघोषो जयति साधकानां सुखावहः तत्र आगमोत्तरे मातृकादिसमुद्धृत्य वह्निबीजं स
मुद्धरेत् वामांसः कूर्मसंज्ञं च ततो मेषं नमसमुद्धरेत् मीने पशं च ततः कुर्याद्वामनेत्रेंदुसंयुतं षडक्षरो मनुः प्रोक्तो मंजुघोषस्य
शंभुना इयं तु दीपनी प्रोक्ता मूलमंत्रस्तु कथ्यते अंकुशं शक्तिबीजं च रमाबीजं ततः प्रिये बीजत्रयात्मको मंत्रो जाड्यौघध्वां
तनाशनः शक्तिबीजं रमाबीजं कामबीजं तथा प्रिये विद्या स्तुतिषष्टी प्रोक्ता एषा वर्णत्रयात्मिका हकारो वह्निमारूढो वामने
त्रेंदुभूषितः प्रोक्ता सर्वज्ञविद्येयमेकवर्णात्मिका प्रिये सिद्धः साध्यः सुसिद्धो वा साधकस्य रिपुः सदा तदा मंत्रो भवेद्दत्तया
प्रमदो बुद्धिदो भवेत् मध्याह्ने सलिले चैव भोजने भाजने तथा गोमये तु बहिर्देशे मैथुने रमणीकुचे गोष्ठे च निशि तोमुंडं यं राम
त्रंडमरुसन्निभं विलिख्य मंत्रवर्णांश्च त्रिशाऊं चत्र धरतथा लिखेच्चंदनले खन्या प्रयत्नात्साधको नमः उच्चाटने लिखेन्मंत्रं गो १६९

चर्म्मलिविशेषतः सलिलेविजयीनित्यंभोजयेतेमहेश्वरः गोमयेवावदूकःस्यात्क्षौद्रेसर्वज्ञतांव्रजेत् कुंकुमेश्रुतिधरोनित्यंगोमुंडे
चमहाकविः गोमूत्रंवदरीमूलंचदनंपांशुरोचनच एकीकृत्याष्टधाजुहुयातिलकंकारयेत्सदा नमस्कृत्यवरंक्षेत्रंप्रार्थयेद्भुक्तिमा
वतः वरंप्रार्थ्यचतस्माद्धिविहरेत्तुयथासुखं आत्मदेवार्चनंस्नानंप्रणवोच्चारणंनतु वस्त्रांचलेनदंतानांशोधनंलवणेनवा रात्रिवा
सोनमुंचेत्तुनशुचिःस्यात्कदाचन एतांज्ञत्वेप्रयत्नेनज्ञात्वात्यागुरुमुखात्सुधीः मासेकेनकवींद्रःस्याद्द्विमासेनेवरीश्वरः त्रिभि
र्मासैर्भवेन्मंत्रीःसर्व्वशास्त्रविशारदः पुत्रार्थीलभतेपुत्रंधनार्थीविपुलंधनं आयुरारोग्यकामस्तुसर्व्वान्कामानवाप्नुयात् अ
थध्यानं शशधरमिवशुभ्रंखड्गपुस्तांकपाणिंसुरुचिरमतिशांतंपंचचूडंकुमारं पृथुतरवरमुख्यंपद्मपत्रायताक्षंकुमतिदह
नदक्षंमंजुघोषंनमामि पीठपूजांततःकुर्यात्साधारणक्रमात्ततःसुधीः भूतप्रेतादिभिःकुर्यात्पीठासनमनंतरं ज्ञानदात्रेनमःपा
घंबुद्धिकर्त्रेतथाचमनं जाड्यनाशायगंधस्याद्धर्मोपलब्धयेच सर्वसिद्धिप्रदायेतिपुष्पंदद्याद्विचक्षणः कुंदपुष्पंसमादाय
भैरवान्पूजयेत्ततः असितांगोरुरुश्चंडःक्रोधउन्मत्तसंज्ञकः कपालीभीषणश्चैवसंहारश्चाष्टमःस्मृतः ततोधूपादिकंदत्वा
प्रसूनानिविसर्जयेत् तैःपुष्पैःपूजयेद्देवीपद्मिनीमधिविशेषतः सुरादिसुंदरीचैवमनोहारिण्यनंतरं कनकावतीतथाकामेश्व

तं०सा० रीरतिकर्य्यथ पद्मिनीवेनरीचैवज्ञनुरागिण्यनंतरं भ्रज्याएनास्तु योगिन्यो हृल्लेखावीजसर्द्धिका एवंमंत्रं जपदेवेशि लक्षषट्कं जपेन्म
१७० नुं घृतान्नकुंदपुष्पैश्च एकादशशतानि च जुहुयादेधितेवह्नौ कांतारे पितृवेश्मनि एवंसिद्धमनुर्मंत्री महावाग्मीश्वरो भवेत् कुकु
रेश्वरतंत्रे मेरुपृष्ठे सुखासीनं देवदेवं जगद्गुरुं शंकरं परिपप्रच्छ पार्वती परमेश्वरं श्रीपार्वत्युवाच भगवन्सर्व धर्मज्ञ सर्वशास्त्रा
गमादिषु वांछितार्थप्रदं लोके मंजुघोषं प्रवोहि मे विशेषतो विजयाख्यां किं कवित्वपदं नृणां सर्व्वकर्मप्रदं चैव मनःसिद्धिप्रदं तथा
भक्तानां कामदं मंत्रं कल्पवृक्षमिवापरं श्रीशंकर उवाच शृणु देवि महामंत्रं साधकानां सुखावहं यज्ज्ञात्वा जडधीः प्रायो वाचस्प
तिसमो भवेत् अंगन्यासकरन्यासवहिः संसमन्वितां जपात् सिद्धिप्रदं मंत्रं विना होमार्चनादिभिः जपहा जापयेद्धापि साधको वि
धिपूर्वकं सर्वज्ञत्वमवाप्नोति सत्यं सत्यं हि सर्व्वति कार्त्तिकेयमुखं यावत्तावल्लक्षं जपेन्मनुं सर्व्वशास्त्रेषु सोऽप्युच्चैर्बृहस्पतिसमो भवेत्
पार्वत्युवाच कोऽप्यत्रापि ऋषिश्छंदो देवोऽप्यत्र जप्यतेऽत्र को ध्येयः को वात्र तन्सर्वं ब्रूहि मे भक्तवत्सल ईश्वर उवाच वृहदारण्यको
नाम ऋषिर्विराट्छंद एव च स एव मंजुघोषाख्यो मुक्तिदोऽपि च मुक्तिदः ध्यात्वा भैरवरूपेण जपेन्मंत्रमनन्यधीः नदामुक्तिप्र राम
दो मंत्रो नात्र कार्या विचारणा ध्यानं तत्र प्रवक्ष्यामि भैरवस्य महात्मनः यथा ध्यात्वा जपेन्मंत्रं तन्मे निगदितं शृणु सात्त्विकं राज १७०

संचैवनामसंतदनंतरं ध्यानंवक्ष्येमहादेवि क्रमेण येनकाम्यया सद्यःसिद्धिकरंरूपं ध्यात्वा जपेच्च सात्विकं सिद्धिप्रदंसाधकानांभ
क्तानांचिंतितप्रदं मंत्रोद्धारमिदंदेवि त्रैलोक्येप्यतिदुर्लभं अप्रकाश्यंपरंगुह्यंनदेयंयस्यकस्यचित् मंत्रोद्धारंप्रवक्ष्यामिगुह्याद्गु
ह्यतरंमहत् विह्नाग्निपाशिश्राविपुकूचनधूम्र स्वरूपः षड्वर्णः मंत्रउदितोभजतांसुखंवाक्यदः सर्वज्ञतांमदसिवाक्पटुतांप्रसू
तेवेदांतवदनिरतस्यवसुप्रदःस्यात् आद्यतंत्रेजपेन्मंत्रीअयुतंयदिसाधकः वाल्मीकिनैवेद्यमुकूसाक्षाद्बृहस्पतिरिवापरः मासमा
त्रेणयःकुर्यात् पुरश्चरणवान्नरः तस्यप्रवदनाद्वाणी निःसरेद्रसवर्त्तिनी मासमात्रेणसततंकविरेवनसंशयः गोमुंडेगविपृष्टे
चचक्रेवाप्सुच गोमये यंत्रेमंत्रंलिखित्वादौपश्चान्मंत्रंजपेत्पुनः ध्यानमात्रंविधायादौ भावयित्वाचिरंसुधीः निर्जनंस्था
नमागत्यजपेन्मंत्रमधोमुखः पौर्णमासींसमासाद्य कुंदस्यकुसुमैःशतैः अष्टाधिकैश्च संपूज्य जपेन्मंत्रंचतुःपथे त्रिमुंडारो
हणंकृत्वानिशीथेमुक्तकुंतलः षण्मासमात्रंजपतियदिकृत्वाविधानवित् बृहस्पतिसमोवक्तानात्रकार्याविचारणा कुक्कुरस्य
चमुंडैकंमुंडंक्रोष्टुर्वृषस्यच त्रिमुंडमेतदाख्यातंसाधकानांसुखावहं आसनंचैवगोमुंडेवामेकुक्कुरमुंडकं दक्षिणेचशिवामुंडंक
त्वापूजांसमाचरेत् अर्द्धचंद्राकृतिःमात्रा बालचंद्रोपमंस्फुरं यंत्रंलिखेत्तत्रपूजांकुंदस्यकुसुमैनच मंत्रेणपाणिकमलेनजपा

तं०सा०
१७१

दिग्गजाभ्रंगारशीलनविधौ खलु दक्षिणेन राकासुधाकरमरीचितुषारगौरं ध्यात्वा चतुष्पथतटे वृषभस्य कस्यं संचिंत्य कुक्कुर
शिवाशिरसाधिरूढः कुंदेन साधकतमो वाति प्रकामं गोचर्म्मणा विरचितं सकलद्रुमात्रं च क्रांततोपि नवकुंकुमरोचनाभिः निर्म्माय स
म्यविधिना विजने श्मशाने संपूज्य दहनभवैर्नवैः पलाशैः संपूर्णमंडलतुषारमरीचिमध्ये बालं विचिंत्य धवलं वरखड्गहस्तं उ
द्दामकेशनिवहं वरपुस्तकाढ्यं नग्नं यजेत् दत जपं कजमायताक्षं अरिष्टगेहे निशि तैलमेवमादाय यन्त्रात्करपल्लवेन नेत्रांचि
तं कांचनपुष्पमेव निवेद्य तस्मै जपति प्रकामं आ किंशुकाद्योरतरोश्च मूले विलिप्य पादौ रसनाम तेन त्रिमुंडमात्रा त्रिलतमे
वरात्रौ जपेच्च यथाशक्तितु पौर्णमास्यां वीरूल नरूतलस्थो मुंडमात्रैकरूढो हिमकररुचिगौरं चिंतयित्वा निशीथे यदि जपति ज
डात्मा मंत्रमेनं त्रिलक्षं भवति सा दाढी श्लोकविलिग्नात्रविचित्रं मुक्त्वान्नशेषकदलीतलमूलसंस्थस्तासीर्णपुष्परचितासनसन्निवि
ष्टः राकाविधुः क्रममुपेम करोति रज्जाय: सोपि द्वैपयई इव वाक्पतीश्वरः स्यात् जिह्वां विमृज्य पतिजपालि सरोरुहाभ्यां रात्स्नाग्रस
नष्टातकैः परिपूज्य गोष्ठे यो वै जपेत्तु दिनं खलु द्रुमात्रमीशं जपेत् किमुत वाक्पतिमेव चित्रं स्थित्वा निशीथसमये रजक राम
स्यकाष्ठखड्गान्वितो जपति यद्यपि पौर्णमास्यां पूर्णमासमथवा नरसापि तस्य वक्त्राच्छिनिः सरति गीस्तु तायमाना यो दंतधाव १७१

१यत्नतोऽतुद्रुध्यानं ओसर्वसिद्धिमुपालंभेत१

नदलैर्मञ्चकरंजकाष्ठैस्तस्यापि गीष्पतिर्वा चनिरूपमसुलभ्यं तिलजैलेनन तिमान्नकुंदकैरवपुष्पकैः मंजिष्ठतोयद्रवचाश्मिभानु
मूलैः स्त्रीयांगशोणितयुतैः समकुष्ठकैश्च दलकुलालारफलकेतिलकंजपस्थो विद्याप्रवोधविषयेनगीष्पतिः स्यात् अथभैरव
तंत्रेऽपि मंजुघोषाख्यममलंमंत्रमाकर्णयप्रिये धनवंशप्रदंरम्यं सर्वज्ञं वाग्मिताप्रदं अदोषकवितानल्पममलं प्रतिभास्पदं दे
व्युवाच भगवन्गिरिजानाथ कथयस्वयत्नादितं मंजुघोषः सकः कीदृक्तस्यानुष्ठानमेवच श्रृणु नामम तत्वतः मंत्रः षडक्षरः
साक्षात्सर्वदुःकुमतिनाशकः रसलक्षाणां धेनस्यजाप्ये कस्तेसुरेप्सितः त्रिपक्षालक्षजपनादेवि वाग्मीभवति मानुषः
सुकवित्वं भवेत्तस्य प्रतिभा विश्वजिन्मरी मासत्रयं जपेद्यस्तु पंडितोऽपण्डितो यदि षण्मासं यस्तु जपति सर्वज्ञ स्त्रग्गलाय
ली: अद्वेनासिद्धयस्सर्वाभवंति समसीश्वरि आहारो ऽस्यन्नणां वर्चोनिवेद्यं चरक्षोमलं मूत्रैः पाद्यंभवेत्तस्यगंधोविष्व
द्रिरोद्भवः अरण्ये जातपत्राणि पुष्पाण्येव सुनिश्चितं एरंडमूलैः कार्पासवीजमध्यप्रकीर्तिते तुंडलीफलदानेन भवेदाचम
नीयकं ध्यानं वक्ष्ये महादेवि सर्वसिद्धिप्रदायकं शशधरमिवशुभ्रंखड्गपुस्तागपाणिं रुचिरमतिशांतं पंचचूडंकुमारं पृथुत
रवरमुख्यं पद्मपत्रायताक्षं कुमतिदहनदक्षं मंजुघोषं नमामि मंत्रोद्धारं प्रवक्ष्यामि नमस्काराय देशतः शृणु देवि महाभागे क

लौमघ्नःफलप्रदं मंत्रंसर्वार्थदंसारंवशीकरणमुत्तमं अमलंनिर्गुणंसारंगुणिनंसर्वकामदं तंनमामिहितंसारंमंत्रघो
षंनमाम्यहं रवीशंपरमंसारंस्तुतंब्रह्मादिभिःसुरैः रक्तंरजोगुणैर्युक्तंमंत्रघोषंनमाम्यहं वचनेननजानंतिकायेननच
कोविदाः तंसारंतमसायुक्तंपीतवस्त्रंनमाम्यहं चरणेपतितायस्यदेवानांजयहेनवे चरणेपतितोजीवोवुद्धयेतंन
माम्यहं नजानंतिसुरायस्यनत्वंनत्वगुणेनच लक्ष्मंसमस्तसारंचमंत्रघोषंनमाम्यहं धीशंविश्वेश्वरंचैवप्रतिपाद्या
दिहेतुकं सकलंनिष्कलंचैवतंनमामिहितंप्रभुं दक्षिणांशक्तितोदद्यात्कुरुतुष्टिर्यथाभवेत् गुरुसंतोषमात्रेणमंत्रसि
द्धिर्नसंशयः अथतारिणीकल्पः तारिणीतंत्रे ईश्वरउवाच श्रूयतांशैलतनयेजाड्यनाशकरीपरा चतुर्वर्गफला
विद्यामंत्रसिद्धिप्रदायिका वर्गाद्यंवह्निसंयुक्तंवामाक्षिपरिभूषितं नादविंदुसमायुक्तंवसुसिद्धिप्रदायकं पुनश्चतुर्मुखं
देविनलकारेणविभूषितं स्वरेणैवचतुर्थेनचंद्रखंडेनचप्रिये लांछितंवैमहाबीजंचतुर्वर्गफलप्रदं ततःलक्ष्मपदंचोक्त्वा
ततोदेविपदंस्मृतं क्लींक्रींकारंचततोदद्यात्स्व॰ग्रहमुद्धरेत् ततः ईकारेणचैकेणमकारेणविभूषितं ततोवाग्भवमुच्चा याम
र्य्यमंत्रमेनंसमुद्धरेत् नवाक्षरोमनुर्देवितारिण्याःसमुदीरितः इयमेवमहाविद्यास्वर्गेमर्त्येचदुर्लभा अष्टसिद्धिप्रदादेवि

चतुर्वर्गफलप्रदा अनयासदृशी विद्या अनयासदृशो मनुः अनयासदृशी सिद्धिर्न भूतं न भविष्यति यो विद्यां लभते देवि किमु तस्य
न जायते अचिराल्लभते वाणीं गद्यपद्यमयीं प्रिये ज्ञानमात्रेण विद्यायाः क्षिप्रं द्रुतकविर्भवेत् विना छंदो विना शिक्षां विना भ्यासेन
सुंदरि विना ज्ञानं विना यत्नं विनालापं कवेः प्रिये जिह्वायां जायते तस्य कवित्वं रससन्निर्मितं अत्र पूजाक्रमः प्रथमं जलमानीय पाद
प्रक्षालनं मतं द्विराचम्य शिखां वध्वा ततो भूमिविशोधनं विघ्नोत्सारणं कृत्वा ततः भूतविशोधनं करो संशोध्य देवेशि चास्त्रमंत्रेण
ततःपरं गुरुं गणपतिं नत्वा भूतशुद्धिं समाचरेत् स्वाधिष्ठान स्थितां देवि वाग्भवं सर्वसिद्धिदं तदुद्भूताग्निवलिभिः शरीरं दग्धतो वुधैः
तद्भस्मपुंजमुत्सार्य्य ह्रीं समुद्भूतवायुना ललाटे कामवीजं तु तन्नद्भूतामृतेन च तदस्थि प्लावितं कृत्वा दृढीभूतं भवेत्ततः निर्लेपं
निर्गुणं शुद्धमात्मानं देवतामयं सर्वपापविनिर्मुक्तं देहं संचिंत्य साधयेत् शरीरस्य विशोधेन प्राणायामं समाचरेत् आद्येन मूलवी
जेन प्राणायामं त्रयं चरेत् मंत्रन्यासं ततो देवि प्रकुर्यात् सर्वसिद्धिदं शंकरस्य ऋषिः प्रोक्तो वृहती छंद ईरितं तारिणी देवता प्रोक्ता
ह्रींकारं वीजमुच्यते वाग्भवं शक्तिरित्युक्तामिति ऋष्यादिकं चरेत् वीजेन तु षडंगानि षडंगेषु प्रकल्पयेत् धर्म्मादि विन्यसेन्मंत्री
ततो ऽधर्म्मादि विन्यसेत् उपर्य्युपरि मध्ये च क्रमेणैव तु न्यसेत् कल्पवृक्षं समुच्चार्य्य मणिपीठं ततः स्मरेत् शवमुच्चार्य्य

नं०सा० त्वा तु तत्रोपरि कपालकं चतुर्दिक्षु न्यसेद्देवि चितानामठिनसमन्वितां हृत्पद्माष्टदले तत्र चाष्टशक्तीन्न्यसेत्ततः दुर्गा जया ततो भ
१२३ द्रा विजया सुप्रभा सती कालीगौरी शिवा चैव इत्यष्टाशक्तयः क्रमात् तत एव स्वदेहेषु पंच योनिं न्यसेद्बुधः केशांते दक्षिणे भागे यो
निवीरां न्यसेत्ततः केशांते वामभागे च योनिं विश्वां ततो न्यसेत् नासाम्ले च देवेशि योनिरूपां विभागतः योनिकामां योनिहारां नेत्रयोः
सव्यवामयोः योनिरूपां न्यसेद्दोष्ट साधकः सर्वसिद्धये मुखकोणे च देवेशि दक्षवामादिभेदतः चिबुके च महेशानि विन्यसेत्साधकोत्त
मः योनिछायां योनिकामां योनिरूपां ततःपरं बाहुमूले दक्षवामे हृदि चैव वरानने योनिचित्रां योनिनित्यां योनिरूपां न्यसेद्बुधः
स्तनयोर्नाभिदेशे च योनिस्थानं सदास्मरेत् योनिसिद्धां योनिविद्धां योनिरूपां न्यसेत्ततः एताःस्मृता महत्तुष्टेर्नानामोऽन्नाश्च विच
क्षणेः देहपीठे ततो देवीं ध्यायेत्तु स्थिरमानसः लम्बालंबोदरीं भीमां नागकुंडलशोभितां रक्तमुखीं ललज्जिह्वां रक्तांबरधरां करो पी
नोन्नतस्तनीं युग्मां महानागेन वेष्टितां शवस्योपरि देवेशि तस्योपरि कपालके नासाग्रध्याननिरतां महाघोरां वरप्रदां चतुर्भुजां दीर्घकेशीं
दक्षिणस्योर्द्धबाहुना बिभ्रतीं नलिनीमेकां वामतो ईषान पात्रकं वराभयधरां देवीमधस्ताद्दक्षवामयोः पिबंतीं रोधिरीं धारां पानपात्रे सदा राम
शिवे सर्वसिद्धिप्रदां देवीं नित्यां गिरिनिवासिनीं लोचनत्रयसंयुक्तां नागयज्ञोपवीतिनीं दीर्घजिह्वां दीर्घजंघां दीर्घांगीं दीर्घजिह्विकां चेडस्र १२३

पश्चिमे देवलोचनत्रयसंयुतां शत्रुनाशकरीं देवीं महाभीमां वरप्रदां व्याघ्रचर्म्मशिरोवस्त्रां जगत्त्रयविभाविनीं साधकानां सुखंकर्त्रीं स
र्वलोकभयंकरीं क्लीं महाभीमां वरप्रदां व्याघ्रचर्म्मशिरोवस्त्रां जगत्त्रयविभाविनीं साधकानां एवंभूतां महादेवीं तारिणीं प्रणमाम्यहं ए
वं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् तार्क्षिणीवत् अस्याः पूजायंत्रं यंत्रं निर्म्माय देवेशि यंत्रमध्ये लिखेत् ततः नवाग्रे पत्रे
ति लिखेत् साधकसत्तमः वह्निमंडलयुग्मं च पद्ममध्ये लिखेत् ततः पूर्वदले च देवेशि आद्यबीजं लिखेत् ततः द्वितीयं दक्षिणे पत्रे तृ
तीयं पश्चिमे दले उत्तरपत्रे देवेशि वाग्बीजं लिखेत् ततः चतुर्द्वारसमायुक्तमष्टवज्रसमन्वितं अत्र पूर्वोक्तक्रमेण पीठं संपूज्य ।
तत्रावाह्य महेशानीं यजेद्धै मंत्रमुच्चरन् षडंगेनैव देवेशि पूजयित्वा तु पार्वती क्षेत्रपालं भैरवं च गणनाथं महान्तकं एतच्चतुष्टयं
देवि यजेद् द्वारचतुष्टये पूर्वाद्यष्टदले देवि एताः संपूज्य साधकः अणिमा नगमदनालक्षिमा मदनातुरा अनंगकुसुमा देवि ततो
ऽष्टकर्णिका तथा कपालिका च देवेशि ततोऽष्टयोगिनीस्तथा तथा षोडशपत्रे पूजयेत् परिचारिकां सुखदां मोक्षदां तत्र भक्तिदां
भोगदां तथा मुक्तिदां सिद्धिदां चैव कामदां फलदां तथा क्षेमदां शिवदां वापि परदां मानदां तथा योगदां भोगदां देवि मुक्तिदां सर्वसि
द्धिदां अणिमाद्यष्टसिद्धिं च पूर्वद्वारे यजेत् ततः वह्निर्दशकलां देवि द्वारे च दक्षिणे तथा पाश्चात्यद्वारे देवेशि कलाश्च द्वादश पूजयेत्

तं०सा० उत्तरे च तथा देवि रवेरविकलास्ततः षडंगेन यजेदेवीं ततश्चास्त्राणि पूजयेत् एतानि देवदेवेशि चतुर्थ्यंताः समीरिताः नमो
१७४ ताश्च महादेवि प्रोक्ताः सकलसिद्धिदा। पुष्पैर्वहुविधैश्चैव रक्तचंदनमिश्रितैः रक्तपुष्पैर्महादेवि नानागंधसमन्वितैः विल्वप
त्रैस्तथा गंधैर्जवापुष्पैर्विशेषतः श्वेतरक्तपरागैश्च करवीरैर्मधूककैः विल्वपत्रैर्गंधपुष्पैर्नागपुष्पैः सुशोभनैः अपराजितपु
ष्पैश्च चंपकैः केशरैस्तथा एभिः पुष्पैर्महादेवि पूजयेन्नित्यतारिणीं मालतीवकपुष्पैश्च सदूर्वैर्नार्चयेत्तथा कदंबैः श्वेतकुसु
मैर्वकुलैः कांचनैस्तथा एवं संपूज्य पित्वातु एभिर्द्रव्यैर्महेश्वरि लक्षमात्रं जपेन्मंत्रं हविष्याशी दिवा शुचिः   इति तारिणी
कल्प अथ सारस्वतकल्पः नारद उवाच। केनोपायेन देवेशि विद्योत्पत्तिर्भवेन्नृणां वेदविद्याप्रकाशश्च तन्मे ब्रूहि जगत्प्र
भो ब्रह्मोवाच साधु साधु त्वया पृष्टं लोकानां हितकारकं एतदेव पुरा पृष्टं कल्पादौ विष्णवे मया ब्रह्मशब्दस्वरूपेण प्रसन्नेनां
तरात्मना यत्प्रोक्तं तेन मे ब्रह्मन् तत्ते वक्ष्यामि ये पृतः ब्रह्मोवाच शृणु ब्रह्मन् परं गुह्यं कल्पं सारस्वतं महत् यस्य विज्ञानमात्रे
ण जाड्यापहरणं भवेत् सर्वशास्त्रप्रकाशश्च सर्वे यो जायतेऽचिरात् अभ्यासाच्च भवेत्तस्य वाचस्पतिसमो भवेन्नि हि अथवा पुस्तिदशाः राम
स्वर्गवागीशत्वं वृहस्पतिः द्वैपायिनो पिपं ज्ञात्वा नंदव्यासो भवेन्मुनिः मंत्रोद्धारं प्रवक्ष्यामि सांगावरणपूजनैः अनंतेविंदुनायु १७४

कं वामगंडांतभूषितं जपेद्द्वादशलक्षाणि मूकोऽपि देवतिवाक्पतिः नाभौ शुभ्रारविंदं तु ध्यायेद्दशदलं सुधीः तन्मध्ये भावयेन्मंत्री
मंडलानां त्रयं चिरं रत्नसिंहासनं ध्यायेद्दलं ज्योतिरूर्ध्वमिव पुनः तस्योपरि पुनर्ध्यायेद्देवीं वागीश्वरीं ततः रत्नकांतिनिभां देवीं ज्योत्स्नाजाल
विकासिनीं मुक्ताहारयुतां शुभ्रां शशिखंडविभूषितां विभ्रतीं दक्षहस्ताभ्यां व्याख्यां वर्णस्य मालिकां अमृतेन तथा पूर्णं घटं दिव्यं च पुस्तकं
दधतीं वामहस्तेन पीनस्तनभरान्वितां मध्ये क्षीणां तथा स्वच्छां नानारत्नविभूषितां आत्मानं देवताभावं ध्यात्वैवं प्रजयेत् क्रमात् आ
द्येन दीर्घयुक्तेन कुर्य्यादंगानि हस्तयोः हृत्पादौ तथा कुर्य्याद्बीजेनांगक्रियां पुनः भ्रुवोर्मध्ये तथा नाभौ गुह्ये च देशिकस्तथा न्यसेद्बी
जं पुनर्वस्तो व्यापकं विन्यसेत्ततः पीठन्यासं ततो कुर्य्याद्देवताभावसिद्धये मातृकाया स्तु यत्प्रोक्तं पीठमभ्यर्च्चय ततः वर्णाब्जेनासनं
दद्यान्मूर्त्तिं मूलेन कल्पयेत् आवाह्य प्रयजेत्तस्यां देवीं वागीश्वरीं ततः अंगैः प्रथमावृत्तिः स्यात् द्वितीया शक्तिभिस्ततः दला
ग्रेषु समभ्यर्च्य ब्राह्म्याद्या यथाविधि लोकपालान् बहिः पूज्यास्तेषामस्त्राणि तद्बहिः एवं संपूजयेन्मंत्री जपहोमरतः सदा कवित्वं ल
भते वाग्मी लक्षैर्द्वादशभिर्ध्रुवं प्रातर्जप्त्वा सहस्रं तु पिबेद्ब्राह्मीवचान्वितां न विस्मरति मेधावी श्रुतान्वेदागमानपि कंठमात्रोदके स्थि
त्वा ध्यायेन्मार्त्तंडमंडले ज्योतिःपुंजनिभां देवीं परिवारसमन्वितां वराभययुतां हस्ते मुद्रापुस्तकधारिणीं जपन्सहस्रमानेन षण्मासे

तं०स्रा० विजितेंद्रियः मीमांसंप्राप्यवाक्सिद्धिंकवीनामग्रणीर्भवेत् अथयोगंप्रवक्ष्यामिजाड्यनाशकरंपरं रात्रिशेषेसमुत्थायसुचिर्भूत्वास
१७५ माहितः सुचिभावेनचात्मानंद्रव्यंचपरिकल्पयेत् ततप्रभापटलव्याप्तंजगत्सर्वंविचिंतयेत् मूलाधारेस्थितांदेवींकुंडलीपरदेवतां
175 स्वपांप्रोत्थाप्यतांशनैःक्रमाच्चक्राणिभेदयेत् ततःपरशिवेनीत्वासौधींचप्रापयेत्ततः ऊर्ध्वंग्रंथिंविनिर्भिद्यजिह्वांदीपस्वरूपिणीं वी
जरूपप्रोल्लसंतींपरात्मिकां शब्दब्रह्मस्वरूपांचततोदेवींविचिंतयेत् ततप्रभापटलव्याप्तंशरीरंचिंतयेत्स्थितं नित्यंसहस्रमानेनजपेत्सं
वत्सरंयदि ततःसंजायतेमंत्रीवाचस्पतिरिवापरः छंदोलंकारतर्कादिनाशास्त्रार्थविद्भवेत्कवित्वंज्ञानसंपत्त्यानुपांडित्यंमधिकं
भवेत् अथापरंप्रवक्ष्यामियोगंभुविसु[illegible]दुर्लभं नाभिचक्रेस्थितांसौम्यांरक्ताकारांविचिंतयेत् सौमावच्छिन्नितंवांचरत्नाभरणभू
षितां पाशांकुशधरांदिव्यांवराभययुतां[illegible]नः दृष्ट्वाचामृतवर्षिणीपापहरयंतींमनोरथान् एवंध्यात्वाजपेल्लक्षंमनुज्ञोविहितंततः
होमंकुर्यात्त्रिमध्वक्तैरक्तोत्पलयुतैर्द्विज[illegible]ततःसंतर्पयेद्देवींदुग्धयुक्तेनसर्पिषा पायसेनवलिंदद्याद्दधिपिष्टमधुप्लुतैः एवंध्या
त्वाविधानंतुसाक्षाद्वैश्रवणोभवेत् सि[illegible]त्रिमध्वक्तैर्हुत्वाजगद्वशंनयेत् पद्महोमेनमहतींप्राप्नुयाच्छ्रियमूर्जितां देवीहेराम
दयविद्यायानास्तिकिंचित्सुदुर्लभं स्नेहभावे[illegible]संप्रोक्तंनदेयंयस्यकस्यचित् एतन्नैकश्चितंविद्योपत्तेश्चकारणं विष्णुनादत्तमस्य १७५

भ्वंमयानुवेमान्भ्वं छिज्ञोत्तमं सिद्धमंत्रोयदामं के वालिशस्यापिमूर्ध्वनि हस्तं दत्वा दिशेत्सोपिसोधीवाचमनर्गलां इतिस्वायंभुवेमात
कातंत्रेसारस्वतकल्पः अथकात्यायनीकल्पः श्रीभगवानुवाच अतिगुह्यतमंमंत्रंएष्टव्यानसिपार्वति भक्तिभावेन देवेशि कथया
मिशुचिस्मिते प्रसन्नतां यया याति देवीकात्यायनीतथा कवितामतुलैश्वर्य्यं ददातिपदमुत्तमं श्रीगणमाकर्षणंचैवमारणोच्चाटने
रिपोः नृपाणांतरुणानां चवश्यताजायते प्रिये कथयामितथासर्वंमंत्रयाकर्णयमद्वचः आरोप्यमहामंत्रंवाग्भवादिनमोंतिकं व
ह्न्यासनंशिवंवांतं विंदुखांतिविभूषितं ह्रकारंविंदुनायुक्तं चतुर्दशस्वरसंयुक्तं ङेयुताचंडिकाचैवमंत्रःप्रोक्तोदशाक्षरः चिंतामणि
रितिख्यातोमयावापिविचिंत्यते देवस्यचंडिकाछंदोगायत्रीकपिलोमुनिः लक्षमेकंजपेन्मंत्रंजुहुयात्तद्दशांशतः मातृकोक्तेय
जेत्पीठेवीजेनांगक्रियामता आदावंगानिसंपूज्यशास्त्रेसुजाततः परं लोकपालास्ततः पूज्याक्तेषामस्त्राणितद्वहिः डाकिनीयो
गिनीचैवखेचरीशाकिनीतथा दिक्षुपूज्याइमादेव्यः सुसिद्धैः फलदायिकाः सत्पपादसरोजेनालंकृतोरुमृगाधिपां वामपाद
गृदलितमहिषासुरनिर्भरां सुप्रसन्नांसुवदनांचारुनेत्रत्रयान्वितां हारनूपुरकेयूरजटामुकुटमंडितां विचित्रपट्टवसनाम
ईचंद्रविभूषितां खड्गखेटकवज्राणित्रिशूलविशिखंतथा धारयंतीधनुःपाशंघंटांखट्वांगमेवहं वाहुभिर्ललितैर्देवींचन्द्रको

तं० सा०
१७६
176

टिसमप्रभां समाहृतैर्दिविषैर्दैवैरैराकाशसंस्थितैः स्तूयमानांमोदमानैर्लोकपालादिभिः सदा एवंसंचिंतयेद्देवींजायतेनरपुंगवः
क्षत्रियेषु यथारामो देवेषु चपुरंदरं पतगेषु यथाताक्ष्र्यः क्रूरकार्य्ये यथाशनिः शकुंतेषु यथाश्येनो मंत्रश्रेष्ठो बलवांस्तथा इदंतेप
रमंगुह्यंसंक्षेपात्कथितंमया इदानींजपहोमानां विधानंचशृणु प्रिये मंत्रोयंचिंत्यते देवि सभायांपुरतोयदि कोटिसूर्यप्रती
काशो दृश्यते वादिभिस्तदा पलायंते महादेवि साध्वसेन क्षणात्ततः साधकेन क्षणात्ततः ईश्वमास्य सितेपक्षे नवम्यामारभेज्जपं स
हस्रं प्रत्यहं कृत्वा संप्राप्य नवमीं सितां विजयंखड्गमादाय पूजयित्वा यथाविधि मालतीबकुलैः कुंदैर्मंत्री मधुरसंप्लुतैः सहस्रत्रि
तयं कृत्वा वाग्मीशो जायतेऽचिरात् होत्वा कविता देवि विशदं कुरुते द्रुतं जपं या कुरुते नित्यं शतशो वत्सरावधि वंध्यापि ल
भते पुत्रं कान्तिकेयमिवापरं दुर्भगा च भवेद्देवि सुभगा तिमनोरमा रूपं विचित्रपृष्ठेर्वा क्रमेलक्षं जप्त्वायुतं ततः नीलोत्पलैः सरोजैश्च
कृत्वा वैश्रवणो भवेत् व्याघ्रचर्म्मपरीधानां मुंडमालाविभूषितां रक्तवर्त्तुलभीमाक्षीं जिह्वया लोलयासुरान् वर्द्धयंतीमहाकालीं
कालरात्रिमिवापरां क्षोभयंतीं जगत्सर्वमसृग्भासुरपर्वतां एवंध्यात्वा जपेद्देवि श्मशाने च चतुःपथे सप्ताहंत्रिशतं कृत्वा व्रतस्थः राम
स्थिरमासनः जपेद्यो नियतं देवि सरिपून्नाशयेद् ध्रुवं अनेनैव विधानेन वलिं दद्याच्चतुष्पथे दधमत्स्यं मरकान्त पिंडीकृत्य समाहि १७६

तः आममांसं हरिद्राक्तं यंविविंत्यप्रदापयेत् यैस्ताहाल्कमतेशत्रुर्यमस्य सनसंशयः हरिर्वाशंकरोवापिनशक्तोरक्षितुंक्वचित्
उमाबीजयुगंचादौ चामुंडाबीजयुग्मकं कात्यायनिपदंचोक्त्वा रवादयद्वितयंततः वशीकुरुमहासत्वानादि हुंहुं पुनर्वदेत् वह्नि
जायांततःप्रोक्तोवलिमंत्रःप्रभावहः ऊर्ध्वबीजंहृल्लेखाबीजंप्रणाम्निनंपरिधाय उपविश्यतिजांगते आत्मानंक्रोररूपंचचिं
तयित्वासमाहितः अंगारकदिने चैवनिर्दिष्टतिथिष्वपि पूजितंखड्गमादाय निशीथेवलिमाहरेत् प्रवाहशोणितं चास्यदद्याद्देव्यैप्रयत्ना
विधिश्रद्धयाभेद्यकायः स्याद्रिपुर्गणनात्रसंशयः मंत्रांतरंमायाबीजंसमुद्धृत्य रमाबीजंततःपरं कात्यायनीपदंङेंतंवह्निजायांततःप
रं अष्टाक्षरीमहाविद्यासर्वकामफलप्रदा ध्यानपूजादिकंसर्वंपूर्ववत्तुसमाचरेत् इतिकात्यायनीकल्पः विश्वसारे अथदुर्गाम
नूनवक्ष्येशृणुष्वकमलानने यस्याःप्रसादमात्रेणभवेद्दैगाधरः स्वयं धांतंबीजंसमुद्धृत्यवामकर्णविभूषितं दुंदुबीजंसमायु
क्तंबीजंपरमदुर्लभं चतुर्वर्गप्रदंसाक्षान्महापातकनाशनं एकाक्षरीसमानास्तिविद्यात्रिभुवनेप्रिये विनागंधैर्विनापुष्पैर्विनाहोमपु
रःसरैः विनायासैर्महादेवि जपमात्रेणसिद्धिदा मंत्रस्यास्यऋषिर्देविनारदःपरिकीर्तितः गायत्रीछंदआख्यातं जगद्धात्री चदेवता च
तुर्वर्गप्रदादुर्गासर्वसत्वेषुसंस्थिता विविधासामहाविद्यातत्स्थशृणुकमलेश्वरि कूर्चाद्यांवाजपेद्विद्यांतदंतेवह्निसुंदरी लज्जाद्यांवाजपेद्वि

तं० सा० ११९

घांफडंतांवा जपेत्सुधीः वध्वबीजयुतांवापि स्वाहांतांवा जपेत्पुनः लक्ष्मणाद्यांवा जपेद्विद्यां चतुर्वर्गफलप्रदां वाग्भवाद्यां जपेद्वापि प्रणवा
द्यां जपेत्पुनः कामबीजादिकांवापि फडंतांवा जपेत्सुधीः अक्षरी विविधा विद्या कथिता ब्रह्मणा पुरा दीर्घस्वरसमायुक्तनिजबीजानि पार्वति
विन्यसेदात्मनो देहे हृदयादिषु पूर्ववत् पूर्ववन्न्यासवर्गांस्तु पूर्ववत्कर्म वाचरेत् कालीवदाचरेद्विद्यां जपेद्विद्यामहर्निशं लक्षं द्वादशमेवा
पि पुरश्चरणमीरितं यथास्थानियथाकाले यथाचारविधानतः प्रजपेत्परया भक्त्या दुर्गां दुर्गतिनाशिनीं मत्स्यैर्मांसैः प्रपक्वैर्मगैः शशकु
शल्लकैः प्रजपेत्परया भक्त्या दुर्गां दुर्गतिनाशिनीं मत्स्यैर्मांसैः स्वयंभूकुसुमैः शुक्लैः सुगंधिकुसुमान्वितैः जवायावकसिंदूरै रक्तचंदनसं
युतैः नानामांसैर्नानाद्रव्यैः प्रजपेत्परमेश्वरीं काकैस्तु कैः पेचकैश्च महिषैश्छागलैरपि अजैरुष्ट्रैः खरैर्गध्रैः प्रजयेद्विधिनामुना तदा
भवेन्महासिद्धिर्नात्र कार्या विचारणा ध्यायेत्तु सिंहस्कंधाधिरूढां नानालंकारभूषितां चतुर्भुजां महादेवीं नागयज्ञोपवीतिनीं रक्तवस्त्र
परीधानां वालार्कसदृशीं तनुं नारदाद्यैर्मुनिगणैः सेविसेवितां भवगेहिनीं त्रिवलीवलयोपेतनाभिनालमृणालिनीं रत्नद्वीपमहाद्वीप
सिंहासनसमन्विते प्रफुल्लकमलारूढां ध्यायेत्तं भवगेहिनीं दुर्गायंत्रं प्रवक्ष्यामि शृणुष्व हरवल्लभे त्रिकोणं विन्यसेत्पूर्वं नवकोणसमन्वि
तं त्रैविंवसहितं सर्घ्यमष्टपत्रसमन्वितं त्रिरेखवासरीयंकार्यं वज्रं भूपुरसंयुतं सभी लक्ष्पयथोक्तेन विलिखेद्विधिनामुना नानास्त्रसंयुतं लेख्य राम ११९

चक्रं मंत्रविमर्षितं तत्रतां पूजयेद्देवीं मूलप्रकृतिरूपिणीं पद्मस्थां पूजयेद्दुर्गां सिंहपृष्ठे निषेदुषीं प्रभामायाः शक्तयः पूज्यं धाद्यैर्नवकोणके प्रभामा
या जया सूक्ष्मा विशुद्धानंदिनी पुनः सुप्रभा विजया सर्वसिद्धिदा नवशक्तयः क्लींमायाः पूजयेत्तां सुगंधचंदनवारिणा ॐकारं सर्वमुच्चार्य क्लींकारं तद
नंतरं यथापदं चतुर्थ्यंतं पूजयेत् क्रमतः प्रिये शंखाः प्रानिधी देव्या वामदक्षिणयोगतः पूजयेत् परया भक्त्या रक्तचंदनपुष्पकैः अर्घ्यदानं सदा कुर्यात्
पूजांते पर्वतात्मजे अंगावृत्तिः पुनः पूज्या पत्रके लोकपास्ततः वज्राद्यायुधसंयुक्ता भूपुरे लोकनायकाः इति दुर्गामंत्राः अथ विशालाक्षी त
दुक्तं आदियामले ईश्वर उवाच भुवनाख्यं समुद्धृत्य मायाबीजं समुद्धरेत् विशालाक्षीपदं ङे तं हृदंतं मंत्रमुद्धरेत् अष्टाक्षरी महाविद्या अष्टसिद्धिप्रदा
प्रिये प्रसंगात्कथिता विद्या त्रैलोक्ये दुर्लभा प्रिये ऋषिरस्य महेशानि सदाशिवो महाप्रभुः पंक्तिश्छंदस्य कथितं विशालाक्षी च देवता शक्तिः प्रण
व मितुक्तं लज्जाबीजं च बीजकं धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः अंगन्यासकरन्यासो यथावदभिधीयते षड्दीर्घभाजा बीजेन प्रणवाद्ये
न कल्पयेत् मूलेन व्यापकं न्यस्य ध्यायेद्देवीं परां शिवां ध्यायेद्देवीं विशालाक्षीं तप्तजांबूनदप्रभां द्विभुजामंबिकां चंडीं खड्गखर्परधारिणीं
नानालंकारसुभगां रक्तांबरधरां शुभां सदा षोडशवर्षीयां प्रसन्नास्यां त्रिलोचनां मुंडमालावलीं रम्यां पीनोन्नतपयोधरां शवोपरि महादे
वीं जटामुकुटमंडितां शत्रुक्षयंकरीं देवीं साधकाभीष्टदायिनीं सर्वसौभाग्यजननीं महासंपत्प्रदां स्मरेत् एवं ध्यात्वा महादेवीमुपचारैः

प्रपूजयेपुरश्चरणकालेतुवर्णलक्षंजपेत्सुधीः यंत्रमध्येसमावाह्यप्रतिष्ठांकारयेत्ततः त्रिकोणंचाष्टपत्रंचततोवृत्तंसमालिखेत्
चतुरस्रंचतुर्द्वारमेवंमंडलमालिखेत् तत्रावाह्ययजेद्देवीदेवींसौभाग्यसुंदरी विशालाक्षीं विशालास्यां यथाविधिप्रपूजयेत् त्रिकोणांते
महादेवींसंपूज्यमातरः क्रमात् पंकजाक्षी विरूपाक्षी रक्ताक्षींचसुलोचनां एकनेत्रां द्विनेत्रांचकोटराक्षींत्रिलोचनां एताःप्रपूज्य
महेशानिपत्राग्रेचाष्टयोगिनीः पश्चिमादिक्रमेणैवचाष्टशक्तीःस्वरूपिणीः चतुरस्रेमहेशानिलोकपालान्समर्चयेत् तद्ब
हिश्चैववज्राद्यान्प्रपूजयेद्भाग्यहेतवे ततोयथाशक्तिजप्त्वापूर्ववद्विधिंसमाचरेत् अथगौरीमंत्राः तंत्रंक्लींगौरिरुद्रद
यितेयोगेश्वरिसवर्मीफट् द्विवांतषोडशार्णोयंमंत्रःसद्भिरुदीरितः अस्यपूजाप्रातःकृत्यादिप्राणायामांतंकर्मसमाप्यत्र्या
ष्यादिन्यासंकुर्यात् शिरसिपर्वतऋषयेनमः मुखेगायत्रीछंदसेनमः हृदिगौर्य्यैदेवतायैनमः ततःकरांगन्यासौ ह्रांत्रंगु
ष्ठाभ्यांनमः क्लींहृदयायनमइत्यादिच ततोध्यानहेमाभांबिभ्रतींदोर्भिर्दर्पणंजननाधने पाशांकुशौःसर्वभूषांतांगौरींसर्व
दांभजे एवंध्यात्वामानसैःसंपूज्यशंखस्थापनादिजयादिपीठमन्वंतंसंपूज्यपुनर्ध्यात्वावाह्यदेवींप्रपूजयेत् ततोऽग्न्यादिकेशराम
ष्वक्लांहृदयायनमइत्यादिनापूजयेत् पत्रेषुपूर्वादि ॐ सुभगायैनमः एवंरतिकामिनीकामदायिनीपाशांकुशदर्पणंजनशाला

कन्नलनद्रंद्रादीन्वज्रादींश्च प्रजयेत् अस्य पुरश्चरणं लक्षजपः आज्येन दशांशहोमः तथा चलक्ष्मेकं जयेन्मंत्रं हविष्याशी जि
तेंद्रियः दशांशं होमयेदाज्यैः पुरश्चरणसिद्धये फलं तु पुष्पाजनभक्ष्यचंदनादिकं मूलमंत्राभिमंत्रितं यस्मै यस्मै दीयते स वश्यो भ
वति तथा चरात्रौ हरिद्रया वामोरु मध्ये स्त्रियः नाम लिखित्वा वामकरेणैव धायशतं सहस्रं वा जपन्निषां त्रियामाकर्षय
ति एतत्सरजादिकं सो भाग्यवश्यसर्वसंपत्करं अथ वश्यलक्ष्मीमंत्रः सचमंत्रदेवप्रकाशिकायां हृल्लेखानामस्कारादि वश्यलक्ष्मीः
राजिते राजपूजिते जयेविजये गौरि गांधारि त्रिभुवनवशंकरि सर्वलोकवशंकरि सर्वस्त्रीपुरुषवशंकरि सुसु दुदु घो घरारावे क्लीं स्वा
हा अस्य पूजाप्रयोगः प्रातः स्नानादिकं वश्याकरांगन्यासं कुर्यात् हृल्लेखानमस्कारादिवश्यलक्ष्मी राजिते राजपूजिते हृदयाय नमः
जयेविजये [illegible] जये गौरि गांधारि शिरसे स्वाहा सर्वलोकवशंकरि कवचाय हुं सर्वस्त्रीपुरुषवशंकरी रिने त्र त्रयाय वौषट् सुसु दुदु
घो घरारावे क्लीं स्वाहा अस्त्राय फट् ततो ध्यानं अविकलशशिराजन्मौलिरावद्धपाशांकुशारुचिरकराब्जा वंधुजीवारुणांगी अ
मरनिकरवंद्या त्रीक्षणा शोणलेपा शुककुसुमयुतास्यात्संपदे पार्वतीवः अस्यां गौर्यामातृकाभिर्लोकपालैः स्त्रीरूपावरणैति अस्यायुत
जपः पुरश्चरणं पायसेन दशांशहोमः मधुरत्रययुतैस्तिलतंदुलैर्लवणैर्वा दिनत्रयं सहस्रो होमः शीघ्र वशीकरः प्रातःकाले सूर्यमंड

तं० सा०
१७९

लमध्यस्थां देवीं संचिंत्याष्टोत्तरशतं जपन् त्रिभुवनवश्यकरं अथ इंद्रमंत्राः यथा सच मंत्रदेवप्रकाशिकायां इं इंद्राय ह्न्त् अस्य
ब्रह्मऋषिः ध्यानं पीतवर्णं सहस्राक्षं वज्रपद्मकरं विभुं सर्वालंकारसंयुक्तं नौमींद्रं दिक्पतीश्वरं एवं ध्यात्वावाचयेज्जयेत् ततइंद्रा
दयायनमइत्यादिषडंगेन पूजयेत् ततः पत्रेषु पूर्वादिकं कार्त्तिकायनमः एवं अग्नये मं यमाय क्षं निर्ऋतये यं वरुणाय यं वायवे सं सोमाय
ईं ईशानाय ततोवज्रादीनि पूजयेत् अस्य पुरश्चरणं लक्षजपः आज्येन तिलैरयुत होमः ततप्रयोगः चतुष्कोणस्थपद्मेवस्त्रवेष्टि
तं कुंभं स्थापयित्वा गंधोदकेन संपूर्य तत्र सपरिवारं इंद्रमाराध्य सहस्रं जप्त्वा तज्जलाभिषेकेन अष्टराज्य सम्प्राप्तिः अन्येषांपर
मा प्रीतिर्भवति अथ गरुडमंत्राः संवर्त्तोग्निनेत्रयुतः पार्श्वस्ताराग्निसुंदरी गारुडोमनुराख्यातो विषद्वयविनाशनः स्मरन् गरुडमा
त्मनं मंत्रमेनं जपेन्नरः विषमालोकनैर्नित्यं हन्यान्नागकुलोद्भवं अस्य पूजा प्रातःस्नानादिवैष्णवोक्तपीठमभ्यर्च्य तं विन्यस्य ऋष्या
दिन्यासं कुर्याद्यथा शिरसि रुद्र ऋषये नमः मुखे पंक्तिश्छंदसे नमः हृदि पक्षीन्द्राय देवतायै नमः प्रणवोबीजं स्वाहा शक्तिः ततों
गन्यासं ज्वल २ महामति स्वाहा गरुड चूडामणे स्वाहा गरुड शिखि शिखे स्वाहा गरुड प्रभंजन २ प्रभेदन २ विद्रावय २ विमर्दय २
स्वाहा उग्ररूपधर सर्वविषहर हर २ भीषय २ स्वाहा सर्वं दह २ भस्मीकुरु २ स्वाहा हेतिगं कल्पना करद्वयांगुष्ठादिकनिष्ठांगुलिषु मंत्र राम
१७९

वर्णोन्नविन्यसेत् ततोध्यानं वर्मान्तोवह्नियुग्मान्तरकमलगतंपंचभूतात्यवर्णक्रिन्नाकल्पंफणीन्द्रैरभयवरकरंपद्मनेत्रंस्रुवक्त्रं
दुष्टाहिंछेदितुं ईस्मरदखिलविषपोषणंप्राणप्रदत्तं प्राणेग्रणेपंत्रिवेदीतनुममृतमयंपक्षिराजंभजेहं एवंध्यात्वामानसैःसंपूज्य
शंखस्थापनंकृत्वावेक्ष्यवोक्तपीठमन्त्रंतसंपूज्यपुनर्ध्यात्वावास्वरेफद्वयंहुंकारद्वयमध्यस्थंलकारेकारविंद्वात्मकवीजयुक्तव
र्णिकं स्वाहांहंहाछकंकेशरेकचटतपयशलाक्षवर्गयुक्तानष्टदलेमातृकापद्मेपक्षिराजंप्रजयेत् अंगैःप्रथमावरणंअनंत
वासुकितक्षककर्कोटकपद्मशंखपालमहापद्मशंखकुलिकाष्टनागैर्द्वितीयंइंद्रादिभिस्तृतीयं अस्यपुरश्चरणंपंचलक्षजपः अ
यवापुरश्चरणार्थंमूलमयुतंप्रत्येकाक्षरसंख्यसहस्त्रंमालामंत्रंजपेत् घृताक्तैःकृष्णपुष्पैर्दशांशहोमः मालामंत्रस्तूच्यते ॐनमो
भगवतेगरुडायकालाग्निवर्णायएह्येहिकालानललोलजिह्वायपातयपातयमोहयमोहयविद्रावयविद्रावयभ्रमभ्रमयभ्रामयहनहनदहदहपचपच
हुंफट्स्वाहा ह्रीराशिमध्येतत्रोत्पन्नचतुर्बीजंक्रमात्कामदक्षमयममृतात्मकंपद्मंविचिंत्यतन्मध्येदष्टंविचिंत्यदष्टस्यमूर्ध्निवक्त्रेहृदय
नाभिषुवंहंठंवंइतिमंत्रेणवीजचतुष्टयंअमृतस्त्राविततत्वेनसंचिंत्यदष्टशिरसिउपरिचंद्रकांतवर्णसुधामयंगरुडंध्यात्वात
द्धस्तसंभितामृतापूरितशंखनिर्गतामृतधारयादष्टप्लावयंतंगरुडंध्यायन्मंत्रंजपेत् एवंध्यानमात्रेणदष्टोनिर्विषोभवत्

त॰सा॰ स्याच चिरंजीवति ॐ नमो भगवते गरुडाय महेंद्राय पर्वतशिखराकाररूपाय संहर संहर मोचय २ चालय २ पातय २ निर्विष २ विषमप्य
१८० मृतं वाहाररूपमिदं प्रज्ञापयामि स्वाहा नमः नल २ वर २ हिप २ हर २ स्वाहा अनेन गरुडमंत्रेण मंत्री गरुडरूपो भूत्वाभिमंत्रितं
180
स्थावरविषं भक्षितमप्यमृतं भवति किमन्नपानादिकमिति अथ विषहराग्निमंत्रः स च विसर्गबिंदुयुक्तः रवकारद्वयरूपः अस्य
पूजा प्रातःकृत्यादिकं कृत्वा ऋष्यादिन्यासं कुर्यात् यथा शिरसि अग्नये ऋषये नमः मुखे पंक्तिछंदसे नमः हृदि अग्नये देवतायै नमः रव
कारो बीजं बिंदु शक्तिः दीर्घस्वररवकारेण कराङ्गन्यासौ कुर्यात् ध्यानादि वैश्वानरमंत्रवत् अस्य पुरश्चरणं द्वादशलक्षजपः आ
ज्येन दशांशहोमः स्ववामहस्ततले पंचोल्लं श्वेतं पद्मं ध्यात्वा तत्कर्णिकाग्रं सविसर्गरवकारं तत्पंचदलेषु सानुस्वारं रवकारं
ध्यात्वा रक्तवर्णं समस्तमयं विचिंत्य तत्स्पर्शनात् सर्वं विषं नाशयेत् इत्थं भूतकरेण विषरोगस्य स्पर्शमात्रेण शतं जयेत्
सर्ववृश्चिकादिविषज्वरजीर्णविसर्पदंशादिशूलनेत्ररोगादि सर्ववेदनां च नाशयेत् इति विषहराग्निमंत्रः अथ वृ
श्चिकादिविषहरमंत्रः ॐ सर स्फु हं ॐ ह्रीं सिलि चिलि हस्फु ॐ हिलि २ चिलि २ स्फुः सर्वेभ्यो देवेभ्यः स्फुः एते वृश्चिकवि राम
षहरामंत्राः अथ मूषिकविषहरा मंत्राः ॐ गोरिवः इति मूषिकहरमंत्रः अथ लूताविषहरमंत्रः ॐ शरलेफुः ॐ १८०

स्वाहा स्त्र मित्युक्तं जातियुक्तं न्यसेन्नतो प्रयोगः पृ ॐ नमो हृदयायेत्यादि अमुकानियतं चैव जपेन्मंत्रं जपाज्जपी स्मृतिमात्रेणैवै
मंत्रीरिपून्सर्वान्विनाशयेत फेत्कारीये ॐ ठं ठां ठिं ठीं ठुं ठूं ठें ठैं ठों ठौं ठं ठः अमुकं हूं २ ठः ठः इतिमंत्रेणश्रृंगालास्थिमयंकीलकंप
चांगुलं सहस्रेणाभिमंत्रितं यस्यगेहे श्मशानेवानिखनेत्स उन्मत्तोभवति डं डां डिं डीं डुं डूं डें डैं डों डौं डं डः अमुकं ग ह्लिं २ हूं २
ठः ठः अनेनमंत्रेण मनुष्यास्थिमयं कीलकं वितस्तिप्रमाणं सहस्रेणाभिमंत्रितं यस्यगेहे श्मशानेवानिखनेत्तस्य सम्यक्ताप
ति वारो न श्यति उद्धृते खलु शांतिः तथा ॐ सः सं सं हं अमुकस्य शांतिर्भवतु स्वाहा अनेनमंत्रेण घृतमधुसिक्तं क्षीरं क्रुने
त्तन शांतिर्भवति ॐ टं टां टिं टीं टुं टूं टें टैं टों टौं टं टः अमुकं मारय २ ठः ठः अनेनमंत्रेण गर्दभास्थिमयं कीलकं त्र्यो दशांगुलं
सहस्रेणाभिमंत्रितं चितामध्ये निखनेत्स च ज्वरेण नश्यति ॐ णं णां णिं णीं णुं णूं णें णैं णों णौं णं णः अनेनमंत्रेण खदिरका
ष्ठमयं कीलकं त्र्यो दशांगुलं सहस्रेणाभिमंत्रितं यस्य नाम्ना गेहे श्मशानेवानिखनेत्तस्य सर्वं नाशयति अथ निगडबंधमो
क्षणं ॐ नमः आते नि ऋतो निगमते जोयन्मयं विचृतावंधनमेतयमे न दत्तं तस्या संविदानो त्तमेनाके अधोरोहयैवं अस्य निगडबं
धनमंत्रस्य प्रजापति ऋषिर्निऋतिर्देवता त्रिष्टुप्छंदो बंधादि मसनपरीहारे विनियोगः एवं ऋष्यादिकं विन्यस्य अयुतं

तं०सा० १८३ जपेत् ततोब्रूयादमुकंमेततः परं वशमानयद्वंद्वचिरिमंत्र उदाहृतः सप्तभिर्दिवसैर्नयात्वशायेद्विधिनाऽमुना वि
धिमाह विलिख्यतालपत्रे लिखेदेत ॐ कालीगहेरवनेन वश्यायसर्वजंतूनां प्रयोगोऽयमुदाहृत अथ त्र्यंबकमंत्रः
त्र्यंबकंयजामहे सुगंधिंपुष्टिवर्द्धनं उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्स्वाहा वसिष्ठोमुनिराख्यातश्छंदोनुष्टु
बुदाहृतं देवतास्यसमुद्दिष्टा त्र्यंबकः पार्वतीप्रियः विभक्तैर्मंत्रवर्णैस्यात्षडंगानांविकल्पना तत्रप्रयोगः भूतशुद्ध्यादिप्राणाया
मांतंकर्मसमाप्य ऋष्यादिन्यासंकुर्यात् शिरसिवसिष्ठऋषयेनमः मुखेनुष्टुप्छंदसेनमः हृदि त्र्यंबकायदेवतायेनमः अमुक
स्यामुकशांतये विनियोगः अथकरांगन्यासः यथा त्र्यंबकं अंगुष्ठाभ्यांनमः यजामहे तर्जनीभ्यांस्वाहा सुगंधिंपुष्टिवर्द्धनं मध्य
माभ्यांवषट् उर्वारुकमिवबंधनादनामिकाभ्यांहुं मृत्योर्मुक्षीयकनिष्ठाभ्यांवौषट् मामृतात् करतलपृष्ठाभ्यांफट् एवंहृद
यादिषु ततः मूर्द्धपश्चाद्यास्येदुवक्त्रेषु तद्दंतरे उरोगलास्येषु पुनर्नाभिहृत्पृष्ठकुक्षिषु लिंगपायूरुमूलांते जानुयुग्मे ततः
परं उरुद्वययुग्मे स्तनयोः पार्श्वयोः पादयोः पुनः पाण्योर्नासिकयोः शीर्षे मंत्रवर्णान्न्यसेत् क्रमात् ततः पदान्येकादश राम
वन्न्यसेत् शिरोभ्रूयुगलादिषु वक्त्रे गंडद्वये भ्रूयो हृदये जठरे पुनः गुह्योरुजानुपादेषु न्यासमेवंसमापयेत् ततोध्यानं १८३

183

हस्ताभ्यां कलसद्वयामृतरसैराप्लावयंतं शिरो द्वाभ्यां तौ दधतं मृगाक्षवलये द्वाभ्यां वहंतीं परं अंकन्यस्तकरद्वयामृतघटं कैला
शकांतं शिवं स्वच्छांभोजगतं नवेंदुमुकुटोज्ज्वलं त्रिनेत्रं भजे एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् तथा शैवोक्तपीठपू
जां विधाय पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधाय आवरणपूजामारभेत् ततोऽग्न्यादिकोणकेशरेषु ॐ वं कं ह
दयाय नम इत्यादि षडंगैः संपूज्य ततो दलपत्रेषु ॐ अर्काय नमः एवं इंदवे वसुधायै जलाय वह्नये वायवे वियते यजमानाय तदग्रे स्येद
बादि रमा राका प्रभा ज्योत्स्ना पूर्णा पूषा पद्मिनी सुधा वामं तु रमायै नम इत्यादि तदग्रे विश्वा विद्या सिता प्रसारा संध्या शिवा निशा वाक्य
नु ॐ विश्वायै नम इत्यादि तदग्रे ॐ आर्द्रायै नमः एवं प्रज्ञायै प्रभायै मेधायै कांत्यै शांत्यै धृत्यै मत्यै तदग्रे परायै० उमायै० पा
र्वत्यै० पद्मायै० शांतायै० अमोघायै० यमायै० अमलायै ततो धूपादि विसर्जांतं कर्म समापयेत् लक्षमेकं पुरश्चरणं तद्दशां
शेन बिल्वपलाशखदिरवटतिलसिद्धार्थपायसक्षीरदधिदूर्वाभिः दशांशेन प्रत्येकं होमः प्रयोगस्तु प्रतिदिवसेऽन्यदिव
सेवाऽष्टोत्तरमूलं स्वच्छा सहस्रं जपेत् तथा च शनिवारदिने स्पृष्ट्वा मूलं स्वच्छा जपेत् सुधीः साक्षान्मृत्योर्विमुंचेत किमन्यत्क्षुद्र
कृताः क्रियाः तथा च स्नात्वा सहस्रं प्रजपेदादित्याभिमुखो मनुं आधिव्याधिविनिर्मुक्तो दीर्घमायुरवाप्नुयात् वरव

तं०सा० सन्निधो जुहुयादयुतावधि धनधान्यसमृद्धिःस्यादचिरेणैवसिध्यति अथमृतसंजीविनी आदौप्रासादबीजंतदनुमतिहरंता
१८४ रकंमाहृतिश्च प्रोच्चार्य त्र्यंबकंयोजपतिमतिहरंसंपुटंचानुलोमं मतिहर त्र्यंबकमृत्युंजयमंत्रं अस्यजपात्सर्वसिद्धिर्भवति अथ
शत्रोपासितामृतसंजीवनी यथागायत्रीप्रथमंपादं त्र्यंबकपदेकंततः गायत्रीद्वितीयंपादं त्र्यंबकद्वितीयपादं गायत्रीतृतीयंपादं
त्र्यंबकशेषपादं मंत्रोयथा ॐतत्सवितुर्वरेण्यं त्र्यंबकंयजामहे सुगंधिंपुष्टिवर्द्धनं भर्गोदेवस्यधीमहि उर्वारुकमिवबंधनात् धि
योयोनःप्रचोदयात् मृत्योर्मुक्षीयमामृतात् ध्यानं अच्छस्वच्छारविंदस्थितःउभयकरेसंस्थितोपूर्णकुंभो द्वाभ्यामेनाक्षमालेनिज
करकमलेद्वौघटौनित्यपूर्णौ द्वाभ्यांद्वौचस्रवंतौशिरसिशशिकलांचामृतैःप्लावयंतं देहंदेवोगङ्गना विदिशानुविशदाकल्पजा
लःप्रियंवः एवंध्यात्वावाहयेत्त्र्यंबकाय महारुद्रायनमइत्यनेनपूजयेत् अस्यजपात्सर्वसिद्धिर्भवति अथाकर्षणविधान
निकयथापिसमासतः यदुक्तंत्रैपुरेतंत्रेरुद्रयामलडामरे श्रीबीजंमान्मथंबीजंलज्जाबीजंसमुद्धरेत् प्रथमंप्रणवंदत्वात्रिपुरा
देविपदंततः अमुकीतिपदंदत्वाआकर्षयद्वयंपदं स्वाहांतंमंत्रमुच्चार्य जपेद्दशसहस्रकं षट्कोणंचसमालिख्यरक्तचं राम
दनकर्दमैः षडंगंकारयेन्मंत्रीलज्जाबीजसमन्वितं षट्दीर्घभाक्स्वरेणैवनादबिंदुविभूषितैः रक्तपुष्पाक्षतधूपादिनैवेद्यैः १८४

परिपठ्यतां भावयन् चेतसा देवीं त्रिनेत्रां चंद्रशेखरां बालार्ककिरणप्रख्यां सिंदूरारुणविग्रहां पद्मं च दक्षिणे पाणौ जपमालां च वा
मेके मंत्रस्यास्य प्रभावेन रंभामपि तयोर्वशीं आकर्षयेन्नसंदेहः किं पुनर्मानुषीमिह प्रयोगांतरमाह भूर्जपत्रे समालिख्य कुंकुमा
लक्तवारिणा काश्मीरागरुकस्तूरीरोचनामिलितेन च अनामा रक्तमिश्रेण कामलाह्रीमनुं जपेत् ॐ श्री कामला ह्रीं अमुकीमा
कर्षय २ ॐ फट् इमं मंत्रं जपेदादौ सहस्रैकं ततःपरं तद्भूर्जपत्रमादाय गुलिकाकारयेत्सुधी तेनैव साध्य पादोत्थमृत्तिका पंकवे
ष्टितं शोषितं तेजसा भानोर्विघट्ये त्रिकटुकैः पुनः प्रतिमां रक्तो निर्माय तस्याः क्षिपेत्तयोदरे गुलिकां पातयेत् पात्रे प्रतिमां सा
ध्यरूपिणीं नादृग्गाभ्यासुरवोभूत्वा निर्जने निशि साधकः यावदूर्ध्वं ति चित्ते चतावद्रूपं मनुं जपेत् यावदायाति मे रक्ता मद्
नालसमानसा: अथ विद्वेष अन्योन्यसमरसंरंभाक्रोधितो समरे लुतौ नदीयनरवरौ द्रुहौ न धूलिमादाय साधकः धू
लिघातेन विद्वेषस्ताडनादभिजायते परस्परं रिपोर्वैरं मित्रेण सह निश्चितं महिषाश्वपुरीषाभ्यां गोमूत्रेण समालिखेत् मयो
र्नाम तयोः श्री घ्रं वि द्वेषं च परस्परं अन्यच्च रक्तेन मह्लिषाश्वेन श्मशानवस्त्रके लिखेत् यस्य नाम भवेत्तस्य विद्वेषश्च प
रस्परं षट्कोणचक्रमध्ये तु रिपोर्नाम समन्वितं मंत्रं संप्रवक्ष्यामि महाभैरवसंज्ञकं ॐ नमो महाभैरवाय श्मशानवासि

तं० सा० नेऽमुकामुकयोर्विद्वेषं कुरु २ ह्रूं फट् एतन्मंत्रं लिखेत्तत्र विद्वेषं जायते ध्रुवं अन्यं योगमहं वक्ष्ये दुर्लभं वसुधातले येन ज्ञाते
१८५ न मात्रेण विद्वेषो जायते ध्रुवं ॐ नमो भगवति श्मशान कालिके ऽमुकं विद्वेषय २ हन २ पच २ मथ २ ह्रूं स्वाहा अमुना मंत्र
राजेन होमयेत् प्रयतः सुधीः वह्निकुंडे निंबपत्रं कटुतैलान्वितेन च प्रज्वाल्य खादिरं वह्निं श्मशानजं ततः पुनः दशसाहस्र
संयुक्तं तिलयवाद्यतान्वितं भावयन् कालिकां देवीमिंद्रनीलमणिप्रभां व्योमनीलां महाचंडां सुरासुरविमर्दिनीं त्रिलोचनां
रक्तनेत्रां सर्वाभरणभूषितां कपालकर्तृकाहस्तां चंद्रसूर्यप्रापरिस्थितां शवजालगतां चैव प्रेतभैरववेष्टितां वसंतीं पितृका
नारे सर्वसिद्धिप्रदायिकां होमयेद्विविधैः सर्षपैर्वलिभागोपकारकैः प्रजपित्वा महेशानीं भक्तियुक्तेन चेतसा तद्भस्म च स
मादाय धारयेदभिमंत्रितं भस्मना तेन यानेन प्रोद्विद्वेषं तद्भवेत्क्षणं वह्निश्च शीततां याति पतेद्भूमौ यथा रविः यथा सुष
तिपाथोधिश्चंद्रमाः पतिते यदि तदापि प्राप्नोत्युद्वियोगराजः सुदुर्लभः षट्कोणे च क्रराजं तु शत्रुणांनमटंकितं पूर्ववद्विद्वेषेन
विद्वेषं कारयेदयसाधकः नाम युक्तं मंत्रमाह ह्रीं विद्वेषिलि अमुकामुकयोः परस्परं विद्वेषं कुरु २ स्वाहा च क्रवाह्ये लिखेद्राम
मंत्रमिमं सर्वैः वस्तुभिः परस्परं भवेद्द्वेषो योगोयं चै कामते अथोच्चाटनविधिं वक्ष्ये यथोक्तं श्रीमतां नरैः निंबपत्रे लिखेत् १८५

न्नाममहिषाश्वपुरीषकैः काकपक्षारव्यातले प्रयत्नेतालेखनीयमनंतरं लेख्यमंत्रमाह ॐ नमः काकतुंडि धवलामुखि अमु
कमुच्चाटय २ हुं फट् एतन्मंत्रंसमभ्यर्च्य लिखित्वा पूर्ववस्तुभिः निंबवृक्षस्थितं सर्वकाकालयं हरेदथ श्मशानवह्निमानी
य धत्तूरकाष्ठदीपितं वह्निं कृत्वा महातैलं र यवा कटुवस्तुभिः प्रसर्वां मनुनातस्यपत्रं राजीकटुसुतं संपूज्य धवलामुखिं
पंचोपचारपूजयां तद्भस्मप्रक्षिपेच्छत्रोर्मंदिरे रोपरि मंत्रवित् ध्यानयुक्तेनमनसा शत्रोरुच्चाटनं भवेत् धूम्रवर्णा महादेवीं त्रिने
त्रां शशिशेखरां जटाजूटसमायुक्तां व्याघ्रचर्मपरिच्छदां कृशांगीमस्थिमालां च कर्तृकापालकरांबुजां कोटराक्षीं सुदंष्ट्रां च पा
तालसन्निभोदरां एवंविधा धियाभाव्य कार्यमुच्चाटनं प्रिये एषयोगविधिः प्रोक्तो वीरतंत्रे महेश्वरि गोपनीयं प्रयत्नेन न प्रका
श्यं कदाचन इत्युच्चाटनं तथा सौराष्ट्रयोर्दिनेयाख्यं नरास्थिं चतुरंगुलं निसारसेन संलिख्य प्रधानभवने क्षिपेत् सप्ताहा
भ्यंतरे शत्रोरुच्चाटनकरं भवेत् मंत्रस्तु अमुकस्योच्चाटनं कुरु २ स्वाहा ॐ अमुकं हन २ स्वाहा रिपोर्मलं च क्वचि कंचरवनि खातु
विनिक्षिपेत् म्रियते मलरोधेन उद्धृते च सुखावहं मंत्रस्तु लं भिनि अमुकस्य मलं लं भय हुं फट् अथ सुखप्रसवमंत्र ॐ
मन्मथमन्मथ वाहिर लंबोदरं मुंच २ स्वाहा ॐ मुक्ताः पाशा विपाशाश्च मुक्ताः सूर्येण रश्मयः मुक्तः सर्वभयाद्गर्भ

ध्ये हिमारी चर स्वाहा एतदन्यतरेणाष्टवारं जलमभिमंत्र्य देयं ततः सुखप्रसवा भवति अथादर्शनप्रयोगः अर्कश
ल्मलि कार्पासपट्टयं कज्जलं तन्तुभिः पंचभिर्वर्त्तिकाभिस्तु नृकपालेषु पंचसु नरतैलेन दीपाः स्युः कज्जलं नृकपालकैः ग्रा
हयेत् पंचभिर्यत्नात् पूर्ववच्च शिवालये पंचस्थानीयज्ञानं तु ऐकीकुर्यात् ततः पुनः मंत्रयित्वाऽञ्जयेन्नेत्रे दैवैरपि न दृ
श्यते मंत्रस्तु हूं हूं फट् कालि महाकालि मांसशोणितं खादय देवि मा पश्यन्तु मानुषेति हूं फट् स्वाहा इति मंत्रेणाष्टोत्त
रसहस्रं जपेत् मंत्रयेत् अथ मूलमष्टोत्तरसहस्राभिमंत्रितं कज्जलात्तत् कज्जलं नेत्रे दत्वा त्रैलोक्यादृश्यो भवति अथ
योगिनीसाधनं तदुक्तं भूतडामरे उन्मत्तभैरव उवाच अथातः संप्रवक्ष्यामि योगिनीसाधनोत्तमं सर्वार्थसाधनं नाम
देहिनां सर्वसिद्धिदं अतिगुह्यं महाविद्या देवानामपि दुर्लभा यासामभ्यर्चनं कृत्वा यक्षेशो भूद्धनाधिपः तासामाद्यां
प्रवक्ष्यामि सुरासुंदरीं प्रिये अस्याश्च साधनेनैव राजत्वं लभते नरः अथ प्रातः समुत्थाय कृत्वा स्नानादिकं शुभं प्रा
सादिकं च समासाद्य कुर्य्यादाचमनं ततः अस्त्रं वाचेस हस्रार हुं फट् दिग्बंधनं चरेत् प्राणायामं ततः कुर्यात् मूलमंत्रेण ताम
तंत्रवित् षडंगं मायया कुर्यात् पद्ममष्टदलं लिखेत् तस्मिन् प्रेतं यथा मंत्री जीवन्यासं समाचरेत् पीठदेवीं समभ्यर्च्य १८६

ध्यायेद्देवीं जगत्प्रियां शुक्लचंद्राननां गौरांगीं विचित्रांबरधारिणीं पीनोन्नतकुचां रामां सर्वज्ञाम् अभयप्रदां इति ध्यात्वा
मूलेन दद्यात्पाद्यादिकं शुभं पुनर्धूपं तथा दीपं च नैवेद्यं मूलमंत्रतः गंधचंदनतांबूलं सकर्पूरं सुशोभनं प्रणवाद्येन भुव
नेशी आगच्छ सुरसुंदरि वह्निजायां जपेन्मंत्रं त्रिसंध्यं च दिने दिने सहस्रैकप्रमाणेन ध्यायेद्देवीं सदा बुधः मासांते दिवसं
प्राप्य बलिं पूजां सुशोभनां दत्वा च प्रजपेन्नित्यं निशीथे याति सुंदरी सुदृढं साधकं मत्वा याति सा साधकालये सुप्र
सन्ना तु सा साधकाग्रे सदा स्मेरमुखी ततः दृष्ट्वा देवीं साधकेंद्रो दद्यात् पाद्यादिकं शुभं सचंदनं सुमनो दत्वा मिलसितं वदे
त् मातरं भगिनीं वापि भार्यां वा मनसि भावतः यदि माता तदा वित्तं द्रव्यं च सुमनोहरं भूपतित्वं प्रार्थितं यत्तद्ददाति दिने दिने
पुत्रवत्पालितं लोके सत्यं सत्यं सुनिश्चितं स्वसा ददाति वित्तं च दिव्यं वस्त्रं तथैव च दिव्यकन्यां समानीय नागकन्यां दिने दिने य
च्च द्रवति भूतं च भविष्यतीति च यत् पुनः तत्सर्वं साधकेंद्राय निवेदयति निश्चितं यद्यत्प्रार्थयते सर्वं ददाति सा दिने दिने
भ्रातृवत्पालितं लोके कामना निर्मनोरगतेः भार्या स्याद्यदि सा देवी साधकस्य मनोहरा राजेंद्रं सर्वराजानं संसारे साधकोत्तमः
स्वर्गलोके च पाताले गतिर्भवति नान्यथा यद्यद्ददाति सा देवी कथितं नैव शक्यते नयासार्द्धं च सो गंधर्व देवात्ं करोति सः अन्य

तं०सा० स्त्रीगमनं त्यक्त्वा चान्यथा नश्यति ध्रुवं १ ततोऽन्यत्साधनं वक्ष्ये निर्म्मितं ब्रह्मणा पुरा नदीतीरं समासाद्य कुर्यात्स्नानादिकं ततः
१८९ शर्वं वस्त्रं कलं कार्य्यं चंदनेन मंडलं लिखेत् स्वमंत्रं तत्र संलिख्य आवाह्य ध्यायेन्मनोहरां कुरंगनेत्रां शरदिंदुवक्त्रां विद्याधरीं चं
दनगंधलिप्तां चीनांशुकां पीनकुचां मनोज्ञां श्यामां सदा काममदुघां विचित्रां एवं ध्यात्वा यजेद्देवीमगुरुधूपदीपकैः गंधपु
ष्परसं चैव तांबूलादीश्च मूलतः तारं मायांत यागच्छ मनोहरे पावकवल्लभा कृत्वायुतं प्रतिदिनं जपेन्मंत्रं प्रसन्नधीः मासा
न्ते दिवसं प्राप्य कुर्याच्च जपमुत्तमं आनिशीथं जपेन्मंत्रं ज्ञात्वा साधकं दृढं गत्वा च साधकाभ्यासे सुप्रसन्ना मनोह
रा वरं वरय शीघ्रं त्वं यन्मे मनसि वर्त्तते साधके प्रोपितां भक्त्या पाद्याद्यैरर्चयेन्मुदा चंदनोदकपुष्पेण फलेन च मनोहरे
ततोऽर्चिता प्रसन्ना स्यात्पुष्पमाति प्राहिणुं च यत् स्वर्णभारं साधकाय सा ददाति दिने दिने सा विशेषं व्ययं कुर्यात्स्थितेन तु
न ददास्यति चान्यस्त्रीगमनं तस्य न भवेत् यमीरितं श्मशानमाह जगतिस्तस्य भवति न संशयः इति ते कथिता विद्या सुगोप्या या सु
रासुरैः तव स्नेहेन मया च वक्ष्येहं परमेश्वरि ० ततो वक्ष्ये महाविद्यां शृणुष्वैकमनाः प्रिये गत्वा वटतरुं देवीं पूजयेत्साधकोत्त राम
मः प्राणायामं षडंगं च माधयाद्यमाचरेत् मांसं बलिं दत्वा पूजयेत्तां समाहितः अर्घ्यमुच्छिष्टरक्तेन दद्यात्तस्यै दिने दिने १८६

प्रचंडवदनांगौरींपक्वबिंबाधरांप्रियां रक्तांलम्बधरांरामांसर्वकामफलप्रदां एवंध्यात्वाजपेन्मंत्रमयुतंसाधकोत्तमः संप्राप्तेदिने
समभ्यर्च्यचाष्टमेविधिवच्चरेत् कायेनमनसावाचाप्रजपेच्चदिनेदिने तारंमायांततयाद्यंचरक्तकर्म्माणितिद्वहि आगच्छकनको
तेचवतिस्वाहामहामनुः आनिशीथंजपन्मंत्रंवलिंदत्वामनोहरं साधकेंदुंदर्दंदत्वायातिसासाधककालये साधकोपितां
दृष्ट्वाददद्यार्घ्यपाद्यादिकंततः ततस्सपतिभावेनभार्य्यास्यात्कामभोजनैः वस्त्रभूषादिकंतस्यैदत्वायातिसानिजमंदिरं एवंभा
र्य्याभवेन्नित्यंसाधकाज्ञानुरूपतः आत्मभार्य्यांपरित्यज्यभजेत्तांचविचक्षणः ३ ततःकामेश्वरीवक्ष्येसर्वकामफलप्रदां
प्रणवंभुवनेशानीचागच्छकामेश्वरीततः वह्निभार्य्यामहामंत्रंसाधकानांसुखावहं पूर्ववत्सकलंकृत्वाभूर्जपत्रेसुशोभने
गोरोचनाभिःप्रतिमांविनिर्म्मायस्वलंकृतां शय्यामारुह्यजपेन्मंत्रमेकमनास्ततः सहस्रैकप्रमाणेनमासमेकंजपेन्मनुं ध्यात्वे
नमधुनादीपंदद्याच्चसुमनाहितः कामेश्वरींशशांकास्यांखेलत्खंजनलोचनां मदालोलगतिंकांतांकुसुमास्त्रशिलीमुखां
एवंध्यात्वाजपेन्मंत्रंनिशीथेयातिसातदा गत्वाचसाधकाभ्यासेआज्ञांदेहीतिभाषिते स्त्रीभावेनयदातस्यैदद्यात्पाद्यादिकं
ततः सुप्रसन्नातदादेवीसाधकंतोषयेत्सदा अन्नाद्यैरतिभोगेनपतिवत्पालयेत्सदा नीत्वारात्रिंसुखेश्वर्य्यैर्दद्याच्चविपुलं

तं०सा० १८१ धनं दत्वालंकारद्रव्यादीन् प्रभाते याति निश्चितं एवं प्रतिदिनं तस्य सिद्धिः स्यात् कामरूपिणं ४ ततः पटे विनिर्म्माय पुत्तली
रूपान् रूपतः सुवर्णवर्ण्णां गौरांगीं सर्व्वालंकारभूषितां नूपुरांगदहाराढ्यां रम्यां च पुष्करेक्षणां एवं ध्यात्वा जपेन्मंत्रं दद्यात्पा
द्यमनुत्तमं सचंदनेन पुष्पेण जातिपुष्पेण यत्नतः गुग्गुलुधूपदीपं च दद्यान्मूलेन साधकः तारे मायां ततो गच्छ रतिसुंदरि
पदं ततः वह्निजायां एकसहस्रं जपेन्मंत्रं दिने दिने मासांते दिवसं प्राप्य कुर्यात्पूजादिकं शुभां घृतदीपं तथा गंधं पुष्पं तांबूल
मेव च तावन्मंत्रं जपेद्विद्वान् यावदायाति सुंदरी ज्ञात्वा सुदृढं साधकेंद्र निशीथे याति निश्चितं साधकाज्ञानुरूपेण प्रया
ति सा दिने दिने निर्ज्जने प्रांतरे देशे प्रोक्ता सिद्धा स्यान्नात्र संशयः त्यक्त्वा भार्य्यां भजेत्तां तु अन्यथा नश्यति ध्रुवं ५ ततोऽन्यत्सा
धनं वक्ष्ये स्वर्गहे शिवसन्निधौ वेदत्रिभुवनेशानी चागच्छ पद्मिनिवल्लभा पावकस्य महामंत्रं पूर्ववन्नमस्कलं ततः मं
डलं चंदनैः कृत्वा मूलमंत्रं लिखेत्ततः पद्मानना श्यामवर्ण्णा पीनोन्नतपयोधरां कोमलांगी स्मेरमुखी रक्तोत्पलदलेक्षणा
एवं ध्यात्वा जपेन्मंत्रं सहस्रं च दिने दिने मासांते पूर्णिमां प्राप्य विधिवत्पूजयेन्मुदा आनिशीथं जपेन्मंत्रं दृढाभ्यासेन सा
धकः सर्व्वत्र कुशलं दद्यात् याति सा साधकालयं भूत्वा भार्य्या साधकं हि तोषयेद्विविधैः सुखैः भोज्यैर्द्रव्यैर्भूषणाद्यैः ६ राम १८१

ग्गिनी सा दिने दिने पतिवत् पालितं लोके निर्भयं स्वर्गे च सर्वदा त्यक्त्वा भार्य्यां भजेत्तां च साधक अमदा प्रिये ॥ ततो वक्ष्ये म
हाविद्यां विश्वामित्रेण धीमता ज्ञात्वा यां साधितां विद्यां वला चातिवला प्रिये प्रणवाद्ये महामाया नटिनि पावकवल्लभा
महाविद्येह कथिता गोपनीया प्रयत्नतः अशोकस्य तटं गत्वा स्नात्वा पूर्ववदाचरेत् मूलमंत्रेण सकलं कुर्य्याद्वसुसमाहितः
त्रैलोक्यमोहिनीं गौरीं विचित्रांबरधारिणीं विचित्रालंकृतां रम्यां नर्तकीवेशधारिणीं एवं ध्यात्वा जपेन्मंत्रं सहस्रं च दिने दि
ने मांसोपहारैः संपूज्य धूपदीपं निवेदयेत् गंधं चंदनताम्बूलं दद्यात्तस्यै सदा बुधः मासमेकं नुतो भक्त्या पूजयेत्साधकोत्त
मः मासांते दिवसं प्राप्य कुर्य्याद्वै पूजनं महत् अर्द्धरात्रौ भयं दत्वा किंचित्साधकसत्तमे सुदृढं साधकं ज्ञात्वा याति सा
धकालयं विद्याभिः सकलाभिश्च किंचित्स्मेरमुखी ततः वरं वरय शीघ्रं त्वं यत्ते मनसि वर्त्तते गच्छ त्वां साधकश्रेष्ठो भावयन्नमन
साधिया मातरं भगिनीं वापि भार्य्यां वा प्रीतिभावतः कृत्वा संतोषयेद्दूत्या नटिनी तत्करोत्यलं माता स्याद्यदि सा देवी पुत्रवत्
पालितं मुदा स्वर्लोकशतं सिद्धिद्रव्यं ददाति सा दिने दिने भगिनी यदि सा कन्या देवस्य नागकन्यकां राजकन्यां समानीय ददाति
सा दिने दिने अतीतानागतवार्त्तां च सर्वं जानाति साधकः भार्य्या स्याद्यदि सा देवी ददाति विपुलं धनं अन्नाद्यैरुपहारैश्च

तं०सा० ददातिकाममोजनं स्वर्णशतंसदातस्मैसाददातिध्रुवंप्रिये यद्यद्वांछितंसर्वंददातिनात्रसंशयः १ महाविद्यांप्रवक्ष्यामिसा
१८८ वधानावधारयाकुंकुमेनसमालिख्यभूर्जपत्रेस्त्रियंमुदा ततोऽष्टदलमालिख्यकुर्यान्मामादिकंप्रिये जीवन्यासंततः
कृत्वाध्यायेत्तत्रप्रसन्नधीः शुद्धस्फटिकसंकाशांनानारत्नविभूषितां मंजीरहारकेयूररत्नकुंडलमंडितां एवंध्या
त्वाजपेन्मंत्रंसहस्रंचदिनेदिने प्रतिपदिसमारभ्यपूजयेत्कुसुमादिभिः धूपदीपविधानैश्चत्रिसंध्यंप्रजपेन्मुदा
शर्करीमाप्राप्यगंधाद्यैः पूजयेत्साधकोनरः घृतदीपंततोधूपंनैवेद्यंचमनोहरं रात्रौचदिवसेजापंकुर्यात्त्वसुसमाहि
तः प्रभातसमयेयातिसाधकस्यांतिकंमुदा प्रसन्नवदनाभूत्वातोषयेइतिभोजनैः देवदानवगंधर्वविद्याधरयक्षला
लसां कन्याभीरत्नभूषाभिःसाधकेंद्रंमुहुर्मुहुः चर्व्यचोष्यादिकंद्रव्यंनित्यंददातिसाध्रुवं स्वर्गमर्त्येचपातालेयद्वस्तुवि
द्यतेप्रिये आनीयदीयतेसापिसाधकायानुरूपतः स्वर्णशतंसदातस्मैददातिसादिनेदिनेसाधकायवरंदत्त्वायातिसानिज
मंदिरं तस्यावरप्रसादेनचिरंजीवीनिरामयः सर्वज्ञःसुंदरःश्रीमान्सर्वज्ञोभवतिध्रुवं रेमेसार्द्धंतयादेविसाधकेंद्रोदि राम
नेदिने नारमायातयागच्छानुरागिणीत्रिमे[illegible]प्रिये वक्ष्ये भार्यामनुप्रोक्तः सर्वसिद्धिप्रदायकं एषामधुमतीनुस्यात्सर्व १८८

सिद्धिप्रदा प्रिये गुह्याद्गुह्यतरा विधानवस्त्विह न्यायकीर्त्तिता ८ देव्युवाच श्रुतं च साधनं सर्व्वं योगिनीनां सुखप्रदं कस्मिन्काले प्र
कर्त्तव्यं विधिना केन वा प्रभो अत्राधिकारिणः के वा समासेन वदस्व मे ईश्वर उवाच वसंते साधयेद्धीमान् हविष्याशी जितेंद्रियः स
दा ध्यानपरो भूत्वा तद्दर्शनमहोत्सवः उज्जयिं प्रांतरे वापि कामरूपे विशेषतः स्थाने ह्येकतमे प्राप्य साधयेत् सुसमाहितः अनेन वि
धिना साक्षाद् भवत्येव न संशयः देव्याश्रमे वर्णाः सर्व्वे परं चात्राधिकारिणः तारकब्रह्मणो भक्त्या विनाप्यत्राधिकारिणः इति योगिनीसा
धनं अथ पूजाधारो निरूप्यते आपोऽग्निर्हृदयं विष्णोर्ब्रह्मकं हंसमुद्भवं यंत्रं च प्रतिमास्थानमर्च्चने सर्व्वदा हरेः इति गौतमीये
शालग्रामे मणौ यंत्रे प्रतिमामंडलेषु वा नित्यपूजा हरेः कार्य्या न तु केवलभूतले शालग्रामशिलास्पर्शात् कोटिजन्माघनाशनं
किं पुनरर्च्चनं तत्र हरिसान्निध्यकारणं बहुभिर्जन्मभिः पुण्यैर्यदि लभ्यां शिलां लभेत् गोष्पदे न तु चिह्नेन तेन न प्राप्यते जन्तुः एते
न विष्णुपूजायां शिलायाअपि प्राधान्यं मंडलादीनां तु सर्व्वसाधारणत्वात् योगिनीतंत्रे लिंगस्थां पूजयेद्देवीं पुस्तकस्थां तथैव
च मंडलस्थां महादेवीं यंत्रस्थां प्रतिमासु च जलस्थां च शिलास्थां वा पूजयेद्देवीं पुस्तकस्थां तथैव च मंडलस्थां महादेवीं यंत्रस्थां
प्रतिमासु च जलस्थां च शिलास्थां वा पूजयेत् परमेश्वरीं एतत्सर्व्वयंत्राभावे कौलावलीये यत्रापराजितापुष्पं जवापुष्पं च

तं०सा०
१८९

विद्यते करवीरेस्मुल्करक्ते ड्रोणंवायदि विद्यते तत्रदेवीवसेन्नित्यं तद्यंत्रेचंडिकार्च्चनं तथायंत्रमंत्रमयं प्रोक्तंमंत्रात्मादेवतेतिच
देहात्मनोर्यथाभेदो मंत्रदेवतयोस्तथा तथाऽऽदौ लिखेद्यंत्रं देवतायाश्च विग्रहं इतिकामक्रोधादिदोषोत्थसर्वदुःखनियंत्रणात्
यंत्रमित्याहुरेतस्मिन्देवः प्रीणातिपूजितः विनायंत्रेण पूजायादेवतानप्रसीदति दुःखनियंत्रणाद्यंत्रमित्याहुस्तंत्रवेदिनः
इतियंत्रेपूजायाः प्राधान्यं अथयंत्रसंस्कारः वामकेश्वरतंत्रे भैरव्युवाच चक्रमेदं महादेवं त्वत्प्रसादान्मयाश्रुतं इदानीं
श्रोतुमिच्छामिप्रतिष्ठाकर्मनिर्णयं श्रीशंकरउवाच शृणुदेविमहाभागे जगत्कारिणिकौलिनि तस्योद्यापनविकर्म्मगं
सर्वंवर्णविनिर्णयं स्नात्वासंकल्पयेन्मंत्रीगुरोरर्चनमाचरेत् पंचगव्यंततः कृत्वाशिवमंत्रेणमंत्रितं तत्रचक्रंविनिःक्षिपेन्मंत्रीप्र
णवेनसमाकुलं तदुद्धृत्यततश्चक्रंस्थापयेत्स्वर्णपात्रके पंचामृतेनदुग्धेनशीतलेनजलेनच चंदनेनसुगंधेनकस्तूरीकुंकु
मेनच पयोदधिघृतक्षौद्रशर्कराद्यैरनुक्रमात् तोयधूपांतरैःकुर्य्यात्पंचामृतविधिंपुनः हाटकैः कलशैर्देवीमष्टभिर्वारिपूरकैः
कषायजलसंपूर्णैः कारयेत्स्नानमुत्तमं स्नानंसमाप्यतांदेवींस्थापयेत्स्वर्णपात्रके स्पृष्ट्वायंत्रंकुशाग्रेणगायत्र्याचाभिमंत्र याम
येत् अथवात्रस्मातं देविदेवताभावसिद्धये आ[illegible]मुद्रिंततः कृत्वाषडंगैर्यजनंचरेत् तत्रावाह्यमहादेवींजीवन्यासंचकारयेत् १८९

उपचारैः षोडशभिर्म्महामुद्रादिभिः सदा फलपुष्पमूलनैवेद्यैर्द्दीपैस्तत्र समर्चयेत् पट्टसूत्रादिकं दद्याद्वस्त्रालंकारमेव च मुकुरंचा
मरंघंटांच यथायोग्यं महेश्वरि सर्व्वमेतन्प्रयत्नेन दद्याद्दात्महितेरतः ततो जपेत्सहस्रंच सकलेप्सितसिद्धये बलिदानं ततः कुर्यात्
प्रणमेच्च त्रिकालकं अष्टोत्तरशतं कृत्वा संपुटं जपं विनिःक्षिपेत् होमकर्म्मण्यशक्तश्चेद्द्विगुणं जपमाचरेत् धेनुमेकां समानीय स्व
र्णशृंगां सवत्सकां गुरवे दक्षिणां दद्यात्ततो देव्या विसर्ज्जनं प्रयोगः कृतान्हिकः स्वस्तिवाचयित्वा संकल्पः ॐ अद्येत्याद्यमुकगो
त्रोऽमुकदेवशर्म्माऽमुकदेवतायाः पूजार्थममुकयंत्रसंस्कारमहं करिष्य इति संकल्प्य पंचगव्यमानीय होममिति मंत्रेणाष्टोत्तरशतमभि
मंत्र्य प्रणवेन यंत्रं निःक्षिपेत् तस्मादुत्तोल्य देवपात्रांतरे स्थापयेत् ततः शीतजलकुंकुमकस्तूरीभिः स्नापयित्वा धूपं दद्यात् एवं दध्ना
एवं घृतेन मधुना शर्करया च ततोऽष्टभिः कलशैः स्नापयेत् कुंकुमरोचनाचंदनमिश्रितैस्तोयैः स्नापयेत् सर्वत्र स्नानं तु मूलमंत्रेण
ततो यंत्रमुत्तोल्य कुशाग्रेण यंत्रं स्पृष्ट्वा ॐ यंत्रराजाय विद्महे महायंत्राय धीमहि तन्नो यंत्रं प्रचोदयात् इत्यष्टोत्तरशतमभिमंत्र्य
प्राणप्रतिष्ठां कुर्यात् अस्य प्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुः सामानि छंदांसि चैतन्यं देवता प्राणप्रति
ष्ठायां विनियोगः आं ह्रीं क्रों यं रं लं वं शं षं सं हों हंसः अमुकदेवतायाः प्राणा इह प्राणाः एवं आं १ अमुकदेवताया जीव इह स्थितः

तं०सा० ओं ११ अमुकदेवतायाः सर्वेन्द्रियाणि ओं ११ अमुकदेवताया वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठ
१९० न्तु स्वाहा इति प्राणान् प्रतिष्ठाप्य अमुकदेवतामावाह्य षोडशोपचारादिना संपूज्य षडङ्गेन पूजयेत् ततः पट्टसूत्रादिकं
दत्वाष्टोत्तरसहस्रं जपेत् शक्तश्चेद् बलिं दद्यात् ततोऽष्टोत्तरशतहोमं कृत्वा प्रत्याहुतिसंपातं दद्यात् होमासामर्थ्ये द्वि
गुणो जपः कार्य्यः ततो दक्षिणां द्विजाय धारणं कुर्य्यादिति यंत्रसंस्कारः ॥ इति श्रीमहामहोपाध्यायकृष्णानंदवा
गीशभट्टाचार्य्यविरचिते तंत्रसारे द्वितीयः परिच्छेदः ॥ यमाहुरेकं पुरुषं पुराणं ब्रह्मेति यं वेदविदो वदन्ति विष्णुं विरि
ञ्चिं गिरिशं तथान्ये गोविन्दमाद्यं तमहं भजामि ॥ अथ पूजायां विहितनिषिद्धानि तत्रादौ दिग्विधानं विष्णुविषये नारदी
ये शुक्लाम्बरधरः स्नात आचान्तः पूर्वदिङ्मुखः शुद्धासनं समास्थाय भूतोत्सारणमाचरेत् अन्यत्र तु निबंधे उपविश्या
सने मंत्री प्राङ्मुखो वाप्युदङ्मुखः बद्धपद्मासनो मंत्री समाहितो जितेन्द्रियः सारसमुच्चये प्रागाननो यजेदुदग्वदनोऽथवेति
रात्रौ पूजायां नायं नियमः तथा च स्मृतिः रात्रावुदङ्मुखः कुर्य्याद्देवकार्य्यं सदैव हि शिवार्चने सदाप्येवं शुचिः कुर्य्यादुद
ङ्मुखः मंत्रतंत्रप्रकाशे लिंगद्वयं तथा नार्च्येत् शालग्रामद्वयमेव च शक्तित्रयं तथा सूर्य्यद्वयमेकत्र नार्चयेत् द्वे चक्रे द्वारकाया राम १९०

अथ शालग्रामशिलाद्वयं एतेषामर्च्चनान्नित्यमुद्वेगं प्राप्नुयाग ही लैंगे एकीकृत्य च लिंगानि दशापं च यातानि च प्रत्येकेना
यवादेविविल्वपत्रैः प्रपूजयेत् एवं पाषाणमयं लिंगं मृत्तिकादि विनिर्म्मितां शालग्रामशिलामेकां गृहस्थोपि प्रपूजयेत्
ना हरेतरर्च्चयेद्विष्णुं न तुलस्या गणाधिपं न दूर्वया यजेद्दुर्गां विल्वपत्रैर्दिवाकरं उन्मत्तमर्कपुष्पं च विष्णोर्वर्ज्यं सदा बुधैः
गौतमीयेन रक्तचंदनं जातु गृह्णीयात् रक्तपुष्पकं विल्वपत्रे सितप्रसूनैर्नार्च्चयेद्देवकीसुतं यत्नतस्त्रैव कमले करवीरे हि २८
तुलस्यो जातिकेतकी नागकेशर पाटली कल्हारं चंपकोत्पले नंद्यावर्त्तं च यूथी च मल्लिकां नवमल्लिकां कुंदमंदारके
चैव सौगंधिकं च केशरं कुरंटकाशोकसर्ज्जविल्वार्ज्जुनमुनिपुष्पकं पत्रं चामलकं भृंगकर्णिकारं पलाशकं एतान्यन्या
नि पुष्पाणि प्रियपाणिः समर्पयेत् इति यच्छिल्वविधानं तच्छिन्नपुष्पाभावे तत्रांतरे देवीनामर्कमंदारमादिभेनगरे
तथा गणेशाय च सूर्याय रक्तपुष्पमतिप्रियं शिवे कुंदमदंती च यूथीबंधूककेतके ज्वाराक्रांतिसंध्ये मालतीके
तकीं तथा घुस्रणं कुमुदं रक्तं हयारिं वर्ज्जयेत्सदा तथा च उग्रगंधं च मल्लिके शादिदूषितं वासोभिः संभृतैर्नीतं प्रतिमा
न्नार्च्चयेत् शिवे शिव इत्युपलक्षणं तथा च कलिकाभिन्नयाप्याद्यं विवाचंपकपत्रकैः तथा च भृष्टैः स्वनार्चयेद्धि

तं०सा०
१९१
191

पुष्पैः पत्रैः फलैरपि स्नात्वा नीतैः पर्युषितैर्याचितैः न कृष्णवर्णकैः स्वयं विकसितैः पद्मैः स्वयं पतितं भुवि वर्जयेद् हस्तीपुष्पम्
गंधं च विशेषतः स्वयं विकसितैरिति स्वयं पुरुषेण विकासितैरित्यर्थः त्रिपत्रान्न्यूनं कुसुमैर्नार्चयेत् तु कदाचन भूगतं चांग
संस्पृष्टं केशकीटादिदूषितं कुमुदं पाटलिं चैव शिरीषं परिवर्जयेत् पाटलं वनपाटलं भूगतं वर्जयेत् पुष्पं शेफा
लीं वकुलं विना न तथा विल्वस्य खदिरस्यैव तथा धात्रीदलस्य च तमालस्य च पत्रस्य छिन्नभिन्ने न दुष्यति गौतमीये मलि
नं भस्मि संस्पृष्टं कृमिकेशादिभूषितं पर्युषितानि च पुष्पाणि वर्जयेद् देवतार्चने तिष्ठदिनत्रयं भुक्तं पद्मामामलकं तथा
तुलसी सर्वदा शुद्धा तथा विल्वदलानि च योगिनीतंत्रे तुलसीं च तमंदारेकह्लारे च तमालके नार्चयेत् महाल्लक्ष्मीं कु
शकाशोद्भवेन च विष्णुक्रांतार्जवानागकेशरं नागवल्लभं वंधुकं चैव मंदारं सर्वं तेन समर्चयेत् न स्पृशेद् हंत वर्जं च भू
गतं च न संस्पृशेत् शेफाली वकुले भद्रे भूगते व समर्चयेत् मालूरं भगनंदेयं तस्य कापस्य वंदनं विल्वस्य मुकुलं वर्ज्यं कदल्याः
पत्रकं तथा विल्वपत्रं च माध्यं च तमालामलकीदलं कह्लारं तुलसी चैव पद्मं च मुनिपुष्पकं एतत् पर्युषितं नस्यात् घस्रो ग्राम
न्यत्र कलिकात्मकं नीरयस्य च विल्वस्य तुलसीदलमेव च न दुष्येच्छिन्नभिन्नं च जातीपुष्पं च शंकरि देवीमधिलक्ष्मतत्रैव १९१

नार्च्चयेत्रिं दिपुष्पेण पीतेन तगरेण च श्वेतोद्भेन्नावल्लस्वेन वर्ज्जयेत पूजनं तथा। त्रिपुराभ्यर्चितु त्यवारा ह्रीयेपल्ला शकाशकुसु
मैर्नार्च्चयेद्दूरतस्त्यजेत् धात्रीतमालजैः पत्रैः स्तुलसी द्वितयेस्तथा पूजनात्पातकी चस्याल्लग्नेस्माधिश्रियं हरेत् तथा त्रिपुरासौ
रसमुच्चये त्रिपुरापूजने वर्ज्या तुलसी सर्व्वदा बुधैः तुलसीगंधमात्रेण क्रुधा भवति सुंदरी कुलावलीयेरन्नमाल्यं स्वेतदूर्वांनी
लकः वकुरंटकं नदघास्त्रमहादेव्यैयदीद्वेद्धेयमात्मनः तथा चन हृत्रविधादो मन्नमस्सरूते पुष्पं श्वेरंकोकनदं वंधूकं शत
पत्रकं वर्व्वराद्वितयं चैव कर्णिकारद्वयं तथा वकमंदारचूतानि करवीरालिशस्यते मल्लिकाद्वितयं जाती होमपुष्पं जयंतकां वि
ल्वपत्रं कुरुवकं मुनिपुष्पं च केशरं वासंती द्वितयं चैव काशपुष्पं० मरूवकं दमनं चलवंगं च यूथी शेफालिका तथा सुगंधिभि
स्तथैरन्यैः कुसुमैरर्च्चयेद्दलैः विल्वैर्म्मरूवकाद्यैश्च तुलसीदलवर्जितैः यत्नु तुलसीवर्जितापूजा न जातु विफला भवेत्
नियमस्तु न तत्रिपुरादौ तथा भैरवी सुंदरीकालीव्रत्तेविधुविवस्वतां तुलसीवर्जिता पूजा न जातु विफला भवेत् अविफ
ला भवेदित्यर्थः तेन भैरव्यादिपूजायां तुलसीसदेवर्ज्या शर्वव्रचनात् इतरायां तु पूजायां तदसत्वेस्त्वेवा न कश्चिद्दिशे
षः ना हृतेरच्चेयद्धि स्तुमितिपुष्पाभावे इति देशप्राप्तस्यतं दुलस्यनिषेधपरं तथा च पुष्पाभावे जलेनापि दूर्वयांतं दुलेन च

तं०सा० नित्यपूजा हरेः कार्य्या भक्तिभावेन सुंदरि नलकर्णादिनिषेधपरं तथा च गंधपुष्पाक्षतयवकुशाग्रश्वेतसर्षपैः सदूर्वैः सर्वदेवाना
१९२ मेतदर्घ्यं प्रकीर्त्तितं इत्येवं चदूर्वयापार्वतीमित्यपि तथा वराहवभट्टः सदूर्वैः पुष्पैः सदा पूजा विहिताविहितैरपि कर्त्तव्या सर्वदेवानां
भक्तियोगोऽत्र कारणं तंत्रयाच तंत्रांतरे देवीपूजा सदा कार्य्या जलजैः स्थलजैरपि विहिताविहितैर्वापि भक्तियुक्तेन चेतसा इदं तु वि
हिताभावोऽस्यं तमशक्तविषयं तथा च कालीतंत्रे अपामार्गैर्भृंगराजैस्तुलसीवर्ज्जितैः शुभैः चामुंडातंत्रे धत्तूराशोकवकुल
श्वेतलक्ष्मापराजिता इत्यादिपुष्पनियमो बोध्यः अथ सेतुं विना जपस्य व्यर्थत्वात् तन्निरूप्यते कालिकापुराणे शास्त्रा
णां प्रणवः सेतुर्मन्त्रेनु प्रणवः स्मृतः स्रवत्यनोंकृतः सर्वः परस्ताच्च विशीर्य्यति निःसेतुं सलिलं यद्वत् क्षणान्निम्नं प्रस
र्पति मंत्रस्तथैव निःसेतुः क्षणात् क्षरयति यज्वनां चतुर्दशस्वरो योऽसौ सेतुरौकारसंज्ञकः सवानुस्वारनादाभ्यां शूद्रा
णां सेतुरुच्यते ॥ अथ पूजायां पंचशुद्धिः तदुक्तं कुलार्णवे आत्मस्थानमंत्रद्रव्यदेवशुद्धिस्तु पंचमी यावन्न कुरुते
देवि तस्य देवार्चनं कुतः पंचशुद्धिं विना पूजा अभिचाराय कल्पते सुस्नाने भूतशुद्ध्यैश्च प्राणायामादिभिः प्रिये षडंगा राम
द्यखिलन्यासैरात्मशुद्धिरितीरिता संमार्जनानुलेपाद्यैर्दर्पणोदरसन्निभं वितानधूपदीपादिपुष्पमाल्यादिशोभि १९२

ते पंचवर्णरजोभिश्च स्थानशुद्धिरितीरिता ग्रथिता मातृकावर्णैर्मूलमंत्राक्षरालिच क्रमोत् क्रमात् द्विरावृत्ता मंत्रशुद्धिरी
तिरिता: पूजाद्रव्याणि मूलास्त्रैः प्रोक्षणीयैर्विशेषत: दर्शयेद्धेनुमुद्रादिद्रव्यशुद्धिरितीरिता। पीठे देवीं प्रतिष्ठाप्य सकली
कृत्य मंत्रवित् मूलमंत्रेण दीपिन्या मालत्यादीनुदकेन च त्रिवारं प्रोक्षयेद्विद्वान् देवशुद्धिरितीरिता पंचशुद्धिं विधायेत्थं
पश्चाद्यजनमाचरेत् अथ मंत्रसिद्धेरुपाया: यो न सम्यगनुष्ठितो मंत्रो यदि सिद्धिर्न जायते पुनस्तेनैव कर्त्तव्यं त
त: सिद्धो भवेद्ध्रुवं पुनरप्यनुष्ठितो मंत्रो यदि सिद्धिर्न जायते पुनस्तेनैव कर्त्तव्यं तत: सिद्धो न संशय: पुन: सोऽनुष्ठितो
मंत्रो यदि सिद्धिर्न जायते उपायास्तत्र कर्त्तव्या: सप्त शंकरभाषिता: भ्रामणं रोधनं वश्यं पीडनं पोषशोषणे दहनांतं
क्रमात् कुर्यात् तत: सिद्धो भवेद्ध्रुवं भ्रामणं वायुबीजेन ग्रथनं क्रमयोगत: तन्मंत्रयंत्रमालिख्य सिह्लकर्पूरकुंकुमै:।
उशीरचंदनाभ्यां तु मंत्रं संग्रथितं लिखेत् क्षीराज्यमधुतोयानां मध्ये तल्लिखितं क्षिपेत् पूजनाज्जपनाद्धोमात् भ्रामित:
सिद्धिदो भवेत् भ्रमितो यदि नासिद्ध्येद्रोधनं तस्य कारयेत् सारस्वतेन बीजेन संपुटीकृत्य संजपेत् एवं रुद्धो भवेत् सिद्धो
न चेदनद्वशीकुरु अलक्तं चंदनं कुष्ठं हरिद्रां मदनं शिलां एतैस्तु मंत्रमालिख्य भूर्जपत्रे सुशोभने धार्यं कंठे भवेत् सिद्ध:

पीडनं वास्य कारयेत् अघोरोत्तरयोगेन पदानि परिजप्य वै ध्याये द्देवतां तद्वदघोरोत्तररूपिणीं विद्यामादित्यदुग्धेन लिखि
त्वा क्रमपञ्चांशिणा तथाभूतेन मंत्रेण होमं कार्य्यं दिने दिने पीडितो लज्जयाविष्टः सिद्धिस्याद्यपोषयेत् बालाया स्त्रितयं
बीजमाद्यं तेन तस्य पोजयेत् गोक्षीरमधुना लिख्य विद्यां पाणौ विधारयेत् पोषितो यं भवेत् सिद्धो न चेत्कुर्य्यात् शोषणं द्वाभ्यां
चवा पुर्वीताभ्यां मंत्रं कुर्य्याद्विदर्भितं एवां विद्यां गले धार्य्यां लिखित्वा वरभस्मना शोषितो न च सिद्धः स्य द्दहनीयोग्निबीज
तः आग्नेयेन तु बीजेन मंत्रस्यैकैकमक्षरं आद्यंतमधऊं क्षं चपो जये द्दाहकर्म्मणि व्रह्म वृहस्पते लेन मंत्रमालिख्य धार
येत् कंठदेशेन ततो मंत्रः सिद्धिःस्यात् शंकरोदितं इत्येतत् कथितं सम्यक् केवलं नव भक्तितः एकेनैव द्रुतार्थीः स्याद्
ऊँ भिः किमुसद्व्रते अथान्यत् संप्रवक्ष्यामि मंत्रसिद्धेस्तु कारणं मातृकापुटितं कृत्वा स्वस्वमंत्रं जपेत्सुधीः क्रमोत्क्र
मात्कृतावस्मात् दंते केवलं मनुं एवं तु प्रत्यहं कुर्यात् यावल्लक्षं समाप्यते निश्चितं मंत्रसिद्धिःस्यादित्युक्तं तंत्रवदिभिः अ
थ मंत्रसिद्धिलक्षणं मनोरथानाम क्लेशसिद्धिरुत्तमलक्षणं मृत्यूनां हरणं तद्वद्देवतादर्शनं तथा प्रयोगाणाम क्लेशसि
द्धिः सिद्धस्तु लक्षणं परं परकायप्रवेशं च पुरप्रवेशनं तथा ऊर्ध्वोत्क्रमणमेवं हि चराचरपुरे गतिः खेचरीमेलकं चैव राम

प्र

ततकथाश्रवणादिकं मूर्छितिङ्गालिंपरूपे ततद्रुतमस्य लक्षणं ख्यातिर्भूषणवाहादिलाभः सुचिरजीवनं नृपाणांतद्
णानांच वशीकरणमुत्तमं सर्वत्रसर्वलोकेषुचमत्कारकरंसुधीः रोगापहरणंदष्ट्रा विषापहरणंतथा पाण्डित्यंलभ
तेमंत्रीचन्द्रचिंधिमय ततः वैराग्यंचमुमुक्षुत्वंस्याजिता सर्ववश्यता अष्टांगयोगाभ्यसनंभोगेच्छापरिवर्जनं सर्वभूतेष्वनुकं
पासर्वज्ञादिगुणोदयः इत्यादिगुणसंपत्तिमध्यासिद्धस्तुलक्षणं ख्यातिर्भूषणवाहादिलाभःसुचिरजीवनं नृपाणां तद्
गणानां चवात्सल्यंलोकवश्यता महैश्वर्यंधनित्वंचपुत्रदारादिसंपदः अधमासिद्धरूपः प्रोक्तोमंत्रिणां प्रथमभूमिका सिद्ध
मंत्रानुपः साक्षात्सशिवोनात्रसंशयः अथमंत्राणांदोषशांतिः तद्यंत्रंछिन्नहत्वादिदुष्टायमंत्रास्तेत्रेतत्रेनिरूपिता
तेसर्वेसिद्धिमाप्नोति मातृकाले प्रभावतः मातृकीलैपुरीकृत्यमंत्रविद्यांविशेषतः शतमष्टोत्तरंश्रवेप्रजपेत्फलसिद्धये
तद्वदं मंत्रोमहाविद्यायथोक्तफलदाभवेत् मातृकापुटितंकत्वामध्ये वर्णंविधायच मंत्रवर्णांततःकुर्यात्सोधनंतंत्रसस्मात्
वध्वानुयोनिमुद्रांतांसंकोच्याधारयंकजं तद्गुत्पन्नान्मंत्रवर्णान्कुर्वतग्रगतागतान् ब्रह्मरंध्रावधिध्यात्वावायुमापू
र्यकुंभयेत् सहस्रंप्रजपेन्मंत्रंमंत्रदोषोपशांतये तथाएषुदोषेषुसंप्राप्तेमायांकमममध्यापिवा दिप्ताचादौश्रियंचेवन्तहू

ने० सा० १९४ षणामुक्तये तथा तारसंपुटितो वापि दुष्टमंत्रोपि सिद्ध्यति यस्य यत्र भवेद्भक्तिः सोपि मंत्रस्य सिद्ध्यति तथा प्रणवो मातृका
१९४ देवी हृल्लेखेत्यमृतत्रयं अमृतत्रयसंयोगात् दुष्टमंत्रोपि सिद्ध्यति अथ होमार्थं कुंडादिनिर्णयः तत्र गृहनियमः प्रथमं भू
मिनिर्णयः गोतमीये भूमेः परिग्रहं कुर्यात् यावदायतनं भवेत् शुक्लरसच्छन्नानुया भूमिर्ब्राह्मी सा परिकीर्तिता क्षत्रिया रक्तम
द्भूमिर्हरिद्रूपा प्रकीर्तिता कृष्णा भूमिर्भवेच्छूद्रा चतुर्धा भूः प्रकीर्तिता ब्राह्मी सर्वार्थसिद्धिः स्यात् क्षत्रिया राज्यदा मता ध
न धान्यकरी वैश्या शूद्रा तु निंदिता भवेत् तत्र ग्रहनिर्णयः गलेशग्विमर्षिणां वा स्वेन संगृह्य स्थंडिलस्यां ऐशान्यामुत्तरे वाथ
वा दिशि संकल्पयेन्मंत्री मंडपं च विभागतः नवहस्तप्रमाणं वा सप्तहस्तमथापि वा पंचहस्तप्रमाणं वा चतुरस्रं समंततः पंच
हस्तं तु एककुंडपक्षे तदुक्तं तत्र एककुंडमतेनान्यत् पंचहस्तं गृहं भवेत् तदेककुंडं गृहस्योत्तरभागे प्रशस्तं यथा अथोत्त
रेण वा कुंडं एकं वेदास्त्रमुद्धरेत् लक्षहोमं तु ततः कुर्यात् गृहमध्ये न दूषणं वा शिवे वाप्यथो ईशानभागे तु मंडपं रचयेत् सु
धी षड्भिर्वाष्टभिर्वा हस्तैः षोडशैर्वा समंततः चतुर्द्वारसमायुक्तं तोरणाद्यैरलंकृतं तद्विभागमते कुंडे रत्निमात्रः
समुन्नतां चतुरस्रां ततो वेदिं मंडपाय प्रकल्पयेत् अथ प्रसंगान्नवकुंडानि तत्र शारदायां प्राक्प्राक्क्रमे मंडपे विधान १९४

वेदिकाया बहिस्त्रिधा क्षेत्रं विभज्य मध्येंऽशे पूर्वादि परिकल्पयेत् अथ वक्ष्याम्याशासु कुंडानि रम्याकाराण्यनुक्रमात् चतुरस्त्रं यो
निमर्द्धचंद्रं त्र्यस्त्रं खुवर्त्तुलं षडस्त्रं पंकजाकारमष्टास्त्रं निनामतः आचार्य्य कुंडं मध्ये स्यात् गौरीपतिमहेंद्रयोः हस्तमात्रमि
तां भूमिं सूर्द्धवत् परिसूत्रयेत् समंतात् कुंडमेतत् स्यात् चतुरस्त्रं शुभावहं चतुरस्त्रीकृतां क्षेत्रं पंचधा विभजेत् सुधीः न्यसेत्
पुरस्तादेकांशं कोणे सार्द्धं प्रमाणतः भ्रामयेत् कोणमानेन तथान्यमपि सूत्रवित् सूत्रयुग्मं ततो दद्यात् कुंडं योनिनिभं भवेत्
चतुरस्त्रीकृतं क्षेत्रं द्विधा विभजेत् सुधीः एकमेकं त्यजेदंशा मध्य ऊर्द्ध्वं तं त्रवित् न्यासं सूत्रं पातयेदंशमानेन भ्रामयेत् ततः अर्द्धचं
द्रनिभं कुंडं रमणीयमिदं भवेत् अग्रे संमुखे प्रतिशर धन्वाकारमिति मध्यारभ्यात् न्यासं सूत्रं पातयेद् द्वयोः शरखाङ्कनयोः यतः
चतुर्धा भेदिते क्षेत्रे न्यसेद् द्वयं पार्श्वयोः एकैकमंशं तन्मानाद् अग्रतो लांछयेत् ततः सूत्रयुग्मं बुधः कुर्यात् त्र्यस्त्रं कुंडमुदाहृतं
अष्टादशांशे क्षेत्रे द्वाभ्यसेदेकं वहिर्बुधः भ्रामयेत्तेन मानेन वृत्तं कुंडमुदाहृतं अष्टधा विभजेत् क्षेत्रं मध्यसूत्रस्य पार्श्वयोः
भागं न्यसेदेकमेकं मानेनानेन मध्यतः कुर्यात् पार्श्वद्वये मत्स्यचतुष्कं तंत्रवित्तमः सूत्रषट्कं ततो दद्यात् षडस्त्रं कुंडमुत्तमं
चतुरस्त्रीकृतं क्षेत्रं विभज्याष्टादशांशतः एकं भागं वहिर्न्यस्य भ्रामयेत्तेन वर्त्तुलं वृत्तानि कर्णिकादीनां वहिस्त्रीणि प्रकल्पये

तं० सा० १९५

195

त्. पद्मकुंडमिदं प्रोक्तं विलोकनमनोहरं वहिरित्यव्ययस्यानेकार्थत्वाद्वहिःशब्दो मध्यवाचकः इति गुरवः कर्णिकादीनां व
तान्निवहिर्वहिःकुर्यादिति भट्टः अन्यथामानाधिक्यापत्तेः तथा च भट्टः चतुरस्रेऽष्टधा भक्ते कुर्याद्वृत्तचतुष्टयं कर्णिकाकेस
रयोर्द्वे तृतीये पत्रकल्पना तदग्राणि चतुर्थे स्युः एतान्येवं प्रकल्पयेत् पूर्वोक्तं विभजेत् क्षेत्रं चतुर्विंशतिभागतः एकं भाग
वहिस्तस्य चतुरस्रं प्रकल्पयेत् अंतस्थचतुरस्रस्य कोणार्धप्रमाणतः वाह्यस्य चतुरस्रस्य कोणाभ्यां परिलांछये
त् दिशं प्रति यथा न्यायमष्टौ सूत्राणि पातयेत् अष्टास्रं कुंडमेतद्धि तंत्रविद्भिरुदाहृतं कुंडानां यादृशं रूपं मेखला
नां तु तादृशं एवं प्रोक्तानि कुंडानि कथ्यते स्रुक्स्रुवौ ततः प्रकल्पयेत् स्रुचं याज्ञवल्क्यमातेन वर्त्मना श्रीपर्णीशिंशपाक्षी
रशाखिविकंकतमं गुरु गृहीत्वा विभजेद्धस्तमात्रं षड्विंशता पुनः हस्तमात्रं वाङ्कमात्रं तथा चागमोक्तेषु वं वाङ्क प्रमा
णेन होमार्थं विदधीत वै विंशत्यंशे भवेद्दंडो वेदिस्तैरष्टभिर्भवेत् एकांशेन मितं कंठः सप्तभागमितं मुखं वेदीत्र्यंशे
न विस्तारः कंठस्य परिकीर्तितः मुखं कंठसमानं स्यान्मुखे मार्गं प्रकल्पयेत् कनिष्ठांगुलिमानेन सर्पिषो निर्गमाय च वे राम
दीमध्ये विधातव्या भागेनैकेन कर्णिका विदधीत वहिस्तस्या एकांशेनामितावटं तस्य खातं त्रिभिर्भागैर्वृत्तमर्धांशतो वहिः १९५

अंशेनैकेन परितो दलानि परिकल्पयेत् मेखलामुखवेद्योः स्यात् सरितोऽर्धशमानतः कुंडमेखलाग्रयोः कुंभौ गुण
वेदांगुलैः क्रमात् गंडीयुगं समाश्राः स्यात् कुंडस्यानाह ईरितः षड्विंशेशः पृष्ठभागे वेद्याः कूर्मा [illegible] त्रिर्भवेत् हंसस्यवा
ह [illegible] त्रिलोचनामुखं लिखेत् मुखस्य पृष्ठभागे स्याः संप्रोक्तं लक्षणं श्रुच श्रुव चतुर्विंशतिभिर्भागैस्तारचयेद्ड्रु
वं द्वाविंशत्पादं दंडमानमंशैर्वेत्तस्य कीर्तितं चतुर्भिरंशैरानाहः कर्षाधर्याहितमाद्विवः अंशद्वयेन निखनेत्तत्पंके मृगमदा
लक्तिः कुंडमेखलाग्रयोः गंडी भवेत् कंकणे च तथा च गंडी कंकनकुंभयोरिति भागुरिः एतयोरभावे वा शिष्टे पलाशपत्रे नि
क्षिप्य रचिरं स्रुक्स्रुवौ तथा विदध्याद्वा [illegible] पत्रे संहि लेहोमकर्मणि कुंडफलानि सर्वसिद्धिकरं पुंसां चतुरस्रमुदाहृतं
पुत्रप्रदं योनिकुंडमर्धचंद्रं शुभप्रदं शत्रुक्षयं त्र्यस्रं वर्तुलं शांतिकर्मणि छेदमारणयोः कुंडं षडस्रं पद्मसन्निभं व
वृद्धिदं रोगसमनं कुंडमष्टास्रमीरितं तथा विप्राणां चतुरस्रं स्याद्राज्ञां वर्तुलमिष्यते वैश्यानामर्धचंद्रं शूद्राणां त्र्यस्र
मीरितं चतुरस्रं तु सर्वेषां केचिदिच्छंति सत्तमा चतुरस्रमहेशानि सर्वकर्माणि साधयेत् तथा सर्वाधिकारिकं कुंडं सर्व
दं चतुरस्रकमिति गृहादिकरणे हस्तनियमो यथा गौतमीये रथादिदोलिकां चैव पोतं सकलमेव च मात्रांगुलेन कर्तव्यं मा

तं०सा० १९६ 196

न्येनापि कदाचन तथा मानक्रियायामुक्तायामनुक्ते मानकर्त्तरि मानं स्याद्यजमानस्यादिहेषामेषनिश्चयः चतुर्विंशत्यं
गुलाद्यं हस्तं तंत्रविदो विदुः कर्त्तुर्दक्षिणहस्तस्य मध्यमांगुलिपर्वणः मध्यस्य दैर्घ्यमानेन मात्रांगुलमुदाहृतं यजमानास्यन्ति
धो नु यवानां तंदुलैरेकमंगुलं चाष्टभिर्भवेत् आदार्य योजितैर्हस्तश्चतुर्विंशतिरंगुलैः वयमोऽनुक्रमे पुनश्चाष्टभिस्तैर्भवेत्
ज्येष्ठमध्यमः सप्तभिर्यवैः कन्यसं षड्भिरुद्दिष्टं अंगुलमुनिसत्तमः सहस्रे खलु होतव्ये कुण्ड्यामिन् कुं तु तत्र द्विहस्तमते करात्म कु
कं तत्र लक्षहोमे चतुःकरं षट्करे वेदलक्षं चाष्टकरे दशलक्षकं दशहस्तं तु कोट्यां वै हस्तसंख्या व्यवस्थिता दशहस्तात्
परं कुण्डं नास्ति होमे महीतले शारदायां कोट्यामष्टकरं स्मृतमिति द्रव्यस्य गुरुत्वेन वोध्यं तथा एकहस्तमितं कुण्डं लक्षहोमे
विधीयते अत्रापि आज्यहोमे लघुदूर्वाकरवीरादिहोमे च वोध्यं तथा मुष्टिमात्रमितं कुण्डं शतार्द्धे च प्रवक्ष्यते शतहोमे रत्नि
मात्रं हस्तमात्रं सहस्रके द्विहस्तमयुते लक्षे चतुर्हस्तमुदाहृतं दशलक्षे च षड्हस्तं कोट्यामष्टकरं स्मृतं एकहस्त[illegible]मितं कुंडं ल
क्षमेकं विधीयते लक्षात् लक्षशकं यावत्तावद्धस्तेन वर्द्धयेत् द्विहस्तादिमानं तु गौतमीये पूर्वपूर्वस्य कुण्डस्य कोणसूत्रं तु यद्भवेत् तम
उत्तरोत्तरकुण्डानां मानं तत्समुदाहृतं तथा कोणसूत्रप्रमाणेन द्विहस्तं कुण्डमुच्यते सर्वकुंडेषु सर्वत्र वर्द्धयेद्विधिनामुना: कु १९६

उकरणो विशेषमाह गोतमीये ततः कुंडं खनेन्मंत्री यथाशास्त्रविधानतः त्यक्त्वा सर्पस्य गात्रं च शिरोदेशं प्रयत्नतः शिरोघा
ते भवेन्मृत्युः पिंडस्य पिंडघातनं पुच्छेषु दुःखसंभूतिः क्रोडे सर्वार्थसाधनं तथा च नागशिरआदिनिर्णयो यथा वास्तुप्रमाणे
ननुगात्रकेन वामेन शेते खलु नित्यकालं त्रिभिस्तु मासैः परिवृत्तभूमौ तं वास्तुनागं प्रवदंति सिद्धाः भाद्रादिके वासवदिक्
शिराः स्यात् मार्गादिकेषु त्रिषु याम्यमूर्द्धा प्रत्यक्शिरा स्यात् खलु फाल्गुणादौ ज्येष्ठादिकौवेरशिराः स नागः यावान्कुंडस्य वि
स्तारः खननं तावदीरितं खाताधिके भवेद्रोगी खातहीने धनक्षयः वक्रकुंडे तु संतापो मरणं छिन्नमेखले मेखलारहिते शोको
ऽभ्यधिके वित्तसंशयः भार्याविनाशकं कुंडं प्रोक्तं योन्या विनाकृतं अपत्यध्वंसनं प्रोक्तं कुंडं यत्कंठवर्जितं सात्त्विकी मेखला
पूर्वा द्वितीया राजसी स्मृता तृतीया तामसी प्रोक्ता मेखलानां तु निर्णयः कुंडानां मेखलास्तिस्रो नुच्छ्रितिमात्रेनुताः क्रमात् उक्ते
धायामतो ज्ञेया ह्येकार्द्धांगुलसंमिताः अस्त्रमात्रकुंडेषु त्रिद्व्येकांगुलात्मिका एकहस्तमिते कुंडे वेदाग्निनयनांगुलाः कुं
डे द्विहस्ते ता ज्ञेया रसवेदगुणांगुलाः चतुर्हस्ते तु ता ज्ञेया वसुतर्कयुगांगुलाः कुंडे रसकरे तास्तु पं[illegible]नुमानकाः
वसुहस्तमिते कुंडे भानुपंक्त्यष्टकांगुलाः ~~कुंडे रसकरे[illegible]~~ दशहस्तमिते कुंडे मनुभानुदशांगुलाः विस्तारोत्सेधतो ज्ञेया मे

तं०सा० खलाः सर्वतोबुधैः होतुरग्रे योनिरासामुपर्य्यश्वत्थपत्रवत् मेखलानां भवेदंतपरितो नेमिरंगुलाः एकहस्तस्य कुंडस्य व
१९६ र्द्धयेत्तां क्रमात्सुधीः दशहस्तांतमन्येषा मर्द्धांगुलवशात्पृथक् एकहस्तस्य एकहस्तांतकस्पना भियो न्यो रेकामनस्कोत्र
त्वात् गौतमीये प्रथममेखलेयो निकुंडोष्ठी होतुरग्रतः कुर्य्यादूर्ज्जोष्ठवतां तु कुंडवितस्त्यर्द्धलक्षणां मुख्यरत्नेकहस्तानां
कुंडानां योनिरीरिता षट्चतुर्द्व्यंगुलायामविस्तारोन्नतिशालिनी एकांगुलं तु योन्यग्रं कुर्य्यादीषदधोमुखं एकैकां
गुलितो योनिं कुंडेष्वन्येषु वर्द्धयेत् यवद्वयप्रमाणेन योन्ययमपि वर्द्धयेत् गात्ते भविमर्षिन्यां मेखलानां बहिः स्थानेस्थल
मिममभिधीयते चतुरस्रस्थलारभ्यनालं मध्ये सरंध्रकं स्थूलमूलं तु सूक्ष्माग्रं तन्नालं स्यान्मनोहरं बाह्यस्य मेखले
बाह्यस्थलादारभ्य कारयेत् तथा स्थलादारभ्य नालं स्यात् योन्याम ध्ये सरंध्रकं सरंध्रकमित्युभयत्र संबध्यते तदुक्तं गौ
तमीये स्थलादारभ्य नालं स्यात् सरंध्रं योनिमध्यतः सूक्ष्माग्रं स्थूलमूलं च सरंध्रं नालमिष्यते योन्यामध्ये विलं कुर्य्यात्तत्र
दाज्यग्राहिसंज्ञकं मध्यतो मध्यपर्य्यंतमित्यर्थः सरंध्रमिति मध्यमेखलायामिति शेषः तथा च नालमेखलयोर्मध्ये परिधेः राम्न
स्थापनायच रंध्रं कुर्य्यात्तथा विद्वान् द्वितीयमेखलोपरि परिधिं तु वा कुमात्राः परिधियत्र जवः सत्वच्चोर्ध्वगणः मु १९६

घ्र

स्पष्टत्वैकहस्तानां नाभिरुत्सेधतारतः नेत्रवेदांगुलोपेता कुंडे षण्मेषु वर्द्धयेत् यवद्वयक्रमेणैव नाभिपृथगुदारधीः यो
निकुंडे योनिमध्ये कुंडे नाभिं च वर्जयेत् नाभिक्षेत्रं त्रिधा कृत्वा मध्ये कुर्वीत कर्णिकां बहिरंशद्वयेनाष्टौ पत्राणि परिकल्पयेत्
नवकुंडपक्षे योनिनियममाह सिद्धांतशेखरे इंद्रादियमदिक्कुंडे योनिः सौम्यमुखी स्मृता: योनिः पूर्वमुखान्येषु पूर्वदक्षि
णेतरास्मृता हस्तमात्रं स्थंडिलं वा संदिष्टं होमकर्माणि अंगुलोत्सेधसंयुक्तं चतुरस्रं समंततः आदाय दक्षिणपाणौ स्रुवं
त्रिमधुरं हविः प्राङ्मुखो वह्निजायांते जुहुयात् न्युब्जपाणिना निमोंतेन नमो दद्यात् स्वाहांतेन हि तमेव च पूजायां माकुंनो चापि सर्वत्रा
यं विधिः स्मृतः नमोंतेति पौराणिकपरं तथा च ब्रह्मपुराणे ॐकारादिसमायुक्तं नमस्कारांतकीर्तितं स्वनामसर्वदेवानां मंत्र इ
त्यभिधीयते यथा इदं पाद्यं ॐ आदित्याय नमः इदमर्घ्यं ॐ आदित्याय नम इत्यादि न तु ॐ आदित्याय नम इदं पाद्यं ॐ सूर्याय नम
इत्यादि तांत्रिके नायं नियमः अर्घ्यादौ वैषम्यप्रसंगात् किं च ह्रीं नमः ॐ गं नमः प्रत्यादिदृष्यादेरन्त्रस्वरस्यावश्यकत्वात् मंत्रेणैकाभू
तेन स्वाहांतेन विचार्य लक्षणः स्वाहावसाने जुहुयात् ध्यायन् वै मंत्रदेवतां अयमपि वैदिकपरं तेन स्वाहांतमंत्रेण स्वाहाऽवक्तव्यं स्रु
वं तु पंचांगुलं तस्य काशोकमुद्रया धार्यः तथा च पंचांगुलं वहिस्तस्य काधारयेच्छंखमुद्रया यत्र होमे संख्या नोक्ता तत्र च संख्यानुक्तौ

तं० सा०
१९८

कुनेतत्साष्टसहस्रं वा जपादिषु अथ होमप्रयोगः आचार्यो ऽलंकृतो यागमंडपद्वारमागत्य सामान्यार्घ्यं विधाय द्वारपूजां कृत्वा गृहं
प्रविश्य तत्र तत्कल्पोक्तदेवतां ध्यात्वा ऐशान्यां दिशि हस्तप्रमाणां वेदिकां विधाय तदुपरि घटं संस्थाप्य यथाशक्ति संपूज्य वीक्षणादिभिः
कुंडं संस्कुर्यात् वीक्षणं मूलमंत्रेण शरेण ताडनं मतं तेनैव प्रोक्षणं कार्यं वर्मणाभ्युक्षणं मतं ततो मूलमुच्चार्य कुंडाय नमः इति कुंडं
संपूज्य सुंदरीपद्देवालया ततः कुंडमध्ये प्रागग्रा उदगग्रास्तिस्रस्तिस्रो रेखाः कुर्यात् प्रागग्रेषु मुकुंदेशपुरंदरान् प्रादक्षिण्येन
संपूज्य उदगग्रेषु ब्रह्मवैवस्वतेंदून् पूजयेत् ततः कुंडमध्ये षट्कोणं वृत्तं त्रिकोणं तद्बहिरष्टदलपद्मं तद्बहिश्चतुरस्रं चतु
र्द्वारसमेतं लिखित्वा तदुपरि मूलेन पुष्पांजलिं दत्वा सुंदरीपद्देनुवालया सर्वान् प्रणवेनाभ्युक्ष्य योगपीठमर्चयेत् तद्यथा कालिकोप
रि आधारशक्त्यादीन् संपूज्याग्नेयादिकोणेषु ॐ धर्माय नमः ॐ ज्ञानाय नमः ॐ वैराग्याय नमः ॐ ऐश्वर्याय नमः पूर्वादिदिक्षु
ॐ अधर्माय नमः ॐ अज्ञानाय नमः ॐ अवैराग्याय नमः ॐ अनैश्वर्याय नमः मध्ये ॐ अनंताय नमः ॐ पद्माय नमः अं अर्क
मंडलाय दशकलात्मने नमः ततः केसरेषु पीता श्वेताऽरुणा कृष्णा धूम्रा तीव्रा स्फुलिंगिनी रुचिरा ज्वालिनी एताः पूर्वादिषु मध्ये च पू राम
जयेत् ततो रं वह्न्यासनाय नमः ततो वागीश्वरीमृतुस्नातां नीलेंदीवरसन्निभां वागीश्वरेण संयुक्तामिति ध्यात्वा ह्रीं ॐ वागीश्वराय १९८

नमः ह्रीं वागीश्वर्यै नमः इति मंत्रेण पंचोपचारैः संपूज्य सूर्यकान्तादिभिः संभृतं श्रोत्रियगेहजं वा वह्निमानयेत् गोतमीये पाक्षा
त्तमं वमग्निं च यदि वा रुत्तिसंभवं श्रोत्रियाणां गेहजं च वनस्थं चापि वाहरेत् यदृच्छालाभसंप्राप्तोऽयोग्यो यागकर्मणि निरग्निर्ब्राह्म
णोच्छिष्टोऽर्द्धलाभकरो भवेत् क्षेत्रवंशोद्भवं तुर्यांशफलं दद्यात् हुताशनः वैश्यशूद्राग्नि विफलं जायते होमकर्मणि तस्मात्स
र्वप्रयत्नेन वह्निमुक्तं समाहरेत् एवं वह्निं पात्रे निधाय क्रव्यादांशं परित्यजेत् ततोऽग्निं वीक्षणादिभिः संस्कृत्य उदर्य्ये वेदवाग्नी
श्यां भौमस्य वह्नेरैक्यं विभाव्य रं वह्नि चैतन्यं कल्पयामीति पावके चैतन्यं निधाय ॐकारेणाष्टोत्तरशतमभिमंत्र्य धेनुमुद्रयामृतीकृ
त्य फडिति संरक्ष्य हुमित्यवगुंठ्य गंधपुष्पादिभिः रं वह्निमूर्तये नमः इति तमभ्यर्च्य कुंडस्योपरि प्रदक्षिणं त्रिपरिभ्राम्य प्रणवो
च्चारणेन स्वकं जानुस्पृष्टमहीतलः शिवबीजधिया आत्मनोऽभिमुखं देव्या योनावेनं निक्षिपेत् ततो वागीश्वरवागीश्वरीभ्यां आ
चमनीयादिकं दत्वा तद्योगर्भे धृतां ध्यायेत् वह्निरूपां तु देवतां पश्चात् गर्भस्य रक्षार्थं प्रदद्याद्दर्भकंकणं चित्पिंगल हन हन दह दह
पच पच सर्वज्ञाज्ञापय स्वाहा इति मनुना वह्निं ज्वालयेत् ततो बध्वांजलिः सन् अग्निं प्रज्वलितं वंदे जातवेदं हुताशनं सुवर्णवर्णममल
लं समिद्धं विश्वतोमुखं इत्यनेन वह्निमुपतिष्ठेत् ततो जिह्वान्यासं कुर्यात् तद्यथा ह्रीं सरद्दुं हिरण्यायै नमः पाषो घरघंगना

हृदरूपायनमः लिंगे ॐ अग्नये वैश्वानरायनमः वामकट्यां ॐ अग्नये कौमारतेजसे नमः वामपार्श्वे

रा० का० येनमः मूर्ध्निसरयूं रक्तायेनमः चक्रेवरयूं लक्ष्म्यायेनमः भ्रूमोलरयूं सुप्रभायेनमः नेत्रेररयूं बहुरूपायेनमः सर्वत्रयरयूं अति
१९९ रक्तायैनमः एतास्तातिक्षोयागकर्मसु काम्यकर्मसु पद्मरागासु वर्णा भद्रलोहिता स्वेतधूम्रिनी करालिका एतास्तामस्पः न्यासं तु बीजयो
गेन सर्ववत् एवं कर्मभेदेन सर्वत्र बोध्यं वह्नेरार्घाशसंयुक्ता सादियानासविंदवः वह्नेर्मंत्रा समुद्दिष्टा ति द्ध्वानां सप्तदेशिकैः करां
१२९ गन्यासो सहस्रार्चिषे अंगुष्ठाभ्यां नमः स्वस्तिपूर्णाय तर्जनीभ्यां स्वाहा उत्तिष्ठपुरुषाय मध्यमाभ्यां वषट् धूमव्यापिने अनामिका
भ्यां हुं सप्तजिह्वाय कनिष्ठाभ्यां वौषट् धनुर्धराय करतलपृष्ठाभ्यां फट् सहस्रार्चिषे हृदयाय नमः इत्यादि ततो मूर्तिन्यासः ॐ मू
र्ध्नि अग्नये जातवेदसे नमः दक्षांशे ॐ अग्नये सप्तजिह्वाय नमः दक्षपार्श्वे अग्नये हव्यवाहनाय नमः दक्षकटौ ॐ अग्नये अश्वो॰
ॐ अग्नये विश्वमुखाय नमः वामांशे ॐ अग्नये देवमुखाय नमः ततो वह्नेरासनं कल्पयित्वा मूर्तिं तत्र विचिंतयेत् इष्टं शक्तिस्व
स्तिकाभीतिमुच्चैर्दीर्घैर्दोर्भिर्धारयंतं जवाभं हेमाकल्पं पद्मसंस्थं त्रिनेत्रं ध्यायेत् वह्निं बद्धमौलिं जटाभिः ततो मेखलानामुपरि विष्टुके
स्तोयैः यतिष्ठित्वम मध्यमेखलायां गर्भसूत्रैः कुशैः परिस्तरेत् ततः प्राचीवर्जं दिक्षु परिधीन् निक्षिप्य तत्र प्रादक्षिण्येन ब्रह्मादिदेव राम
तान् इत्यः पुनर्वह्निं ध्यात्वा तत्र पीठे आवाह्यानेन मंत्रेण गंधादिभिः पूजयेत् ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्मा १९९

खिसाधयस्वाहा इत्यादिमध्येषट्कोणेषु च सरयूं हिरण्यायै नमः षरयूं गगनायै नमः कर्मभेदे काम्ये ररयूं पद्मरागादयानमद्धत्वा
दिक्रूरे मरयूं विश्वमूर्त्यै नमः इत्यादि केशरेषु अग्न्यादिकोणमध्ये दिक्षु च चतुःसहस्रार्चिषे हृदयाय नमः ॐ स्वस्तिपूर्णाय शिरसे स्वा
हा ॐ उत्तिष्ठपुरुषाय शिखायै वषट् धूमव्यापिने कवचाय हुं ॐ सप्तजिह्वाय नेत्रत्रयाय वौषट् ॐ धनुर्धराय अस्त्राय फट्
पूर्वादिदलेषु ॐ अग्नये जातवेदसे नमः ॐ अग्नये सप्तजिह्वाय नमः ॐ अग्नये हव्यवाहनाय नमः अग्नये अश्वोदरजाय नमः
ॐ अग्नये वैश्वानराय नमः ॐ अग्नये कौमारतेजसे नमः ॐ अग्नये विश्वमुखाय नमः अग्नये देवमुखाय नमः इति वह्निमूर्त्तीः स्वस्ति
कधारिणीः संपूज्य लोकपालाय यथाक्रमं तिद्यमूलमध्याग्निसंशोधयित्वा दक्षिणेन ततो मंत्रोक्तस्य पुनः प्रत्यर्घ्य दर्भानग्नौ निक्षिप्य
आत्मनो दक्षिणे भागे कुशांतरे स्थापयेत् ततः आज्यस्थालीमादाय अस्त्रजपेन वारिणा तां संशोध्य तस्यामाज्यं निक्षिप्य वीक्षणा
दिभिः संस्कुर्यात् ततो वायवे ऽगारमुद्धृत्य तेषु नमः इति मंत्रेण आज्यस्थालीं निवेशयेत् ततो दर्भयुगलं संदीप्य उत्क्षिप्य न लेपि
येत् नम इति मंत्रेण घृतेन ततो दीप्तेन दर्भयुग्मेन आज्यं नीराज्य तद्दर्भयुग्ममग्नौ विसर्जयेत् ततः फडिति मंत्रेण घृते प्रज्वलितान् दर्भा
न् प्रदग्धान् तानग्नौ प्रक्षिपेत् ततो ग्रहीत्वा पुनरंगारान् वह्नौ संयोज्य जलं स्पृष्ट्वा अंगुष्ठोपकनिष्ठाभ्यां प्रादेशसम्मितौ दर्भौ धृत्वा अग्रे

तं०सा० णद्युतंपवित्रीकृत्यनमइतिमंत्रेणततकुशाभ्यांआत्मसंमुखंघृतसंप्लवंकुर्य्यात् प्रादेशमात्रंसमग्रंछिदर्भसंयुक्तेघृतांतरेक्षिप्त्वादौ
२०० भागौकृत्वाश्रुक्लकपक्षौस्मरेत् ततोवामेइडानाडीदक्षिणेपिंगलानाडीमध्येसुषुम्नांध्यात्वाहोमंकुर्य्यात् तद्यथानमइतिमंत्रेणश्रुवेण
२०० दक्षभागात् आज्यमादायअग्नेर्दक्षिणलोचनेअग्नयेस्वाहेतिजुहुयात् तद्वद्वामतःआज्यमादायआग्नेर्वामलोचनेॐसोमायस्वाहे
तितन्मध्यादाज्यमादायअग्नेर्भाललोचनेॐअग्नीसोमाभ्यांस्वाहानमइतिजुहुयात् ततोनमइतिमंत्रेणश्रुवेणउपदक्षिणभागादादाय
वह्निमुखेअग्नयेस्विष्टिकृतेस्वाहाइतिजुहुयात् सर्वत्रआहुतिसंपातः ततोव्याहृतिभिर्होमः ॐभूःस्वाहा ॐभुवःस्वाहा ॐस्वःस्वा
हा ततोवैश्वानरजातवेदइत्यादिमंत्रेणत्रिवारंकृत्वाअग्नेर्गर्भाधानादिक्रियासंपादयेत् तद्यथागर्भाधानंपुंसवनंसीमंतोन्नयनंजातकर्म
नि नामकरणंनिष्क्रमणंअन्नप्रसनंचूडाकरणंउपनयनंमहाव्रतंउपनिषत्स्नानगोदानंउद्वाहकारव्यंकूरेकर्म्माणिस्मरणांतं १६ तथा
चशुभेयुविवाहांनामरणांताक्रूरकर्म्मसुतत्रक्रमः ॐअग्नेर्गर्भाधानंकर्म्मसंपादयामिस्वाहाइतिप्रतिकर्मणिक्रमेणअष्टाहुतीर्जु
हुयात् ततोवह्नेःपूर्वोत्तरदिक्कोणगमनांएकैकाहुतिंहुत्वाश्रुवेणचतुराज्यंश्रुचिनिधायश्रुवेणतांपिधायउत्तिष्ठन्वैश्वान राम
रजातवेदइहावहलोहिताक्षसर्वकर्माणिसाधयस्वाहाप्रोक्षितपनेनजुहुयात् ततोविघ्नेश्वरमंत्रेणदशाहुतीर्जुहुयात् । २००

तद्यथा ॐ स्वाहा ॐ श्रीं स्वाहा ॐ श्रीं ह्रीं स्वाहा ॐ श्रीं ह्रीं क्लीं स्वाहा ॐ श्रीं ह्रीं क्लीं ग्लौं स्वाहा ॐ श्रीं ह्रीं क्लीं ग्लौं गं स्वाहा ॐ श्रीं
ह्रीं क्लीं ग्लौं गं गणपतये स्वाहा पुनर्वरवरद स्वाहा ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे स्वाहा ॐ श्रीं ह्रीं क्लीं
ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा तथा च प्रपंचसारे नारायणीये दशभिर्भेदैः पूर्वपूर्वसमन्वितैः मनुनागणप
त्येन कुर्वीत पूर्वं दशाहुतीः ततो देवतायाः पीठं वह्नौ समभ्यर्च्य वह्निरूपां देवतां विभाव्य पंचोपचारादिभिः संपूजयेत् सुंद
दीपकैर्नु षडासनमंत्रेणांगमंत्रेण च संपूज्य ऐं ह्रीं श्रीं समस्तप्रकटगुप्तगुप्ततरसंप्रदायकुलकौलनिगर्भरहस्यातिरहस्य
परापररहस्ययोगिनीचक्रश्रीपादुकां पूजयामि नमः इति विशेषः तारादौ तु ब्राह्म्यादि इंद्रादि वज्रादीन् पूजयेदिति विशे
षः ततो वह्निमुखे मूलेन घृतेन पंचविंशाहुतीर्जुहुयात् ततो वह्निदेवतयोरात्मना सह ऐक्यं विदध्यात् मूलेनाज्येन एकादशाहुती
र्जुहुयात् ततस्तत्तद्देवतायाघृतेनावरणदेवतायाः एकैकाहुतीर्जुहुयात् ततः संकल्पितं तत्तत्कल्पोक्तविहितद्रव्यैर्होमं कुर्यात् तद्यथा व
क्ररूपाख्यजिह्वायां जुहुयात् सर्वकर्माणि यतः समस्तसिद्धीनां सा वित्री वक्ररूपिकेति यामले कुंडमध्ये हिरण्याख्या वश्याकर्षणक
र्माणि कनकाख्या स्तंभनादौ रक्ताख्या द्वेषणे मता कृष्णाख्या मारणे शस्तास्तु प्रभा शांतिकर्माणि उच्चाटने तिरिक्ताख्या वक्ररूपा सु

तं०सा० छिदा काम्यहोमेऽङ्गुलिनियमस्तु तत्रतर्ज्जन्यंगुष्ठयोगाद्वश्यांत्यर्थं जुहुयान्नरः दाहज्वराभिचारणोमनामांगुष्ठमुद्रया विद्वेषच्चे
२०१ च्चाटने चमरणेच प्रशस्यते प्रादेशनीमध्यमाभ्यां वाथोपशमनंमहत् वपुर्मेधातथाशांतिर्नीतिपुष्ट्यादिकेतथा आकर्षणेनिसर्वाति
कारातदर्थंगतानि च तर्ज्जन्यनामिकायोगात्सघएवभवंतिहि मोहनंवश्यपमीकामंचप्रीतिसंवर्द्धनंतथा प्रादेशिनीकनिष्ठाभ्यां
सर्वमेतत्प्रसिध्यति मोहमाकर्षणंचैवक्षोभणेच्चाटनंतथा कनिष्ठामध्यमांगुष्ठसंयोगेनतुलीलया विधियुक्तेनहोमेनतथाद्व्या
नुयोगतः सर्वेमंत्राःप्रसिध्यंति मुद्रामंत्रप्रयोगतः तत्र ॐ भूरग्नयेपृथिव्यैमहतेस्वाहा ॐ भुवोवायवेऽन्तरिक्षाय दिवेमहतेस्वाहा
ॐ स्वःचंद्रमसेदिग्भ्योनक्षत्रेभ्योमहतेस्वाहा ॐ भूर्भुवःस्वश्चन्द्रमसेनक्षत्रेभ्योदिग्भ्योमहतेस्वाहा: ततोहोमद्रव्याणिस्रुवेणस्रुचि
निधायतेनाच्छाद्यतोनाभौसंस्थाप्यद्रुतः सर्वंभिसादिमन्त्रेणचपूर्णाहुतिंदत्वासंहारमुद्रयादेवतामात्मस्थांस्पपुनर्व्याहृतिभिर्हु
त्वाअग्निर्जिह्वाङ्गमूर्त्तीर्नामिकेकाहुतिर्दत्वापूर्ववन्मेखलोपरिअद्भिः परिषिच्यात्मनिसंहारमुद्रयापावकंयोजयित्वापरिधीन्सपरि
स्तरान्ग्नौ क्षिपेद्विशेषस्तुनैमित्तिकेकर्म्मणि एतान्नदहेत् नित्यकर्म्मणिनदहेत् तथाचशारदायां नैमित्तिदहेन्मन्त्री निसेतु नदहेदि राम
मान् ततोदक्षिणायदीक्षाङ्गहोमःस्यात् तद्देवतायाआवरणदेवतायाश्चहोमान्तरं आज्योन्वितैस्तिलैःकल्पविहितद्रव्यैर्वाअष्टोत्तरसह २०१

ज्ञु स्त्रंशतं वा जुहुयात् ततः सुधौतदंतं दत्वा पूर्णं शिष्यं स्नातं कुण्डान्तिकमानीय दिव्यदृष्ट्या तं विलोकयन् चैतन्यं गुरुरात्मनि संयोज्यां
ध्वविशोधनं कुर्यात् । तद्यथा । कुशाग्रेण छित्वा शिष्यपादं संस्पृश्य । ॐ शोधयामि कलाध्वानं स्वाहेति आज्याहुतीः सलिले अष्टाहुती
र्जुहुयात् अथ गुह्यं स्पृष्ट्वा ॐ शोधयामि तत्वाध्वानं स्वाहा । एवं नाभिं स्पृष्ट्वा ॐ शोधयामि भुवनाध्वानं स्वाहा हृदयं स्पृष्ट्वा ॐ शोध
यामि वर्णाध्वानं स्वाहा भालं स्पृष्ट्वा ॐ शोधयामि पदाध्वानं स्वाहा मूर्द्धानं स्पृष्ट्वा ॐ शोधयामि मंत्राध्वानं स्वाहा । सर्वत्राष्टाहु
तीर्जुहुयात् एवं क्रमेण परमशिवे सर्वं स्थाप्य पुनः सृष्टिवर्त्मना तद्दाहृत्य शिष्यं तन्नयेत् तद्यथा मंत्राध्वा पदाध्वा वर्णाध्वा भुवना
ध्वा तत्वाध्वा कलाध्वा एवं क्रमेणानयेत् ततो दिव्यदृष्ट्या तं शिष्यं विलोकयन् आत्मस्थितं तच्चैतन्यं शिष्ये नियोजयेत् ततः स्रुचा पूर्णा
हुतिदानादि कर्म समाप्य पूर्वोक्तक्रमेण दीक्षां कारयेत् इति होमपद्धतिः ततो होमद्रव्याणां प्रमाणमभिधीयते कर्षमात्रं घृतं होमे स्रु
क्तिमात्रं पयः स्मृतं उक्तानि पंचगव्यानि तत्समानि मनीषिभिः तत्समं मधुदुग्धान्नमक्षमात्रमुदाहृतम् दधिप्रसृतिमात्रं स्याल्ला
शुक्तिः को जाः स्युर्मुष्टिसम्मिताः पृथुकास्तत्प्रमाणाः स्युः शक्तवोपि तथोदिताः गुडं पलार्द्धमानं स्यात् शर्करापि तथा स्मृता ग्रासार्द्धं चरुमानं स्या
र्द्धद्वय = दिक्षुः पर्वावधि स्मृताः एकैकं पत्रपुष्पाणि तथा पूयानि कल्पयेत् कदलीफलनारंगफलान्येकैकशो विदुः मातुलिंगं चतुःखंडं पनसं

१ तथा प्रस्तं फलं वैल्वं कपित्थं खण्डितं द्विधा ऊर्वारुकफलं होमे तत्रैव खण्डितं त्रिधा

तं०सा० २०२ दशधा प्रस्तं च अष्टधा नारिकेलानि खण्डितानि विदुर्बुधाः तथा फलान्यन्यानि खण्डानि समिधः स्मृताः दशांगुलाः दूर्वात्रयं समुद्दिष्टं गुडूची
चतुरंगुला व्रीहयो मुष्टिमात्राः स्युर्मुद्गा माषाश्च यवाश्च अपि तण्डुलास्तु सदा दशांशाः कोद्रवा मुष्टिसम्मिताः गोधूमा रक्तकलमा विहिता मु
तिलैः पापनाशः ष्टिमात्रतः तिला चुलुकमात्राः स्युः सर्षपास्तत्प्रमाणकाः शुक्तिप्रमाणं लवणं मरीचस्यापि विंशतिः गुग्गुलं दरमात्रं स्याद्द्राक्षा मवतत्समं भ
वेत् चन्दनागुरुकर्पूरकस्तूरीकुंकुमानि च तिन्तिडीबीजमानानि यदुद्दिष्टानि देशिकैः तथा वैश्वानरं स्थितं ध्यायेत्सन्निधौ होमे सुदेशि
२०२ कः शयानमाज्यहोमेषु निषण्णं शेषवस्तुषु आस्यान्तर्जुहुयाद्वह्नेर्विपश्चित्सर्वकर्मसु कर्णहोमे भवेद्व्याधिर्नेत्रे ध्वान्तमुदीरि
तं नासिकायां मनःपीडा मस्तके धनसंक्षयः यतः काष्ठं ततः श्रोत्रं यतो धूमो ततो नासिका यत्राल्पज्वलनं नेत्रं यत्राङ्गारस्ततः शिरः ।
यत्र च ज्वलिता ज्वाला जिह्वा सा जातवेदसः स्वर्णसिन्दूरबालार्ककुंकुमक्षौद्रसन्निभः सुवर्णरेतसो वर्णः शोभनो परिकीर्तितः भे
रीवारिदहस्तीन्द्रनिनादोऽग्निः शुभावहः नागचंपकपुन्नागपाटलीयूथिकानिभः पद्मेन्दीवरकल्हारसर्पिर्गुग्गुलसन्निभः पा
वकस्य शुभो गंधः इत्युक्तस्तत्त्ववेदिभिः प्रदक्षिणोत्सृष्टकृपाः दत्ता भाग्यविनः श्रियं शुभदा यजमानस्य राज्यस्यापि विशेषतः कुंदे राम
न्दुधवलो धूमो वह्नेः प्रोक्तः शुभावहः कृष्णः कृष्णगतिर्वर्णो यजमानविनाशकृत् श्वेतो राज्यं दहत्याशु वायसस्वरसन्निभः खरस्व २०२

रसेमावङ्केर्च्छनिःसर्व्वविनाशकृत् पूतिगंधोकृतवह्नोहोतुर्दुःखप्रदोभवेत् छिन्नावद्गाशिखाकुर्यान्मृत्युंधनपरिक्षयं शुकपि
च्छनिभोधूमः पारावतसमप्रभः हानिंतुरगजातीनांगवांचकुरुतेऽचिरात् एवंविधेषुदोषेषुप्रायश्चित्तायदेशिकः मूलेनाज्येनजु
हुयात्तं चविंशतिमाहुतिं इतिहोमप्रकरणंसमाप्तं शारदायां अथाभिधास्येतंत्रेस्मिन्सम्यक्षट्कर्मलक्षणम्
सर्वतंत्रानुसारेणप्रयोगफलसिद्धिदं शान्तिवश्यस्तंभनानि विद्वेषोच्चाटनेततः मारणान्तानिशंसन्तिषट्कर्माणिमनीषिणः
रोगकृत्याग्रहादीनांविनाशः शान्तिरीरिता वश्यं जनानांसर्व्वषांविधेयत्वमुदीरितं प्रवृत्तिरोधःसर्व्वेषांस्तंभनंतदुदीरि
तं स्निग्धानांद्वेषजननंमिथोविद्वेषणंमतः उच्चाटनंस्वदेशादेर्भ्रंशनंपरिकीर्त्तितं प्राणिनांप्राणहरणंमारणंतदुदाहृतं
स्वदेवतादिक्कालादीन्ज्ञात्वाकर्म्माणिसाधयेत् रतिर्वाणीरमाज्येष्ठाभद्रकालीयथाक्रमात् षट्कर्म्मदेवताःप्रोक्ताःकर्म्मादौताः
प्रपूजयेत् ईशचन्द्रेन्द्रनिर्ऋतिवाय्वग्नीनांदिशोमताः सूर्य्योदयसमारभ्यघटिकादशकक्रमात् ऋतवःस्युर्वसन्ताद्याःअहो
रात्रंदिनेदिने वसन्तग्रीष्मवर्षाख्यशरद्धेमन्तशैशिराः यछार्द्धरात्रंशरत्कालोहेमन्तस्तुप्रभातकः पूर्वाह्णश्चवसन्तः
५५ स्यान्मध्याह्नोग्रीष्मएवच प्राविट्कालोपराह्नःस्यात्प्रदोषःशिशिरःस्मृतः अथवाउषायोगेचहेमन्तःप्रभातेशिशिरागमः

तं० सा०
२०३

प्रहराद्वसन्तस्य ग्रीष्मो मध्यंदिनागमे तुर्य्ययामे च वर्षाख्या शरदस्तंगते रवौ हेमन्त: शान्तिके प्रोक्त: वसन्तो वश्यकर्म्मणि
शिशिरस्तंभने ज्ञेयो विद्वेषे ग्रीष्म एव च प्राविडुच्चाटने ज्ञेय: शरन्मारणकर्म्मणि चामुण्डाकल्पे तु पेत पूर्वमुखो वश्ये दक्षिणं चा
भिचारिके पश्चिमे धनदं प्रोक्तमोत्तरं शान्तिकं मतम् तथाभिचारे कार्य्या च दक्षिणा लवनामही वसनं लोहितं प्रोक्तं उत्तमीघलो
हितं स्मृतं भूषणं लोहद्रव्येण वामेन पूजनादिकं नरस्तायु विशेषेण मारणे रक्तुरीरित: मृतस्य युद्धभग्नस्य दन्तेन गर्दभ
स्य वा शत्रुणां वधमिच्छता भस्मेमलि भिर्लिप्ते दाकर्षकर्म्मणि साध्यकेशास्तत्र प्रोतेस्तु रंगदशानो द्भवै: अहेमालां समा
लोक्य विद्वेषोच्चाटने तु येत तिथिनियमस्तु सप्तमी च द्वितीया चतुर्थी या चाष्टमी तथा बुधेऽप्य वारे संयुक्ता ज्ञेया विद्वेष
कर्म्मणि कृष्णा चतुर्दशी तद्वदष्टमी मन्दवारका उच्चाटने तिथिशस्ता प्रदोषे च विशेषत: चतुर्दश्यष्टमी कृष्णा ह्यमावास्या त
थैव च मंदभौमदिनोपेता शस्ता मारणकर्म्मणि बुधचंद्रदिनोपेता पंचमी दशमी तथा पौर्णमासी च विज्ञेया तिथि स्तंभनक
र्म्मणि: शुभग्रहोदये कुर्य्यात् शुभानि च शुभोदये रौद्रकर्म्माणि रिक्तार्के मृत्युयोगे च मारणम् अथासनं पद्मासनं स्वस्तिकं राम
कं भद्रयोनि कटं कुक्कुटं पुन: वज्रं भद्रकमित्यादृशासनानि मनीषिण: पद्मासनं तु संयोज्य जान्वोर्विवरे नरे करौ निवेश्य पश्मो संस्था २०३

203

प्य व्योमस्थं कुर्कुटासनं अन्यानि वक्ष्याणि षण्मुद्राः क्रमतो ज्ञेयाः पद्मपाशगदाह्वयः मूशलाशनिषड्गाख्याः शान्तिका
दिषु कर्मसु जलं शान्तिविधौ शस्तं वश्ये वह्निरुदीरितं स्तम्भने पृथिवी शस्ता विद्वेषे व्योम कीर्तितः उच्चाटने स्मृतो वायुर्भूयो
पि मारणे स्मृतः तत्तद्भूतोदये सम्यक् तत्तन्मण्डलसंयुतं तत्तत्कर्म प्रकर्तव्यं मन्त्रिणा निश्चितात्मना शीतांशुशलिल
हुताशनि व्योमवायुहविर्भुजां वर्णास्तु मन्त्रबीजानि षट्कर्मणि यथाक्रमं ग्रथनं च विदर्भं च संपुटो रोधनं तथा योगः पल्लव इत्येते
विन्यासाः षट्सु कर्मसु मन्त्रार्णान्तरितान्कृत्वा साध्यवर्णान्यथाविधि ग्रथनं तद्विजानीयात् प्रशस्तं शान्तिकर्मणि मन्त्रा
र्णद्वयमध्यस्थं साध्यनामाक्षरं लिखेत् विदर्भ एष कथितो मन्त्रिभिर्वश्यकर्मणि आदावन्ते च मन्त्रः स्यात् नाम्नो सो संपु
टः स्मृतः एष स्यात्स्तम्भने शस्तः इत्युक्तो मन्त्रवेदिभिः नाम्नः प्राद्यन्तमध्येषु मन्त्रः स्याद्रोधनं मतम् विद्वेषणविधाने तु प्र
शस्तमिदमुत्तमं मन्त्रस्यान्ते भवेन्नाम योगः प्रोच्चाटने मतः अन्ते नाम्नो भवेन्मन्त्रः पल्लवो मारणे मतः सितरक्तपीतमिश्राः कृष्णा
धूम्रा प्रकीर्तिताः वर्णा तो मन्त्रसंप्रोक्ता देवताः षट्सु कर्मसु मन्त्राणां लेखने द्रव्यं चन्दनं रोचनं निशा गृहधूम चिताङ्गारो मा
रणेष्टविषाणि च शेफ्लान्निला नचिताग्निधत्तूरकैरसः स्मृतः गृहधूमस्तकटुकं विषाष्टकमुदीरितं देवताकालमुद्रादीन्स

तं०सा० व ्यक्कृत्वा त्वाविचक्षणः षट्कर्माणि प्रकुर्वीत यथोक्तफलसिद्धये कुलार्णवे उच्चाटने वषट् प्रोक्तो फट् फडन्तं च मारणे स्तंभने च न
२०४ मः प्रोक्तः स्वाहा शान्तिकपौष्टिके होमतर्पणयोः स्वाहा न्यासपूजनयोर्नमः मंत्रान्ते योजयेन्मंत्री जपकाले यथास्थितिः अस्यार्थः ए
एतानि तत्तत्कर्माणि जपकाले मंत्रान्ते योजयित्वा मंत्रं जपेत् होमादिषु नायं नियमः इत्याह होमेति केचित्तु अग्निकार्ये
जपे स्वाहा नमः सर्वत्र चार्च्चयेत् शान्तिपौष्टिवषट् द्वेषाकर्षणोच्चाटनमारणे स्वाहा स्वधा वषट् हुं च वौषट् फट् योजयेत्क्र
मात् वश्याकरणे संतापज्वरे स्वाहा प्रकीर्त्तयेत् क्रोधोपशमने शान्तौ प्रीतौ योजयेन्नमो बुधैः वौषट् सम्मोहने दीपपुष्टि
मृत्युंजयेषु च हुंकारं प्रीतिनाशे च छेदने मारणे तथा उच्चाटने च विद्वेषे वौषट् योगलतौ वषट् कुंडोद्दीपनकार्येषु लाभा
लाभे वषट्स्मृतः इति विशेषवचनाद्धोमेप्ययं विधिः शान्तिकादौ पात्रादिनियमस्तु तत्रैव शान्तिके राजतं ताम्रं भूर्य्य
पत्रं च वश्यके सर्वकार्येषु सौवर्णं क्रूरे स्यात्प्रेतकर्प्परं त्रिगंधं शान्तिके प्रोक्तं पञ्चगव्यं तु वश्यके सर्वकार्ये द्विगंधं स्यात्क्रू
रे चाष्टविषाणि च शान्तिके लिखनी दूर्वा वश्यादौ शिखिपुच्छिका हेम्नाः सर्वाणि कार्याणि क्रूरे स्यात्काकपुच्छिका गृहेषु राम
शान्तिकर्म वश्यादिकं चण्डिकागृहे देवालये च सर्वाणि स्मशाने क्रूरकर्म च अथ भूतानामुदयः दंडाकारा गति २०४

र्भमेः पुटयोरुभयोरपि तोयाधः पावकस्योर्द्ध्वगतिस्तिर्य्यङ् भस्वतः गतिर्व्योम्नो भवेन्मध्ये भूतानामुदयस्मृतः धरणेरुद
ये कुर्यात् स्तंभनं विषमात्मवत् शांतिकं पौष्टिकं कर्म्म तोयस्य समये वसे मारणादीनि मरुतो विपक्षोच्चाटनादिकं हवे
उदिदिनाशने शस्तमुदयं च विहायसः अथ भूतानां मंडलानि ववत्तन्दिवसतस्य षड्बिन्दुलांछितं मातरिश्विनः त्रिकोणं
स्वस्तिकोपेतं वह्नेरर्द्धेन्दुसंयुतं अंभोजसंभस्तोभूमेश्चतुरस्रं सवज्रकं तत्र भूतसमाभानि मंडलानि विदुर्बुधाः वर्णैस्थे
रञ्जितं तामारुः स्वस्वनाम्नावृतान्यपि स्वच्छवियन्मरुत् कृष्णोरक्तोग्निर्विशदं पयः पीता भूमिरित्यादि प्रयोगानन्तरं
कुलार्णवे एकलक्षं जपेन्मंत्रं ध्यानन्याससमन्वितं प्रयोगदोषशान्त्यर्थमात्मरक्षार्थकारणम् नचेत्फलं चनाप्नोति दे
वताशापमाप्नुयात् यस्तु नष्टास्तं मारणं कर्म्म कुर्य्याच्चेदयुतं जपेत् तत्र सुप्रायश्चित्तपरम् इदानीं स्तवकवचानि नि
रूप्यंते तत्रादौ भुवनेश्वरीस्तोत्रं अथानंदमयीं साक्षाच्छब्दब्रह्मस्वरूपिणीम् ईडे सकलसंपत्त्यै जगत्कारणमंबिकां आद्या
मशेषजननीमरविन्दयोनेर्विष्णोः शिवस्य च वपुः प्रतिपादयित्रीम् सृष्टिस्थितिक्षयकरीं जगतां त्रयाणां स्तुत्वा गिरं विमलयाप्य
हमंबिके त्वां पृथ्व्या जलेन शिखिना मरुताम्बरेण होत्रेन्दुना दिनकरेण च मूर्त्तिभाजः देवस्य मन्मथरिपोरपि शक्तिमत्ता हेतु

नं०सा० २०५ त्वमेवखलुपर्वततराजपुत्रिःस्रोतसःस[क]कललोकसमर्च्चितायावैशिष्ट्यकारणमवैमितुदेवमातः त्वत्पादपंकजपरा
गपवित्रितासुरांभोजरासुसततंपरिवर्त्तनंयत् आनंदयेत्कुमुदिनीमधिपःकलानांनान्यायनान्यामितःकमलिनीमथ
नेत्रवाला एकस्यमोदनविधौपरमेकईष्टेत्वत्तुप्रपंचमभिनंदयसिस्वदृष्ट्या आद्याप्यशेषजगतांनवयौवनासिशै
लाधिराजतनयाप्यतिकोमलासि त्रय्याःप्रसूरपित्वयानसमीक्षितासिध्येयासिगौरिमनसोनपथिस्थितासि आसाद्य
जन्ममनुजेषुचिराद्दुरापंतत्रापिपाटवमवाप्यनिजेन्द्रियाणां नाभ्यर्चयन्तिजगतांजननित्रियेत्वांनिःश्रेणिकाग्रमधिरु
ह्यपुनःपतन्ति कर्प्पूरचूर्णहिमवारिविलोडितेनयेचन्दनेनकुसुमैश्चसुजातगंधैः आराधयन्तिहिभवानिसमुत्सुकास्त्वां
तेखल्वशेषभुवनाधिभुवःप्रथन्ते आविश्यमध्यपदवींप्रथमेसरोजेसुप्ताहिराजसदृशीविरचय्यविश्वंविद्युल्लता
वलयविभ्रममुद्वहन्तीपद्मानिपंचविदलय्यसमश्नुवाना तन्निर्गतामृतरसैःरभिषिक्तगात्रीमार्गेणतेननिलयंपुनरप्य
वाप्ता येषांहृदिस्फुरसिजातुनतेभवेयुः मातर्महेश्वरकुटुंबिनिगर्भभाजः आलम्बिकुन्तलभराभिरामवक्त्रामापीवरस्त राम्र
नतटींतनुवृत्तमध्यां चित्राक्षमालकलशालिखिताब्जहस्तामावर्त्तयामिमनसातवगौरिमूर्त्तिम् आस्थापयोगमवतिं २०५

स्य च वैरिषड्कमावर्जयन्तेन्द्रियगणं मनसि प्रसन्ने पाशांकुशा -- भयावराद्यकरांसुवक्त्रामालोकयन्ति भुवनेश्वरि यो
गिनस्त्वां उत्तमहाटकनिभाकारिभिश्चतुर्भिरावर्जितामृतघटैरभिषिच्यमाना हस्तद्वयेन नलिनेरुचिरे वहन्ती पद्मासि
सा भयकरी भवसि त्वमेव अष्टाभिरुग्रविबुधायुधवाहिनीभिर्दीर्घल्लरीभिरयिदुस्त्यमगाधिराजं दूर्वादलद्युतिरमे
र्यविपक्षपक्षान्यकुर्वती त्वमसि देवि भवानि दुर्गा आविन्निदाघजलशीकरशोकलितमिव वक्त्रांगुंजाफलेन परिशोभित
हारयष्टिं पत्रांशुकामसितकान्तिमनंगतंत्रामाद्यांपुलिंदतरुणीमसकृत्स्मरामि हुंसैर्गतिक्वणितनूपुरदूरलग्ने मूर्ते
रिवाहतवचनैरनुगम्यमानौ पद्माविवोर्द्धमुखरूढसुजातनालौ श्रीकंठपत्निशिरसैव दधे तवांघ्री ऊर्द्धाभ्यांसमीहितुम
नन्तमिनत्वद्गम्यामुत्ताघमालनयनं वृषकेतनेन सान्द्रानुरागतरलेन निरीक्ष्यमाणे जंघे उभे अपि भवानि तवानतोस्मि
ऊरू स्मरामि जितहस्तिकरावलेपौ स्थौल्येन मार्दवतया परिभूतरंभौ श्रोणीभरस्य सहनौ परिकल्प्य दत्तौ स्तंभाविवांगवयसा
तव मध्यमेन श्रोणीपोत्तनोच युगपन्न प्रपद्य पिच्छतो है: वाल्यात्परेण वयसा परिहृष्टसार: रोमावलीविलसितेन विभाव्यमू
र्त्तिर्मध्ये तव स्फुरतु मे हृदयस्य मध्ये सख्यास्मरस्य हरनेत्रकृताद्भुताशाशा त्येलावण्यवारिभरितेन वयोवनेन आपाद्यदन्नमिव

पल्लवलमप्रधर्षणं नाभिं कदापि तव देवि न विस्मरेयम् ॥ दृष्ट्वोपगूहपिशुनं भसितं दधाने काश्मीरकर्दममनुस्तनपङ्कजे ते स्ना
नोत्थितस्य करिकुम्भयुगलस्य फेनोलसि दूरतोस्मरयतः समदस्य कुम्भौ ॥ कण्ठाभिरिक्तगलदुज्वलकान्तिधाराशोभौ भुजौ निजरिपो
र्मकरध्वजेन कण्ठग्रहाय रचितौ किल दीर्घपाशौ मातर्मम स्मृतिपथं न विलङ्घयेतां ॥ नामायतं रचितकम्बुविलासचौर्यं भू
षाभरेण विविधेन विराजमानम् । कण्ठं मनोहरगुणं गिरिराजकन्ये संचिंत्य तृप्तिमुपयामि कदापि नाहं ॥ अत्यायताक्षमभिजा
तललाटपट्टं मन्दस्मितेन दरफुल्लकपोलरेखं बिम्बाधरं वदनमुन्नतदीर्घनासं यस्ते स्मरत्यसकृदम्ब स एव जातः ॥ आवि
स्तुषारकरलेखमनल्पगन्धपुष्पोपरि भ्रमदलिव्रजनिर्विशेषं यश्चेतसा कलयते तव केशपाशं तस्य स्वयं गलति देवि पुराण
पाशः ॥ श्रुतिसुचरितपाकं धीमतां स्तोत्रमेतत्पठति य इह मर्त्यो नित्यमार्द्रान्तरात्मा ॥ स भवति पदमुच्चैः संपदां पादनम्रा क्षितिपमु
कुटलक्ष्मीलक्षणानां चिराय ॥ अथास्याः कवचः ॥ श्रीदेव्युवाच ॥ भुवनेश्वर्या देवेश या या विद्याः प्रकीर्तिताः । श्रुताश्चा प्रकाशिताः
धिगताः सर्वाः श्रोतुमिच्छामि सांप्रतं ॥ त्रैलोक्यमंगलं नाम कवचं मंत्रविग्रहं । सिद्धविद्यामयं देवि सर्वैश्वर्यप्रदायकं ॥ पठनाद्धार राम
णान्मर्त्यस्त्रैलोक्यैश्वर्यभाग्भवेत् ॥ त्रैलोक्यमंगलस्यापि कवचस्य ऋषिः शिवः ॥ छन्दो विराट् जगद्धात्री देवता भुवनेश्वरी २०६

धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः क्लीं बीजं मे शिरः पातु भुवनेशी ललाटकं ऐं पातु दक्षनेत्रं मे क्लीं पातु वामलोचनं श्रीं
पातु दक्षकर्णं मे त्रिवर्णात्मा महेश्वरी वामकर्णं सदा पातु ऐं घ्राणं पातु मे सदा क्लीं पातु वदनं देवी ऐं पातु रसनां मम वाक्पुटा च त्रि
वर्णात्मा कण्ठं पातु परात्मिका श्रीं स्कन्धौ पातु नियतं ह्रीं तु ऊ पातु नित्यदा क्लीं करौ त्रिपुटे शानी त्रिपुटैश्वर्य्यदायिनी श्रीं
पातु हृदयं ह्रीं मे मध्यदेशं सदावतु क्रौं पातु नाभिदेशं सा त्र्यक्षरी भुवनेश्वरी सर्व्वबीजं सदा पृष्ठं पातु सर्व्ववशंकरी ह्रीं
पातु गुह्यदेशं मे नमो भगवती कटिं महेश्वरी सदा पातु शक्थिनी जानुयुग्मकं अन्नपूर्णे सदा पातु स्वाहा पातु पदद्व
यं सप्तदशाक्षरी पायादन्नपूर्णाखिलं वपुः तारं माया रमा कामः षोडशार्णास्ततः परं शिरस्था सर्वदा पातु विंशत्यर्णात्मि
का परा तारं -- दुर्गे युगं रक्षणि स्वाहेति दशार्णात्मिका जयदुर्गा घनश्यामा पातु मां सर्वतो मुदा मायाबीजादिका चैषा दशा
र्णा च तथा परा उत्तप्तकाञ्चनाभासा जयदुर्गाननेऽवतु तारं ह्रीं दुं दुर्गायै नमोऽष्टवर्णात्मिका परा शंखचक्रधनुर्बाणधरा मां दक्षि
णेऽवतु महिषमर्दिनी स्वाहा वसुवर्णात्मिका परा नैरृत्यां सर्वदा पातु महिषासुरनाशिनी माया पद्मावती स्वाहा सप्तार्णा परिकीर्त्ति
ता पद्मावती पद्मसंस्था पश्चिमे मां सदावतु पाशांकुशपुटा मायेहि परमेश्वरि स्वाहा त्रयोदशार्णा तारायाः साऽश्वारूढा नि

तं० सा० २०१

लेऽवतु सरस्वती पंचशरोनित्यक्लिन्नेमदद्रवे स्वाहारव्यक्षरी नित्यामामुत्तरेसदाऽवतु तारंमायाचकवचं ह्रेच छे हजतो वधू

ः कूं ह्ले क्रीं फट् महाविद्या द्वादशार्णाखिलप्रदा त्वरिताष्टाहिभिः पायाच्छिवकोणेसदाचमां ऐं क्लीं सौः सातत्तोवालामामुर्द्धदेश

तोऽवतु बिन्द्वन्ताभैरवीवालाभूमौमां सर्वदावतु इतितेकथितं पुण्यं त्रैलोक्यमंगलंपरं सारात्सारतरंपुण्यमहाविद्यौघविग्रह

मस्यापिपठनात्सद्यः कुवेरोपिधनेश्वरः इन्द्राद्याः सकलादेवाधारणात्पठनाद्यतः सर्वसिद्धीश्वराः सन्तः सर्वैश्वर्य्यमवा

पुः पुष्पांजल्यष्टकंदद्यान्मूलेनैवपृथक्पृथक् संवत्सरकृतायास्तुपूजायाफलमाप्नुयात् प्रीतिमन्योन्यतः कृत्वाकम

लानिश्चलागृहे वाणीचनिवसेद्वक्त्रे सत्यंसत्यंनसंशयः योधारयतिपुण्यात्मा त्रैलोक्यमंगलाभिधंकवचंपरमंपुण्यंसो

पिपुण्यवतांवरः सर्वैश्वर्य्ययुतोभूत्वा त्रैलोक्यविजयीभवेत् पुरुषोदक्षिणेवाहौनारीवामभुजेतथा वहुपुत्रवतीभू

त्वावंध्यापिलभतेसुतं ब्रह्मास्त्रादीनिशस्त्राणिनैवकृन्तन्तितंजनं एतत्कवचमज्ञात्वायोभजेत्परमेश्वरीं दारिद्र्यंपर

मंप्राप्यसोऽचिरान्मृत्युमाप्नुयात् इतिरुद्रयामले देवीश्वरसंवादे त्रैलोक्यमंगलंनामभुवनेश्वरीकवचंसमाप्तं श्री राम

थान्तरूर्णस्तोत्रं नमः कल्याणदे देविनमः शंकरवल्लभे नमोभक्तिप्रदेदेवि अन्नपूर्णेनमोस्तुते नमोमायागृहीतांगिनमः २०१

शंकरवल्लभे माहेश्वरीनमस्तुभ्यं अन्नपूर्णे नमोस्तुते महामायेशिवधर्म्मपत्निरूपे हरप्रिये वांछादात्रिपुरेशानि अन्नपू
र्णेनमोस्तुते उद्यद्भानुसहस्राभेनयनत्रयभूषिते चंद्रचूडेमहादेवि अन्नपूर्णेनमोस्तुते विचित्रवसने देवि अन्नदानरते ऽनघे
शिवनित्यरतामोदे अन्नपूर्णेनमोस्तुते साधकाभीष्टदे देवि भवदुःखविनाशिनि कुचभारनते देवि अन्नपूर्णेनमोस्तुते षट्कोण
पद्ममध्यस्थे षडङ्गयुवतीमये ब्रह्माण्यादिस्वरूपे च अन्नपूर्णेनमोस्तुते देवि चंद्रकृतापीठे सर्व्वसाम्राज्यदायिनि सर्व्वा
नंदकरे देवि अन्नपूर्णेनमोस्तुते इन्द्राद्यर्च्चितपादाब्जे रुद्रादिरूपधारिणि सर्व्वसंपत्प्रदे देवि अन्नपूर्णेनमोस्तुते इत्याका
लेपठेद्यस्तु स्तोत्रमेतत्समाहितः तस्यगेहे स्थिरालक्ष्मीर्ज्जायते नात्र संशयः प्रातःकाले पठेद्यस्तु मंत्रजापपुरःसरं तस्या
त्रस्य समृद्धिः स्याद्वर्द्धमाना दिने दिने यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन प्रकाशनात्कार्य्यहानिः स्यात्तस्माद्यत्नेन गोपयेत्
इति अन्नपूर्णास्तोत्रं अथास्याःकवचम् देव्युवाच कथितास्त्वन्नपूर्णाया या या विद्याः सुदुर्ल्लभाः कृपयाकथिताः सर्व्वाः श्रुता
श्चाधिगतामया सांप्रतं श्रोतुमिच्छामि कवचं मंत्रविग्रहं ईश्वर उवाच शृणु पार्व्वति वक्ष्यामि सावधानावधारय ब्रह्म
विद्यास्वरूपं च महदैश्वर्य्यदायकं पठनाद्धारणान्मर्त्यः त्रैलोक्यैश्वर्य्यभाग्भवेत् त्रैलोक्यरक्षणस्यास्य कवचस्य ऋषिः शिवः

तं०स्ता० २०८ छंदो विराट्देवतान्नपूर्णा सर्वार्थसिद्धिदा धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः क्लींनमो भगवत्यंते माहेश्वरीपदंततः अन्न
पूर्णे ततः स्वाहा चैषा सप्तदशाक्षरी पातु मामन्नपूर्णा सर्वांगं रत्नकुंभान्नपात्रदा श्रीं बीजाद्या तथा चैषा द्विरंभाक्षिता मुखं घ्राणो अष्टादशाक्षरी=
का घ्राणं कुवैदास्तु कंठं वाग्बीजपूर्विका कामबीजादिका चैषा हृदयं तु महेश्वरी तारं श्रीं क्लीं नमो ने च भगवति पदं ततः माहेश्वरि
पदं चान्नपूर्णा स्वाहे त्रिपातु मे नाभिमेकोनविंशार्णा पायान्माहेश्वरी सदा तारं माया रमा काम षोडशार्णा ततः परं शिरस्था नमो भगवति माहेश्व त्रिंशत्रयोदशाक्षरा=
सर्वदा पातु विंशत्यर्णा तु काऽपरा अन्नपूर्णा महाविद्या क्रीं पातु भुवनेश्वरी शिरः श्रीं क्लीं तथा ह्रीं च त्रिपुरा पातु मे गुदं षड्
क्रीं= दीर्घभाजा बीजेन षडंगानि पुनन्तु मां इन्द्रो मां पातु पूर्वे च वह्निकोणेऽनलोऽवतु यमो मां दक्षिणे पातु नैरृत्यां निरृतिश्च क्र
मां पश्चिमे वरुणः पातु वायव्यां पवनोऽवतु कुवेरश्चोत्तरे पातु मामैशान्ये शिवोऽवतु ऊर्ध्वाधः पातु सततं ब्रह्माऽनन्तो
यथाक्रमात् वज्राद्यायुधाः पान्तु दशदिक्षु यथाक्रमात् इति ते कथितं पुण्यं त्रैलोक्यरक्षणपरं यत् ज्ञात्वा पठनाद्देवाः
सर्वैश्वर्यमवाप्नुयुः ब्रह्मा विष्णुश्च रुद्रश्च धारणात् पठनाद्यतः सृजन्त्यवन्ति हन्त्येव कल्पे कल्पे पृथक् पृथक् पुष्पांजल्यष्टकं दे राम
वैमूलेनैव पठेत्ततः युगायुगकृतायास्तु पूजायाः फलमाप्नुयात् वाल्मीकिवक्त्रे वसेत्तस्य सत्यं सत्यं न संशयः अष्टोत्तरशतं चास्य पु २०८

वं

रक्षार्थं विधिस्स्मृतः भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि कंठे वा दक्षिणे वा हौ सो ऽपि सर्वविघ्नभयः ब्रह्मास्त्रादीनि शस्त्रा
णि न ङ्गात्रं प्राप्य पार्वति सर्वाणि कुसुमान्येव भवत्येव न संशयः इति भैरवतंत्रे ऽन्नपूर्णाकवचं समाप्तं अथ त्रिपुरास्तोत्रं
वराभीतिहस्तं द्विवाङ्क प्रसन्नं शिवं सुप्रसन्नं स्वचिन्ता ज्ञोपविष्टं प्रसन्नास्यबिम्बं प्रकाशस्वरूपं शिरःपद्ममध्ये गुरुं पूजयामि
केशश्चैव वह्निसंस्था त्रिमूर्त्या प्रयुक्तं प्राशां केनयुक्तं तवाद्यं सुबीजं सुवर्णप्रभे ये जपन्ति त्रिसंध्यं श्रियं सो भगत्वं लभन्ते नरास्ते
२ नमो वायुमित्रं ततो वामनेत्रं सुधाधाम विनियोज्यैकारं द्वितीयं सुवीजं मुखस्त्रेणि वन्द्यं त्वदीयं विभाव्य श्रियं प्राप्नुवन्ति ३
विरिञ्चिर्हि तिस्थं ततो वामनेत्रं विधुनाद्युक्तं दिनेशो भवीजं विभाव्यैव संमोहयन्ति त्रिलोकीं जपादीश्वरत्वं लभन्ते नरेन्द्राः ४
त्रयं संनियोज्यास्य मारि प्रिये ये त्रिसंध्यं जपन्ति त्वदंगं विभाव्य न तेषां रिपुर्वा कुप्रयोगं करोति स्मरारातिरूढ नानांगहे श्री
स्तु तेषाम ५ मुखे भारती गद्यपद्यप्रवं का न हिंसन्ति हिंस्रा सुरास्तान् मन्ति तदंघ्रिद्वयं भूषणं मूर्ध्नि राज्ञां करे सिद्धयो हु
गेहात्तांस्पृशन्ति ६ वनेपारिजातद्रुमाना पृथिव्यां सुवर्णप्रभा भामणि भूमिगेहे स्मरेद्वेदिकायां लसद्रत्नसिंहासने प
द्ममध्ये ऽक्षरं संविचिन्त्य ७ स्फुरन्नर्कसिकायां परं योनियुग्मे तदन्तर्गतामुत्सु हेमप्रभायां लसत्कुंडलामिन्दुवक्त्रां त्रिने

मं०स्ता०
२०९

त्रांस्फुरत्कंचुकठांस्ववक्षोजनम्रां ८ महारत्नवज्रोल्लसद्धाङ्कवं दैः सुपश्चद्वयंपाशकंकार्मुकंच सुवर्णांकुशंपुष्पवाणान्
दधानांदृहद्गत्रभूषांसुमध्यांसुकांचीमू ९ तुलाकोटिरम्यंस्फुरत्पादपद्मां किरीटाद्यलंकारयुक्तांप्रसन्नां स्मितेचाम
रैर्दर्पणांतत्वारएंडंसमुत्संस्तुकर्पूरपूर्णैर्धृताभिः १० त्रिलोकीविधात्रींजगत्तापहन्त्रींजगत्क्षोभकर्त्रींजगल्लोकपुत्रीं स
दानंदपूर्णांहृकारार्द्धवर्णांत्रिविंदुस्वरूपांत्रिशक्तिंभजामि ११ चिरंचिन्तयित्वातदेतत्स्वरूपंपुरोमेध्यसमावाह्यभक्त्या यंत्र
स्वयंभूकुसुमादिभिः पूजयित्वा चतुर्वर्गसिद्धिंलभेन्मानवोपि १२ श्रियंश्रीपतिपार्वतीमीश्वरंचरत्तिकामदेवंषड
गेतसार्द्धं स्वयोनौतथामन्त्रमुक्तांभवानींक्रमात्पूजयित्वानरेन्द्रोभवेत्स १३ निधिद्वैचपार्श्वद्वयेसंविभाव्यप्रद्
ज्येमहिष्यस्ततोलोकपालाः तदस्त्राणितत्रद्धलाग्रेप्रपूज्यभवस्पार्शसिद्धिंलभेन्मानवोपि १४ क्षितिस्त्वंविधाता
जगत्सृष्टिकर्त्री त्वमापोपिविष्णुर्जगत्पालिकाच त्वमग्निस्तुरुद्रोजगत्क्षोभकर्त्री त्वमैश्वर्ययुक्ताजगद्वायुरूपा
१५ त्वमाद्याशिवेशानुकान्तेश्वरत्पेजगद्व्योमसद्भावमभीषि निराधारगम्याभवस्येकुपुत्र्या त्वमाकाशकल्पाभवानि राम
प्रसीद १६ भवांभोधिमध्येनिपातेवसर्द्धमुनीनाम्स्वर्गर्द्धंकरोसि अजस्त्वांनजानेचिदानंदरूपेप्रकाशस्वरूपेभवानि २०९

१ सुखर्वं

प्रसीद १७ जगत्सां भवत्या जनो मन्दचेता जं यन्ने कलत्रं कवित्वं करोति विचित्र्यस्वरूपं त्वदीयं त्रिलोक्यां लमे दुर्ल्लभं त्वं भवानी प्रसी
द १८ त्वमाधारशक्तिस्त्वमाधेयरूपा जगद्व्यापिका त्वां जगद्व्यापिरूपा अनावरच्च मे दुर्ल्लभं त्वं भवानी प्रसीद १९ त्वमाधारशक्ति
स्त्वमाधेयरूपा जगद्व्या अन्त्युस्त्वं विभुस्त्वं त्वमेवासि विश्वं स्तुतिः का भवत्या जगत्यां विनास्ति तथापि त्वदीया गुणल्पमादि शक्ति स्तु
तिं कर्तुमेवं भवानि प्रसीद २० इदं स्तोत्रमत्यन्त गुह्यं नरा ये पठन्ति त्रिसंध्यं कुलान्ते जपित्वा नते यांम साध्यं त्रिलोकी जनानाल
नन्ते स्वरूपं भवानि प्रसीद २१ इति त्रिपुरास्तोत्रं अथ कवचं देव्युवाच भगवन्सर्वधर्मज्ञ सर्वशास्त्रार्थपारग त्रिशक्ति
पल हम्या अकं कवचं यत्प्रकाशितं सर्वार्थसाधनन्नाम कथमस्व मयि प्रभो ईश्वर उवाच शृणु देवि प्रवक्ष्यामि कवचं परमा
द्भुतं सर्वार्थसाधनं नाम त्रैलोक्ये चाति दुर्ल्लभं सर्वसिद्धिमयं देवि सर्वैश्वर्य्यप्रदायकं पठनाद्धारणान्नरस्त्रैलोक्यैश्वर्य्यभा
गभवेत् सर्वार्थसाधनस्यास्य कवचस्य ऋषिः शिवः छंदो विराट् त्रिशक्तिरूपा जगद्धात्री च देवता धर्म्मार्थकाममोक्षेषु विनियोगः प्रकी
र्त्तितः श्रीं बीजं मे शिरः पातु लक्ष्मीरूपा ललाटकं क्लीं पातु दक्षनेत्रं मे वामनेत्रं सुरेश्वरी ह्रीं पातु दक्षकर्णं मे वामं कामेश्वरी तथा ल
क्ष्मी घ्राणं सदा पातु वदनं पातु केशवः गौरी तु रसनां पातु कंठं पातु महेश्वरः स्कंधदेशं रतिः पातु महेश्वरी कुमारी पृष्ठदेशं मे गुह्यं र

२

तं०व स्ता० रक्षतु वैष्णवी वाराही शक्तिर्यनी पातु चैन्द्री पातु पदद्वयं भार्य्यां रक्षतु चामुण्डा लक्ष्मी रक्षतु पुत्रकान् इन्द्रः पूर्वे सदा पातु आग्नेय्या
२१० मग्निदेवता याम्ये यमः सदा पातु नैरृत्यां निरृतिश्च मां पश्चिमे वरुणः पातु वायव्यां वायुदेवता सौम्ये सोमः सदा पातु ऐशान्यामी
श्वरो विभुः ऊर्द्ध्वे प्रजापतिः पातु अधस्त्वनंतदेवता राजद्वारे श्मशाने च अरण्ये प्रान्तरे तथा जले स्थले चान्तरीक्षे शत्रूणां सङ्कटे
तथा एताभिः सहिता देवी त्रिबीजात्मा महेश्वरी त्रिशक्तिश्च महालक्ष्मीः सर्वत्र मां सदावतु इति ते कथितं देवि सारात्सारतरं परं
सर्वार्थसाधनं नाम कवचं परमाद्भुतं अस्यापि पठनात्सद्यः कुबेरोपि धनेश्वरः इन्द्राद्याः सकला देवाः धारणात्पठनाद्यतः सर्वसि
द्धीश्वराः सन्तः सर्वैश्वर्य्यमवाप्नुयुः पुष्पांजल्यष्टकं दत्वा मूलेनैव पठेत्सकृत् संवत्सरकृतायाश्च पूजायाः फलमाप्नुयात् प्री
तिमन्योन्यतः कृत्वा कमला निश्चला गृहे वाणी च निवसेद्वक्त्रे सत्यं सत्यं न संशयः यो धारयति पुण्यात्मा सर्वार्थसाधनाभिधं
कवचं परमं पुण्यं सोपि पुण्यवतां वरः सर्वैश्वर्य्ययुतो भूत्वा त्रैलोक्यविजयी भवेत् पुरुषो दक्षिणे बाहौ नारी वाम भुजे तथा
बहुपुत्रवती भूत्वा वंध्यापि लभते सुतं ब्रह्मास्त्रादीनि शस्त्राणि नैव कृन्तन्ति ते जनं एतत्कवचमज्ञात्वा यो भजेत्परमेश्वरीं दा राम
रिद्र्यं परमं प्राप्य सो चिरान्मृत्युमाप्नुयात् इति रुद्रयामले त्रिशक्त्या सर्वसाधनं नाम कवचं समाप्तम् ० अथ दुर्गायाः स्त्रा २१०

210

तनानामात्मकस्तोत्रं ईश्वरउवाच शतनामप्रवक्ष्यामिशृणुष्वकमलानने यस्यप्रसादमात्रेण दुर्गाप्रीताभवेत्सती ॐसती
साध्वीभवप्रीताभवानीभवमोचनी आर्यादुर्गाजयाचाद्यात्रिनेत्राशूलधारिणी पिनाकधारिणीचित्राचंद्रघंटामहातपा मनोबुद्धि
रहंकाराचित्तरूपाचिताचितिः सर्वमन्त्रमयीनित्यासत्यानंदस्वरूपिनी अनंताभाविनीभाव्याभव्याहव्यासदायतिः शंभुपत्नीदे
वमाताचिन्तारत्नप्रियासदा सर्वविद्यादक्षकन्यादक्षयज्ञविनाशिनी अपर्णाचैकपर्णाचपाटलापाटलावती पट्टाम्बरपरीधानाक
लमंजीररंजनी अमेयाविक्रमाक्रूरासुंदरीपुरसुंदरी वनदुर्गाचमातंगीमतंगमुनिपूजिता ब्राह्मीमाहेश्वरीचैंद्रीकौमारीवैष्णवीत
था चामुंडाचैववाराहीलक्ष्मीश्चपुरुषाकृतिः विमलोत्कर्षिणीज्ञानाक्रियासत्याचबुद्धिदा बहुलाबहुलप्रेमासर्ववाहनवाह
ना निशुंभशुंभहननीमहिषासुरमर्दिनी मधुकैटभहन्त्रीचचंडमुंडविनाशिनी सुरासुरविनाशाचसर्वदानवघातिनी सर्वशास्त्र
मयीनित्यासर्वशास्त्रधारिणीतथा अनेकशस्त्रहस्ताचअनेकास्त्रस्यधारिणी कुमारीचैवकन्याचकैशोरीयुवतीयतिः अप्रौढा
चैवप्रौढाचवृद्धमाताबलप्रदा यइदंपठतेनित्यंदुर्गानामशताष्टकं नासाध्यंविद्यतेतस्यत्रिषुलोकेषुपार्वति धनधान्यसुतान्जा
याहयंहस्तिनमेवच चतुर्वर्गंतथाचांतेलभेन्मुक्तिंचशाश्वतीं कुमारीपूजयित्वाचध्यात्वादेवींसुरेश्वरी पूजयेत्परयाभक्त्याप

तं० स्ता०
२११

ठं नाम शताष्टकम् तस्य सिद्धिर्भवेद्देवि सर्वैस्तु खवैरपि राज्ञा नोदासतां याति राज्यश्रियमवाप्नुयात् गोरोचनालक्तककुंकुमेन सिंदूरकर्पू
रमधुत्रयेण विलिख्य यंत्रं विधिना विधिज्ञो भवेत्सं सपदांपदं सदा धारयतो पुरारिः भौमावास्यानिशाभागे चन्द्रे शतभिषागते विलिख्य प्र
पठेत्स्तोत्रं स भवेत्संपदांपदं इति विश्वसारतंत्रे दुर्गाशितनामस्तोत्रं समाप्तम् अथ दुर्गाकवचं ईश्वर उवाच शृणु देवि प्रवक्ष्या
मि कवचं सर्वसिद्धिदं पठित्वा धारयित्वा वा नरो मुच्येत संकटात् अज्ञात्वा कवचं देवि दुर्गामंत्रं च यो जपेत् स वाप्नोति फलं तस्य परे च
नरकं व्रजेत् उमा देवी शिरः पातु ललाटं शूलधारिणी चक्षुषी खेचरी पातु कर्णौ चत्वरवासिनी सुगंधा नासिकां पातु वदनं सर्व
साधनी जिह्वां च चण्डिका देवी ग्रीवां सौभद्रिका तथा अशोकवासिनी चेतो द्वौ बाहू वज्रधारिणी हृदयं ललिता देवी उदरं सिंह
वाहिनी कटिं भगवती देवी द्वावूरू विंध्यवासिनी महाबला तु जंघे द्वे पादौ भूतलवासिनी एवं स्थितासि देवि त्वं त्रैलोक्यरक्षणात्मि
के रक्ष मां सर्वगात्रेषु दुर्गे देवि नमोस्तु ते इति कुब्जिकातंत्रे दुर्गाकवचं समाप्तं अथ महिषमर्दिनीस्तोत्रं तदुक्तं कुलचूडामणौ भै
रव उवाच मच्चित्ते चर चण्डि चूर्णितदुराचारप्रचण्डासुरेश्वरं दारय भूरि दुर्धर दरद्रोहोन्मिमर्म्मापदः तेनायं निरुपद्रुतो निरुपमश्रीपारम
दप्राटवी प्राप्तानंतरसार्णवे मम मनो हंसश्चिरं नंदतु १ हित्वा चंडि हिरण्यपदारणपटु प्रोद्दामहस्तांगुलि स्फायात्कनकसुमेरुसोदरस २११

टाटोपं नसिंहं सुराः मातस्त्वत्पत्पुपाशयेषणापटु श्रीपादसंसेविनं सेवंते कविवैरिणं किमरिभिर्भीतिर्भवेत्सेविनः २ चंडित्वद्विषयात्म
रस्तरपदं प्रोत्कान्तरं चेत्कृतं तं नन्वंबुरुहप्रभृतिप्रभुं गतं ब्रह्मादिभिर्गीयते तस्मादेवि समस्तदेवतनुधामसारैकधामस्फुरद्धीमन्न
पादसरोजचुम्बनपरं मामघसंभावय ३ मन्निंदायदिवास्तु तत्कुलयथाचाराद्वरं मास्तु वा कीर्त्तिः केशवकौशिकार्च्चनचरीनैवास्तु स
त्संनिधिः मातर्ब्रह्महरिस्मरारिकुलभुग्देव्यारिसेवास्पदं श्रीमत्पादपयोजचुंबनविधौचित्तंसदेवास्तु नः ४ निर्दिष्टोस्मिय दित्वदीय
पदयुक्स्पर्शापशीभावनेनिर्दिष्टस्य तदागमास्तु विरलं विस्तुसिद्धास्पदं तस्मादेवि कृपाभवांचिततरं श्रीपादपद्मद्वयं मच्चित्तेलतसं
पदंप्रसरतु क्लेशं करिष्यत्वत्ता ५ स्वात्मानं परिरभ्यभजपतिरप्युन्मादमासादितः स्फारं जीवनरक्षणे सचकेतीनैवाभविष्यत्प्रभुः
देवाद्धिच्युतचंद्रचंदनवनप्राशस्त्यवर्ज्जाश्रवन्माध्वीकपद्मं भवत्पदेवकमलामोदेनत्स्वादितः ६ हाहामातरणादिमोहजल
धिव्याहारबुद्धाखिलव्रातानंदवसानिवेगविवसतस्वात्मोदरेमादृशि पुष्पाकंसुरवृंदनिर्भरमनस्तापाभिभूतिक्षमश्रीमद्भक्ति
रसाभिदुर्दिनपरीवाहःसदासर्प्पतु ७ तस्मादस्फुरदंशुजालजरठाचण्डांशुकोटिस्खलद्ध्वान्तस्वान्तविसारिनिर्म्मलचिदानंदत्रयं
देवतांम सर्ज्जसंसृजतेस्थितिं वितनुते सर्वं पुनर्लुंपेत्तेते प्रोद्भिन्नाञ्जननीलनीरदसहक्षिन्नेसदेवास्तु नः ८ पाशस्त्वत्महिषच्छलात्फु

रम्मिलऽर्ज्जद्विधावत्स्खलद्धक्रान्त:प्रसरत्क्रमत्क्रमशिरोदेशंसमालंवते सादुर्ग्गाभयदुर्ग्गतिद्युतालंवान्तरत्रासिनीत्पप्पदेवत
वैरिदानवपटुर्ग्गायाह्लादिनी ९ नृपत्खेटकचामरंचलवल्लनचक्राघायवर्ज्जरवस्फायत्सैन्यशिलीमुखोच्छलदनल्पाज्जिह्वना
स्तम्भुधौकंकाराणविसर्पिनिर्न्नितशिर:साटोपदुष्टासुरत्रुघ्नखड्गविखंडिताखिलशकुन्तन्दृप्तिपिपासोज्वले १० चंचत्कम्प्रविर
मकालकलतीव्रास्फालसंपादकोन्माद्यन्माहिषतिर्यगाननशिर:शृंगांतरालस्थले चक्रत्पोर्घ्रिमुपक्रमध्यकालिनेद्धधाम्युती
मातृभि:सेव्येचादुरणांगनेरणमुदाघूर्ण्णायमानास्मरे ११ उद्बोध:क्रमसव्यवामकरयोश्चक्रदरंकर्त्रिकांखेटंवाणधनुस्त्रिश्
लमयलम्मुद्रांदध्यानांशिवां श्यामांनीलघनौघकुंतलचयप्रोन्यद्धजूटांस्खलच्छीरास्फालल्लसत्करालवदनांघोराट्टहासो
भटी १२ एवंयेतवमूर्त्तिमनघांध्यायन्तिदुर्ग्गादिभि:शक्त्याद्येरभिपूजितांपरपुरक्षोभादिवकुर्वते राज्यंशत्रुजय:सदर्थधिष
णाकाम्यमतादर्शनि: स्तंभोच्चाटनमारणादिकृतिनात्रैवांस्वयंजायते १३ स्तोत्रंतेचरणारविंदयुगलंध्यानावधानाश्रयाम
त्रोद्धारकुलोपचाररचितंगूढोपदिष्टंयदि येप्त्यवन्तियवन्तिदेवितरमाश्रीमोहकामोदयस्तेषांहस्तगताभवन्तिजगतांमातर्न्न राम
मस्तेजय १४ इतिकुलचूडामणौभैरवोक्तमहिषमर्द्दिन्यास्तोत्रंसमाप्तं अथास्या:कवचं अथवक्ष्येमहेशानिकवचंसर्वकामदं २१२

यस्यप्रसादमासाद्य भवेत्साक्षात्सदा शिवः ॐकारं पूर्वमुच्चार्य्य मंत्री मंत्रस्य सिद्धये प्रपठेत्कवचं नित्यं मन्त्रवर्णस्य सिद्धये
महिषमर्दिन्याः कवचस्य भगवान महाकाल ऋषिरनुष्टुप्छंदः आद्याशक्तिर्देवता चतुर्वर्गफलप्राप्तये विनियोगः क्लींपातुमस्त
के देवीकामिनीकामदायिनी मकारेपातुमांदेवीचक्षुर्युग्मेमहेश्वरी हिकारेपातुवदने हिंगुलासुरनायका षकारेपातुमांघ्राणे
जिह्वायांचापराजिता मकारेपातुमांदेवीमर्दिनीसुरनायिका दिकारेपातुमांदेवीसावित्रीकालनाशिनी निकारेपातुमांनित्या
हृदये वामपार्श्वयोः नाभौलिंगेगुदेकंठे कर्णयोः पार्श्वयोस्तथा शिखायांकवचेपादे मुखेजंघायुगेतथा सर्वांगेपातुमांस्वाहा
सर्वशक्तिसमन्विता कामाद्यापातुमांस्वाहा सर्वांगेपातुमर्दिनी दशाक्षरीमहाविद्या सर्वांगेपातुमर्दिनी मर्दिनीपातुसततंमर्दनीर
लयेत्सदा प्रभापातुमहेशानीकनकापातुसर्वदा नंदिनीपातुसततंसुप्रभासर्वदाऽवतु विजयापातुसर्वत्र देव्यांगेनवशक्तयः प्राच्
यः पांतुसततंमुद्राः पांतुसदामम जयापातुसदा स्कन्दमाताविंध्यापातुसर्वदा डाकिन्यः पांतुसततं सिद्धाः पांतुसदामम सर्वत्रसर्व
दापातुदेवीमहिषमर्दिनी इतितेकथितंदिव्यं कवचं सर्वकामदं यत्रतत्रनवक्तव्यंगोपनीयंप्रयत्नतः गोपितंसर्वतंत्रेषुविघ्नसारेप्र
काशितं सर्वत्रसुलभा विद्या कवचं दुर्ल्लभंमहत् शठायभक्तिहीनायनिंदकायमहेश्वरि ऊनांगेऽतिरिक्तांगेवा क्रूरेमिथ्याभिमा

तं० स्ता० बिऐ नत्वं दर्शयेद्दिव्यं कवचं सुरदुर्लभं यत्र तत्र न वक्तव्यं शंकरेण च भाषितं दत्वा तेभ्यो महेशानि नश्यन्ति सिद्धयः ह्सणात् म
२१३ न्त्रः प्राङ्मुखो घ्राणि शिशाय दत्वा सुदक्षिणं अस्तु भ्रं च भवेत्तस्य तस्माद्यत्नेन गोपयेत् गोरोचना कुंकुमेन भूर्जपत्रे महेश्वरि लि
रिवत्वा शुभयोगे च ग्रस्ते द्वौ विधुनोत्तथा आयुष्मान् सिद्धियोगे वा लवे वा कोलवे पिवा विनिजं श्रवणायां चरेवस्यां वा पुनर्वसौ
उत्तरा त्रय योगे षु तथा पूर्वा त्रये षु च अश्विन्यां वा रोहिण्यां वा तृतीया नवमी तिथौ अष्टम्यां वा चतुर्दश्यां षष्ठ्यां वा पंचमी तिथौ
कुह्वां म्यामधिमायां वा निशायां प्रान्तरे तथा एकलिंगे श्मशाने च शून्यागारे शिवालये गुरुणा वै श्रवेर्चा पि स्वयं भूकुसुमै
स्तथा कुक्कैर्वा रक्त पुष्पैर्वा चंदनै रक्त संयुतैः मावां गातो क्षिना वस्त्रे लिखित्वा धारयेत्सुतः तस्य सर्वार्थ सिद्धिः स्याच्छंकरेण
च भाषितं कुमारीं पूजयित्वा च देवीस्तं निवेदयेत् पठित्वा भोजयेद्विप्रान् धनवान् वेदपारगान् आरवेटकमुपाख्यानं कु
मार्यै च दिनत्रयं तदा धरेन्महारक्षां कवचं सर्वकामदं नाधयो व्याधयस्तस्य दुःखशोकभयं क्वचित् वादीमूकोभवत्येव रा
जा च सेवकायते मासमेकं पठेद्यस्तु प्रत्यहं प्रजपेत्सदा षण्मासैर्वा त्रिभिर्मासैः खेचरो भवति ध्रुवं अपुत्रो लभते पुत्रं अधनो
धनवान् भवेत् अरोगी बलवांश्चैव राजा च दासतां मियात् रजस्वलाभगे नित्यं जपेद्विद्यां विधानतः एवं यः कुरुते धीमा २१३

२ नियतः शुचिः दिवा भवेद्धविष्याशी रात्रौ शक्तिपरायणः षट्सहस्रप्रमाणेन प्रत्यहं २

213

स्वयं श्रीसदाशिवः इति विश्वसारतंत्रे महिषमर्द्दिनीकवचं समाप्तम् अथ महालक्ष्मीस्तोत्रं त्रैलोक्यपूजिते देवि क-
मले विष्णुवल्लभे यथा त्वमचला कृष्णे तथा भव मयि स्थिरा: कमला लक्ष्मी चला चला भूतिर्हरिप्रिया पद्मा पद्मालया स-
पद्मैः श्रीयं पद्मधारिणी द्वादशैतानि नामानि लक्ष्मीं संपूज्य यः पठेत् स्थिरा लक्ष्मीर्भवेत्तस्य पुत्रदारादिभिःसह इति ल-
क्ष्मीस्तोत्रं समाप्तं अथाम्बायाः कवचं ईश्वर उवाच अथ वक्ष्ये महेशानि कवचं सर्वकामदं यस्य विज्ञानमात्रेण भवेत्साक्षा-
त्सदाशिवः नार्च्चनं तस्य देवेशि मंत्रमात्रं जपेन्नरः स भवेत्पार्वतीपुत्रः सर्वशास्त्रपुरस्कृतः विद्याकृता थिनासेव्या विशेषेव वि-
ष्णुवल्लभा अस्याश्चतुरक्षरी विष्णुवनितायाः कवचस्य भगवान् श्रीशिव ऋषिरनुष्टुप्छंदो वाग्भवी देवता वाग्भवं बीजं ल-
ज्जाशक्तिरमाकीलकं कामबीजात्मकं कवचं मम सुकवित्वपाण्डित्वसमृद्धिसिद्धिसमृद्धये विनियोगः ऐंकारो मस्तके पातु वाग्भ-
वी सर्वसिद्धिदा ह्रीं पातु चक्षुषोर्मध्ये चक्षुर्युग्मं च शांकरी जिह्वायां मुखवृत्ते च कर्णयोर्दन्तयोर्नसि ओष्ठाधरे दन्तपंक्तौ तालु-
मूले हनौ पुनः पातु मां विष्णुवनिता लक्ष्मीः श्रीवर्णरूपिणी कर्णयुग्मे भुजद्वन्द्वे स्तनद्वंद्वे च पार्वतीति हृदये मणिबंधे च ग्रीवायां
पार्श्वयोर्द्वयोः पृष्ठदेशे तथा गुह्ये वामे च दक्षिणे तथा उपस्थे च नितंबे च नाभौ जंघाद्वये पुनः जानुचक्रे पदद्वन्द्वे घुटिकेङ्गुलिमूलके म-

धातुप्राणशक्त्यात्मसी मम्यांमस्तकेतथा सर्वांगेपातुकामे श्रीमहादेवीसमुन्नतिः व्युष्टिःपातुमहामाया उत्कृष्टिःसर्वदाऽवतु ऋ
तं०स१० द्धिःपातुसदादेवीसर्वत्रशंभुवल्लभा वाग्भवीसर्वदापातुपातुमांभवगेहिनी रमापातुमहादेवीपातुमायास्वराट्स्वयं सर्वांगेपातुमांलक्ष्मीः
२१४ विष्णुमायासुरेश्वरी विजयापातुभवनेजयापातुसदामम शिवदूतीसदापातुसुंदरीपातुसर्वदा भैरवीपातुसर्वत्रभेरूंडासर्वदावतु
त्वरितामांपातुनित्यंउग्रतारासदावतु पातुमांकालिकानित्यंकालरात्रिःसदाऽवतु वनदुर्गासदावतुकामाख्यासर्वदाऽवतु योगिन्यःसर्वदा
पांतुमुद्राःपांतुसदामम मात्राःपांतुसदादेव्यश्चक्रस्थायोगिनीगणाः सर्वत्रसर्वकार्येषु सर्वकर्मसुसर्वदा पातुमांदेवदेवीचलक्ष्मीः
सर्वसमृद्धिदा इतितेकथितंदिव्यंकवचंसर्वसिद्धये यत्रतत्रनवक्तव्यंयदीच्छेदात्मनोहितं शठायभक्तिहीनायनिंदकायमहेश्वरीशून्यां
गेचातिरिक्तांगेदर्शयेन्नकदाचन नस्तवंदर्शयेद्दिव्यंसंदर्श्यशिवहाभवेत् कुलीनायमहेच्छायदुर्गाभक्तिपरायच वैष्णवायविशु
द्धायदद्यात्कवचमुत्तमं निजशिष्यायशान्तायधनिनेकुलिनेतथा दद्यात्कवचमित्युक्तंसर्वतंत्रसमन्वितं शनौमंगलवारेचरक्त
चंदनकेनतथा यावकेनलिखेन्मंत्रंसर्वमंत्रसमन्वितं विलिखेत्कवचंदिव्यंस्वयंभूःकुसुमैःशुभैः स्वशुक्रैःपरशुक्रैश्चनानागंधसमन्वितैः राम
नैः गोरोचनाकुंकुमेनरक्तचंदनकेनवा सुतिथौशुभयोगेवाश्रवणायांरवेर्दिने अश्विन्यांकृत्तिकायांवाफल्गुन्यांवामघासुच सर्वे २१४

भाद्रपदायोगे स्वात्यां मंगलवासरे विलिखेत्प्रपठेत्स्तोत्रं सुभयोगे सुरालये आयुष्मत्प्रीतियोगे च ब्रह्मयोगे विशेषतः इन्द्रयोगे सु-
भे योगे शुक्लयोगे तथैव च कौलदेवालये चैव वह्निजेन्वेवसत्तमः शून्यागारे श्मशाने वा निर्जने च विशेषतः कुमारीः पूजयित्वा च यजेद्दे-
वीं सनातनीं मत्स्यैर्मांसैः शाकसूपैः पूजयेत्परदेवतां घृताद्यैः सोपकारैश्च पुष्पधूपैर्विशेषतः ब्राह्मणान्भोजयित्वा च पूजयेत्परमेश्व-
रीं आखेटकमुखाख्यानं तत्र कुर्याद्दिनत्रयम् तदाधारे महारक्षां शंकरेण प्रभाषितं मारणोच्चाटनादीनि लभन्ते नात्र संशयः सम्भवे
त्पार्वतीपुत्रः सर्वशास्त्रपुरस्कृतः गुरुर्देवो हरः साक्षात्पत्नी तस्य हरप्रिया अभेदेन यजेद्यस्तु तस्य सिद्धिरदूरतः पठति य इदं मन्त्रं
नित्यमार्द्रान्तरात्मा ऊपफलमनुमेयं लभ्यते यद्विशेषम् सम्भवति पदमुच्चैः संपदां पादनम्राः क्षितिपमुकुटलक्ष्मीलक्षणानां चिरा-
य इति विश्वसारतन्त्रे लक्ष्मीकवचं समाप्तं अथ सरस्वतीस्तोत्रं ह्रीं ह्रीं हृद्यैकबीजे शशिरुचिकमले कल्पविस्पष्टशोभे भव्ये भव्य-
ानुकूले कुमतिवनदवे विश्ववन्द्याङ्घ्रिपद्मे पद्मे पद्मोपविष्टे प्रणतजनमनोमोदसंपादयित्रि प्रोत्फुल्लज्ञानकूटे हरिनिजदयिते देवि
सन्सारसारे १ ऐं ऐं ऐं इष्टमन्त्रे कमलभवमुखांभोजभूतेस्वरूपे रूपारूपप्रकाशे सकलगुणमये निर्गुणे निर्विकारे न स्थूले नापि सूक्ष्मेप्य-
विदितविषये नापि विज्ञानतत्त्वे विश्वे विश्वान्तराले सुरवरनमिते निःकले नित्यशुद्धे २ ह्रीं ह्रीं ह्रीं जाप्यतुष्टे हिमरुचिमुकुटे वल्लकीव्यग्र

मार्गे

हस्ते मातर्म्मातर्न्नमस्ते दहदहजडतां देहि बुद्धिं प्रशस्तां विद्ये वेदान्तगीते श्रुतिपरिपठिते मोक्षदे मुक्तिमार्गे मार्गातीतप्रभावे भव मम
वरदा शारदे शुभ्रहारे ३ धींधींधींधारणाख्ये धृतिमतिनतिभिः नामभिः कीर्तिनीये नित्येनित्ये निमित्ते मुनिगणनमिते नूतने वै पु मु
राणे पुण्ये पुण्यप्रवाहे हरिहरनमिते नित्यशुद्धे सुवर्णे मातर्मात्रार्धतत्वे मममतिदे माधवप्रीतिदाने ४ क्लीं क्लां क्लीं क्लीं स्वस्वरूपे दहद
हदुरितं पुस्तकाव्यग्रहस्ते संतुष्टाकारचित्ते स्मितमुखि सुभगे जृंभनिस्तंभविद्ये मोहे मुग्धप्रवाहे कुरु मम विमतिध्वान्तविध्वंसमीडे गी
र्गौर्वाग्भारती त्वं कविवरवदनासिद्धिदा सिद्धिसाध्या ५ स्तौमि त्वां त्वां च वन्दे भज मम रसनां मा कदाचित्त्यजेथाः मा मे बुद्धिर्विरुद्धा
मे भवतु न च मनो देवि मे यातु पापं मा मे दुःखं कदाचिद्विपदि च समयेप्यस्तु मे नाकुलत्वं शास्त्रे वादे कवित्वे प्रसरतु मम धीः मास्तु कुं
ठा कदाचित् ६ इत्येतैः श्लोकमुख्यैः प्रतिदिनमुषसि स्तौति यो भक्तिनम्रो वाणी वाचस्पतेरप्यभिमतविभवो वाक्पटुर्मृष्टकंठः
स स्यादिष्टार्थलाभी सुतमिव सततं पाति तं सा च देवी सौभाग्यं तस्य लोके प्रसरति कविता विघ्नमस्तं प्रयाति ७ ब्रह्मचारी व्रती मौनी त्रयोदश्यां
निरामिषः सारस्वतो नरः पाठात् स स्यादिष्टलाभवान् ८ पक्षद्वये त्रयोदश्यामेकविंशतिं अविच्छिन्नं पठेद्धीमान् ध्यात्वा देवीं स राम
रस्वतीं शुक्लाम्बरधरां देवीं शुक्लाभरणभूषितां वांछितं फलमाप्नोति स लोके नात्र संशयः इति ब्रह्मणा कृतं स्वयं सरस्वत्याः स्त २१५

वः शुभः प्रयत्नेन पठेन्नित्यं सोमृतत्वं च गच्छति ॥ इति सरस्वतीस्तोत्रं समाप्तम् ॥ अथ गणेशस्तोत्रं ॥ ॐकारमाद्यं प्रवदन्ति सन्तो वा
चः श्रुतीनामपि यं गृणन्ति । गजाननं देवगणानतांघ्रिं भजेहमर्द्धेन्दुकृतावतंसं ॥ १ ॥ पादारविन्दार्चनतत्पराणां संसारदावानलभङ्गद
क्षं निरन्तरं निर्गतदानतोयैस्तं नौमि विघ्नेश्वरमम्बुदाभम् ॥ २ ॥ कृताङ्गरागं नवकुङ्कुमेन मत्तालिमालां मदपङ्कलग्नां निवारयन्तं नि
जकर्णजालैः को विस्मरेत्पुत्रमनङ्गशत्रोः ॥ ३ ॥ शंभोर्जटाजूटनिवासिगंगाजलं समानीय कराम्बुजेन लीलाभिराराच्छिवमर्चयन्तं ग
जाननं भक्तियुता भजन्ति ॥ ४ ॥ कुमारभुक्तौ पुनरात्महेतोः पयोधरौ पर्वतराजपुत्र्याः प्रक्षालयन्तं करशीकरेण मौग्ध्येन तं नागमुखं
भजामि ॥ ५ ॥ त्वया समुद्धृत्य गजास्यहस्तं ये शीकराः पुष्करसंप्रयुक्ताः व्योमाङ्गणे ते विचरन्ति ताराः कालात्मना मौक्तिकतुल्यभासः ॥ ६ ॥
क्रीडारते वारिनिधौ गजास्ये वेलामतिक्रामति वारिपूरे कल्पावसानं परिचिन्त्य देवाः कैलासनाथं स्तुतिभिस्तुवन्ति ॥ ७ ॥ ना
गाननेनागकृतोत्तरीये क्रीडारते देवकुमारसंघैः त्वयि क्षणं कालगतिं विहाय तौ प्रापतुः कन्दुकतामिवेन्दू ॥ ८ ॥ मदोल्लसत्पञ्चमुखै
रजस्रम् अध्यापयन्तं सकलागमार्थान् देवानृषीन्भक्तजनैकमित्रं हेरम्बमर्कारुणमाश्रयामि ॥ ९ ॥ पादाम्बुजाभ्यामतिवामनाभ्यां कृ
तार्थयन्तं कृपया धरित्रीम् अकारणं कारणमाप्तवाचां तन्नागवक्त्रं न जहाति चेतः ॥ १० ॥ येनार्पितं सत्यवतीसुताय पुराणमालिख्य विषा

नं०स्ता० २१६

एकोद्या तंचन्द्रमौलेस्तनयंतपोभिराराध्यमानन्दघनंभजामि ११ पदंश्रुतीनामपदंस्तुतीनांलीलावतारंपरमात्ममूर्तेः नागात्म
कोवापुरुषात्मकोवाऽभेद्यमाद्यंभजविघ्नराजं १२ पाशांकुशौभुग्नरदंत्वभीष्टंकरैर्दधानंकरवक्त्रमुक्तैः मुक्ताफलाभैःपृथु
शीकरौघैःसिंचन्तमंगंशिवयोभजामि १३ अनेकमेकंगजदेकदन्तंचैतन्यरूपंजगदादिवीजं ब्रह्मेतियंवेदविदोवदन्तितंशंभुसू
नुंसततंभजामि १३ अनेकमेकंगजदेकदन्तंचैतन्यरूपंजगदादिवीजं ब्रह्मेतियंवेदविदोवदन्तितंशंभुसूनुंसततंभजामि १४
स्वाङ्कस्थितायानिजवल्लभायामुखाम्बुजालोकनलोलनेत्रं स्मराननाङ्गंमदवैभवेनरूढंभजेविघ्नविमोहयन्तं १५ ये
पूर्वमाराध्यगजाननत्वांसर्वाणिशास्त्राणिपठन्तितेषां त्वत्तोनचान्यत्प्रतिपाद्यमस्तितदस्तिचेत्सत्यमसत्यकल्पं १६ हिरण्य
वर्णंजगदीशितारंकविंपुराणंरविमंडलस्थं गजाननंयंप्रवदन्तिसन्तस्तत्कालयोगैस्तमहंभजामि १७ वेदान्तगीतंपुरुषं
भजेहमात्मानमानन्दघनंहृदिस्थं गजाननंयन्महसाजनानांविघ्नान्धकारोविलयंप्रयाति १८ शंभोसमालोक्यजटाक
लापेशशांकखंडंकरपुष्करेण स्वभग्नदन्तंप्रविचिन्त्यमौग्ध्यादाक्रष्टुकामःश्रियमातनोतु १९ विघ्नार्गलानांविनिपातनार्थं राम
यंनारिकेलैःकदलीफलाद्यैः प्रभावयन्तोमदवारणास्यप्रापुर्नरोभीष्टमहंभजेतं २० यद्वीरणेकेर्धद्रुभिस्तपोभिराराध्य २१६

अतःपरंपत्राणि १ त्रुटिः

माघंगजराजवक्त्रं स्तुत्वानयायेविधिवत्स्तुवन्तितेसर्व्वलक्ष्मीनिलयोभवन्ति २१ इतिगणेशस्तवराजःसमाप्तः अथ
हारिद्रगणेशकवचं ईश्वरउवाच शृणुवक्ष्यामिकवचंसर्व्वसिद्धिकरंप्रिये पठित्वापाठयित्वाचमुच्यतेसर्व्वशंकरात् १
अज्ञात्वाकवचंदेविगणेशस्यमनुंजपेत् सिद्धिर्न्नजायतेतस्यकल्पकोटिशतैरपि ॐआमोदश्चशिरःपातुप्रमोदश्चशि
खोपरि संमोदोभ्रुयुगेपातुभ्रुमध्येचगणाधिपः गणक्रीडश्चक्षुर्युग्मंनासायांगणनायकः गणक्रीडान्वितःपातुवदनेसर्व
दामम जिह्वायांसुमुखःपातुग्रीवायांदुर्मुखःसदा विघ्नेशोहृदयपातुविघ्ननाथश्चवक्षसि गणानांनायकःपातुबाहु
युग्मेसदामम विघ्नकर्त्ताचउदरेविघ्नहर्त्ताचलिंगके गजवक्त्रःकटीदेशेएकदन्तोनितम्बके लंबोदरःसदापातुगुह्यदेशे
ममारुणः व्यालयज्ञोपवीतानांपातुपादयुगेसदा जापकःसर्वदापातुजानुजंघेगणाधिपः हारिद्रःसर्व्वदापातुसर्वा
ङ्गेगणनायकः यइदंप्रपठेन्नित्यंगणेशस्यमहेश्वरि कवचंसर्वसिद्धाख्यंसर्वविघ्नविनाशनं सर्वसिद्धिकरंसाक्षात्सर्व
पापविमोचनम् सर्व्वसंपत्करंसाक्षात्सर्वशत्रुक्षयंपरं ग्रहपीडाज्वरारोगायेचान्येगुह्यकादयः पठनाद्धारणादेवना
शमायांतितत्क्षणात् धनधान्यकरंदेविकवचंसुरपूजितं समोनास्तिमहेशानित्रैलोक्येकवचस्यच हारिद्रस्यमहेशा

तं० क्षा० निकवचस्य चर्म्मतले किमन्यैरसदालापैर्यत्रायुर्व्यर्थतामियात् इति विश्वसारतंत्रे हारिद्रगणेशकवचं समाप्तं अथ
२२१ सूर्य्यस्य कवचं श्रीसूर्य उवाच शाम्ब शाम्ब महावाहो शृणु मे कवचं शुभं त्रैलोक्यमंगलं नाम कवचं परमाद्भुतं य
ज्ज्ञात्वा मंत्रवित् सम्यक् फलमाप्नोति निश्चितं यद्धृत्वा च महादेवो गणनामधिपो भवेत् पठनाद्धारणाद्विष्णुः सर्व्वेषां पा
लकः सदा एवमिन्द्रादयः सर्व्वे सर्व्वैश्वर्यमवाप्नुयुः कवचस्य ऋषिर्ब्रह्मा छन्दोनुष्टुबुदाहृतं श्रीसूर्यो देवता चात्र सर्व्वदेवन
मस्कृतः आरोग्ययशमोक्षेषु विनियोगः प्रकीर्त्तितः प्रणवो मे शिरः पातु घृणिर्मे पातु भालकं सूर्य्योव्यान्नयनद्वन्द्वमादि
त्यः कर्णयुग्मकं अष्टाक्षरो महामंत्रः सर्व्वाभीष्टफलप्रदः ह्रीं बीजं मे मुखं पातु हृदयं भुवनेश्वरी चंद्रबीजं विसर्गाढ्यं पातु मे गु
ह्यदेशकं अक्षरोसौ महामंत्रः सर्व्वतंत्रेषु गोपितः शिवो वह्निसमायुक्तो वामाक्षिविंदुभूषितः एकाक्षरो महामंत्रः श्रीसू
र्य्यस्य प्रकीर्त्तितः गुह्याद्गुह्यतरो मंत्रो वाञ्छाचिन्तामणिः स्मृतः शीर्षादिपादपर्य्यन्तं सदा पातु मनूत्तमः इति ते कथितं दि
व्यं त्रिषु लोकेषु दुर्ल्लभं श्रीप्रदं कान्तिदं नित्यं धनारोग्यविवर्द्धनं कुष्ठादिरोगशमनं महाव्याधिविनाशनं त्रिसंध्यं यः पठेन्नि राम
त्यं अरोगी बलवान् भवेत् बहुना किमिहोक्तेन यद्यन्मनसि वर्त्तते तत्तत्सर्वं भवत्येव कवचस्य च धारणात् भूतप्रेतपिशाचाश्च य २२१

रगंधर्वराक्षसाः ब्रह्मराक्षसवेतालानैव दृष्टुमपि क्षमाः दूरादेव पलायन्ते तस्य संकीर्त्तनादपि भूर्य्यपत्रे समालिख्य रोचना
गुरुकुंकुमैः रविवारे च संक्रान्त्यां सप्तम्यां च विशेषतः धारयेत्साधकश्रेष्ठस्त्रैलोक्यविजयी भवेत् त्रिलोहमध्यगं कृत्वा
धारयेद्दक्षिणे भुजे स्त्रियो वामभुजे कण्ठे सोपि सूर्य्यो न संशयः इति ते कथितं ब्रह्मन् त्रैलोक्यमंगलाभिधं कवचं दुर्लभं लो
के तव स्नेहात्प्रकाशितं अज्ञात्वा कवचं दिव्यं यो जपेत्सूर्य्यमुत्तमं सिद्धिर्न्न जायते तस्य कल्पकोटिशतैरपि इति ब्रह्मयाम
ले त्रैलोक्यमंगलं नाम श्रीसूर्य्यकवचं समाप्तं अथ विष्णुस्तोत्रं आदाय वेदान्सकलान्समुद्रान्निहत्य शंखं रिपुमत्युदग्रं
दत्ताः पुरा येन पितामहाय विष्णुं तमाद्यं भज मत्स्यरूपं दिव्यामृतार्थं मथिते महाब्धौ देवासुरैर्वासुकिमन्दराद्यैः भूमेर्महावे
गविघूर्णितायास्तं कूर्म्ममाधारगतं नमामि २ समुद्रकांचीसरिदुत्तरीया वसुंधरा मेरुकिरीटभारा दंष्ट्रायतो येन समुद्धृ
ता भूस्तमादिकोलं शरणं प्रपद्ये ३ भक्तार्त्तिभंगक्षमया धिया यः स्तंभान्तरालादुदितो नृसिंहः रिपुं सुराणां निशितैर्नखा
ग्रैः विदारयंस्तं न च विस्मरामि ४ चतुःसमुद्राभरणा धरित्री न्यासाय नालं चरणस्य यस्य एकस्य नान्यस्य पदं सुराणां त्रिविक्रमं
सर्वगतं नमामि ५ त्रिःसप्तवारं नृपतीन्निहत्य यस्तर्प्पणं रक्तमयं पितृभ्यः चकार दोर्द्दण्डबलेन सम्यक् तमादिशूरं प्रण

सादिता २

तं०स्ता० मामिविष्णुं ६ कुलेरघूणांसमवाप्यजन्मविधायसेतुंजलधेर्जलान्तः लंकेश्वरंयःशमयांचकारसीतापतिंतंप्रण
२१८ मामिभक्त्या ७ हलेनसर्वानसुरानविलक्ष्यचकारचूर्णंमुसलप्रहारैः यःलक्ष्ममासाद्यबलंवलीयान्भक्त्याभजेतं
वलभद्ररामं ८ पुरासुराणामसुरान्विजेतुंसंभावयंश्चीवरचिह्नवेशं चकारयःशास्त्रममोघकल्पंतंमूलभूतंप्रण
तोस्मिवुद्धं ९ कल्पावसानेनिखिलैःखुरैःस्वैःसंघट्टयामासनिमेषमात्रात् ० यस्तेजसानिर्दहनातिभीमोविश्वात्मकं
तंतुरगंभजामि १० शखंसुचक्रंसुगदांसरोजंदोर्भिर्दधानंगरुडाधिरूढं श्रीवत्सचिह्नंजगदादिमूलंतमालनीलंहृ
दिविष्णुमीडे ११ क्षीराम्बुधौशेषविशेषतल्पेशयानमन्तःस्मितशोभिवक्त्रं उत्फुल्लनेत्राम्बुजमंबुदाभमाद्यंश्रुतीना
मथाहंस्मरामि १२ प्रीणयेदनयास्तुत्याजगन्नाथंजगन्मयं धर्म्मार्थकाममोक्षाणामाप्तयेपुरुषोत्तमम् इतिश्री
विष्णुस्तोत्रं अथरामस्तोत्रं हनुमानउवाच तिरस्कृतामपिराज्ञेतिसमवाययंसमीयुषा यथासुग्रीवमुख्यानांयस्त
मुग्रंनमाम्यहं सकृदेवप्रपन्नायविशिष्टामैवयःश्रियं विभीषणायाब्धि- तटेयस्तंवीरंनमाम्यहम् योमहान्पुरुषोराम
वापीमहाश्चैःकरुणामतःस्तुतंयेनजरायोस्तमहाविष्णुंनमाम्यह ३ तेजसाक्रापितायस्यज्वलज्जिह्वलनादयः प्रका २१८

भक्तेस्तुतं त्रोधंतं ज्वलन्तं नमाम्यहं ४ सर्वतोमुखतोयेन लीलया दलिताररौ राक्षसेश्वरयोधानां तं सर्वेषं सर्वतोमुखं ५ न
भावन्तु प्रपन्नानां हिनस्ति च तथान्येषु सिंहः संवेष्टितो हृष्टः तं नसिंहं नमाम्यहम् ६ यस्माद्बिभ्यति वातार्कज्वल
नेन मृत्युपवः भियस्सन्ति पापानां भीषणं तं नमाम्यहं ७ परस्य योग्यताये त्वारहितो निजमंगलं ददात्येव नियोद
र्घ्योयस्तं भद्रं नमाम्यहं ८ यो मृत्युं निजदासानां मारयत्यखिलेष्टदः तत्रोदाहृतयो र्ध्व द्धो भक्तमृत्युं नमाम्यहं ९
यत्पादपद्मप्रणतो भवत्युत्तमपूरुषः तमीशं सर्वदेवानां नमनीयं नमाम्यहं १० आत्मभावं समुत्क्षिप्य दास्येनैव रघू
त्तमं भजेहं प्रत्यहं रामं ससीतं सहलक्ष्मणं ११ नित्यं श्रीरामभक्तस्य किंकरा यम किंकराः शिवमय्यो दिशस्तस्य सिद्ध
यस्तस्य दासिका १२ इमं हनुमता प्रोक्तं मंत्रराजात्मकं स्तवं पठेदनुदिनं यस्तु स रामे भक्तिमान् भवेत् १३ इति हनुम
त्कल्पे मंत्रराजात्मकः स्तवराजः समाप्तः अथ रामाष्टशतनामकम् वेदव्यास उवाच शृणु गांगेय वक्ष्यामि राम
स्याद्भुतकर्म्मणः नामाष्टशतकं पुण्यं त्रिषु लोकेषु विश्रुतं नातः परतरं गुह्यं त्रिषु लोकेषु विद्यते कैलासशिखरे र
म्ये नानारत्नविचित्रिते एकाग्रप्रयतो भूत्वा विष्णुमाराधयंस्तदा उपविष्टं ततो भोक्तुं पार्वती शंकरोब्रवीत् पार्वत्योहि

नं व मा० २१९ 219
मयासार्द्धं भो नृभुवनवन्दिते तमाह पार्वती देवी जप्यानामसहस्रकं ततो भो स्वाम्यहं देव भुज्यतां भवता प्रभो ततस्तां पार्व
तीं प्राह प्रहसन्परमेश्वरः धन्यासि लत्तपुण्यासि विष्णुभक्तासि पार्वति दुर्लभा वैष्णवी भक्तिर्भागधेयं विनेश्वरि रकारादी
नि नामानि शृण्वतो मम पार्वति मनः प्रसन्नतामेति रामनामाभिशंकया रमन्ते योगिनोऽनन्ते समपानन्दे चिदात्मनि इ
ति रामपदेनासौ परब्रह्माभिधीयते रामरामेति रामेति रमे रामे मनोरमे सहस्रनामभिस्तुल्यं रामनाम वरानने रामेत्यु
क्त्वा महादेवि भुङ्क्ष्व सार्द्धं मयाधुना ततो रामेति नामोक्त्वा सह भुक्त्वा तु पार्वती ततो भुक्त्वा महादेवी पतिना सह संस्थि
ता पप्रच्छ श्रीमहादेवं प्रीतिप्रवणमानसा सहस्रनामभिस्तुल्यं रामनाम त्वयोदितम् तस्यान्यान्यपि नामानि सं
ति चेत्तावद्विधः कथ्यतां मम देवेश तत्र मे प्रीतिरुत्तमा श्रीशंकर उवाच लौकिका वैदिकाः शब्दाः ये केचित्सं
ति पार्वति नामानि रामभद्रस्य सहस्रं तेषु चाधिकं तेषु चास्य तु मुख्यानि नाम्नामष्टोत्तरं शतं विष्णोरेकैकनामानि स
र्ववेदाधिकं फलं तादृङ्नामसहस्रेषु रामनाम शतं महत् ऊपतः सर्ववेदांश्च सर्वमन्त्रांश्च पार्वति तस्मात्कोटिगुणं पुण्यं राम
रामनाम्नैव लभ्यते अस्य श्रीरामाष्टोत्तरशतनामामीश्वर ऋषिरनुष्टुप्छन्दः श्रीरामचन्द्रो देवता श्रीरामचन्द्रप्रीत्यर्थे वि २१९

नियोगः श्रीरामो रामभद्रश्च रामचंद्रश्च शाश्वतः राजीवलोचनः श्रीमान् राजेंद्रो रघुपुंगवः जानकीवल्लभो जैत्रो
२ जितामित्रो जनार्दनः विश्वामित्रप्रियो दान्तः शरणत्राणतत्परः वलिप्रमथनो वाग्मी सत्यवाक् सत्यविक्रमः सत्य
व्रतो व्रतफलः सदा हनुमदाश्रयः कौशलेयः खरध्वंसी विराधवधपण्डितः विभीषणपरित्राता दशग्रीवशिरोह
रः सप्ततालप्रभेत्ता च हरकोदण्डखंडनः योमदग्न्यमहादर्पज्वलनस्ताडकांतकः वेदान्तसारो हरः सप्ततालप्र
भेत्ता हरकोदण्डखंडनः यामदग्न्यमहादर्पज्वलनस्ताडकांतकः वेदांतसारो वेदात्मा भववैद्यश्च भेषजः दूष
णत्रिशिरोरिश्च त्रिमूर्त्तिस्त्रिगुणस्त्रयी त्रिविक्रमस्त्रिलोकात्मा पुण्यचारित्र्यकीर्त्तनः त्रिलोकीरक्षको धन्वी
दंडकारण्यपुण्यकृत् अहल्यापावनश्चैव पितृभक्तो वरप्रदः जितेंद्रियो जितक्रोधो जितलोभो जगद्गुरुः ऋ
क्षवानरसंघाती चित्रकूटपदाश्रयः जयन्तत्राणवरदः सुमित्रापुत्रसेवितः सर्वदेवाधिदेवश्च मृतवानरजीवनः
महामारीचहर्त्ता च महाभागो महाभुजः सर्वविदस्तुतः सौम्यो ब्रह्मण्यो मुनिसंस्तुतः महायोगी महोदारः सुग्रीवेप्सितरा
ज्यदः सर्वपुण्याधिकफलः तीर्थः सर्वाघनाशनः आदिपुरुषो महापुरुषः परमपुरुषस्तथा पुण्योदयो दयासारः पुरा

रा०स्ता० ल:पुरुषोत्तमः स्मितवक्त्रो मितभाषी पूर्वभाषी च राघवः अनन्तगुणगम्भीरो धीरोदात्तगुणोत्तरः मायामानुष
२२० चारित्रो महादेवादिपूजितः सेतुकृज्जितवारीशः सर्वतीर्थमयो हरिः श्यामाङ्गः सुन्दरः शूरः पीतवासा धनुर्धरः सर्व
यज्ञाधिपो यज्वा जरामरणवर्जितः शिवलिङ्गप्रतिष्ठाता सर्वाघगणवर्जितः परमात्मा परं ब्रह्म सच्चिदानन्दविग्रहः
परं ज्योतिः परं धाम पराकाशः परात्परः परेशः पारगः पारः सर्वदेवात्मकः शिवः ॐ इत्येतस्य रामभद्रस्य नाम्नामष्टोत्त
रशतं गुह्याद्गुह्यतरं देवि तव प्रीत्या प्रकीर्तितं यः पठेच्छृणुयाद्वापि भक्तियुक्तेन चेतसा स सर्वैर्मुच्यते पापैः कल्पको
टिसमुद्भवैः जलानि स्थलतां यान्ति शत्रवो यान्ति मित्रतां राजानो दासतां यान्ति वह्नयो यान्ति सौम्यतां आनुकूल्यं
च भूतानि स्थैर्यं यान्ति चलाः श्रियः अनुग्रहं ग्रहा यान्ति शान्तिमायान्त्युपद्रवाः पठतो भक्तिभावेन जनस्य गिरिसं
भव यः पठेत्प्रयतो भूत्वा तस्य वश्यं जगत्त्रयं यद्यत्कामयते चित्ते तत्तदाप्नोति कीर्तनात् यः पठेद्रामचन्द्रस्य नाम्ना
मष्टोत्तरं शतं स्नानेनापि च कुर्वाणो न स पापेन लिप्यते सर्ववेदेषु तीर्थेषु दानेषु च तपःसु च तत्फलं कोटिगुणितं तस्य वै राम
नानेन लभ्यते अन्तकालेऽपि सर्वेषु पठन्नाम न तत्समश्नुते कल्पकोटिसहस्राणि कल्पकोटिशतानि च वैकुण्ठे वासमाप्नोति २२०

दशाष्टधैर्दशापरैः रामंदूर्वादलश्यामंपद्माक्षंपीतवाससं स्तुवंतिनामभिर्दिव्यैर्न्नतेसांसारिणोनराः रामायरामचंद्राय
रामभद्रायवेधसे रघुनाथायनाथायसीतायाःपतयेनमः इमंमंत्रंमहेशानिजपन्नेवदिवानिशं सर्व्वपापवि
निर्म्मुक्तोविष्णुसायुज्यमाप्नुयात् इत्येतद्रामचंद्रस्यमाहात्म्यंवेदसम्मितं कथितंतवगांगेययतस्त्वंवैष्णवोत्तमः
वन्दामहेमहेशानिहरकोदण्डखंडनं जानकीहृदयानंदवर्द्धनंरघुनंदनं इतिपद्मपुराणेपार्व्वतीश्वरसंवादेश्री
रामचंद्राष्टशतनामस्तवराजःसमाप्तः अथश्रीरामकवचंध्यात्वानीलोत्पलश्यामंरामंराजीवलोचनं जा
नकीलक्ष्मणोपेतंजटामुकुटमंडितं सासितूणधनुर्बाणपाणिनक्तंचरान्तकं स्वलीलयाजगत्त्रातुमाविर्भूतमजंवि
भुं रामरक्षांपठेत्प्राज्ञःपापघ्नींसर्वकामदां अस्यश्रीरामकवचस्यकौशिकऋषिरनुष्टुप्छंदःश्रीरामोदेवताश्रीरा
मकवचपाठेविनियोगः ॐशिरोमेराघवःपातुभालंदशरथात्मजः कौशल्येयोदृशौपातुविश्वामित्रप्रियःश्रुती
घ्राणंपातुमखत्राताभुखंसौमित्रिवत्सलः जिह्वांविद्यानिधिःपातुकंठंभरतवंदितः स्कंधौदिव्यायुधःपातुभुजौ
भग्नेशकार्म्मुकः करौसीतापतिःपातुहृदयंयामदग्न्यजित् वक्षःपातुकवन्धारिःस्तनौगीर्वाणवंदितः पार्श्वौकुल

नंवसा व
२२१

पतिः पातु कुक्षिमिक्ष्वाकुनंदनः मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रयः गुह्यं जितेंद्रियः पातु पृष्टं पातु रघूद्वह सुग्री
वेशः कटिं पातु शक्थिनी हनुमत्प्रभुः ऊरू रघूत्तमः पातु रक्षःकुलविनाशकृत् जानुनी सेतुकृत्पातु जंघे दशमुखांत
कः पादौ विभीषणश्रीदः पातु रामोऽखिलं वपुः एतां रामबलोपेतां रक्षां यः सुकृती पठेत् स चिरायुः सुखी पुत्री विज
यी विनयी भवेत् पातालभूतलव्योमचारिणः छद्मचारिणः न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः रामेति रा
मचंद्रेति रामभद्रेति वा स्मरेन् नरो न लिप्यते पापैर्भुक्तिं मुक्तिं च विंदति जगज्जैत्रैकमंत्रेण रामनाम्नाभिरक्षितं
यः कंठे धारयेत्तस्य करस्थाः सर्वसिद्धयः भूर्जपत्रे त्विमां विद्यां घृतकुंकुमचर्चितां कृत्वा वै धारयेद्यस्तु सोऽभीष्टफ
लमाप्नुयात् काकवंध्या च या नारी मृतवत्सा च या भवेत् वंध्यापत्या जीववत्सा सा च स्यान्नात्र संशयः वज्रपंजर
नामेदं यो रामकवचं पठेत् अव्याहताज्ञः सर्वत्र लभते जयमंगलं आदिष्टवान्यथा स्वप्ने रामरक्षामिमां हरिः तथा
लिखितवान् प्रातः प्रबुद्धो बुधकौशिकः धन्विनौ बद्धनिस्त्रिंशौ काकपक्षधरौ शुभौ वीरौ मां पथि रक्षतां तावुभौ राम राम
लक्ष्मणौ तरुणौ रूपसंपन्नौ सुकुमारौ महाबलौ पुंडरीकविशालाक्षौ चीरकृष्णाजिनांबरौ फलमूलाशिनौ दांतौ ना २२१

पन्नौ ब्रह्मचारिणौ पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ शरण्यौ सर्वसत्त्वानां श्रेष्ठौ सर्वधनुष्मतां रक्षःकुलनिहन्ता
रौ त्रायेतां नौ रघूत्तमौ आत्तसज्यधनुषाविषुस्पृशावक्षयाशुगनिषंगसंगिनौ रक्षणाय मम रामलक्ष्मणावग्रतः पथि सदैव
गच्छतां सन्नद्धः कवची खड्गी चापबाणधरो युवा गच्छन्मनोरथोऽस्माकं रामः पातु सलक्ष्मणः अग्रतो नृसिंहो मे पृष्ठतो
गरुडध्वजः पार्श्वयोस्तु धनुष्पाणी सशरौ रामलक्ष्मणौ रामो दाशरथिः शूरो लक्ष्मणानुचरो बली काकुत्स्थः पुरुषः
पूर्णः कौशल्येयो रघूत्तमः वेदान्तवेद्यो यज्ञेशः पुराणः पुरुषोत्तमः जानकीवल्लभः श्रीमान् अप्रमेयपराक्रमः इत्ये
तानि जपेन्नित्यं मद्भक्तो यः सदा पठेत् अश्वमेधायुतं पुण्यं संप्राप्नोति न संशयः आपदामपहर्तारं दातारं सर्वसंपदां
गुणाभिरामं श्रीरामं भूयो भूयो नमाम्यहं दक्षिणे लक्ष्मणो धन्वी वामतो जानकी शुभा पुरतो मारुतिर्यस्य तं नमामि
रघूत्तमं इति पद्मपुराणे वज्रपंजरनाम रामकवचं समाप्तं अथ श्रीकृष्णस्तोत्रं प्रसीद भगवन्मह्यमज्ञानात्कुं
ठितात्मने तवांघ्रिपंकजरजोरागिणीं भुक्तिमुत्तमां १ अज प्रसीद भगवन्नमितद्युतिपंजर अप्रमेय प्रसीदास्मद्दुःख
हा पुरुषोत्तमः २ असंवेद्य प्रसीदास्मदानंदात्मन्ननामय अचिन्त्यसार विश्वात्मन् प्रसीद परमेश्वर ३ प्रसीद तुंगतुंगा

गं ० सा० नां प्रसीद गिरिवशोभन प्रसीद त्वं भगं भीरणां भीराणां महाद्युते प्रसीद व्यक्त विस्तीर्ण विस्तीर्ण नामगोचर प्रसीदार्द्रार्द्र जाती
२२२ नां प्रसीदात्तात्तयाविनां ५ गुरोर्गुर्जरीयान्त्रद्देवेश प्रसीदानन्ददेहिनां जयमाधवमायात्मन् जयशाश्वतचक्रभृत् ६ जयशं
खधर श्रीमान् जयनंदकनन्दन जय चक्रगदापाने जयदेव जनार्दन ७ जयरत्नवराबद्धकिरीटाक्रान्तमस्तक जयपक्षि
सा पतिच्छायानिरुद्धार्ककिरणे ८ नमस्ते नरकाराते नमस्ते मधुसूदन नमस्ते ललितापांग नमस्ते नरकान्तक ९ न
मः पापहरेशान नमः सर्वभयापह नमः संभृतसर्वात्मन् नमः संभृतकौस्तुभ १० नमस्ते नयनातीत नमस्ते भयहारक
नमो विभिन्नदेहाय नमः श्रुतिपथातिग ११ नमस्त्रिमूर्त्तिभेदेन सर्गस्थित्यन्तहेतवे विष्णवे त्रिदशारातिजिष्णवे पर
मात्मने १२ चक्रभिन्नारिचक्राय चक्रिणे चक्रबान्धवे विश्वाय विश्ववन्द्याय विश्वभूतात्मवर्त्तिने १३ नमोऽस्तु योगि
ध्येयायात्मन् नमस्त्वध्यात्मरूपिणे भक्तिप्रदाय भक्तानां नमस्ते मुक्तिदायिने १४ जपनं हवनं चेष्टा ध्यानं पूजनसत्क्रि
या देवेश कर्म सर्वं मे भवेदाराधनं तव १५ इति हवनजपार्च्चाभेदतो विष्णुपूजानियतहृदयकर्मा यस्तु मंत्री चिराय राम
स खलु सकलकामान्प्राप्य कृष्णान्तरात्मा जननमृतिविमुक्तात्युत्तमां मुक्तिमेति गोगोपिगोपिकावीतं गोपालं गोषु २२२

गोचरं गोगो विद्यं गोसहस्रैर्न्नौमि गोकुलनायकं ॥ अथ गोपालस्तोत्रम् ॥ नवीननीरदश्यामं नीलेन्दीवरलोचनं वल्लवीनंद
नं वंदे कृष्णं गोपालरूपिणं स्फुरद्बर्हिदलोद्बद्धनीलकुंचितमूर्धजं कदम्बकुसुमोद्बद्धवनमालाविभूषितं गंडमण्डलसंसर्गिच
लत्कांचनकुंडलं स्थूलमुक्ताफलोदारहारोद्योतितवक्षसं हेमांगदतुलाकोटिकिरीटोज्वलविग्रहं मंदमारुतसंक्षोभवलि
ताम्बरसंचयं रुचिरौष्ठपुटन्यस्तवंसीमधुरनिस्वनैः लसद्गोपालिकाचेतोमोहयन्तंमुहुर्मुहुः वल्लवीवदनाम्भोजमधुपान
मधुव्रतं क्षोभयन्तंमनस्तासांसस्मेरापांगवीक्षणैः यौवनोद्भिन्नदेहाभिः संसक्ताभिः परस्परं विचित्राम्बरभूषाभिर्गोपनारी
भिरावृतं प्रभिन्नांजनकालिंदीजलकेलिकलोत्सुकं योधयन्तं क्वचिद्गोपान्व्याहरन्तंगवांगणं कालिंदीजलसंसर्गिशी
तलानिलकंपिते कदम्बपादपच्छायेस्थितं वृन्दावने क्वचित् रत्नभूधरसंलग्नरत्नासनपरिग्रहं कल्पपादपमध्यस्थहे
ममंडपिकागतं वसंतकुसुमामोदसुरभीकृतदिङ्मुखे गोवर्द्धनगिरौरम्येस्थितंरासरसोत्सुकं सव्यहस्ततलन्यस्तगिरिव
र्यातपत्रकं खण्डिताखंडलोन्मुक्तासारधाराघनं वेनुवाद्यमहोल्लासकृतहुंकारनिःस्वनैः सवत्सैरुन्मुखैःशश्वद्गोकुलैर
भिवीक्षितं कृष्णमेवानुगायद्भिस्तच्चेष्टावशवर्तिभिः दण्डपाशोद्यतकरैर्गोपालैरुपशोभितं नारदाद्यैर्मुनिश्रेष्ठैर्वेदवे

तं०स्ता० २२३ दांगपारगो: प्रीतिमुक्तिगधयावाचास्तूयमानं परात्परं य एवं चिन्तयेद्देवं भक्त्यासंस्तौतिमानव: त्रिसंध्यं तस्य तुष्टोसौ ददाति वरमी
प्सितं राजवल्लभतामेतिभवेत्सर्वजनप्रिय: अचलां श्रियमाप्नोति सवाग्मी जायते ध्रुवं इति श्रीगौतमीयतंत्रे श्रीगोपालस्तो
त्रं समाप्तं ॥ अथास्य कवचं पुलस्त्य उवाच भगवन्सर्वधर्मज्ञ कवचं यत्प्रकाशितं त्रैलोक्यमंगलं नाम कृपया कथय प्र
भो सनत्कुमार उवाच शृणु वक्ष्यामि विप्रेन्द्र कवचं परमाद्भुतं नारायणेन कथितं कृपया ब्रह्मणो पुरा ब्रह्मणा कथितं मम
ह्यपरं स्नेहाद्वदामि ते अतिगुह्यतरं तत्त्वं ब्रह्ममंत्रौघविग्रहं यद्धृत्वा पठनाद्ब्रह्मा सृष्टिं वितनुते ध्रुवं यद्धृत्वा पठनात्पा
ति महालक्ष्मीर्जगत्त्रयं पठनाद्धारणाच्छंभु: संहर्त्ता सर्वतत्त्ववित् त्रैलोक्यजननी दुर्गा महिषादिमहासुरान् वरदृ
प्तान् जघानैव पठनात् धारणाद्यत: एवमिंद्रादय: सर्वे सर्वैश्वर्यमवाप्नुयु: शिष्याय विष्णुभक्ताय साधकाय प्रकाशयेत्
सवा यपरशिष्याय दत्वा मृत्युमवाप्नुयात् त्रैलोक्यमंगलस्यास्य कवचस्य प्रजापति: ऋषि:छन्दश्च गायत्री देवो नाराय
ण:स्वयं धर्मार्थकाममोक्षेषु विनियोग: प्रकीर्त्तित: प्रणवो मे शिर: पातु नमो नारायणाय च भालं पायान्नेत्रयुग्ममष्टा राम
र्णो भुक्तिमुक्तिद: क्लीं पायाच्छ्रोत्रयुग्मं चैकाक्षर: सर्वमोहन: क्लीं कृष्णाय सदा घ्राणं गोविंदायेति जिह्विकां गोपीजन २२३

पदंवल्लभायस्वाहाननंमम अष्टादशाक्षरोमंत्रः कंठंपातु दशाक्षरः गोपीजनपदंवल्लभायस्वाहा भुजद्वयंमम क्लीं ग्लौं क्लीं
श्यामलांगायनमः कुचौ दशाक्षरः क्लीं लक्ष्मी क्लीं करौ पायात् क्लीं लक्ष्मी मांगजोऽवतु हृदयं श्रीभुवनेशानी क्लीं लक्ष्मायक्लीं
स्तनौमम गोपालायाग्निजायान्तं कुक्षियुग्मंसदाऽवतु क्लीं लक्ष्मायसदापातु पार्श्वयुग्मंमनूत्तमः लक्ष्मगोविंदकौ यातु स्मराद्यो
ङेयुतोमनुः अष्टाक्षरः पातु नाभिं लक्ष्मेनिधिप्तनरोऽवतु पृष्ठं क्लीं लक्ष्मकंकालं क्लीं लक्ष्मायद्विगन्तकः सक्थिनीसततं
पातु श्रीं ह्रीं क्लीं लक्ष्मद्वयं ऊरूसप्ताक्षरः पायात्त्रयोदशाक्षरोऽवतु श्रीं ह्रीं क्लीं पदतोगोपीजनवल्लभपदन्ततः भाय
स्वाहेति पायुवे क्लीं ह्रीं श्रीं सदशाक्षरः जानुनीचसदापातु श्रीं क्लीं सदशाक्षरः त्रयोदशाक्षरः पातु जंघेचक्रायुधायु
धः अष्टादशाक्षरो ह्रीं श्रीं पूर्वको विंशदर्णकः सर्वांगमेसदापातु द्वारकानायकोबली नमोभगवतेपश्चाद्वासुदेवायतत्
नःपरं ताराद्यो द्वादशार्णोयंप्राच्यांमांसर्वदावतु श्रीं ह्रीं क्लीं दशवर्णस्तु क्लीं ह्रीं श्रीं षोडशाक्षरः गदाद्युदायुधोविष्णुर्मा
मग्निदिशिरक्षतु ह्रीं श्रीं दशाक्षरोमंत्रो दक्षिणेमांसदावतु तारोनमोभगवते रुक्मिणीवल्लभायच स्वाहेति षोडशार्णोयं प्रा
नैरृत्यांदिशिरक्षतु क्लीं हृषीकेशपदंभायनमोमांवारुणेऽवतु अष्टादशार्णः कामान्तोवायव्येमांसदाऽवतु श्रीं मायाका

तं॰सा॰ महालक्ष्म्यायगोविन्दायफ्रिंगोमनुः द्वादशार्णात्मको विष्णुरूर्ध्वे मां सदावतु वाग्भवं कामलक्ष्म्याय क्लीं गोविन्दाय ततःपरं श्रीं गोपीज
२२४ नवल्लभाय स्वाहा चक्षो ततः द्वाविंशत्यक्षरो मंत्रो मामैशान्यां सदाऽवतु कालीयस्य फणामध्ये दिव्यं नृत्यं करोति तं नमामि
देवकीपुत्रं नृत्यराजानमच्युतं द्वात्रिंशदक्षरो मंत्रोऽप्यधो मां सर्वदावतु कामदेवाय विद्महे पुष्पबाणाय धीमहि तन्नोऽनं
गः प्रचोदयात् एष मां पातु चोर्ध्वतः इति ते कथितं विप्र ब्रह्ममंत्रौघविग्रहं त्रैलोक्यमंगलं नाम कवचं ब्रह्मरूपिणं ब्रह्मेशप्र
मुखाधीश नारायणमुखाच्छ्रुतं तव स्नेहान्मयाख्यातं प्रवक्तव्यं न कस्यचित् गुरुं प्रणम्य विधिवत्कवचं प्रपठेत्ततः सकृ
द्द्विस्त्रिर्यथाज्ञानं सोऽपि सर्वतपोमयः मंत्रेषु सकलेष्वेव देशिको नात्र संशयः शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृ
तः हवनादीन्दशांशेन कृत्वा तत्साधयेद्ध्रुवं यदि स्यात्सिद्धकवचो विष्णुरेव भवेत्स्वयं मंत्रसिद्धिर्भवेत्तस्य पुरश्चर्यां
विना ततः स्पर्द्धामुद्धूय सततं लक्ष्मीर्वाणी वसेत्ततः पुष्पांजल्यष्टकं दत्वा मूलेनैव सकृत्पठेत् दशवर्षसहस्राणां पूजा
याः फलमाप्नुयात् भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि कंठे वा दक्षिणे वाहौ सोऽपि विष्णुर्न संशयः अश्वमे राज
धसहस्राणि वाजपेयशतानि च महादानानि यान्येव प्रादक्षिण्यं भुवस्तथा कलां नार्हन्ति तान्येव सकृदुच्चारणाद्यतः २२४

...दिः

त्रै

कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नरः त्रैलोक्यं क्षोभयमेव त्रैलोक्यविजयी भवेत् इदं कवचमज्ञात्वा भजेद्यः पुरुषो
त्तमं शतलक्षं प्रजप्तोपि न मंत्रः सिद्धिदायकः इति सनत्कुमारीयतंत्रे त्रैलोक्यमंगलं नाम कवचं समाप्तं ॐ अथ नृसिं
हकवचं नारद उवाच इन्द्रादिदेववृंदेश तातेश्वर जगत्पते महाविष्णोर्नृसिंहस्य कवचं ब्रूहि मे प्रभो यस्य प्रपठनाद्विद्वान्
त्रैलोक्यविजयी भवेत् ब्रह्मोवाच शृणु नारद वक्ष्यामि पुत्रश्रेष्ठ तपोधन कवचं नरसिंहस्य त्रैलोक्यविजयाभिधं यस्य प्र
प्रपठनाद्वाग्मी त्रैलोक्यविजयी भवेत् स्रष्टाहं जगतां वत्स पठनाद्धारणाद्यतः लक्ष्मीर्जगत्त्रयं पाति संहर्ता च महेश्वरः पठ
नाद्धारणाद्देवा बभूवश्च दिगीश्वराः ब्रह्ममंत्रमयं वक्ष्ये भूतादिविनिवारकं यस्य प्रसादाद्दुर्वासा त्रैलोक्यविजयी मुनिः उ
पठनाद्धारणाद्यस्य शास्ता च क्रोधभैरवः त्रैलोक्यविजयस्यास्य कवचस्य प्रजापतिः ऋषिश्छंदश्च गायत्री नृसिंहो देवता
विभुः क्ष्रौं बीजं मे शिरः पातु चंद्रवर्णो महामनुः उग्रं वीरं महाविष्णुं ज्वलंतं सर्वतोमुखं नृसिंहं भीषणं भद्रं मृत्युमृत्युं न
माम्यहं द्वात्रिंशदक्षरो मंत्रो मंत्रराजः सुरद्रुमः कंठं पातु ध्रुवं क्ष्रौं ह्रं भगवते चक्षुषी मम नरसिंहाय च ज्वालामालिने पा
तु कर्णकं दीप्तदंष्ट्राय च तथाग्निनेत्राय च नासिकां सर्वरक्षोघ्नाय सर्वभूतविनाशनाय च सर्वज्वरविनाशाय दहदहप

तं०सा० चहृयं रक्षरक्षवर्मश्रस्त्रस्वाहा पातुमुखंमम नारादिरामचंद्रायनमः पातुगुदंमम ह्रीपार्यात्पार्श्वयुग्मंचनारोनमःपदंतत्रः
२२५ नारायणायपार्श्वचश्रांह्रींह्रौंक्रोंचहूंफट् षडक्षरःकटिंपातुॐनमोभगवतेपदंवासुदेवायएष्टक्लींलक्ष्म्यायक्लींमुरुहृयं
क्लींलक्ष्म्यायसदापातुजानुनीचमन्त्रमः ह्रींग्लौंक्लींश्यामलांगायनमः पायात्मदद्वयं ह्रौंनृसिंहायचह्रौंचसर्वांगमे
सदावतु इतितेकथितंवत्ससर्वमंत्रौघविग्रह तवस्नेहान्मयाख्यातंप्रवक्तव्यंनकस्यचित् गुरुपूजांविधायाथगृहीया
त्कवचंततः सर्वपुण्यपुतोभूत्वासर्वसिद्धियुतोभवेत् शतमष्टोत्तरंचास्यपुरश्चर्याविधिस्मृतः हवनादीन्दशांशेनकृत्वा
तत्साधकोत्तमः ततस्तुसिद्धकवचरूपेणमदनोपमः स्पर्द्धामुद्धूयभवनेलक्ष्मीर्वाणीवसेत्ततः पुष्पांजल्यष्टकंदत्वामूलेनैव
पठेत्सकृत् अपिवर्षसहस्राणांपूजायाःफलमाप्नुयात् भूर्जेविलिख्यगुटिकांस्वर्णस्थांधारयेद्यदि कंठेवादक्षिणेवा
होनरसिंहोभवेत्स्वयं योषिद्वामभुजेचैवपुरुषोदक्षिणेकरे बिभृयात्कवचंपुण्यंसर्वसिद्धियुतोभवेत् काकवंध्याचया
नारीमृतवत्साचयाभवेत् जन्मवंध्यानष्टपुष्पाबहुपुत्रवतीभवेत् कवचस्यप्रसादेनजीवन्मुक्तोभवेन्नरः त्रैलोक्यंक्षोभ राम
यत्येवंत्रैलोक्यविजयीभवेत् भूतप्रेतपिशाचाश्चराक्षसादानवाश्चये तंदृष्ट्वाप्रपलायंतेदेशाद्देशांतरंध्रुवं यस्मिन्गृहे २२५

चक्रकवचं यामेवायदि तिष्ठति तद्देशानुपरिस्पन्दप्रयाति प्रति हृत्तः इति ब्रह्मसंहितायां त्रैलोक्यमोहनं नाम नरसिंहकवचं समा
प्तं ॐ अथ शिवस्तवं धरापोग्निमरुद्व्योममखेशेन्द्वर्कमूर्त्तये सर्वभूतात्मरूपाय शंकराय नमो नमः अनुत्पन्नप्रसूतव
साय प्रसूतये प्रसूतजन्मशालिने अतीन्द्रियाय महसे शश्वताय नमो नमः स्थूलसूक्ष्मदन्नविभागाय निर्दिष्टपाय शंभवे भवाय
भवभक्ताय दुःखहर्त्रे नमो नमः तर्ह्नीमार्ज्जोभिभक्ताय तपसां फलदायिने चतुर्वर्गजवदान्याय सर्वज्ञाय नमो नमः आदिम
ध्यान्तशून्याय निरस्ताशेषभीतये योगिध्येयाय महते निर्गुणाय नमो नमः विश्वात्मने विचित्राय विलसच्चन्द्रमौलये
कंदर्पदर्पनाशाय कालहंत्रे नमो नमः विषाशनाय विहरद्वृषस्कंधमुपेयुषे सरिद्दामसमाबद्धकपर्दाय नमो नमः
अनुरूपायानुरुद्धभावायानुरूपनामशरात्मने पुरान्तकाय पूर्णाय पुण्यनाम्ने नमो नमः तुष्टाय निजभक्तानां भुक्तिमुक्तिप्र
दायिने विवाससे नवासो विश्वशास्त्रे नमो नमः त्रिमूर्त्तिमूलभूताय त्रिनेत्रायापि शंभवे त्रिधाम्ने धामरूपाय जन्मपुरा
यनमो नमः देवासुरशिरोरत्नकिरणारुणितांघ्रये कान्ताय निजकान्ताये दत्तार्द्धाय नमो नमः स्तोत्रेणानेन पूजायां श्री
णयेज्जगतः पतिं भुक्तिमुक्तिप्रदं भक्त्यासर्वज्ञं परमेश्वर इति शिवस्तोत्रं अथ पाशुपतकवचं भगवन्देवदेवेश सर्वाम्ना

तं० सा०
२२६
सर्वव्यापीश्वरः

घप्रश्नजित सर्वमेकथितं देवकवचं नप्रकाशितं प्रासादाख्यस्य मंत्रस्य कवचं मे प्रकाशय सर्वरत्नाकरं देवयदि स्नेहोस्ति मां प्रति
श्रीभगवानुवाच प्रसादमंत्रकवचस्य वामदेव ऋषिः पंक्तिश्छंदः सदाशिवो देवता साधकाभीष्टसिद्धये विनियोगः शिरो मे सर्वदा पा
तु मृत्युंजयस्त्रिवीजात्मा आयू रक्षतु मे सदा वटमूलसमासीनो दक्षिणामूर्तिरव्ययः सदा मां सर्वतः पातु षट्त्रिंशात्त्स्वरूपधृ
क् द्वाविंशार्णात्मको रक्षः कुक्षिं मे परिरक्षतु त्रिवर्णात्मा नीलकंठः कंठं रक्षतु सर्वदा चिन्तामणिर्वीजरूपोऽर्द्धनारीश्वरो ह
रः सदा रक्षतु मे गुह्यं सर्वसंपत्प्रदायकः एकाक्षरस्वरूपात्मा कूटव्यापी महेश्वरः मार्तंडभैरवो नित्यं पादौ मे परिरक्षतु तुम्बुरा
ख्यो महावीजस्वरूपस्त्रिपुरान्तकः सदा मां रणभूमौ च रक्षतु त्रिदशाधिपः ऊर्ध्वमूर्द्धानमीशानो मम रक्षतु सर्वदा दक्षिणा
स्यं तत्पुरुषोऽव्यान्मे गिरिनायकः अघोराख्यो महादेवः पूर्वास्यं परिरक्षतु वामदेवः पश्चिमास्यं सदा मे परिरक्षतु उत्त
रास्यं सदा पातु सद्योजातस्वरूपधृक् इत्थं रक्षाकरं देवि कवचं देवदुर्लभं प्रातःकाले पठेद्यस्तु सोभीष्टफलमाप्नुयात्
पूजाकाले पठेद्यस्तु कवचं साधकोत्तमः कीर्तिश्रीकान्तिमेधायुः सहितो भवति ध्रुवं कंठे यो धारयेदेतत्कवचं मत्स्वरूपकं रण
युद्धे च जयमाप्नोति द्यूते वादे च साधकः कवचं धारयेद्यस्तु साधको दक्षिणे भुजे देवा मनुष्या गंधर्वा वश्यास्तस्य न संश २२६

यः कवचं शिरसा यस्तु धारयेद्यतमानसः करस्थास्तस्य देवेशि अणिमाद्यष्टसिद्धयः भूर्जपत्रे त्विमां विद्यां स्तुक्लपटे
नवेष्टितां रजतोदरसंविष्टां कृत्वा वा धारयेत्सुधीः संप्राप्य महतीं लक्ष्मीं मत्रे मद्देहरूपभाक् यस्मै कस्मै न दातव्यं न प्रका
श्यं कदाचन • शिष्याय भक्तियुक्ताय साधकाय प्रकाशयेत् अन्यथा सिद्धिहानिः स्यात्सत्यमेतन्मनोरमे नवस्नेहान्म
ह्यादेवि कथितं कवचं शुभं न देयं कस्यचिद्भद्रे यदीच्छेदात्मनो हितं योर्चयेद्धूपपुष्पाद्यैः कवचं मन्मुखोदितं तेनार्चिता महा
देवि सर्वे देवा न संशयः इति भैरवतन्त्रे सदाशिवकवचं समाप्तं अथ वटुकस्तोत्रं कैलासशिखरासीनं देवदेवं जगद्गुरुं शं
करं परिपप्रच्छ पार्वती परमेश्वरं श्रीपार्वत्युवाच भगवन्सर्वधर्मज्ञ सर्वशास्त्रागमादिषु आपदुद्धारणं मंत्रं सर्वसिद्धिप्रदं
नृणां सर्वेषां चैव भूतानां हितार्थं वाञ्छितं मया विशेषतस्तु राज्ञां वै शान्तिपुष्टिप्रसाधनं अंगन्यासकरन्यासबीजन्याससमन्वितं व
क्तुमर्हसि देवेश मम हर्षविवर्द्धनं श्रीभगवानुवाच शृणु देवि महामंत्रमापदुद्धारहेतुकम् सर्वदुःखप्रशमनं सर्वशत्रुनिवर्हणं
अपस्मारादिरोगाणां ज्वरादीनां विशेषतः नाशनं स्मृतिमात्रेण मंत्रराजमिमं प्रिये ग्रहराजभयानां च नाशनं सुखवर्द्धनं स्नेहाद्वक्ष्या
मितं मंत्रं सर्वसारमिमं प्रिये सर्वकामार्थदं मंत्रं राज्यभोगप्रदं नृणां आपदुद्धारणं मंत्रं वक्ष्यामि निविशेषतः प्रणवं पूर्वमुद्धृत्य देवी

प्रणवमुद्धरेत् वटुकायेति वै पश्चादापदुद्धारणाय च कुरुद्वयं ततः पश्चाद्वटुकाय पुनः क्षिपेत् देवीप्रणवमुद्धृत्य मंत्रोद्धारमिमं प्रि
ये मंत्रोद्धारमिमं देवि त्रैलोक्यस्यापि दुर्लभं अप्रकाश्यमिमं मंत्रः सर्वशक्तिसमन्वितं स्मरणादेव मंत्रस्य भूतप्रेतपिशाचकाः वि
द्रवंति तथा णि वै कालरुद्रादिव प्रजाः पठेद्वा पाठयेद्वापि पूजयेद्वापि पुस्तकं नाग्निचौरभयं वापि ग्रहराजभयं तथा न च मा
री भयं तस्य सर्वत्र सुखवान्भवेत् आयुरारोग्यमैश्वर्यं पुत्रपौत्रादि संपदः भवंति सततं तस्य पुस्तकस्यापि पूजनात् पार्व
त्युवाच य एष भैरवो नाम आपदुद्धारको मतः त्वया च कथितो देव भैरवः कल्प उत्तमः तस्य नामसहस्राणि प्रयुतान्यर्बुदानि
च सारमुद्धृत्य तेषां वै नामाष्टशतकं वद भगवानुवाच यस्तु संकीर्तयेदेतत्सर्वदुष्टनिवर्हणं सर्वान्कामानवाप्नोति साधकः
सिद्धिमेव च शृणु देवि प्रवक्ष्यामि भैरवस्य महात्मनः आपदुद्धारणस्येह नामाष्टशतमुत्तमं सर्वपापहरं पुण्यं सर्वापद्विनिवा
रणं सर्वकामार्थदं देवि साधकानां सुखावहं देहांगन्यासकं चैव पूर्वं कुर्यात्समाहितः भैरवं मूर्ध्नि विन्यस्य ललाटे भीमद
र्शनं अक्ष्णोर्भूताश्रयं न्यस्य वदने तीक्ष्णदर्शनं क्षेत्रपं कर्णयोर्मध्ये क्षेत्रपालं हृदि न्यसेत् क्षेत्राख्यं नाभिदेशे तु कट्यां सर्वाराम
घ्ननाशनः त्रिनेत्रमूर्वोर्विन्यस्य जंघयो रक्तपाणिकम् पादयोर्देवदेवेशं सर्वांगे वटुकं न्यसेत् एवं न्यासविधिं कृत्वा तदनंतरमु

त्तमं नामाष्टशतकस्यास्य छंदोनुष्टुप्प्रकीर्त्तितं बृहदारण्यकोनाम ऋषिश्च परिकीर्त्तितः देवता कथिता चेह सद्भिर्वटुकभैरवः
भैरवो भूतनाथश्च भूतात्मा भूतभावनः क्षेत्रज्ञः क्षेत्रपालश्च क्षेत्रदः क्षत्रियो विराट् श्मशानवासी मांसाशी खर्प्पराशी श्मरांत
कः रक्तपः पानपः सिद्धः सिद्धिदः सिद्धसेवितः करालः कालशमनः कलाकाष्ठातनुः कविः त्रिनेत्रो बहुनेत्रश्च तथा पिंगललोच
नः शूलपाणिः खड्गपाणिः कंकाली धूम्रलोचनः अभीरुर्भैरवो भीरुर्भूतपो योगिनीपतिः धनदो धनहारी च धनवान्प्रतिभान
वान् नागहारो नागकेशो व्योमकेशः कपालभृत् कालः कपालमाली च कमनीयः कलानिधिः त्रिलोचनो ज्वलन्नेत्रस्त्रिशिखी च त्रि
लोकभृत् त्रिवृत्तनयनो डिंभः शान्तः शान्तजनप्रियः वटुको वटुवेषश्च खट्वांगवरधारकः भूताध्यक्षः पशुपतिर्भिक्षुकः परिचा
रकः धूर्त्तो दिगंबरः शौरिर्हरिणः पांडुलोचनः प्रशान्तः शान्तिदः शुद्धः शंकरः प्रियबांधवः अष्टमूर्त्तिर्निधीशश्च ज्ञानचक्षुस्त
पोमयः अष्टाधारः कलाधारः सर्प्पयुक्तः शशीशिखः भूधरो भूधराधीशो भूपतिर्भूधरात्मकः कंकालधारी मुण्डी च व्यालयज्ञो
पवीतवान् जृंभनो मोहनः स्तंभी मारणः क्षोभनस्तथा शुद्धनीलांजनप्रख्यदेहो मुंडविभूषितः बलिभुग्बलिभूतात्मा कामी का
मपराक्रमः सर्वापत्तारणो दुर्ग्गो दुष्टभूतनिषेवितः कामी कलानिधिः कान्तः कामिनीवशकृद्वशी सर्वसिद्धिप्रदो वैद्यः प्रभवि

तं०व०सा० स्युप्रभाववान् अष्टोत्तरशतं नाम भैरवस्य महात्मनः मया ते कथितं देवि रहस्यं सर्वकामदं य इदं पठति स्तोत्रं नामाष्टशतमुत्तमं न
२२८ तस्य दुरितं किंचिन्न रोगेभ्यो भयं तथा न शत्रुभ्यो भयं किंचित्प्राप्नोति मानवः क्वचित् पातकानां भयं नैव पठेत्स्तोत्रमनन्यधीः मारीभये रा
जभये तथा चौराग्निजे भये उत्पातिके महाघोरे तथा दुःस्वप्नदर्शने बंधने च तथा घोरे पठेत्स्तोत्रं समाहितः सर्वं प्रशममायाति भयाद्भैर
वकीर्त्तनात् एकादशसहस्रं तु पुरश्चरणमुच्यते त्रिसंध्यं यः पठेद्देवि संवत्सरमतन्द्रितः स सिद्धिं प्राप्नुयादिष्टां दुर्लभामपि मानवः षण्मा
साद्भूमिकामस्तु स लभेत महीं राजशत्रुविनाशाय जपेन्मासाष्टकं पुनः रात्रौ वारत्रयं चैव नाशयत्येव शत्रुवान् जपेन्मा
सत्रयं रात्रौ राजानं वशमानयेत् धनार्थी च सुतार्थी च दारार्थी यस्तु मानवः जपेद्वारत्रयं यद्वा वारमेकं तथा निशि धनं पुत्रांस्तथा दा
रान्प्राप्नुयान्नात्र संशयः भीतो भयान्प्रमुच्येत देवि सत्यं न संशयः यान्यान्समीहते कामांस्तांस्तान्प्राप्नोति निश्चितं अप्रकाश्यमिदं
गुह्यं न देयं यस्य कस्यचित् सत्कुलीनाय शान्ताय ऋजवे दंभवर्जिते दद्यात्स्तोत्रमिदं पुण्यं सर्वकामफलप्रदं ध्यानं वक्ष्यामि देवस्य यथा
ध्यात्वा पठेन्नरः शुद्धस्फटिकसंकाशं सहस्रादित्यवर्चसं अष्टबाहुं त्रिनयनं चतुर्बाहुं द्विबाहुकं भुजंगमेखलं देवमग्निवर्णशिरो राम
रुहं दिगंबरं कुमारीशं बटुकाख्यं महाबलं खट्वांगमसिपाशं च शूलं चैव तथा पुनः डमरुं च कपालं च वरदं भुजगं तथा नीलजीमूतसंका २२८

ध्वनीलांजनसमप्रभं दंष्ट्राकरालवदनं नूपुरांगदसंकुलं आत्मवर्णसमोपेतं सारमेयसमन्वितं ध्यात्वा जपेत्सुसंहृष्टः सर्वान्कामा
नवाप्नुयात् एतच्छ्रुत्वा ततो देवी नामाष्टशतमुत्तमं भैरवाय प्रहृष्टाभूत्स्वयं चैव महेश्वरी इति विश्वसारतंत्रे आपदुद्धारकल्पे
रवकस्तोत्रराजः समाप्तः अथ भैरवीस्तोत्रं ब्रह्मादयस्तुतिशतैरपि सूक्ष्मरूपां जानन्ति नैव जगदादिमनादिमूर्तिं तस्माद्वयं
कुचनतां नवकुंकुमाभां स्थूलां स्तुमः सकलवाङ्मयमातृभूतां सद्यः समुद्यतसहस्रदिवाकराभां विद्याक्षसूत्रवरदाभयचिह्नहस्तां
नेत्रोत्पलैस्त्रिभिरलंकृतवक्त्रपद्मां त्वां भारहाररुचिरां त्रिभजामः सिंदूरपुंजकचिरं कुचभारनम्रां जन्मांतरेषु कृतपुण्यफलैकग
म्यां अन्योन्यभेदकलहाकुलमानसास्ते जानन्ति किं जडधियस्तव रूपमम्ब स्थूलां वदन्ति मुनयः श्रुतयो गृणन्ति सूक्ष्मां वदन्ति
वचसामधिवासमन्ये त्वां मूलमाहुरपरे जगतां भवानि मन्यामहे वयमपारकृपाम्बुराशिं चंद्रावतंसकलितां शरदिन्दुशुभ्रां पं
चाशदक्षरमयीं हृदि भावयन्ति त्वां पुस्तकं जपवटीममृताढ्यकुंभं व्याख्यां च हस्तकमलैर्दधतीं त्रिनेत्रां शंभुस्त्वमद्रितनयाकलितार्ध
भागो विष्णुस्त्वमम्ब कमलापरिरब्धदेहः पद्मोद्भवस्त्वमसि वागधिवासभूमिरेतेषां क्रियाश्च जगति त्रिपुरे त्वमेव आश्रित्य वाग्भ
वभवांश्चतुरः परादीन्भावान्पदेषु विहितान्समुदीरयंतीं कंठादिभिश्च करणैः परदेवतां त्वां संविन्मयीं हृदि कदापि न विस्मरा

तं०स्ता० मि श्राकुंच्य वायुमवजित्य च वैरिषट्कमालोक्य निश्चलधिया निजनासिकाग्रं ध्यायन्ति मूर्ध्नि कलितेन्दुकलावतंसं त्वद्रूपमम्ब कृति
२२९ नस्तरुणार्कमित्रं त्वं प्राप्य मन्मथरिपोर्वपुरर्धभागं सृष्टिं करोषि जगतामिति वेदवादः सत्यं तदद्रितनये जगदेकमातर्नो चेदशेष
जगतः स्थितिरेव न स्यात् स्रजां विधाय कुसुमैः सुरपादपानां पीठे तवाम्ब कनकाचलगह्वरेषु गायन्ति सिद्धवनिताः सह किन्नरी
भिरास्वादितासवरसारुणनेत्रपद्माः विद्युद्विलासवपुषः श्रियमुद्वहन्तीं यान्तीं स्ववासभवनाच्छिवराजधानीं सौषुम्नवर्त्मकम ह
लानि विकाशयन्तीं देवीं भजे हृदि परामृतसिक्तगात्रीं आनन्दजन्मभवनं भवनं श्रुतीनां चैतन्यमात्रतनुमम्ब तवाश्रयामि ब्रह्मेश
विष्णुभिरुपासितपादपद्मां सौभाग्यजन्मवसतिं त्रिपुरे यथावत् शब्दार्थभावि भवनं सृजतीं गुरूपायातच्छिभर्तृपुनर्भवजन्तुः स्वच्छ
त्वया वन्द्यागमिकाहरति तत्सकलं युगान्ते नाशारदो मनसि जातु न विस्मरामि नारायणीति नरकार्णवतारिणीति गौरीति खेदशमनी
तिसरस्वतीति ज्ञानप्रदेति नयनत्रयभूषितेति त्वामद्रिराजतनये विबुधा भजन्ति ये स्तुवन्ति जगन्मातः श्लोकैर्द्वादशभिः क्रमात् त्वा
मम्ब प्राप्य वाक्सिद्धिं प्राप्नुयुस्ते परां गतिं इति भैरवीस्तवराजः अथास्याः कवचं श्रीदेव्युवाच भैरवाः सकला विद्याः श्रुता राम
श्चाधिगता मया सांप्रतं श्रोतुमिच्छामि कवचं यत्पुरोदितं त्रैलोक्यविजयं नाम शस्त्रास्त्रविनिवारकं त्वत्तः परतरो नाथ कः कृपां कर्तुमर्ह २२९

ईतिः ईश्वरउवाच शृणु पार्वतिवक्ष्यामि सुंदरि प्राणवल्लभे त्रैलोक्यविंजयन्नाम कवचं मंत्रवियहं पठित्वा धारयित्वेदं त्रैलो
क्यविजयी भवेत् जघान सकलान्देत्यान्मायक्तुलां मधुसूदनः ब्रह्मा सृष्टिं वितनुते य स्तुत्वाभीष्टदायकः धनाधिपः कुबेरोपि वाम
वस्त्रिदशेश्वरः यस्य प्रसादादीशोहं त्रैलोक्यविजयी विभुः नदेयं परशिष्येभ्योऽसाधकेभ्यः कदाचन पुत्रेभ्यः किमथान्येभ्यो दत्वाम
त्युमवाप्नुयात् भैरव्याः कवचस्यापि दक्षिणामूर्तिरिवच विराट्छंदोजगद्धात्रीदेवता कालभैरवी धर्मार्थकाममोक्षेषु विनियो
गः प्रकीर्तितः अधरोबिंदुमालाढ्यो कामः शक्तिशशीयुतः भृगुर्मनुस्वरयुतः सर्वीबीजत्रयात्मिकावालेषामे शिरः पातु बिंदुना
दयुतापि सा भालं पातु कुमारी सा सर्गहीना कुमारिका दृशौपातु च वाग्बीजं कर्णयुग्मं सदावतु कामबीजं सदा पातु घ्राणयुग्मं
परावतु सरस्वती प्रदा बाला जिह्वां पातु शुचिप्रभा हस्त्रैं कंठं हसकलरीं स्कंधौ पातु हस्त्रौः भुजौ पंचमीभैरवी पातु करौ हस्त्रैं स
दाऽवतु हृदयं सकलरीं वक्षः पातु हसौः स्तनौ पातु सा भैरवी देवी चैतन्यरूपिणी मम हस्त्रैं पातु सदा पार्श्वयुग्मं हसकलरीं सदा कुक्षिं
पातु हस्त्रौः मध्ये भैरवी भुवि दुर्लभा ऐं ईं ॐ मध्यदेशं बीजविद्या सदावतु हस्त्रैं पृष्ठं पातु सदा नाभिं हसकलरीं सदा पातु हसौः करौ पा
तु षट्कूटा भैरवी मम हस्त्रैं सक्थिनी पातु हसकलरीं सदावतु गुह्यदेशं हस्त्रौः पातु जानुनी भैरवी मम संपत्प्रदा सदा पातु ईं जंघे हसक्लीं

र्व

तं०स्ता० पदं पातु ह्स्रैं: सर्वदेहं भैरवी सदावतु हस्रौं मम वतु प्राच्यां हसक्लीं पावके ऽवतु हस्रौं मे दक्षिणे पातु भैरवी चक्रसंस्थिता ह्स्रीं
२३० क्लीं ह्स्रौं मां सदा पातु नैरृत्यां चक्रभैरवी हसकलरीं हसरूः पश्चिमे पातु भैरवी क्रीं क्रीं क्रीं पातु वायव्ये हूं हूं पातु सदोत्तरे क्लीं पातु
सदैशान्ये दक्षिणे कालिकेऽवतु ऊर्द्ध्व पातु क्रबीजानि रक्षन्तु माम धस्थले दिग्विदिक्षु स्वाहा पातु कालिका खड्गधारिणी ॐ ह्रीं स्त्रीं हूं
फट् सा तारा सर्वत्र मां सदाऽवतु संग्रामे कानने दुर्गे तोये तरंग दुस्तरे खड्गकर्त्रीधरा सोग्रा सदा मां परिरक्षतु इति ते कथितं देवि
सारात्सारतरं महत् त्रैलोक्यविजयं नाम कवचं परमाद्भुतं यः पठेत्प्रयतो भूत्वा पूजायाः फलमाप्नुयात् स्पर्द्धामि द्धूय भवने लक्ष्मी
वाणीवसेत्ततः यः शत्रुभीतो रणकातरो वा भीतो वने वा शलिलालये वा वादे सभायां प्रतिवादिनो वा रक्षः प्रकोपाद्ग्रहसंकुलाद्वा
प्रचंडदंडाक्षशमनाद्व भीतो गुरोः प्रकोपादपि कृच्छ्रसाध्यात् अभ्यर्च्य देवीं प्रपठेत्त्रिसंध्यं स स्यान्महेशप्रतिमो जयी च त्रैलोक्यवि
जयं नाम कवचं सन्मुखोदितं विलिख्य भूर्जपत्रे तु गुटिकां स्वर्णसंस्थां धारयेद्यदि कंठे वा दक्षिणे वाहौ त्रैलोक्यविजयी भवेत् तद्गात्रं
प्राप्य शस्त्राणि भवंति कुसुमानि च लक्ष्मीः सरस्वती तस्य निवसेद्भवने मुखे एतत्कवचमज्ञात्वा यो जपेत्भैरवीं परां वालां वा प्रजपेद्धिरा म
छांदादिभिः प्रसुमाप्नुयात् इति रुद्रयामले देवीश्वरसंवादे त्रैलोक्यविजयं नाम कवचं समाप्तम् अथ श्रीविद्यास्तोत्रं ॐ नमः २३०

मः कल्पान्ते कल्याणवृष्टिभिरिवामृतपूरिताभिः लक्ष्मीस्वयंवरणमंगलदीपिकाभिः सेवाभिरम्ब तव पादसरोजमूले नाकारि किं
मनसि भक्तिमतां जनानां एतावदेव जननि स्पृहणीयमास्ते त्वद्वन्दनासु सलिलस्थसरोजनेत्रे सान्निध्यमुद्यदरुणाम्बुजसोदर
स्य त्वद्विग्रहस्य सुधया परया प्लुतस्य २ ईषत्तमोभावकलुषाः कतिनाम सन्ति ब्रह्मादयः प्रतिदिनं प्रलयाभिभूताः एकः स एव
जननि स्थिरसिद्धिरास्ते यः पादयोस्तव सकृत् प्रणतिं करोति ३ लब्ध्वा सकृत्त्रिपुरसुन्दरि तावकीनं कारुण्यकन्दलितकान्तिभ
रं कटाक्षं कन्दर्पभावसुभगास्त्वयि भक्तिभाजः संमोहयन्ति तरुणीर्भुवनत्रयेपि ४ ह्रींकारमेव तव नाम गृणन्ति वेदा मातस्त्रि
कोणनिलये त्रिपुरे त्रिनेत्रे त्वत्संस्मृतौ यमभटाभिभवं विहाय दीव्यन्ति नन्दनवने सह लोकपालैः ५ हन्तुः पुरामधिगलं प
रिपूर्यमानः क्रूरः कथं नु भविता गरलस्य वेगः नाश्वासनाय यदि मातरिदं तवार्द्धं देहस्य शश्वदमृताप्लुतशीतलस्य ६ स
र्वज्ञतां सदसि वाक्पटुतां प्रसूते देवि त्वदंघ्रिसरसीरुहयोः प्रणामः किं च स्फुरन्मुकुटमुज्ज्वलमातपत्रं द्वे चामरे च महतीं वसुधां
प्रयाति ७ कल्पद्रुमैरभिमतप्रतिपादनेषु कारुण्यवारिनिधिभिस्त्वे भवत्कटाक्षैः आलोकय त्रिपुरसुन्दरि मामनाथं त्वय्ये
व भक्तिभरितं त्वयि बद्धदृष्टिं ८ हन्तेतरेष्वपि निधाय मनांसि चान्ये भक्तिं वहन्ति किल पामरदैवतेषु त्वामेव देवि मनसाहमनु

नं० सा० स्मरामि त्वामेव नौमि जननि शरणं त्वमेव ९ लद्देष्वसत्स्वपि तवान्हि विलोकनानामालोकय त्रिपुरसुंदरि मां कथंचित् नूनं म
231 याचसदृशं करुणैकपात्रं जातो जनिष्यति जनो न च जायते वा १० क्लीं क्लीं मिति प्रतिदिनं जपतां भवाख्यां किन्नाम दुर्लभमिह त्रि
231 पुराधिवासे माला किरीटमदवारणमानिनीयां स्तान् सेवते वसुमती स्वयमेव लक्ष्मीः ११ संघत्कराणि सकलेन्द्रियनन्दनानि
साम्राज्यदानकुशलानि सरोरुहाक्षि त्वद्वन्दनानि दुरिताहरणोद्यतानि मामेव मातरनिशं कलयंतु नान्यं १२ कल्पोपसंहार
णकल्पितताण्डवस्य खण्डपर्शोः परभैरवस्य पाशांकुशैक्षवशरासनपुष्पबाणा सा साक्षिणी विजयते तव मूर्तिरेका १३ ल
ग्नं सदा भवतु मातरिदं त्वदीयं तेजः परं बहुलकुंकुमपंकशोणं भास्वत्किरीटममृतांशुकलावतंसं त्वद्रूपमम्बु कलितिन द्रू
स्तरूणार्कमित्रां १४ ह्रींकारत्रयसंपुटेन महता मंत्रेण संदीपितं स्तोत्रं यः प्रतिवासरं तव पुरो मातर्जपेन्मंत्रवित् तस्य क्षोणिभु
जो भवंति वशगा लक्ष्मीश्चिरस्थायिनी वाणी निर्मलसूक्तिभावभरिता जागर्ति दीर्घं यशः १५ दुमित्वस्नाविरचितं कल्याणीस्तो
त्रं अथ किंकिणीस्तवः किंकिदुखं सकलजननि क्षीयते न स्मरतां याकं कं योगं त्वयि विनुते चित्तमालम्बितायां १ स्मरता भवराम
भयध्वंसि प्रजिता सिद्युभंकरि स्तुता त्वं वाञ्छितं देवि ददासि करुणाकरोति परमानन्दबोधाद्वि रूपतेजः स्वरूपिणि देववन्दति 231

तोरत्नेति ग्रहणं चरणाम्बुजे विद्धि श्रान्तिमहासत्त्रामात्रेमात्रेन्नमोस्तु ते सृष्टिस्थित्युपसंहारहेतुभूते सनातनि गुणत्रयात्मिका
सिलं जगतः कारणेलया अनुग्रहाय भक्तानां गृहीतदिव्यविग्रहे भक्तस्य मे नित्यं हर आयुक्लेशपरमेश्वरि एहि कामुष्मिकी सिद्धिं
देहि त्रिदशवन्दिते तापत्रयपरिम्लानं भजनं त्राहि मां शिवे नान्यं वदामि न शृणोमि न चिन्तयामि नान्यं स्मरामि भजामि न चाश्र
यामि त्यक्त्वा त्वदीयचरणाम्बुजमादरेण मां त्राहि देवि कृपया मयि देहि सिद्धिं अज्ञानाद्वा प्रमादाद्वा वैकल्यात्साधनस्य च यन्न्यू
नमतिरिक्तं वा तत्सर्वं क्षन्तुमर्हसि द्रव्यहीनं क्रियाहीनं श्रद्धामन्त्रविवर्जितं तत्सर्वं कृपया देवि क्षमस्व त्वं दयानिधे यन्म
या क्रियते कर्म्म तन्महत्स्वल्पमेव च तत्सर्वं श्रेयसे भूयात्त्रिदशार्च्य मयाञ्जलिः इतिक्रिंकिनोस्तोत्रं अथ श्रीकवचं
देव्युवाच देवदेव महादेव भक्तानां प्रीतिवर्द्धनं सूचितं यन्महादेव्याः कवचं कथयस्व मे महादेव उवाच शृणु देवि प्रवक्ष्यामि क
वचं देवदुर्लभं अप्रकाश्यं परं गुह्यं साधकाभीष्टसिद्धिदं कवचस्य ऋषिर्देवि दक्षिणामूर्तिरव्ययः छन्दः पङ्क्तिः समुद्दिष्टं देवी त्रि
पुरसुन्दरी धर्म्मार्थकाममोक्षाणां विनियोगः प्रकीर्त्तितः वाग्भवः कामराजश्च शक्तिवीजं सुरेश्वरि ऐं वाग्भवः पातु शीर्षे क्लीं का
मराजस्तथा हृदि सौः शक्तिवीजं सदा पातु नाभौ गुह्ये च पादयोः ऐं क्लीं सौः वदने पातु बालां मां सर्वसिद्धये हस्रैं हसकल

ऐंह्स्त्रोंपातु भैरवीकंठदेशतः सुंदरीनाभिदेशेमान्शीर्षेकामकलासदा भ्रुनासयोरंतराले महात्रिपुरसुंदरी ललाटेसुभगा
पातु भगामांकंठदेशतः भगोंयाचहृदयेउदरेभगसर्पिणी भगमालानाभिदेशेलिंगेपातुमनोभवा गुह्येपातुमहादेवीराजरा
जेश्वरीशिवा चैतन्यरूपिणीपातुपादयोर्जगदम्बिका नारायणीसर्वगात्रेषुसर्वकार्येशुभंकरी ब्रह्माणीपातुमांपूर्वेदक्षि
णेवैष्णवीतथा पश्चिमेपातुवाराहीउत्तरेतुमहेश्वरी आग्नेय्यांपातुकौमारीमहालक्ष्मीर्नैरृते वायव्यांपातुचामुण्डाइंद्राणीपा श्री ४
तुईशके जलेपातुमहामायापृथिव्यांसर्वमंगला आकाशेपातुवरदासर्वत्रभुवनेश्वरी इदन्तुकवचंदेव्यादेवानामपिदुर्लभं प
ठेत्प्रातःसमुत्थायशुचिःप्रयतमानसः नाधयोव्याधयोतस्यनभयंचभवेत्क्वचित् नचमारीभयंतस्यपातकानांभयंतथा न
दारिद्र्यवशंगच्छेत्तिष्ठेन्मृत्युवशेनच गच्छेच्छिवपुरंदेविसत्यंसत्यंवदाम्यहं इदंकवचमज्ञात्वाश्रीविद्यांयोजपेत्प्रिये सनाप्नोति
फलंतस्यप्राप्नुयाच्छस्त्रयातनं इतिसिद्धजामलेमहात्रिपुरसुंदर्याःकवचं अथमहात्रिपुरसुंदरीकवचं देव्युवाच भ
गवन्देवदेवेशलोकानुग्रहकारक त्वत्प्रसादान्महादेवश्रुतामंत्रास्त्वनेकधा साधनंविविधंदेवकीलकोद्धरणंतथा शापा राम
दिभूषणोद्धारःश्रुतस्त्वत्तोमयाप्रभो राजराजेश्वरीदेव्याःकवचंसूचितंमया श्रोतुमिच्छामितत्सम्यक्कथयस्वमयिप्रभो २३२

ईश्वरउवाच लक्षवारंसहस्राणिवारितासिपुनःपुनः स्त्रीस्वभावात्पुनर्देवि पृच्छसित्वंमहेश्वरि प्रिये अत्यन्तगुह्यकवचंसर्वकामफल
प्रदं प्रीतयेतवदेवेशि कथयामिशृणुष्वतत् अस्यराजेश्वरीश्रीमन्महात्रिपुरसुंदरीषोडशीविद्याकवचस्यमहादेवऋषिः प्रस्तारःपं
क्तिश्छंदोराजराजेश्वरीश्रीमन्महात्रिपुरसुंदरीदेवताधर्मार्थसाधनेविनियोगः पूर्वेमांभैरवीपातुबालामांपातुदक्षिणे मालिनीपश्चि
मेपातुत्रासिनीउत्तरेऽवतु ऊर्ध्वंस्यापातुमहादेवीमहात्रिपुरसुंदरी अधस्तात्पातुदेवेशीपातालतलवासिनी आधारेवाग्भवःपातुकाम
राजस्तथाहृदि डामरःपातुमांनित्यंमस्तकेसर्वकामदा ब्रह्मरन्ध्रेसर्वगात्रेछिद्रस्थानेचसर्वदा महाविद्याभगवतीपातुमांपरमेश्वरी
ऐंह्रींललाटेमांपातुह्रींक्लींक्लूंसप्तनेत्रयोः नासायांकर्णयोश्चैवह्रांह्रींह्रींचिबुकेतथा सौःपातुचगले हृदयेसह्रींनाभिदेशके
कलह्रींक्लींस्त्रींगुह्यदेशेसह्रींपादयोस्तथा सह्रींमांसर्वतःपातुसकलह्रींपातुसंधिषु जलेस्थलेतथाकाशेदिक्षुराजगृहेतथा
ह्रूंक्षेमांत्वरितापातुसह्रींसह्रींमनोभवा हंसःपायान्महादेविपरंनिष्कलदेवता विजयामंगलादूतीकल्याणीभगमालिनी ज्वाला
चमालिनीनित्यासर्वदापातुमांशिवा इत्येवंकवचंदेविदेवानामपिदुर्लभं तवप्रीत्यामयाख्यातंगोपनीयंप्रयत्नतः इदंरहस्यंपरमंगु
ह्याद्गुह्यतरंप्रिये धन्यंप्रशस्यमायुष्यंभोगमोक्षप्रदंशिवे दुःस्वप्ननाशनंपुंसांनरनारीवशंकरीं आकर्षणकरंदेविसर्वभोगाद

तं०सा० कांशिवे इदं कवचमज्ञात्वा राजराजेश्वरीं शिवाम् यो ऽर्चयेद्योगिनीवृंदैः समन्त्योनात्र संशयः न तस्य मंत्रसिद्धिः स्यात्कदाचिदपि शं
२३३ करि इह लोके च दारिद्र्यं रोगदुःखाद्यशुभानि च परत्र नरकं गत्वा पशुयोनिमवाप्नुयात् तस्मादेतत्सदाभ्यस्य दधिकारी भवेत्ततः मद्वक्त्र
निर्गतमिदं कवचं सुपुण्यं पूजाविधिस्मपुरतो विधिना पठेद्यः सौभाग्यभोगललितानि शुभानि भुक्त्वा देव्याः पदं भजति तत्सुरदुर्लभं तत्का
ले इति कुलानंदसंहितायां षोडशरूप कवचं समाप्तं अथ प्रचण्डचण्डिकास्तोत्रं नाभौ शुद्धसरोजमध्यविलसद्बंधूकपुष्पारुणं भास्व
द्भास्करमंडलं तदुदरे यद्योनिचक्रं महत् तन्मध्ये विपरीतमैथुनरतः प्रद्युम्नतत्कामिनी पृष्ठस्थां तरुणार्ककोटिविलसत्तेजःस्वरूपां शि
वां वामे छिन्नशिरोधरां तदितरे पाणौ महत्कर्त्रिकां प्रत्यालीढपदां दिगंतवसनामुन्मुक्तकेशव्रजां छिन्नात्मीयशिरःसमुच्छल
दसृग्धारां पिबन्तीं परां बालादित्यसमप्रकाशविलसन्नेत्रत्रयोद्भासिनीं वामादन्यत्र नाडीवक्त्रे वहल्लगलादस्रधाराभिरन्नैः पाय
न्तीमस्थिभूषां करकमललसत्कर्त्रिकामुग्ररूपां रक्तामारक्तकेशीमपगतवसनां वर्णिनीमात्मशक्तिं प्रत्यालीढोरुपादामरुणितन
यनां योगिनीद्रां दिग्वस्त्रां मुक्तकेशीं प्रलयघनघटा घोररूपां प्रचंडां दंष्ट्रादुष्प्रेक्ष्यवक्त्रोदरविवरलसल्लोलजिह्वाग्रभासां विद्युल्लोलाम
लाक्षियुग्मां हृदयतटलसद्भोगिभीमां सुमूर्तिं सद्यश्छिन्नात्मकंठप्रगलितरुधिरैः डाकिनीवर्द्धयंतीं ब्रह्मेशानाच्युताद्यैः शिरसि २३३

विनिहितामन्दपादारविंदै शान्मज्ञैर्योगिमुख्यैः प्रतिपदमनिशं चिन्तितां चित्स्वरूपां संसारे सारभूतां त्रिभुवनजननीं छिन्नमस्तां प्रपद्य
स्मा मिष्टांतामिष्टदात्रीं कलिकलुषहरां चेतसा चिन्तयामि उत्पत्तिस्थितिसंहृतीर्घटयितुं धत्ते त्रिरूपां तनूं त्रैगुण्याज्जगतो यदीय
विकृतिः ब्रह्माच्युतः शूलभृत् तामाद्यां प्रकृतिं स्मरामि मनसा सर्वार्थसंसिद्धये ः यस्याः स्मेरपदारविंदयुगले लाभं भजन्ते ऽमराः श्रलिपि
सितपुरं श्रीयोगपट्टाय रोहं वक्त्रविधजनभाजारंभसंभावितो हि पशुजनविरतो हं भैरवीसंश्रितो हं गुरुचरणपरो हं भैरवो हं शि
वो हं इदं स्तोत्रं महापुण्यं ब्रह्मणा भाषितं पुरा सर्वसिद्धिप्रदं साक्षान्महापातकनाशनं यः पठेत्प्रातरुत्थाय देव्याः संनिहितो विवा
तस्य सिद्धिर्भवेद्देवि वाञ्छितार्थप्रदायिनी धनं धान्यं सुतं जायां हयं हस्तिनमेव च वसुंधरां महाविद्यामष्टौ सिद्धिर्भवेद्ध्रुवं वैयाघ्रा
जिनवांछितस्वज घनोरस्ये प्रलम्बोदरे खर्वानिर्वचनीय सर्वसुभगे मुण्डावलीमण्डिते कर्त्रीकुन्दरुचिं विचित्रवलितां ज्ञानं दधा
नेपदे मातर्भक्तजनानुकम्पिनि महामाये स्तुतुभ्यं नमः इति प्रचंडचंडिकास्तोत्रं अथास्याः कवचम् देव्युवाच कथिताः छिन्नम
स्तायाः याया विद्याः सुगोपिताः त्वया नानाविधेनैव शिष्याः अधिगता मया इदानीं श्रोतुमिच्छामि कवचं पूर्वसूचितं त्रैलोक्यविजयं
नाम कृपया कथ्यतां प्रभो भैरव उवाच शृणु वक्ष्यामि देवेशि सर्वदेवनमस्कृतं त्रैलोक्यविजयं नाम कवचं सर्वमोहनं सर्वविद्याम

तं०सा० २३४

यं साध्यां सुरासुरजयप्रदं धारणात्पठनादीशस्त्रैलोक्यविजयी विभुः ब्रह्मा नारायणो रुद्रो धारणात्पठनाद्यतः कर्त्ता पाता च संहर्त्ता

भुवनानां सुरेश्वरि न देयं परशिष्येभ्योऽभक्तेभ्योपि विशेषतः देयं शिष्याय भक्ताय प्राणेभ्योप्यधिकाय च देव्याश्छिन्नमस्तायाः क

वचस्य च भैरवः ऋषिर्विराट्छन्दस्तु देवता छिन्नमस्तका त्रैलोक्यविजये मुक्तौ विनियोगः प्रकीर्त्तितः हुंकारो मे शिरः पातु छि

न्नमस्ता बलप्रभा ह्रीं ह्रूं ऐं त्र्यक्षरी पातु भालं वक्त्रं दिगंबरी श्रीं ह्रीं ह्रूं ऐं दृशौ पातु मुंडकर्त्रिधरापि सा सा विद्या प्रणवाद्यन्ता श्रुति

युग्मं सदावतु वज्रवैरोचनीये हूं हूं फट्स्वाहा महाविद्या [illegible] भुवादिका घ्राणं पातु छिन्नमस्ता स्वमुंडकर्त्रिधारिणी श्रीमा

याकूर्च्चवाग्बीजैर्वज्रवैरोचनीये हूं हूं फट्स्वाहा महाविद्या षोडशी ब्रह्मरूपिणी स्वपार्श्वे वालिकाभ्यामसृक्धारां पाययन्ती मु

दं वदनं सर्वतः पातु छिन्नमस्ता स्वशक्तिका मुण्डकर्त्रिधरा रक्ता साधकाभीष्टदायिनी वर्णिनी डाकिनीयुक्ता सापि मामभितोऽ

वतु रमाद्या पातु जिह्वां लज्जाद्याः पातु कण्ठकं कूर्चाद्या हृदयं पातु वागाद्या स्तनयुग्मकं रमया पुटिता विद्या पार्श्वौ पातु महेश्वरी माया

पा पुटिता पातु नाभिदेशं दिगंबरी कूर्च्चेन पुटिता देवी पृष्ठदेशं सदावतु वाग्बीजपुटिता चैषा मध्यं पातु सशक्तिका ईश्वरी कूर्च्चवा राम

ग्बीजैर्वज्रवैरोचनीये हूं हूं फट्स्वाहा इति महाविद्या कोटिसूर्यसमप्रभा छिन्नमस्ता सदा पायाद् ऊरुयुग्मं सशक्तिका ह्रीं ह्रूं वर्णिनी जा २३४

तु स्त्रीं क्रीं हूं चण्डाकिनीपदं सर्वविद्यास्थिता नित्यासर्वा हूं मे सदावतु प्राच्यां पायादेकलिंगा योगिनी पावकेवतु डाकिनी द
क्षिणे पातु श्रीमहाभैरवीच मां नैरृत्यां सततं पातु भैरवी पश्चिमेऽवतु इन्द्राक्षी पातु वायव्ये सितांगी पातु चोत्तरे संहारिणी सदा
पातु शिवकोणे सकर्त्रिका इत्यष्टशक्तयः पान्तु दिग्विदिक्षु सकर्त्रिका क्रीं क्रीं क्रीं सदा पातु पूर्वे हूं हूं मां पातु पावके क्रीं क्रीं मां
दक्षिणे पातु दक्षिणे कालिकेऽवतु क्रीं क्रीं क्रीं चैव नैरृत्यां हूं हूं मां पश्चिमेऽवतु क्रीं क्रीं पातु मरुत्कोणे स्वाहा पातु सदोत्तरे
महाकाली खड्गहस्ता ईशःकोणे सदावतु तारो माया वधूः कूर्चं फट्कारोऽयं महामनुः खड्गकर्त्रिधरा तारा चोर्ध्वदेशे सदाऽवतु क्रीं
स्त्रीं हूं फट् पाताले पातु नीलसरस्वती इति ते कथितं देवि कवचं मन्त्रविग्रह यद्धृत्वा पठनाद्भीमः क्रोधाख्यो भैरवः प्रभुः सुरासु
र मुनीन्द्राणां कर्ता हर्ता भवेत्स्वयं यस्याज्ञया मधुमती याति सा सा धकं भूतिन्याद्याश्च पक्षिण्यो डाकिन्याद्याश्च खेचराः श्रीमां
ग न्हन्ति तास्य कवचस्य प्रसादतः एतदेव परं ब्रह्म कवचं मन्मुखोदितं देवीमभ्यर्च्य गन्धाद्यैः मूलेनैव पठेत्सकृत् संवत्सरकृता
यास्तु पूजायाः फलमाप्नुयात् भूर्जे विलिखितं चैतद्गुटिकां कांचनस्थितां धारयेद्दक्षिणे बाहौ कंठे वा यदि वाग्यतः सर्वैश्वर्य
युतो भूत्वा त्रैलोक्यं वशमानयेत् तस्य गेहे वसेल्लक्ष्मीर्वाणी च वदनाम्बुजे ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रे यान्ति सौम्यतां इदं

स्ता

कवचमज्ञात्वायोमन्त्रं छिन्नमस्तकां सोपिशस्त्रप्रहारेणमृत्युमाप्नोतिसत्वरं इतिभैरवतंत्रेभैरवभैरवीसंवादेछिन्नमस्ताकल्पे
त्रैलोक्यविजयंनामकवचंसमाप्तं अथश्यामाकवच भैरवउवाच कालीपूजाश्रुतानाथभावाश्चविविधाःप्रभो इदानीं
श्रोतुमिच्छामिकवचंपूर्वसूचितं त्वमेवशरणंनाथत्राहिमांदुःखसंकटात् भैरवउवाच रहस्यंशृणुवक्ष्यामिभैरवि
प्राणवल्लभे श्रीजगन्मंगलंनामकवचंमंत्रविग्रहं पठित्वाधारयित्वाचत्रैलोक्यंमोहयेत्क्षणात् नारायणोपियद्धृत्वा
नारीभूत्वामहेश्वरं योगेशंक्षोभमनयत्यद्धृत्वाचरघूद्वहः वरदृप्तान्जघानैवरावणादिनिशाचरान् यस्यप्रसा
दादीशोपित्रैलोक्यविजयीविभुः धनाधिपःकुबेरोपिसुरेशोभूच्छचीपतिः एवंसकलादेवाःसर्वसिद्धीश्वराःप्रिये
श्रीजगन्मंगलस्यापिकवचस्यऋषिःशिवः छन्दोनुष्टुप्देवताचकालिकादक्षिणेरिता जगतांमोहनेदुष्टविजयेभुक्ति
मुक्तिषु योषिदाकर्षणेचैवविनियोगःप्रकीर्तितः शिरोमेकालिकापातुक्रींकारैकाक्षरीपरा क्रींक्रींक्रींमेललाटंचकालिकाख
ड्गधारिणी हूंहूंपातुनेत्रयुग्मंह्रींह्रींपातुश्रुतीमम दक्षिणेकालिकेपातुघ्राणयुग्मंमहेश्वरी क्रींक्रींक्रींरसनांपातुहूंहूं राम
पातुकपोलकं वदनंसकलंपातुह्रींह्रींस्वाहास्वरूपिणी द्वाविंशत्यक्षरीकुष्कोमहाविद्यासुखप्रदा खड्गमुण्डधराकालीसर्वा २३५

गमभितोऽवतु क्रीं हूं क्रीं सुन्दरी पातु चामुंडा हृदयं मम ऐं हूं ॐ ऐं ललनद्वयं क्रीं फट् स्वाहा ककुत्स्थलं अष्टाक्षरी महाविद्या तु क्रौं
पातु मम कर्तृका क्रीं क्रीं हूं हूं क्रीं क्रीं करौ पातु षडक्षरी मम क्रीं नाभिं मध्यदेशं च दक्षिणे कालिकेऽवतु क्रीं स्वाहा पातु पृष्ठं तु का
लिका सा दशाक्षरी हूं हूं दक्षिणे कालिके हूं क्रीं पातु कटिद्वयं कालीदशाक्षरीविद्या स्वाहा मम ऊरुयुग्मकं ॐ क्रीं क्रीं मे स्वाहा
पातु कालिका जानुनी सदा काली ह्रींनाम विद्येयं चतुर्वर्गफलप्रदा क्रीं हूं ह्रीं पातु मा गुल्फं दक्षिणे कालिकेऽवतु क्रीं हूं ह्रीं
स्वाहा पातु चतुर्दशाक्षरी मम खड्गमुण्डधरा काली वरदाभयधारिणी विद्याभिः सकलाभिः सा सर्वाङ्गमभितोऽवतु काली कपा
लिनी कुल्या कुरुकुल्या विरोधिनी विप्रचित्ता तथोग्रोग्रप्रभा दीप्ता घनत्विषः नीला घना बलाका च मात्रा मुद्रा मिता च मां एताः
सर्वाः खड्गधारा मुण्डमालाविभूषणाः रक्षन्तु दिग्विदिक्षु मां ब्राह्मी नारायणी तथा माहेश्वरी च चामुण्डा कौमारी चाप
राजिता वाराही नारसिंही च सर्वाश्चामितभूषणाः रक्षन्तु स्वायुधैर्दिक्षु मां यथा तथा इति ते कथितं दिव्यं कवचं परमाद्भुतं श्री
जगन्मंगलं नाम महाविद्यौघविग्रहं त्रैलोक्याकर्षणं ब्रह्मन् कवचं मन्मुखोदितं गुरुपूजां विधायाथ विधिवत्प्रपठेत्ततः क
वचं त्रिः सकृद्वापि यावज्जीवं च वा पुनः एतच्छतार्द्धमावृत्य त्रैलोक्यविजयी भवेत् त्रैलोक्यं क्षोभयत्येव कवचस्य प्रसादतः ।

महाकविर्भवेन्मासात्सर्वसिद्धीश्वरो भवेत् पुष्पांजलीन्कालिकायै मूलेनैव पठेत्स हात् शतवर्षसहस्राणां पूजायाफलमाप्नुयात् भू
र्जे विलिखितं चैतत्कवचमस्थं धारयेद्यदि शिखायां दक्षिणे वाहौ कंठे वा धारयेद्यदि त्रैलोक्यं मोहयेत्क्रोधात्त्रैलोक्यं चूर्णयेत्क्षणात्
पुत्रवान्धनवान्श्रीमान्नानाविद्यानिधिर्भवेत् ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रस्पर्शनात्ततः नाशमायांति या नारी वंध्या वा
मृतपुत्रिणी कंठे वा वामबाहौ वा कवचस्य च धारणात् बह्वपत्या जीववत्सा भवत्येव न संशयः न देयं परशिष्येभ्योऽभक्तेभ्यो
विशेषतः शिष्येभ्यो भक्तियुक्तेभ्यो ह्यन्यथा मृत्युमाप्नुयात् स्पर्धामुद्धूय कमला वाग्देवी मंदिरे मुखे पौत्रान्तं स्थैर्यमा
स्थाय निवसत्येव निश्चितं इदं कवचमज्ञात्वा यो भजेत्कालिदक्षिणां शतलक्षं प्रजप्त्वापि तस्य विद्या न सिद्ध्यति स शस्त्रघात
माप्नोति सो चिरान्मृत्युमाप्नुयात् इति भैरवतंत्रे भैरवभैरवीसंवादे श्यामाकवचं समाप्तं अथास्याः स्तोत्र कर्पूरं मध्यमां
त्यस्वरपररहितं सेंदुवामाक्षियुक्तं बीजं ते मातरेतत्त्रिपुरहरवधू त्रिःकृतं ये जपंति तेषां गद्यानि पद्यानि च मुखकुहरादुल्लसंत्ये
व वाचः स्वच्छंदं ध्वांतधाराधररुचिरुचिरे सर्वसिद्धिंगतानां १ ईशानाः सेंदुवाममश्रवणपरिगतं बीजमन्यन्महेशि द्वंद्वं तेम राम
दचेता यदि जपति जनो वारमेकं कदाचित् जित्वा वाचामधीशं धनदमपि चिरं मोहयन्नंबुजाक्षीवृंदं चंद्रार्धचूडे प्रभवति सम २३६

पर्दी

हाघोरवाणावतंसे २ ईशोवैश्वानरस्थः शशधरविलसद्वामनेत्रेणयुक्तो बीजं ते द्वन्द्वमन्यद्विगलितचिकुरे कालिके ये जपन्ति द्वेष ॥
रंघ्नन्तिते च त्रिभुवनमभितोवश्यभावंनयन्ति स्रक्कद्वन्द्वास्रधाराद्वयधरवदने दक्षिणे कालिकेति ३ ऊर्द्ध्वं वामे कृपाणं करत
लतले छिन्नमुण्डं दधाने सव्ये चाभिवरंच त्रिजगदघहरे दक्षिणे कालिकेति तस्यैतन्नामगुह्यं तव मनुविभवं भावयन्त्येवमम्बते
वामच्छेरकरस्थाः प्रकटितवदने सिद्धयस्त्र्यम्बकस्य ४ वर्गाद्यं वह्निसंस्थं विकलतिवलितं तत्त्रयं कूर्चयुग्मं लज्जा द्वन्द्वं च पश्चात्स्मि
तमुखितदघषट्कद्वयं योजयित्वा मातर्ये जेजपन्ति स्मरहरमहिले भावयन्तः स्वरूपं ते लक्ष्मीलास्यलीलाः कमलदलदृशः का
मरूपा भवन्ति ५ प्रत्येकं वा त्रयं वा द्वयमपि च परं बीजमत्यन्तगुह्यं त्वन्नाम्ना योजयित्वा सकलमपि सदा भावयन्तो जपन्ति
तेषां नेत्रारविन्दे विहरति कमला वक्त्रशुभ्रांशुबिम्बे वाग्देवी देवि मुण्डस्रगतिशयलसत्कण्ठि पीनस्तनाढ्ये ६ गतासूनां बाहुप्र
करकृतकाञ्चीपरिलसन्नितम्बां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनां श्मशानस्थे तल्पे शवहृदि महाकालसुरतप्रयुक्तां त्वां
ध्यायन् जननि जडचेता अपि कवि ७ शिवाभिर्घोराभिः शवनिवहमुण्डास्थिनिकरैः परं संकीर्णायां प्रकटितचितायां हरवधूं प्रविष्टां
संतुष्टामुपरिसुरतेनातियुवतीं सदा त्वां ध्यायन्ति क्वचिदपि न तेषां परिभवः ८ वदामस्ते किम्वा जननि वयमुच्चैर्जडधियो न धाता ना

त० स्ता० २३७ मीशो हरिरपि न ते वेत्ति परमं तथापि त्वद्भक्तिर्मुखरयति चास्माकमसिते तदेतत्क्षन्तव्यं न खलु पशुरोषः समुचितः ९ समन्तादापी
नस्तनजघनदृग्यौवनवतीरताशक्तो नक्तं यदि जपति भक्तस्तव मनुं विवासास्त्वां ध्यायन्गलितचिकुरस्तस्य वशगाः समस्ताः सि
द्धौघा भुवि चिरतरं जीवति कविः १० समाः स्वस्थीभूतां जपति विपरीतां यदि सदा विचिन्त्य त्वां ध्यायन्नतिशयमहाकालसुरतां त
दा तस्य क्षोणीतलविहरमानस्य विदुषः कराम्भोजे वश्याः स्मरहरवधूमहासिद्धिनिवहाः ११ प्रसूते संसारं जननि भवती पाल
यति वा समस्तं क्षित्यादि प्रलयसमये संहरति च अतस्त्वं धातासि त्रिभुवनपतिः श्रीपतिरपि महेशोपि प्रायः सकलमपि
किं स्तौमि भवतीं १२ अनेके सेवन्ते भवदधिकगीर्वाणनिवहान् विमूढास्ते मातः किमपि न हि जानन्ति परमं समाराध्यामाद्यां
हरिहरविरिञ्च्यादिविबुधैः प्रपन्नोस्मि स्वैरं रतिरसमहानन्दनिरतां १३ धरित्री कीलालं शुचिरपि समीरोपि गगनं त्वमेका
कल्याणी गिरिशरमणी कालि सकलं स्तुतिः का ते मातस्तव करुणया मामगतिकं प्रसन्ना त्वं भूया भवमनु न भूयान्मम जनुः १४
श्मशानस्थः स्वस्थो गलितचिकुरो दिक्पटधरः सहस्रं त्वर्काणां निजगलितवीर्येण कुसुमं जपंस्त्वत्प्रत्येकं मनुमपि तव ध्यान
न निरतो महाकालि स्वैरं स भवति धरित्रीपरिवृढः १५ गृहे सम्मार्जन्याः परिगलितबीजं सुचिकुरं समूलं मध्याह्ने वितरति चितायां २३७

यांकुञ्जदिने समुच्चार्य्यप्रेम्णामनुमत्पिसन्तत्तकालि सत्ततंगजाकटोपाविद्धितिपरिवढः सत्यविवरः १६ स्वपुष्पेराकीपकुसुम
धनुषोमन्दिरमहोपुरोध्यायन्ध्यायनयदिजपतिमकरत्वमन्त्रं सगंधर्वश्रेणीपतिरपिकविलामृतनदीनदीनः पर्य्यन्तरमय
दलीनः प्रभवति १७ त्रिपश्चारेपीठेशवशिवहृदिस्मेरवदनां महाकालेनोच्चैर्मदनरसलावण्यनिरतां समासक्तोनक्तंस्वयमपि
रतानंदनिरतो जनोयस्त्वां ध्यायेदपि जननिसस्यात्स्मरहरः १८ सलोमास्थिस्वैरंपललमपिमार्जाररमपिनेपरंचोष्ट्रंमेषंनर
महिषयोःछागमपिवा वलिंतेपूजायामयिवितरतांमर्त्यवसतां सतांसिद्धिः सर्वा प्रतिपदमपूर्वा प्रभवति १९ वशीलक्षंमंत्रंप्रजपति
हविष्याशनरतोदिवामातर्युष्मच्चरणयुगलध्याननिरतः परंनक्तंनग्नोनिधुवनविनोदेनचमनुं जनोलक्षंसम्यक्स्मरहरसमानः
क्षितितले २० इदंस्तोत्रंमातस्तवमनुसमुद्धारणजनुः स्वरूपाख्यंपादम्बुजयुगलपूजाविधियुतं निशार्द्धंवापूजासमयमथवा
यस्तुपठतिप्रलापस्तस्यापिप्रसरतिकवितामृतरसः कुरंगाक्षीवृंदंतमनुसरतिप्रेमतरलंवशस्तस्यक्षोणीपतिरपिकुबेरप्रतिनि
धिः विपुःकारागारंकलयतिचतंकेलिकलयाचिरंजीवन्मुक्तः सभवतिसुभक्तः प्रतिजनुः २२ इतिश्रीमहाकालविरचितंश्यामा
स्तोत्रंसमाप्तं ७ अथतारास्तोत्रं मातर्नीलसरस्वतिप्रणमतांसौभाग्यसंपत्प्रदे प्रत्यालीढपदस्थितेशवहृदिस्मेराननाम्भोरुहे

तं० स्ता० २३८ फुल्लेंदीवरलोचने त्रिनयने कर्त्रीकपालोत्पले खड्गं चादधती त्वमेव शरणं त्वामीश्वरीमाश्रये १ वाचामीश्वरि भक्तकल्पलतिके सर्वा
र्थसिद्धीश्वरि गद्यप्राकृतपद्यजातरचनासर्वार्थसिद्धिप्रदे नीलेन्दीवरलोचनत्रययुते कारुण्यवारांनिधे सौभाग्यामृतवर्षिलेन कृ
पया सिंच त्वमस्मादृशं २ खर्वे गर्वसमूहपूरिततनो सर्पादिवेषोज्वले व्याघ्रत्वक्परिवीतसुंदरकटिव्याधूतघंटांकिते सद्यः कृ
त्तगलद्रजःपरिमिलन्मुंडद्वयीमूर्द्धजग्रंथिश्रेणिनृमुंडदामललिते भीमे भयं नाशये ३ मायानंगविकाररूपललनाबिंद्वर्द्ध
चंद्रात्मिके हूंफट्कारमयी त्वमेव शरणं मंत्रात्मिके मादृशः मूर्तिस्ते जननि त्रिधामघटिता स्थूलातिसूक्ष्मा परा वेदानां न हि
गोचरा कथमपि प्राज्ञानुतामाश्रये ४ त्वत्पादांबुजसेवया सुकृतिनो गच्छन्ति सायुज्यतां तस्य श्रीपरमेश्वरस्य त्रिनयन
ब्रह्मादिसाम्यात्मनः संसाराम्बुधिमज्जने पटुतनून्देवेन्द्रमुख्यान्सुरान्मातस्त्वत्पदसेवने हि विमुखान्किं मन्दधीः सेवते
५ मातस्त्वत्पदपंकजद्वयरजोमुद्रांककोटीरिणस्ते देवा जयसंगरे विजयिनो निःशंकमंके गताः देवोहं भुवने न मे सम इति स्प
र्द्धां वहन्तः परे तत्तुल्यां नियतं यथा शुचिरमी नाशं व्रजन्ति स्वयं ६ त्वन्नामस्मरणात्पलायनपरान्द्रष्टुं च शक्ता न ते भूतप्रेतराक्ष
पिशाचराक्षसगणा यक्षाश्च नागाधिपाः दैत्या दानवपुंगवाश्च खचरा व्याघ्रादिकाजंतवो डाकिन्यः कुपितान्तकाश्च मनुजा मातः २३८

द्गणं भूतले ७ लक्ष्मीः सिद्धिगणाश्च पादुकमुखाः सिद्धास्तथा वारिणां स्तंभश्चापि वरांगने गजघटास्तंभस्तथा मोहनं मातस्त्वत्
पदसेवया खलु नृणां सिद्ध्यन्ति ते ते गुणाः क्लान्तिः कान्तमनोभवस्य भवति क्षुद्रोपि वाचस्पतिः ८ ताराष्टकमिदं रम्यं भक्तिमान्यः प
ठेन्नरः प्रातर्मध्याह्नकाले च सायाह्ने नियतः शुचिः लभते कवितां विद्यां सर्वशास्त्रार्थविद्भवेत् ९ लक्ष्मीमनश्वरां प्राप्य भुक्त्वा भोगा
न्यथेप्सितान् १० कीर्त्तिः कान्तिश्च नैरुज्यं सर्वेषां प्रियतां व्रजेत् विख्यातिं चापि लोकेषु प्राप्यान्ते मोक्षमाप्नुयात् इति नीलत
न्त्रे तारास्तोत्रं समाप्तं अथ ताराकवचं ईश्वर उवाच कोटितन्त्रेषु गोप्या हि विद्यान्त्रऽघमोचिनी दिव्यं हि कवचं तस्याः शृणुष्व
सर्वकामदं १ ताराकवचस्यास्य अक्षोभ्य ऋषिस्त्रिष्टुप् छन्दो भगवती तारा देवता सर्वमन्त्रसिद्धिसमृद्धये विनियोगः प्रणवो मे शिरः पा
तु ब्रह्मरूपा महेश्वरी ह्रींकारः पातु हृदये भवानी शक्तिरूपधृक् फट्कारं पातु सर्वांगं सर्वसिद्धिफलप्रदा खर्वा मां पातु देवेशी
गण्डयुग्मे भयापहा निम्नोदरी सदा युग्मे पातु महेश्वरी व्याघ्रचर्मावृतकटी पातु देवी शिवप्रिया पीनोन्नतस्तनी पातु पार्श्वयुग्मे म
हेश्वरी रक्तवर्तुलनेत्रा च कटिदेशे सदावतु ललज्जिह्वा सदा पातु नाभौ मे भुवनेश्वरी करालास्या सदा पातु लिंगे देवी हरिप्रिया:
पिंगोग्रैकजटा पातु जंघायां विघ्ननाशिनी खड्गहस्ता महादेवी जानुचक्रे महेश्वरी नीलवर्णा सदा पातु जानुनी सर्वदा मम नाग

गं०व०सा० कुंडलधरादेवी पातु पादयुगे ततः नागहारधरादेवी सर्वांगे पातु सर्वदा नागकंकनधरादेवी प्रायश्चांतरदेशतः चतुर्भुजा सदा पातु गमने
२३९ शत्रुनाशिनी खड्गहस्ता महादेवी पातु मां विजयप्रदा नीलाम्बरधरादेवी पातु मां विघ्ननाशिनी खड्गहस्ता महादेवी पातु मां विजयप्रदा
कर्त्रहस्ता सदा पातु विवादे शत्रुमध्यतः ब्रह्मकपालधरादेवी संग्रामे पातु सर्वदा नागकंकनधरादेवी भोजने पातु सर्वदा शवकर्णा म
हादेवी शयने पातु सर्वदा वीरासनधरादेवी निद्रायां पातु सर्वदा धनुर्धारिणा धरादेवी पातु मां धर्मसंकुले नागाश्चितकटी पातु देवी
मां सर्वकर्मसु छिन्नमुण्डधरादेवी कानने पातु सर्वदा चितामध्यस्थिता देवी मारणे पातु सर्वदा द्वीपचर्मधरादेवी पुत्रदारध
नादिषु अलंकारान्विता देवी पातु मां हरवल्लभा रक्तरक्तनदीकुंजे हूं हूं फट् समन्विता बीजरूपा महादेवी पर्वते पातु सर्वदा
मलिधरि वज्रिणि देवि महाप्रतिप्रसरे तथा रक्तरक्तसदा हूं हूं ओं क्रीं स्वाहा महेश्वरी पुष्पकेतुराजार्हे तेकानने पातु सर्वदा ओं
क्रीं वज्रपुष्पे हूं फट् प्रान्तरे सर्वकामदा ओं पुष्पपुष्पे महापुष्पे पातु पुत्रान्महेश्वरी हूं स्वाहा शक्तिसंयुक्ता दारान्रक्षतु सर्वदा २
ओं आं क्रूं फट् स्वाहा महेशानी पातु द्यूते हरिप्रिया ओं क्रीं सर्वविघ्नानुत्सारिणी देवी विघ्नान्मां सर्वदावतु ओं पवित्रवज्रभूमे हूं फट् राम
स्वाहा समन्विता त्वरिता पातु मां देवी सर्वविघ्नविनाशिनी ओं आः सुरेखवज्ररेखे हूं फट् स्वाहा समन्विता पाताले पातु मां देवी ना २३९

लिनीनामसंज्ञिका क्लींकारीपातुमां सर्वे शक्तिरूपांमहेश्वरीं स्त्रींकारीपातुदेवेशीवंधरूपामहेश्वरी हूंस्वरूपामहादेवीपातु क्रोध
रूपिणि फट्स्वरूपामहामायाउत्तरेपातुसर्वदा पश्चिमेपातुमांदेवीफट्स्वरूपाहरिप्रिया मध्येमांपातुदेवेशी हूंस्वरूपामहामाया छन्न
रेपातुसर्वदा पश्चिमेपातुमांदेवीपट्नागात्मजा नीलवल्लीसदापातुसर्वत्रवाग्भवंसदा भवानीपातुभुवनेसर्वैश्वर्यप्रदायिनी विद्यादान
रतादेवीसरस्वती शास्त्रेवादेचसंग्रामेजलेचविषमेगिरौ भीमरूपासदापातुश्मशानेभयनाशिनी भूतप्रेतालयेघोरेदुर्गामांसदाऽ
वतु पातुनित्यंमहेशानीसर्वत्रशिवदूतिका कवचस्यचमहात्म्यंनाहंवर्षशतैरपि शक्नोमिकथितुंदेविभवेत्तस्यफलंचयत् पुत्रदा
रेषुबन्धूनांसर्वदेशेचसर्वदा नविद्यतेभयंतस्यनृपपूज्योभवेच्चसः शुचिर्भूत्वाशुचिर्वापिकवचंसर्वकामदं प्रपठन्वास्मरन्मर्त्यो
दुःखशोकविवर्जितः सर्वशास्त्रेमहेशानिकविराड्भवतिध्रुवं सर्ववागीश्वरोमर्त्योलोकवश्योभवेन्नरः रणेद्यूतेविवादेचजयस्
त्रभवेद्ध्रुवं पुत्रपौत्रान्वितोमर्त्योविलासीसर्वयोषितां शत्रवोदासतांयान्तिसर्वेषांवल्लभःसदा गर्वीखर्वीभवत्येववादीस्खलतिदर्श
नात् मृत्युश्चवश्यतांयातिदासास्तस्यावनीभुजः प्रसंगात्कथितंसर्वंकवचंसर्वकामदं प्रपठन्वास्मरन्मर्त्यः श्रीपातुग्रहणेक्षमः
सर्वदानंदसिंधूनामधिपःकविराड्भवेत् सर्ववागीश्वरोमर्त्योलोकवश्यःसदासुखी गुरोःप्रसादमासाद्यविद्यांप्राप्यसुगोपितां

तं० सा० २४०

तत्रापि कवचं देवि दुर्लभं भुवनत्रये गुरुर्देवो हरः साक्षात् पत्नी तस्य हरप्रिया अभेदेन यजेद्यस्तु तस्य सिद्धिरदूरतः मंत्राचारा महेशानि क-
थिताः पूर्ववत्प्रिये नाभौ ज्योतिस्तथा रक्तं हृदयोपरि चिंतयेत् ऐश्वर्यं सुकवित्वं च महावाणीश्वरो नृपः नित्यं तस्य महेशानि महिलासं-
गमं चरेत् पंचाचाररतो मंत्री सिद्धो भवति नान्यथा शक्तियुक्तो भवेन्मर्त्यः सिद्धो भवति नान्यथा ब्रह्मा विष्णुश्च रुद्रश्च ये देवाः
सुरसत्तमा तं दृष्ट्वा साधकं देवि लज्जायुक्ता भवंति ते स्वर्गे मर्त्ये च पाताले ये देवाः सिद्धिदायकाः प्रशंसंति सदा देवि तं दृष्ट्वा सा-
धकोत्तमं इति ते विघ्नात्मकाश्च ये देवाः स्वर्गे मर्त्ये रसातले प्रशंसन्ति सदा सर्वे तं दृष्ट्वा साधकोत्तमं इति ते कथितं देवि मया सम्यक्
प्रकीर्तितं भुक्तिमुक्तिकरं साक्षात् कल्पवृक्षस्वरूपिणं आसाद्याद्यगुरुं प्रसाद्य य इदं कल्पद्रुमालम्बनं मोहेनापि मदेन चापि पति-
तो जाड्येन मुह्यत्यसौ सिद्धोसौ भुवि सर्वदुःखविपदां पारं प्रयात्यन्तके मित्रं तस्य नृपाश्च देवि विपदो नश्यन्ति तस्याशु च लिखित्वा धार-
येद्यस्तु कंठे वामस्कंधे भुजे तस्य सर्वार्थसिद्धिः स्याद्यद्यन्मनसि वर्तते गोरोचनाकुंकुमेन रक्तचंदनकेन वा यावकेन महेशानि लिखेद्य-
त्रं समाहितः अष्टम्यां मंगले दिने चतुर्दश्यामथापि वा संध्यायां लिखेद्यंत्रं भूर्जपत्रे समाहितः मघायां श्रवणायां वा रेवत्यां वा वि राम
शेषतः सिंहराशिगते चेंदौ कर्कटस्थे दिवाकरे मीनराशौ गुरौ याते वृश्चिकस्थे शनैश्चरे लिखित्वा धारयेद्यस्तु उत्तरा[illegible]गुरौ भ २४०

वन श्मशाने प्रांतरे वापि शून्यागारे विशेषतः निशायां वा लिखेद्यंत्रं तस्य सिद्धिरचंचला भूर्ज्जपत्रे लिखेद्यंत्रं गुरुणा चैव हेस्व
रि ध्यानधारणायोगेन धारयेद्यस्तु भक्तितः अचिरात्तस्य सिद्धिः स्यान्नात्र कार्य्या विचारणा इति रुद्रयामले उग्रताराकवचं समा
सं अथ ताराकवचं देव्युवाच नारा प्रजाश्रुता नानायद्विद्याश्च सकला मया सांप्रतं श्रोतुमिच्छामि कवचं मंत्रविग्रहं त्रैलोक्य
मोहनं नाम सर्वविघ्ननिवारकं शरैवस्तूचितं नाथ लपयामि प्रकाशय भैरव उवाच देवदानवविद्याधरकूश्रजिते प्राणव
ल्लभे त्रैलोक्यमोहनं नाम कवचं शृणु तत्परं सर्वविद्यामयं देवि सर्वमंत्रमयं ध्रुवं महारत्नाकरं सर्वसिद्धिविद्याप्रदायकं वेदव
मो पियद्धृत्वा सर्वज्ञः पठनाद्यतः यद्धृत्वा पठनाद्दीशस्त्रैलोक्यविजयी विभुः धनाधिपः कुवेरश्चरोपि देवाधीशः शचीपतिः प
ठनाद्धारणाज्ज्ञात्वं यतः सर्वदिगीश्वराः सर्वैश्वर्ययुताः सत्त्वः सद्यैश्वर्यमवाप्नुयुः यस्य प्रसादादीशो हं भैरवानां सुरेश्वरि
क्रोधाधिपो महाभीमो देवेषु प्रथितः प्रभुः नाद्यायास्तारिणीश्चैभ्यो दद्याच्छिद्रेभ्य एव च अभक्तेभ्योपि पुत्रेभ्यो दद्यान्मृत्युमवा
प्नुयात् त्रैलोक्यमोहनस्यापि कवचस्य ऋषिः शिवः छन्दो विराट् देवता च सोग्रतारा प्रकीर्त्तिता चतुर्वर्गेषु विद्यायां विजये परि
कीर्त्तितः ॐ ह्रीं स्त्रीं मे शिरः पातु हूं फट् पातु ललाटकं सार्द्धपंचाक्षरी तारा पायान्नेत्रयुगं मम ॐ ह्रीं स्त्रीं हूं श्रुती पायान्नमः

तं०सा०
२४१

पातुचनासिका तारावडहरी पायाद्वदनं मुण्डमालिनी क्रीं स्त्रीं हूं चफटवदनं जिह्वां पायान्महेश्वरी क्रीं स्त्रीं हूं युगलं पातु मापिनी
लसरस्वती स्त्रीं कुल्लौ पातु नियतं तारे कालहररूपिणी हूं घंटां सा सदा पातु बीजैककालहररूपिणी ऐं क्लां स्त्रीं हूं फट् पायाद्वाकुलाराम्मेनु
जहृय श्रीं क्रीं स्त्रीं हूं चफट् पायाद्धि तारामेसूनद्वयं क्रीं क्रीं स्त्रीं हूं चफट् पायन्नारानुहृदयं मम हूं क्रीं स्त्रीं हूं चफट् बीजतारा
पृष्ठं सदावतु ह्लीं क्रीं स्त्रीं हूं चफट पायान्माम्बीकामस्वरूपिणी ॐ क्रीं श्रीं हूं नमः पायात्कुक्षौ महावडहरी ऐं सौः ॐ ऐं क्लीं
फट् स्वाहा कटिदेशं सदाऽवतु अष्टाक्षरी महाविद्यासाक्षाद्ब्रह्मस्वरूपिणी खं हूं ह्रौं ॐ ऐं श्रीं क्रीं सागुह्यदेशे सदाऽवतु सप्ता
क्षरी चोग्रतारा मूलविद्यास्वरूपिणी ॐ क्रीं क्लां हूं नमस्तारायै सर्वालपदं ततः दुस्तरोनारयपदं तारय प्रणवद्वयं स्वाहेतिच महा
विद्याजानुनी सर्वदाऽवतु ऐं सौः ॐ ऐं क्लीं फट् स्वाहा जंघे पातु परात्मिका ॐ क्रीं स्त्रीं हूं फट् तारा हंसा चन्द्रानवाक्षरी महेश्व
तारा पादौ मे नित्यं पातु महेश्वरी ॐ ऐं क्लीं स्त्रीं हंसो स्हौः वदवद वाग्वादिनी तिच कामबीजत्रयं नील सरस्वती स्वरूप ध्व…
द्वंकाद्धिकाद्धिकलाहि स्वाहेतिच चतुर्दिशाक्षिविमपी पातु तारा बिल्वे वपुः इन्दुवामाक्षियुक्पृथ्वीसरस्वत्यनलप्रिया कू…घ राम
तापातु तोर्द्ध्वं मूलविद्यादशाक्षरी तारोमध्यावधःकूर्चकालीकाम्पकलाततः उग्रतारे भगं कामपरालक्ष्मीः शिवांकुशौ म…हाद्या २४१

उक्ता विद्या प्रोक्ता भारादेव्या मयाधुना। विधिवद्ग्रहणादस्या मन्मुंमन्तुपर्थं नयेत् एषा विद्या महागुप्ता तंत्रादिजामुखे सुच
सांप्रतं कथितं दिव्यं कवचाङ्गं मया प्रिये इति निकथितं देवि गुह्याद्गुह्यतरं प्रिये त्रैलोक्यमोहनं नामकवचं मंत्रविग्रहं ज्ञात्वावि
द्यामयं भद्रे केवलं ब्रह्मरूपिणि मंत्रविद्यामयं चैतत्कवचं मन्मुखोदितं गुरुमभ्यर्च्य विधिवत्कवचं प्रपठेद्यदि तेऽ:स
त्वं द्यायथा ह्लानं भैरवस्त्वं ह्मणो ड्वेत् सर्वपापविनिर्मुक्तः कुलकोटीः समुद्धरेत् गुरुःस्यात्सर्वविद्यासु अधिकारी जपा
दिषु शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः शतमष्टोत्तरं जप्त्वा भवेद्भूमिपुरंदरः त्रैलोक्यविचरे [illegible] द्वीरोगगणनाथोऽ
यथा गुहः गद्यपद्यमयी वाणी भवेद्गंगाप्रवाहवत् पुष्पांजल्यष्टकं दत्वा मूलेनैव पठेत्सकृत् पञ्चवर्षसहस्राणां पूजाया
फलमाप्नुयात् भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि पुरुषो दक्षिणे बाहौ योषिद्वामभुजे तथा सर्वसिद्धीश्वरो भूत्वा विच
रेद्भैरवो यथा तद्गात्रं प्राप्य शस्त्राणि ब्रह्मास्त्रादीनि भैरवि माल्यानि कुसुमान्येव भवन्ति सुखदानि च तस्य गेहे विरलं द्रुमो वाणी
वक्त्रे वसेद्ध्रुवं इदं कवचमज्ञात्वा तारां यो भजतेऽधमः स्वल्पायुर्निर्धनो मूर्खो भवत्येव न संशयः इति भैरवीतंत्रे ताराकल्पे त्रैलो
क्यमोहनं नामकवचं अथ वगलामुखीस्तोत्रं चलत्कनककुंडलोल्लसितचारुगंडस्थली लसत्कनकचंपकद्युतिमदिन्दुबिम्बा

मं० सा० २४२

ननां गदाहतविपक्षकां कलितलोलजिह्वांचलां स्मरामि वगलामुखीं विमुखवाङ्मनस्तंभनीं पीयूषोदधिमध्यचारुविलसद्रक्तोत्प
लमंडपे सत्सिंहासनमौलिपातितरिपुं प्रेतासनाध्यासिनीं स्वर्णाभां करपीडितारिरसनां भ्राम्यद्गदां विभ्रमां इत्थं ध्यायति यान्ति वि
लयं सद्योथवापदः २ देवि त्वच्चरणांबुजार्चनकृते यः पीतपुष्पांजलिं भक्त्या वामकरे निधाय च पुनर्मंत्री मनोज्ञाक्षरं पीठध्यानपरोथ
कुंभकवशाद्बीजं स्मरेत्पार्थिवम् तस्यामित्रमुखस्य वाचि हृदये जाड्यं भवेत्तत्क्षणात् ३ वादी मूकति रंकति क्षितिपतिर्वैश्वान
रः शीतति क्रोधी शाम्यति दुर्जनः सुजनति क्षिप्रानुगः खंजति गर्वी खर्वति सर्वविच्च जडति त्वन्मंत्रिणा यंत्रितः श्रीनित्ये वगलामु
खि प्रतिदिनं कल्याणि तुभ्यं नमः ४ मंत्रस्तावदलं विपक्षदलने स्तोत्रं पवित्रं च ते यंत्रं वादिनियंत्रणं त्रिजगतां जैत्रं च चित्रं च ते मा
तः श्रीवगलेति नाम ललितं यस्यास्ति जन्तोर्मुखे त्वन्नामग्रहणेन संसदि मुखस्तंभो भवेद्वादिनां ५ दुष्टस्तंभनमुग्रविघ्नशमनं दारि
द्र्यविद्रावणं भूभृद्भीशमनं चलन्मृगदृशां चेतः समाकर्षणं सौभाग्यैकनिकेतनं मम दृशः कारुण्यपूर्णेक्षणे मृत्योर्मारणमाविरस्तु
पुरतो मातस्त्वदीयं वपुः ६ मातर्भंजय मद्विपक्षवदनं जिह्वांचलां कीलय ब्राह्मीं मुद्रय दैवदेस धिषणामुग्रां गतिं स्तंभय शत्रूंश्चूर्णय राम
य देवि तीक्ष्णगदया गौरांगि पीतांबरे विघ्नौघं वगले हर प्रणमतां कारुण्यपूर्णेक्षणे ७ मातर्भैरवि भद्रकालि विजये वाराहि विश्वाश्रये २४२

श्रीविघ्नेसमयेमहेशीचगलेकामे शिवामिरमे मातङ्गि त्रिपुरेपरात्परतरेस्वर्गापवर्गप्रदे दासोहंशरणागतः करुणयाविश्वेश्वरि
र संरंभेचोरसंघे प्रहरणसमयेबंधनेव्याधिमध्ये विद्यावादे विवादेप्रकुपितनृपतौ दिव्यकालेनिशायां वश्यवास्तंभनेवापिपुवधे म
येनिर्जलेवावनेवा गच्छंस्तिष्ठंस्त्रिकालं यदिपठति शिवं प्राप्नुयादाशुधीरः ९ त्वंविद्यापरमा त्रिलोकजननी विघ्नौघसंछेदिनी योषा
कर्षणकारिणी जनमनः संदोहसंदायिनी स्तंभोत्सारणकारिणीपशुमनः सम्मोहसंदायिनी जिह्वा कीलनभैरवी विजयते ब्र
ह्मादिमन्त्रो यथा १० विद्यालक्ष्मीं सर्वसौभाग्यमायुः पुत्रैः पौत्रैः सर्वसाम्राज्यसिद्धिं मानं भोगं वश्यमारोग्यसौख्यं प्राप्तं तत्तद्भू
तलेस्मिन्नरेण ११ त्वत्कृतं जपसन्नाहं गृहीतं परमेश्वरि दुष्टानां निग्रहार्थाय तं गृहाण नमोस्तु ते इति रुद्रयामले बगलास्तोत्रं
इति स्तवकवचप्रकरणं समाप्तं अथ प्रसंगाः स्तुतः षट्त्रिंशदुपचारा मादयो निरूप्यन्ते अथ चतुःषष्ट्युपचाराः सर्वोपचारमन्त्रा
नारीपूर्वाः कल्पयामि नमः इत्यन्ताः कार्याः ऐं ह्रीं श्रीं पाद्यं कल्पयामि नमः एवं अर्घ्यं कल्पयामि नमः इति क्रमेण आसनारोपणं सु
गंधितैलाभ्यंगं मज्जनशालाप्रवेशं मण्डपमणिपीठोपवेशनं दिव्यस्नानीयमुद्वर्तनं उष्णोदकस्नानं कनककलशच्यु
तसकलतीर्थाभिषेचनं धौतवस्त्रपरिमार्जनं अरुणदुकूलपरिधानं अरुणदुकूलोत्तरीयं आलेपमंडपप्रवेशं आलेप

प

तं०सा० मणिपीठोपवेशनं चंदनागुरुकुंकुमकर्पूरमृगमदगोरोचनादिव्यगंधसर्वांगीनविलेपनं केशभारस्यकालागुरुधूपमल्लि
२४३ कामालतीजातीचंपकाशोकशतपत्रपूगनागकुहलीपुन्नागकल्हारयुग्मसर्वर्तुकुसुममालाभूषणं मण्डपप्रवेशं भू
२४३ षणमणिपीठोपवेशनं नवमणिमुकुटं चंद्रसकलसीमन्तसिंदूरं तिलकरत्नंकालाञ्जनं नासाभरणंपालीयुगलं अधर
यावकं ग्रथनभूषणं कनकचित्रपत्रकं महापदकं मुक्तावलिं एकावलिं देवच्छन्दकं केयूरयुगलचतुष्टयं वलयावलिं
ऊर्मिकावलिं कांचीदामकटिसूत्रं शोभाख्याभरणं पादकटकं रत्ननूपुरं पादांगुलीयकं एककरे पाशं अन्यकरे अंकुशं अ
स्त्र परकरे इक्षुचापं अपरकरे पुष्पबाणान् श्रीमन्माणिक्यपादुके स्वसमानवेशास्त्वाभरणदेवताभिः सह महासिंहासनादि
रोहणं कामेश्वरपर्यंकोपरोहणं अमृतासवपानम् आचमनीयकं कर्पूरवटिकां आनन्दोल्लासविलासहासं मङ्गलारा
त्रिकं श्वेतछत्रं चामरयुगलं दर्पणं तालवृन्तं गंधपुष्पधूपदीपनैवेद्यं कल्पयेत् एतेषामुपचाराणामभावे एतेमन्त्रा
प्याः नवरत्नेश्वरे चतुःषष्ट्युपचाराणामभावे तन्मनुं जपेत् तत्र देवपदं विद्यात् साधकः स्थिरमानसः अथवा दशोपचाराम
चाराः आसनं स्वागतं पाद्यं चार्घ्यमाचमनं ततः स्नानं वासोपवीतं च भूषणानि च सर्वशः गंधपुष्पं तथा धूपं दीप ...त्रं च २४३

तर्पणं माल्यानुलेपनं चैव नमस्कार विसर्जनं अष्टादशोपचारैश्च मंत्री पूजां समाचरेत् अथ षोडशोपचाराः पाद्यार्घ्या
चमनं स्नानं तथा वसनभूषणे गंधपुष्पे धूपदीपनैवेद्याचमनं ततः ताम्बूलमर्चनास्तोत्रं तर्पणं च नमस्क्रिया प्रांतज
येत्पूजायामुपचारांश्च षोडश: अथ दशोपचाराः पाद्यमर्घ्यं तथाचाम्यं मधुपर्काचमनं ततः गंधादयो नैवेद्यांतः
उपचारा दश क्रमात् अथ पञ्चोपचाराः गंधं पुष्पं तथा धूपं दीपं नैवेद्यमेव च अखंडफलमासाद्य कैवल्यं लभते ध्रुवं अ
थोपचारमंत्राः तथा उपचन्दनकुंकुमारुणपयोधाराभिराह्लादितां मामाकारत्नमणिप्रवालघटितां दत्तां गृहाणाम्बिके आमृष्टां सु
रसुन्दरीभिरमलैर्हस्ताम्बुजैर्भक्तितो मातः सुन्दरिभक्तकल्पलतिके श्रीपादुकामादरात् देवेन्द्रादिभिरर्चितं सुरगणैरादाय सिंहा
सनं चंचत्काञ्चनसंचयाभिरचितं चारुप्रभाभास्वरं एतच्चम्पककेतकीपरिमलं तैलं मया निर्मितं गंधोद्वर्तनमादरेण तरुणीदत्तं गृहा
णाम्बिके २ पश्चाद्देवि गृहाण शंभुगृहिणि श्रीसुन्दरि प्रायशो गंधद्रव्यसमूहनिर्भरभरं धात्रीफलं निर्मितम् तत्केशान् परिशोध्य क
कतिकया मन्दाकिनीस्रोतसि स्नात्वा प्रोञ्छनगंधिकं भवतु नः श्रीसुन्दरि त्वन्मुदे ३ सुराधिपतिकामिनीकरसरोजनालीधृतां सच
न्दनसकुंकुमागुरुभरेण विभ्राजितां महापरिमलोज्ज्वलां सरसशुद्धकस्तूरिकां गृहाण वरदायिनि त्रिपुरसुंदरि श्रीपदे ४ गंध
रि

नं०सा० सुरामरकिंनरप्रियतमासंतानहस्तांबुजप्रस्तारैर्ध्रियमाणमुत्तमतरं काश्मीरजापिंजरं भालभास्वरभानुमंडललसत्कान्तिप्रभावोज्वलं चै
२४४ लं निर्मलमातनोतु वसनं श्रीसुंदरि त्वन्मुदे ५ स्वर्णाकल्पितकुंडले श्रुतियुगे हस्ताम्बुजे मुद्रिकां मध्ये सारसनां नितम्बफलके मञ्जीर
मंघ्रिद्वये हारो वक्षसि कंकणौ क्वणरणत्कारौ करद्वंद्वके विन्यस्तं मुकुटं शिरस्यनुदिनं दत्तोन्मदं स्तूयतां ६ ग्रीवायां धृतिकान्तिका
244 न्तपटलं ग्रैवेयकं सुन्दरं सिंदूरं विलसल्ललाटफलके सौंदर्यमुद्राधरं राजत्कज्जलमुज्वलोत्पलदलश्रीमोचने लोचने तद्दिव्यौषधिनिर्मि
तं रचयतु श्रीशांभवि श्रीपदे ७ अमन्दतरमंदरोन्मथितदुग्धसिंधूद्भवं निशाकरकरोपमं त्रिपुरसुंदरि श्रीपदे गृहाण मुखमीक्षितुं मुकु
रबिम्बमाविद्रुमैर्विनिर्मितमघच्छिदे रतिकरांबुजस्थायिनं ८ कस्तूरीद्रवचंदनागुरुसुधाधाराभिराप्लावितं चंचच्चंपकपाटलादिसु
रभिद्रव्यैः सुगंधीकृतं देवस्त्रीगणमस्तकस्थितमहारत्नादिकुंभव्रजैरंभः शांभवि संभ्रमेण विमलं दत्तं गृहाणाम्बिके ९ कह्लारोत्पलनाग
केशरसरोजाख्यावलीमालतीमल्लिकैः वरकेतकादिकुसुमैः रक्ताश्वमारादिभिः पुष्पैर्माल्यभरेण वै सुरभिणा नानारसस्रोतसा ताम्रांभो एग
जनिवासिनीं भगवतीं श्रीसुंदरीं पूजयेत् १० मांसीगुग्गुलुचंदनागुरुरजः कर्पूरशैलेयजैर्माध्वीकैः सहकुंकुमैः सुरभिरैः सर्पि लग
तैः सौरभ्यस्थितिमंदिरे मणिमये पादे भवत्प्रीतये धूपोयं सुरकामिनीविरचितः श्रीसुन्दरि त्वन्मुदे ११ घृतद्रवपरिस्फुरद्रुचिर न २४४

यस्मान्वितोमहात्रिपुरनाशनःसुरनितंविनीनिर्म्मितः सुवर्णचषकस्थितःसघनसारवर्त्यान्वितःनवत्रिपुरसुंदरिस्फुरतुदेविवोऽपोमु
दे १२ ओंनींसौरभनिर्भरंरुचिकरंशाल्योदनंनिर्म्मलंयुक्तंहिंगुमरीचजीरसुरभिर्द्रव्यान्वितैर्व्यंजनैः पक्वान्नेनसपायसेनमधुनादध्या
ज्यसंमिश्रितं नैवेद्यंसुरकामिनीविरचितंश्रीसुन्दरित्वंमुदे १३ लवंगकलिकोज्वलंवहलनागवल्लीदलंसजातिफलकोमलंसघनसा
रपूगीफलं सुधामधुरिमाकुलंरुचिररत्नपात्रस्थितंगृहाणमुखपंकजेस्फुरतमंवतांम्बूलकं १४ शरत्प्रभवचन्द्रमःस्फुरितचं
द्रिकासुंदरंदलद्धुवनरंगिनीललितमौक्तिकाडंबरं गृहाणभवकांचनप्रभवदंडखंडोज्वलंमहात्रिपुरसुंदरिप्रकटमातपत्रंम
हत् १५ मातस्त्वन्मुदमातनोतुसुभगस्त्रीभिःसमान्दोलितंशुभ्रंचामरमिंदुकुंदसदृशंप्रस्वेददुःखापहं सद्योगस्त्यवसिष्ठशुक
नारदव्यासादिवाल्मीकिभिःस्वेचित्तेक्रियमाणएवक्रियतांशर्म्माणवेदध्वनि १६ स्वर्गाङ्गनेमंगलवेणुशंखभेरीनिनादैरुपगीय
माना:कोलाहलैराकुलितातवास्तुविद्याधरीनृत्यकलासुखायमातर्दविभक्तरसभावितवत्नेश्रीयतांयदिकुतोपलभ्यते १७ तत्रलो
ल्यमतिसत्फलमेकंजन्मकोटिभिःरपीहनलभ्यं १७ एतैःषोडशभिःपद्यैरुपचारोपकल्पितैः यःपरांदेवतांस्तौतिसतेषांफलमाप्नु
यात् १८ अथरुद्राक्षमाहात्म्यं शिखायांहस्तयोःकंठेकर्णयोश्चापियोनरः रुद्राक्षंधारयेद्भक्त्याशैवंलोकमवाप्नुयात् न

सं०सा० वक्त्रं तु रुद्राक्षं धारयेद्वामबाहुना चतुर्दशमुखं चैव शिखायां धारयेद्बुधः एकवक्त्रः शिवः साक्षात् ब्रह्महत्यां व्यपोहति ॥ द्विव
२४५ ध्यत्वं प्रजिश्रातो वह्निसंभं करोति च द्विवक्त्रो हरगौरी स्यात् शिवधाद्यघनाशकृत् त्रिवक्त्रोऽग्निस्त्रिजन्मोत्थपापराशिं प्रनाशयेत् चतुर्व
क्त्रः स्वयं ब्रह्मा ब्रह्महत्यां व्यपोहति पञ्चवक्त्रस्तु कालाग्निरगम्याभक्ष्यपापहृत् षड्वक्त्रस्तु गुहः प्रोक्तो गर्भहत्यां शमेदघम् सप्त
वक्त्रः स्वनन्तः स्यात् स्वर्णस्तेयाद्यघनुत्सदा विनायकोऽष्टवक्त्रः स्यात् सर्वानन्तविनाशकृत् भैरवो नववक्त्रस्तु शिवसायुज्यकारकः
दशवक्त्रः स्मृतो विष्णुर्भूतप्रेतपिशाचहा एकादशमुखो रुद्रो नानायज्ञफलप्रदः द्वादशास्यो भवेदर्कः सर्वक्रतुफलप्रदः
त्रयोदशमुखः कामः सर्वकामफलप्रदः चतुर्दशास्यः श्रीकण्ठो वंशोद्धारकरः परः निश्छिद्रा रुद्राक्षस्य पक्वा रुद्राक्षा धारणे स्मृ
ताः पञ्चामृतं पञ्चगव्यं स्नानकाले प्रयोजयेत् रुद्राक्षस्य प्रतिष्ठायां मन्त्रं पञ्चाक्षरं यथा ॐ त्र्यम्बकादिमन्त्रं च यथा तत्र प्रयोज
येत् त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनं उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् तथा ॐ ह्रौं घोरे ह्रूं घोरतरे ह्रूं ॐ ह्सैं ह्रीं
सर्वतः सर्वाङ्गेन नमस्ते रुद्ररूपे ह्रूं अनेनापि च मन्त्रेण रुद्राक्षस्य द्विजोत्तमः प्रतिष्ठां विधिवत्कुर्यात् ततोऽधिकफलं लभेन्नरः ततो राम
ययास्य मन्त्रेण धारयेद्भक्तिसंयुतः ततः क्रमेण मन्त्राः ॐ ॐ भगवान्नमः १ ॐ ॐ नमः २ ॐ ॐ नमः ४ ॐ ह्रूं नमः ५ ॐ ह्रैं नमः ६ २४५

ॐ नं हूं नमः ७ ॐ सः क्रं नमः ८ ॐ हं नमः ९ ॐ क्रीं नमः १० ॐ श्रीं नमः ११ ॐ हूं क्रीं नमः स्वः १२ ॐ क्षां क्षौं नमः १३ ॐ नमो
नमः १४ रुद्राक्षे देहसंस्थे तु कुक्कुरो म्रियते यदि सोऽपि रुद्रपदं याति किं पुनर्मानवा गुह सप्तविंशति रुद्राक्षमालया देहसंस्थया
यत्करोति नरः पुण्यं सर्वं कोटिगुणं भवेत् यो ददाति द्विजातिभ्यो रुद्राक्षं भूविषण्मुख तस्य प्रीतो भवेद्रुद्रः प्रयच्छति निजं पदम इ
ति पद्मपुराणे रुद्राक्षमाहात्म्यं स्कन्दपुराणे कार्त्तिकेय उवाच एक द्वि त्रि चतुः पञ्च षट् सप्त नवा दशैकादशद्वादशत्रयो
दश चतुर्दश एतेषां तु मुखानां च देवताकोऽत्र शंकर गुणं च कीदृशं तेषां कथयस्व यथार्थतः शंकर उवाच शृणु षण्मुख वक्ष्या
च देवताकोऽत्र शंकर तत्त्वेन वक्त्रे वक्त्रे यथाक्रमं एकवक्त्रः शिवः साक्षाद्ब्रह्महत्यां व्यपोहति द्विवक्त्रो देवदेवोऽसौ गोवधं नाशये
द्ध्रुवं त्रिवक्त्रो दहनः साक्षात् स्त्रीहत्यां व्यपोहति चतुर्वक्त्रः स्वयं ब्रह्मा ब्रह्महत्यां व्यपोहति पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नामना
मतः षड्वक्त्रः कार्त्तिकेयस्तु धारयेद्दक्षिणे भुजे ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः सप्तवक्त्रो महासेनः अनन्तो नामनाग
राट् गुरुतल्पादिभिः पापैर्मुच्यते नात्र संशयः अष्टवक्त्रो महासेनः साक्षाद्देवो विनायकः एकोदरकरेणापि संस्पर्शे द्वा गु
स्त्रियां एवमादीनि पापानि अतिपापानि सर्वशः विघ्नास्तस्य च नश्यन्ति मुक्तो याति परां गतिम् गुणा ह्येतेषु सर्वेषु अष्टवक्त्रस्य धा

तं०सा० रणात् नववक्त्रो भैरवः स्याद्धारये द्वामकेभुजे कपिलं मुक्तिदं प्रोक्तं समतुल्यबलो भवेत् लक्षकोटिसहस्राणि ब्रह्महत्यां करोति यः
२४६ तत्सर्वं दहते शीघ्रं नववक्त्रस्य धारणात् दशवक्त्रो महासेनस्साक्षाद्देवो जनार्दनः ग्रहाश्चैव पिशाचाश्च वेतालाब्रह्मराक्षसा प
न्नगाश्च विनश्यन्ति दशवक्त्रस्य धारणात् वक्त्रैकादशरुद्राक्षो रुद्राएकादशस्मृताः शिखायां धारयेन्नित्यं तस्य पुण्यफलं
शृणु अश्वमेधसहस्रस्य वाजपेयशतस्य च हेमशृङ्गयाश्च लक्षस्य साम्यस्य गदतस्य यत्फलं तत्फलं समवाप्नोति रुद्रैका
दशधारणात् रुद्राक्षं द्वादशैर्वक्त्रैः कण्ठदेशे च धारयेत् आदित्यस्तुष्यते नित्यं द्वादशार्कव्यवस्थिता त्रयोदशमुखः
कामः सर्वकामफलप्रदः चतुर्दशास्यश्रीकण्ठो वंशोद्धारकरः परः तत्र क्रमेणामन्त्राः ॐ ह्रें १ ॐ श्रीं २ ॐ ॐ धुं धुं
ॐ क्लीं क्रः ४ ॐ श्रीं ५ ॐ क्लीं ६ ॐ ह्रां ७ ॐ कवं ८ ॐ क्लां ९ ॐ क्लीं १० ॐ श्रीं ११ ॐ ह्रां क्लां १२ ॐ क्षौं स्थौं १३ ॐ नं १४
इति रुद्राक्षसंस्कारः अथ नैमित्तिकादिकर्मभङ्गे प्रायश्चित्तमाह गौतमीये यद्यत्कर्म विलुप्येत नित्यनैमित्तिकं तथा सहस्रं प्र
नेत्रं मूलं चायुतमेव चा नित्यसहस्रं प्रजपेत् नैमित्तिकं तथायुतं इति विष्णुविषयं अन्यत्र तं त्रराजे नित्यादिक्रमदोषेषु श्रीराम
विद्यां शतं जपेत् नैमित्तिकातिक्रमणे सहस्रं प्रजपेन्मनुं पायसं करेणु सर्वेषामेव पापानां संकरे समुपस्थिते प्रायश्चित्तं चेतत्रो २४६

क्रमयुतं मंत्रजापतः अथविद्याराधनमंत्राः तत्रगौतमीये यस्यदर्शनमिच्छन्ति देवाः स्वाभीष्टसिद्धये कृपयादेवदेवेश मदग्रे
सन्निधोभव तस्यैतेपरमेशानस्वागतंस्वागतंप्रभो कृतार्थोनुगृहीतोस्मिसफलंजीवितंतुमे यदागतोसि देवेशचिदानन्दमयाव्यय अज्ञा
नाद्वाप्रमादाद्वावैकल्यात्साधनस्यच यदपूर्णंभवेत्कृत्यंतस्याप्यभिमुखोभव इत्यावाहनमंत्रः यद्भक्तिलेशसंपर्कात्परमानं
दसंभवः तस्मैतेपरमेशानपाद्यंशुद्धायकल्पते इतिपाद्यं देवानामपिदेवायदेवानांदेवतायच आचामंकल्पयामीशशुद्धाया
शुद्धिहेतवे इत्याचमनम् तापत्रयहरंदिव्यंपरमानन्दलक्षणं तापत्रयविमोक्षायतवार्घ्यंकल्पयाम्यहं इत्यर्घ्यं सर्वकालुष्य
हीनायपरिपूर्णसुधात्मकं मधुपर्कमिमंदेवकल्पयामिप्रसीदमे इतिमधुपर्कं उच्छिष्टोप्यशुचिर्वापियस्यस्मरणमात्र
तःशुद्धिमाप्नोतितस्मैतेपुनराचमनंत्विदं इतिमधुपर्कपुनराचमनीयं परमानन्दबोधाब्धिनिमग्ननिजमूर्तयेसाङ्गोपांग
मिदंस्नानंकल्पयाम्यहमीशते इतिस्नानं मायाविनाननतेजन्मनिजगरुरुतेजसे निरावरणविज्ञानवासस्तेकल्पया
म्यहं इतिवासः यमाश्रित्यमहामायाजगत्संमोहनीसदा तस्मैतेपरमेशायकल्पयाम्युत्तरीयकं यस्यशक्तित्रयेनच
संप्रोतमखिलंजगत् यज्ञसूत्रायतस्मैतेयज्ञसूत्रंप्रकल्पये इतियज्ञसूत्रं स्वभावसुन्दराङ्गायसत्यासत्याश्रयायते भूष

तंत्रसार० २४७ णानि विचित्राणि कल्पयामि स्फुरद्द्युति इति भूषणानि समस्तदेवदेवेश सर्वतृप्तिकरं परं अखंडानन्दसंपूर्णं गृहाण जलमु
त्तमं इति जलं परमानंदसौरभ्यपरिपूर्णदिगन्तरं गृहाण परमं गंधं कृपया परमेश्वर इति गंधः तुरीयगुणसंपन्नं नानागु
णमनोहरं आनंदसौरभं पुष्पं गृह्यतामिदमुत्तमं इति पुष्पम् वनस्पतिरसोत्पन्नो गंधाढ्यो गंध उत्तमः आघ्रेयः स
र्वदेवानां धूपोयं प्रतिगृह्यतां इति धूपः सुप्रकाशो महादीपः सर्वतस्तिमिरापहः सबाह्याभ्यंतरं ज्योतिर्दीपोयं प्र
तिगृह्यतां इति दीपं गोतमीये पूजा च पंचधा प्रोक्ता तासां भेदान् शृणुष्व मे अभिगमनमुपादानं योगः स्वाध्याय एव
च इज्यापंचप्रकारा चक्रमेण कथयामि ते तत्राभिगमनं नाम देवतास्थानमार्जनं उपलेपनं निर्माल्यदूरीकरण
मेव च उपादानं नाम गंधपुष्पादिचयनं तथा योगो नाम स्वदेवस्यात्मत्वेनैव भावना स्वाध्यायो नाम मंत्रार्थसंधान
पूर्वको जपः सूक्तस्तोत्रादिपाठश्च हरेः संकीर्तनं तथा तत्त्वादिशास्त्राभ्यासश्च स्वाध्यायः परिकीर्तितः इज्या नाम स्वेष्टदेव
श्रा-धि जनं च यथार्चितः इति पंचप्रकारा ह्येताः कथितास्तव सुव्रत सार्ष्टिसामीप्यसालोक्यसारूप्यसायुज्यक्रमात् अथ ... राम
बुद्धिस्तु वैष्णवानामिहोच्यते गृहोपलेपनं चैव तथानुगमनं हरेः भक्त्या प्रदक्षिणं चैव पादयोः शोधनं पुनः पूजार्थं पु २४७

ष्पारणं नक्तौ रात्रौ लग्नं हरेः करयोः सर्वशुद्धीनामियं शुद्धिर्विशिष्यते तन्नामकीर्त्तनं चैव गुणानामथ कीर्त्तनं भक्त्या श्रीकृष्ण
देवस्य वचसः शुद्धिरिष्यते तत्कथाश्रवणं चैव तस्योत्सवनिरीक्षणं श्रोत्रयोर्नेत्रयोश्चैव शुद्धिः सम्यगिहोच्यते पादोदकं च निर्माल्यं
मालानामपि धारणं उच्यते शिरसः शुद्धिः प्रणतस्य हरेः पुनः आघ्राणं गन्धपुष्पादेर्निर्माल्यस्य तपोधन विशुद्धिः स्यादनन्तस्य
घ्राणस्यापि विधीयते पत्रपुष्पादिकं यच्च कृष्णपादयुगार्पितम् तदेकं पावनं लोके तद्धि सर्वं विशोधयेत् ललाटे च गदा कार्या मूर्ध्नि
चापं शरांस्तथा नन्दकं चैव हृन्मध्ये शङ्खचक्रं भुजद्वये शङ्खचक्राङ्कितो विप्रः श्मशाने म्रियते यदि प्रयागे या गतिः प्रोक्ता सा गति
स्तस्य गौतम तत्रान्तरे यानैर्वा पादुकाभिर्वा यानं भगवतो गृहे देवोत्सवेष्वसेवा च प्रणामस्तु तदग्रतः उच्छिष्टे चैव तथाशौचे भगव
द्वन्दनादिकं एकहस्तप्रणामश्च तत्पुरस्तात्प्रदक्षिणं पादप्रसारणं चाग्रे तथा पर्यङ्कबन्धनं शयनं भक्षणं चापि मिथ्याभाषणमेव
च उच्चैर्भाषा मिथो जल्पो रोदनानि च विग्रहः निग्रहानुग्रहौ चैव स्त्रीषु च क्रूरभाषणं कश्मलावरणं चैव परनिन्दा परस्तुतिः
अश्लीलभाषणं चैव अधोवायुविमोक्षणं शक्तौ गौणोपचारश्च अनिवेदितभक्षणं तत्तत्कालोद्भवानां च फलादीनामनर्पणं
म. विनियुक्तावशिष्टस्य प्रदानं व्यञ्जनस्य च पृष्ठीकृत्यासनं चैव परनिन्दा परस्तुतिः गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा अ

तं०सा० २४८

पराधासहस्राणि विष्णोर्द्वात्रिंशत्परिकीर्तिताः इदमप्युपलक्षणं वशिष्ठे केशवाग्रेन्नृत्यगीतं न करोति हरेर्दिने वह्निना किं न दग्धोऽसौ ग
नः किं न रसातलं नारदीये स्मरणं कीर्तनं विष्णोः कलौ मन्त्र उपादिकं दानं तु प्रीतये तस्य नान्यथा गतिरिष्यते गौतमीये० शालग्रा
मशिलातोयमपीत्वा यस्तु मस्तके प्रक्षेपनं प्रकुर्वीत ब्रह्महा स निगद्यते विष्णोः पादोदकं पीतं कोटिहत्याघनाशनं तदेवाष्टगुणं पाप
भूमौ विन्दुनिपातनात् आगमेऽपि हित्वा हरिप्रियं देवि तुलसी त्रयं च तोयम्पदे नैवेद्यं वक्रमघपानवल्लितं गुर्वेगनास्तं गजं
श्रीसाध्वीनमतिस्थितिर्हरेर्जलैस्तत्संगजं श्रीसाध्वीनमतिस्थितिर्हरेर्जलैस्तत्संगजं किल्बिषं शालग्रामशिलानृसिंहमहिमा
कोऽप्येष लोकोत्तरः सुप्तप्रबोधकालोऽयमन्त्राणामभीधीयते मन्त्रविद्याविभागेन द्विविधा मन्त्रजातयः मन्त्राः पुंदेवताः प्रोक्ता
विद्याः स्त्रीदेवताः पुंमन्त्रा हूंफडन्ताः स्युः स्त्रियो द्विठान्ताः स्युः स्त्रियो मताः नपुंसका नमोन्ताः स्युः त्युक्तामनवस्त्रिधा एत
न्यारिभवेद्विद्या महाशब्देन गीयते एवं मन्त्रेऽपि आग्नेयसौम्यात्मका मन्त्रा विज्ञेयाः क्रूरसौम्ययोः कर्मणोर्वह्नितारान्तविद्या
याः समीरिताः आग्नेया मनवः सौम्या भूयिष्ठं हसमन्ताक्षराः आग्नेयाः संप्रबुध्यन्ते प्राणे चरति दक्षिणे भागेन्यस्मिन् स्थिते प्रा राम
णे सौम्या बोधं प्रयान्ति ते नाडीद्वयगते प्राणे सर्वे बोधं प्रयान्ति ते प्रयच्छन्ति फलं सर्वं प्रबुद्धा मन्त्रिणां सदा प्राणोपानसमायोगा २४८

च्छिवशात्तयोरनुमेलनं प्रबोधकालो विज्ञेयः स्वयकालस्ततः परं तथा वामवहो यदा वायुर्ईश्वानां योजनं तदा दक्षिणस्य शरदावा
युतदा दीर्घानियोजिताः उभयस्थो यदा वायुस्तदा स्यादुभयात्मकः संपुटीकृत्य मंत्रेण आदिलान्तान्सबिंदुकान् पुनश्च सवि
सर्गं ओंस्तानहकारं केवलं जपेत् एवं जप्तोपदिष्टाश्च प्रबुद्धः सर्वसिद्धिदः इति सुप्तप्रबोधकालः अथ योगासनानि
पद्मासनं स्वस्तिकाख्यं भद्रं वज्रासनं तथा वीरासनमिति प्रोक्तं क्रमादासनपञ्चकं ऊर्वोरुपरि विन्यस्य सम्यक् पादौ तले
उभे अंगुष्ठौ च निबध्नीयाद्धस्ताभ्यां व्युत्क्रमात्ततः पद्मासनमिति प्रोक्तं योगिनां हृदयंगमम् जान्वोरन्तरे सम्यक् कृत्वा पाद
तले उभे ऋजुकायो विशेद्योगी स्वस्तिकं तत्प्रचक्षते १ सीमन्याः पार्श्वयोर्न्यस्य गुल्फयुग्मं सुनिश्चितं वृषणाधः पार्श्वे
पादौ पाणिभ्यां च परिबंधयेत् भद्रासनं समुद्दिष्टं योगिभिः परिकल्पितं ३ ऊर्ध्वौ पादौ क्रमान्न्यस्य जान्वोः प्रत्यङ्मुखांगु
ली करौ निदध्यादाख्यानं वज्रासनमुत्तमं ४ एकं पादमधः कृत्वा विन्यस्योरौ तथेतरं ऋजुकायो विशेद्योगी वीरासनमिती
रितं अथ मुद्राप्रकाराः अथ मुद्राः प्रवक्ष्यामि सर्वतंत्रेषु गोपिताः याभिर्विरचिताभिश्च मोदन्ते मंत्रदेवताः अर्चने जपका
ले च ध्याने काम्ये च कर्मणि स्नाने वावाहने शंखे प्रतिष्ठायां च रक्षणे नैवेद्ये च तथान्यत्र तत्तत्कल्पप्रकाशिते स्थाने मुद्राः प्र

तं०सा०
२४२

द्रष्टव्याः स्वस्वलक्षणलक्षिताः आवाहनादिकामुद्रा नव साधारणीमताः तथा षडंगमुद्राश्च सर्व्वमन्त्रेषु योजयेत् एकोनविंशतिर्मु
द्रा विष्णोः नाम गोचिभिः शंखचक्रगदापद्मवेणुश्रीवत्सकौस्तुभाः वनमालातथाज्ञानमुद्राविल्वाह्वयातथा गरुडाख्यापरामु
द्राविष्णोः संतोषवर्द्धिनी नारसिंही च वाराही हयग्रीवा धनुस्तथा बाणमुद्रा तथा परशुर्जगन्मोहिनिका तथा म काममुद्रा
परा ख्याता शिवस्य दशमुद्रिकाः लिंगयोनित्रिशूलाख्या माला हेष्टा भीर्म्मृगात्मिका खट्वांगं च कपालाख्या डमरुः शिवतोषिताः
सूर्य्यस्यैकैव पद्माख्या सप्त मुद्रा गणेशतुः दन्तपाशांकुशा विघ्नपरशुलड्डुकसंज्ञकाः बीजपूराह्वया मुद्रा विज्ञेया विघ्नपूजने
पाशांकुशवराभीतिखड्गचर्म्मधनुश्शराः मौसली मुद्रिका दौर्गा मुद्राः शक्तेः प्रियंकराः लक्ष्मीमुद्राऽब्जिनी लक्ष्म्या वाग्वादि
न्याः पूजने अक्षमाला तथा वीणा व्याख्या पुस्तकमुद्रिका सप्तजिह्वाह्वया मुद्रा विज्ञेया वह्निपूजने मत्स्यमुद्रा च कूर्म्माख्या
लेलिहा मुंडसंज्ञका महायोनिरिति ख्याता सर्वसाधारणी सिद्धिसम्बृद्धिदा श्यामार्च्चने महायोनिः श्यामादौ मुद्रिका
मत्स्यकूर्म्माख्यालेलिहा सर्वसाधारणीमता तारार्चनं विशेषाच्च कथ्यते पंचमुद्रिका योनिश्च भूतिनी चैव बीजाख्या दैत्यधूमिनी राम
नी लेलिहानेति संप्रोक्ता पंचमुद्रा विलोकिता दशमा मुद्रिका ज्ञेयाः त्रिपुरायाः प्रपूजने संक्षोभद्रावणाकर्षवश्योन्मादमहांकुशाः २४८

खेचरीबीजयोन्याख्या त्रिखंडापरिकीर्त्तिता कुंभमुद्राभिषेके स्यात्पद्ममुद्रासने तथा कालकर्णीप्रयोगे स्याद्विघ्नप्रश[illegible]
णि गालिनी च प्रयोगे स्याद्ग्रलक्षो धनकर्म्मणि श्रीगोपालार्च्चने वेणुर्नृहरेर्न्नारसिंहिका वाराहस्य च पूजायां व[illegible]
स्य प्रदर्शयेत् हयग्रीवार्च्चने चैव हयग्रीवां च दर्शयेत् रामार्च्चने धनुर्वाणमुद्रे पर्शुस्तथार्च्चने परशुरामस्य विज्ञेया गरुड[illegible]
नसंज्ञका वासुदेवाह्वया ध्याने कुंभमुद्रानुरक्षणे सर्वत्र प्रार्थने चैव प्रार्थनाख्यां नियोजयेत् उद्देशानुक्रमादासां मु[illegible]
णिलक्षणं निचहस्ताभ्यामंजलिर्बध्वानामिकामूलपर्व्वणोः अंगुष्ठौ निक्षिपेत्सेयं मुद्रा त्वावाहनी स्मृता: १ अधोमुखी त्वियं
चेत्स्यात्स्थापनीमुद्रिका स्मृता: २ उच्छ्रितांगुष्ठमुष्ट्योस्तु संयोगात्संनिधापनी ३ अन्तःप्रवेशितांगुष्ठा सैव संरोधनी मता:
४ उत्तानमुष्टियुगलाभ्यां मुखीकरणी मता देवतांगे षडंगानां न्यासः स्यात्सकलीकृतिः ५ सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखत
र्ज्जनी अवगुंठनमुद्रेयमभितो भ्रामिता मता ६ अन्योन्याभिमुखाश्लिष्टाकनिष्ठानामिका पुनः तथैव तर्ज्जनीमध्या धेनुमुद्रा
समीरिता ७ अमृतीकरणं कुर्य्यात्तया साधकसत्तमः ८ अन्योन्यग्रथितांगुष्ठा प्रसारितपरांगुली महामुद्रेयमुदिता परमी
करणे बुधैः ९ प्रयोजयेदिमां मुद्रां देवताह्वानकर्म्मणि अंगन्यासस्य या मुद्रास्तासां लक्षणमुच्यते वेदमवीनां समुद्रा

तं॰ वसा॰ २५० णांकर्ष्यंतेलक्षणोन्यथा वामांगुष्ठंतुसंगृह्यदक्षिणेनतुमुष्टिना कृत्वोत्तानंततोमुष्टिमंगुष्ठंतुप्रसारयेत् वामांगुष्ठस्य प
२५० श्चिमांसंयुक्ताःस्युःप्रसारिताः दक्षिणांगुष्ठसंस्पृष्टमुद्रा शंखसंज्ञका हस्तौ चसम्मुखौ कृत्वासुभुग्नौसुप्रसारितौ कनि
ष्ठिकांगुष्ठकौ लग्नौमुद्रैषाचक्रसंज्ञिका २ अन्योन्याभिमुखौकृत्वासुभुग्नौसुप्रसारितौतुग्रथितांगुली अंगुल्यौम
ध्यमे भूयःसंलग्नेसंप्रसारिते गदामुद्रेयमुदिताविष्णोःसन्तोषवर्द्धिनी ३ हस्तौतुसम्मुखौकृत्वासन्नतावुन्नतांगुली तलंतुमि
लितांगुष्ठौकृत्वैषापद्ममुद्रिका ४ उच्चैर्वामकरांगुष्ठोलग्नस्तस्यकनिष्ठिका दक्षिणांगुष्ठसंलग्नातत्कनिष्ठाप्रसारिता:
तर्जनीमध्यमानामा किंचित्संकोचवालिता वेणुमुद्राभवेदेषासुगुप्ताप्रेयसीहरेः ५ अन्योन्यस्पृष्टकरयोर्मध्यमानामि
कांगुली अंगुष्ठेनतुवध्नीयात्कनिष्ठामूलसंस्थिते तर्जन्यौकारयेदेषामुद्राश्रीवत्ससंज्ञिका ६ अनामापृष्ठसंलग्ना
दक्षिणस्यकनिष्ठिका कनिष्ठिकयाऽन्ययावध्वातर्जन्यादक्षयातथा वामानामांचवध्नीयाद्दक्षिणांगुष्ठमूलको अंगुष्ठमध्य
वामेसयोऽप्यसरलापरा: चतस्रोप्यग्रसंलग्नामुद्राकौस्तुभसंज्ञिका ७ स्पृशेत्कंठादिपादान्तंतर्जन्यांगुष्ठयातथा करद्वये राम
नमालावन्मुद्रेयंवनमालिका ८ तर्जन्यंगुष्ठकौसक्तावग्रतोहृदिविन्यसेत् वामहस्ताम्बुजंवामेजानुमूर्द्धनिविन्यसेद्ज्ञा २५०

250

नमुद्रामवेदेषा गम चन्द्ररूपप्रेयसी ९ अंगुष्टं वाममकुंचितमितरकरांगुष्टं केनाथवध्वानस्याग्रं पीडयित्वां लीभि
रपि च तावामहस्तांगुलीभिः वद्ध्वा गाढं हृदिस्थापयेत्तु विमलधीर्धामाहरमारवीजं विल्वाख्या मुद्रिकेषा स्फुटमिह क
थिता गोपनीया विधिज्ञैः १० हस्तौ तु विमुखौ कृत्वाग्रथयित्वा कनिष्ठिके मिथस्तर्जनिके श्लिष्टे श्लिष्टावंगुष्ठकौ तथा
मध्यमानामिके द्वे तु द्वौ पक्षाविव चालयेत् एषा गरुडमुद्राख्या विष्णोः संतोषवर्द्धिनी ११ जानुमध्ये करौ कृत्वा
तु कोष्ठौ समावृतौ हस्तौ च भूमिसंलग्नौ कंपमानः पुनः पुनः मुखं विवृतकं कुर्यात् लेलिहानं च जिह्विकां नारसिंही भवेदे
षा मुद्रा तत्प्रीतिवर्द्धिनी १२ अंगुष्ठाभ्यां तु करयोरथानाम्य कनिष्ठिके अधोमुखीभिः सर्वाभिः मुद्रयेत् हरेर्मता १३
दक्षहस्तं चोर्द्ध्वमुखं वामहस्तेमधोमुखं अंगुल्यग्रं तु संयुक्तं मुद्रा वाराहसंज्ञिका ४ वामहस्ततले दत्वा अंगुलीस्तामधो
मुखीः संरोप्य मध्यमां तासां मूलस्याधो विकुंचयेत् हयग्रीवप्रिया मुद्रा तन्त्रे रत्नकारिकौ ५ वामस्य मध्यमाग्रं तु तर्ज
न्याग्रेण योजयेत् अनामिकां कनिष्ठां च तस्यांगुष्ठेन पीडयेत् दर्शयेद्वामके स्कंधे धनुर्मुद्रेयमीरिता ६ दक्षमुष्टिस्थ तर्जन्या
दीर्घया वाणमुद्रिका यद्वा ज्ञानास्मृति यथा हस्तगतं चापं तथा हस्तं कृत्रिमे चापमुद्रेयमाख्याता वामहस्ते व्यवस्थिता ७

तं०स्ता० थाहस्तगतावाणोस्तथा हस्तंकुरुप्रिये वाणमुद्रेयमाख्याता रिपुवर्ग्गनिकृन्तनी नालतलं तु करयोस्तिर्य्यक्संयोज्य चांगु
२५१ लीः संहताः प्रसृताः कुर्य्यान्मुद्रेयं पर्शुसंज्ञिका मूर्द्धस्थांगुष्ठमुष्टी हि मुद्रा त्रैलोक्यमोहिनी हस्तौ तु संपुटीकृत्वा प्रसृतां
गुलिकौ तथा तर्ज्जन्यौ मध्यमापृष्ठे ऽंगुष्ठौ मध्यमाश्रितौ कामधेनुमुद्रेयमुदिता सर्वदेवप्रियंकरी २ महादेवप्रियानाम कथ्यते ल
क्षणान्यथा उच्छ्रितं दक्षिणांगुष्ठं वामांगुष्ठेन बन्धयेत् वामांगुलीर्दक्षिणाभिरंगुलीभिश्च बन्धयेत् लिंगमुद्रेयमाख्याता शिव
सान्निध्यकारिणी १ मिथः कनिष्ठिके बद्ध्वा तर्ज्जनीभ्यामनामिके अनामिकोर्द्ध्वसंश्लिष्टदीर्घमध्यमयोरधः अंगुष्ठाग्रद्वयं न्यस्य
योनिमुद्रेयमीरिता अंगुष्ठेन कनिष्ठां तु बद्ध्वा श्लिष्टांगुलित्रयं प्रसारयेत् त्रिशूलाख्या मुद्रैषा परिकीर्त्तिता ३ अंगुष्ठतर्ज्जन्य
ग्रे तु ग्रथित्वांगुलित्रयं प्रसारयेदक्षमालामुद्रेयं परिकीर्त्तिता ४ अधःस्थितो दक्षहस्तः प्रसृतो वरमुद्रिका ऊर्द्ध्वस्थितो वा
महस्तः प्रसृतोऽभयमुद्रिका ५ मिलितानामिकांगुष्ठमध्यमाग्रे नियोजयेत् श्लिष्टांगुल्याश्रिते कुर्य्यात् मृगमुद्रेयमीरिता
पंचांगुल्यो दक्षिणास्तु मिलिता ऊर्द्ध्वसंस्थिताः खट्वांगमुद्रा विख्याता शिवस्यातिप्रिया मता १ पात्रवद्वामहस्तं च कृत्वांगे वामे तथा राम
निधाय ऊर्द्ध्वोच्छ्रितं कुर्य्यात् मुद्रा कापालिकी मता मुष्टिं च शिथिलां बध्वा ईषत्कुंचितमध्यमां दक्षिणे तर्ज्जनीमुन्नम्य कर्णे प्र २५१

हस्तांभूतले ७ विकाररूपललनाविन्दुर्द्धचंद्रात्मिके हूंफट्कारमयी त्वमेवशरणं मंत्रात्मिके मादृशः मूर्त्तिस्तेजननित्रिधामघटितास्थू
लाद्विसत्त्वात्परावेदानां नहि गोचरा कथमपि प्राज्ञाज्ञातुतामाश्रये ४ त्वत्पादाम्बुजसेवयासुकृतिनो गच्छन्ति सायुज्यतां तस्य श्रीपरमेश्वर
स्पत्रिचालयेत् एषामुद्रा डमरुका सर्वविघ्नविनाशिनी ९ ततो गले शङ्खमुद्रां प्राणमुद्रां च नेत्रे लक्षणान्वितु उत्तानौ द्वौ मुखी मध्यासंलग्न
द्धमुष्टिका दत्तमुद्रा समाख्याता सर्वागम विशारदैः १ वामस्य वृत्तिलग्नतर्जन्याद्रूममुष्टेस्तु तर्जनी संयोज्यांगुष्ठकाग्राभ्यां तर्जन्यो
मुत्क्षिपेत् एषा या शाङ्कया मुद्रा विद्वद्भिः परिकीर्त्तिता २ अत्यी अत्र मध्यमां लग्नां तर्जनीं मध्यपर्वणि संयोज्याकुञ्चयेन्किंचिन्मुद्रां
कुशासंज्ञिका तर्जनी मध्यमानामा कनिष्ठांगुष्ठमुद्रिता अधोमुखी दीर्घरूपा मध्यमा विघ्नमुद्रिका पद्ममुद्रा निगदिता प्रसिद्धा
लङ्गमुद्रिका वीजपूराङ्कया मुद्रा प्रसिद्धत्वादुपेक्षिता ६ शाक्तेयीनां च मुद्राणां कथ्यन्ते लक्षणानि च पाशांकुशवराभीतिधनु
र्बाणः समीरिताः कनिष्ठानामिके चध्वास्थांगुष्ठेनैव दक्षतः शिष्टांगुलीनु प्रसृते संस्पृष्टे खड्गमुद्रिका १ वामहस्तं तथोतिर्यक्कृत्वा
चैव प्रसार्य्यच आकुञ्चितांगुलीकुर्याच्चर्ममुद्रेयमीरिता २ मुष्टिं कृत्वा तु हस्ताभ्यां वामस्योपरि दक्षिणं कुर्यान्मुशलमुद्रेयं
सर्वविघ्नविनाशिनी ३ मुष्टिं कृत्वा कराभ्यां च वामस्योपरि दक्षिणं कृत्वा शिरसि संयोज्य परशुर्जमुद्रेयमीरिता ४ चक्रमुद्रां जयावं

मु२ स्व

तं०सा० २५२ ध्यामध्यमे द्वे प्रसार्य्य च कनिष्ठिकेऽत्र यानीयत तदग्रेंऽगुष्ठकौ क्षिपेत् लक्ष्मीमुद्रा परा ह्येषा सर्वसंपत्प्रदायिनी ५ वीनावादनवद्धस्तौ कृत्वा संचाल
येच्छिरः वीनामुद्रेयमाख्याता सरस्वत्याः प्रियङ्करी ६ वाममुष्टिस्याभिमुखी दत्त्वा पुस्तकमुद्रिका ७ दक्षिणांगुष्ठतर्जन्याग्रं लग्नं परां
गुली प्रसार्य्य संहिता ज्ञानाख्या व्याख्यानमुद्रिका श्रीरामस्य सरस्वत्याः प्रत्यग्रप्रेयसी मता ४ माणिक्यवद्धस्तयोर्नौ कृत्वा प्रसृतांगुलिकौ करौ कनि
ष्ठिकांगुष्ठयुगले मिलित्वान्तः प्रसारयेत् सप्तजिह्वाख्यमुद्रेयं वैश्वानरप्रियंकरी १ कनिष्ठांगुष्ठकौ सक्तौ करयोरितरेतरं तर्जनीमध्य
मानामाः संहता भुग्नवर्जिता मुद्रैषा गालिनी प्रोक्ता शंखस्योपरि चालिता दक्षांगुष्ठं परांगुष्ठे क्षिप्त्वा हस्तद्वयेन तु सावकाशामेकमु
ष्टिं कुर्य्यात् सा कुम्भमुद्रिका मुष्ट्योरूर्ध्वकृतांगुष्ठौ तर्जन्यग्रे तु विन्यसेत् सर्वरक्षाकरी ह्येषा कुम्भमुद्रेयमीरिता प्रसृतांगुलिकौ हस्तौ
मिथः श्लिष्टौ च सम्मुखौ कुर्य्यात् स्वहृदये सेयं मुद्रा प्रार्थनसंज्ञिका ४ अंजल्यंजलिमुद्रा स्यात् वासुदेवाभिधा च सा अंगुष्ठा
न्नतौ कृत्वा मुष्ट्योः संलग्नयोर्द्वयोः तावेवाभिमुखौ कुर्य्यात् मुद्रैषा कालकर्णिका ६ दक्षिणेन निविडां मुष्टिं नासिकार्प्पितत
नीमुद्रां विस्मयसंज्ञा स्याद्धि स्मयावेशकारिणी ७ मध्यमा ऽसितागुष्ठाद् दक्षिणेन नादमुद्रिका ८ तर्जन्यंगुष्ठसंयोगादन्ते तान्
विंदुमुद्रिका ९ अधोमुखे वामहस्ते ऊर्ध्वास्यं दक्षहस्तकं क्षिप्त्वांगुलीरंगुलीभिः संग्रथ्य परिवर्त्तयेत् एषा संहारमुद्रा स्यात् २५२

तविसर्ज्जनविधोऽस्मिन् दद्रूपानिपृष्ठदेशे वामपाणितलं न्यसेत् अंगुष्ठौ चालयेत् सम्यक् मुद्रेयं मत्स्यरूपिणी वामहस्तस्य त
र्जन्यां दक्षिणस्य कनिष्ठिका तथा दक्षिणतर्ज्जन्यां वामांगुष्ठं नियोजयेत् उन्नतं दक्षिणांगुष्ठं वामस्य मध्यमादिका अंगुलि
योजयेत् पृष्ठे दक्षिणस्य करस्य च वामस्य पितृतीर्थेन मध्यमानामिके तथा अधोमुखे तु कुर्य्यात् दक्षिणस्य करस्य च कूर्मपृष्ठ
समं कुर्य्यात् दद्रूपाणिश्च सर्वतः कूर्ममुद्रेयमाख्याता देवताध्यानकर्म्मणि अन्तरांगुष्ठमुष्टिं तु कृत्वा वामकरस्य च मध्ये
तु दक्षिणस्य तथा लंबयन्नतः मध्यमेनाथ तर्ज्जन्या अंगुष्ठाग्रे तु योजयेत् दक्षिणे योजयेत्पाणिं वामङ्गुष्ठे तु साधकः दर्पये ६
दक्षिणे भागे मुण्डमुद्रेयमुच्यते तर्ज्जनीमध्यमानामासमं कुर्य्यात् ह्यधोमुखं अनामायां क्षिपेद्वृद्धां मध्यमां लत्त्वा कनिष्ठिका लेलि
हाना मुद्रेयं जीवन्यासे प्रकीर्त्तिता तर्ज्जन्यनामिकामध्ये कनिष्ठा क्रमयोगतः करयोर्य्योजयेत्सेव कनिष्ठामूलदेशतः
अंगुष्ठाग्रे तु निक्षिप्य महायोनिः प्रकीर्त्तिता वामके च स्थले त्रोक्ताः प्रकाश्य तेन मुद्रिकाः शृणु देवि प्रवक्ष्यामि मुद्राः सर्वार्थसि
द्धिदाः । याभिर्विरचिताभिस्तु सान्निध्यं त्रिपुरे भवेत् परिवृत्त करौ स्पष्टावंगुष्ठौ कारयेत्समौ अनामान्तर्गते कृत्वा तर्ज्जन्यौ कु
टिलाकृती कनिष्ठिके नियुंजीत निजस्थाने महेश्वरि त्रिखंडेयं समाख्याता त्रिपुराध्यानकर्म्मणि १ मध्यमामध्यमं कृत्वा

तं०सा० २५३

253

कनिष्ठेंऽगुष्ठरोधिते तर्ज्जन्यौ दंडवत्कृत्वा मध्यमोपर्य्यनामिके एवाच प्रथमा मुद्रा सर्वसंक्षोभकारिणी २ एतस्या एवमुद्राया
मध्यमे सरले तथा क्रियते परमेशानि सर्वविद्राविणी परा ३ मध्यमा तर्ज्जनीभ्यां च कनिष्ठानामिके सम अंकुशाकाररूपाभ्यां मध्य
मे परमेश्वरि अंगुष्ठं तु नियुञ्जीत कनिष्ठानामिकोपरि इयमाकर्षिणी मुद्रा त्रैलोक्याकर्षिणी मता ४ पुटाकारौ करौ कृत्वा
तर्ज्जन्यावंकुशाकृती परिवर्त्तक्रमेणैव मध्यमे तदधोगते क्रमेण देवि तेनैव कनिष्ठानामिकादयः संयोज्य निबिडाः सर्व्वाः अं
गुष्ठावग्रदेशतः मुद्रेयं परमेशानि सर्ववशकरी मता ५ सन्मुखौ तु करौ कृत्वा मध्यमा मध्यगे त्वजेन अनामिके तु सरले तद्ब
हिस्तर्ज्जनीद्वयं दंडाकारौ ततोऽङ्गुष्ठौ मध्यमानखदेशकौ मुद्रैषोन्मादिनी नाम्ना क्लेदिनी सर्वयोषिताम् ६ अस्यास्त्वनामि
कायुग्ममधः कृत्वांऽकुशाकृती तर्जन्यावपि तेनैव क्रमेण विनियोजयेत् इयं महांकुशा मुद्रा सर्वकामार्थसाधिनी सव्यं द
क्षिणदेशे तु सव्यदेशे तु दक्षिणं बाहुं कृत्वा महादेवि हस्तौ संपरिवर्त्तितौ कनिष्ठानामिके देवि युक्ता तेन क्रमेण च तर्जनीभ्यां
समाक्रान्ते सर्वोर्द्ध्वमपि मध्यमे अंगुष्ठौ च महादेवि सरलावपि कारयेत् इयं सा खेचरी मुद्रा पार्थिवस्थाननयोजिता परिवारि राम
रूपकरौ स्पष्टावर्द्धचन्द्राकृती प्रिये तर्जन्यंगुष्ठयुगलं युगपत्कारयेत्ततः अधः कनिष्ठभ्यमध्येमे विनियोजयेत् अप्येकुरि २५३

लेयोऽपेसर्व्वाधस्तादनामिके वीजमुद्रेयमचिरात्सर्व्वसिद्धिप्रवर्द्धिनी ९ मध्यमेकुटिलेकृत्वातर्ज्जन्युपरिसंस्थिते अनामिकाम
ध्यगतेतथैवहिकनिष्ठिके सर्व्वाएकत्रसंयोज्य अंगुष्ठपरिपीडिताः एषानुप्रथमामुद्रायोनिमुद्रेतिसंज्ञिता १० एतामुद्रामहेशानि
त्रिपुरायामयोदिताः पूजाकालेप्रयोक्तव्यायथानुक्रमयोगतः वामहस्तेनमुष्टिंतुवध्वाकर्णप्रदेशके तर्ज्जनींशष्कुलीसत्यभ्रायि
त्वनुमतंनमः सौभाग्यदंडिनीमुद्रान्यासकालेपिसूचिता अंतरंगवहिर्म्मुख्यानुनिरुध्यजगतीमिमां त्रिपुरविद्याग्रहामुद्रान्यासकालेपि
सूचिता वध्वानुयोनिमुद्रांवैमध्यमेकुटिलेकुरु अंगुष्ठेनतदग्रेतुमुद्रेयंभ्रांतिनीमता इतिमुद्राप्रकरणंसमाप्तम् अथधारणाय
न्त्राणिलिख्यन्ते तत्रक्रमः आलिख्याष्टदिगर्गलामुदरगंपाशादिकंचाक्षरंकोष्ठेष्वष्टसुमन्त्रपरेषुविलिख्यदशार्णमंत्रद्वयं अ
धः पूर्व्वापरमष्टकुयुकुलयवरान्व्योमासनानर्गलेष्वालिख्येन्द्रजलाधिपादिगुणशः पंक्तिद्वयात्तत्परं कोष्ठेष्वष्टसुयुगार्णमानम
सहितांयुग्मस्वरान्तर्गतां मायांकेसरगांदलेषुविलिख्यमूलंत्रिपंक्तिक्रमात् त्रिःपाशांकुशवेष्टितंचलिपिभिर्व्वीजंक्रमात्क्रमा
त्पञ्चस्वनघेटेनपंकजमुखेनावेष्टितंतद्वहिः इदानीमिदंयंत्रंमन्त्रिणांप्राप्ततमनं पाशश्रीशक्तिकंदर्पकामशक्तीन्दिरांकुशाः
प्रथमोष्टाक्षरोमंत्रस्ततःकामिनिरंजनी स्वाहान्तोऽष्टाक्षरःसाध्यपरःकीर्त्तितोमनुः क्लींगौरिरुद्रदयितेयोगेश्वरिसाहवर्म्मफट् द्विठान्तः

तं० स्ता० २५४ षोडशार्णोयंमंत्रः सद्भिरुदीरितः इति भुवनेश्वरीयंत्रं नारो ङ्कं विलिखेत्सरोजकुहरे साध्याभिधानान्वितं मंत्रार्णान्वसुसंख्यकान्
वसुदलेष्वालिख्यतद्वाह्यतः शक्त्या त्रिः परिपरिवेष्टितं धरगतं पद्मस्य मज्ञाननं यन्त्रं वश्यकरं यहादिभयहृल्लक्ष्मीप्रदं की
र्तिप्रदं इति त्वरितायन्त्रं २ पद्मं भानुदलान्वितं प्रविलिखेत्तत्कर्णिकायां पुनस्तारं शक्तिगवीजसाध्यसहितं तत्केशरेषु त्र
मान् मर्दिन्यामनुसंभवान्स्युगलशो वर्णान्पुनः पत्रगान्मन्त्रार्णान् गुणशो विधाय विलिखेदन्यं तदन्त्येदले मातृकावर्णै
संन्वितं भूपरद्वयमध्यगं यंत्रं विध्यनिवासिन्याः प्रोक्तं सर्वसमृद्धिदं मन्त्रस्तु तस्याः उत्तिष्ठपुरुषि किं स्वपिषि भयं मे समु
पस्थितं यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा रत्नाकरं विशेषेण दुन्दुभ्यम्नतादिना रानं राज्यदं श्रेष्ठराज्यानां वश्यपदं व
श्यमिदं तत्सुतार्थिनीनां सुतदं रोगिणां रोगशान्तिदं बहुनाकिमिहोक्तेन यस्मात्परं न विद्यते ४ मध्याद्यं नवयोनिभूपु
ष्टि यन्त्रं तत्कामदोमतः ३ वेदादिस्थितिसाध्यनामपुरतः श्रीशक्तिमायान्वितं किंजल्केषु दिनेशपत्रविलसन्मंत्राक्षरान्
लि: पद्मं व्यंजनकेशरं स्वरलसत्पत्राष्टयुग्मं धराबिम्बाभ्यां वषडन्तयात्वरितया यन्त्रं लिखेद्वेष्टितं भूपुरद्वयकोणेषु हृल्लेखं राम
पुनः पुनः महालक्ष्मीयन्त्रमिदं सर्वैश्वर्यफलप्रदं सर्वदुःखप्रशमनं सर्वापद्विनिवारकं बहुनाकिमिहोक्तेन परमस्मा न वि २५४

यंते ४ मध्याद्यंनवयोनिषुप्रविलिखेद्धीङाभिवर्णैस्त्रिशोगायत्र्याः पुनरष्टपत्रविवरेष्वालिख्यलिप्यावृतं भूविंवोन्नतये
न्मन्मथयुजाकोणेषुसंवेष्टितंयंत्रंत्रैपुरमीरितंत्रिभुवनप्रक्षोभनंश्रीप्रदं गायत्रीतु-मन्त्रयंत्रिपुरादेवि विद्महेपदमुच्चरेत्
उक्ताकामेश्वरिपदंप्रवदेद्धयधीमहि अन्तेचप्रवदेद्भूयस्तन्नःक्लिन्नेप्रचोदयात् गायत्र्येषासमाख्यातात्रैपुरीसर्वसिद्धिदा
५ वीजंषट्कोणमध्येस्फुरदनलपुरेतारगंदिक्षुलक्ष्मीमायाकन्दर्पभूभितदनुरसपुटेष्वालिखेद्धीङषट्कं तत्संधिष्वष्ट
मन्त्रान्वसुदलकमलेमूलमन्त्रस्यवर्णान्शिष्टान्पत्रेषुविद्वान्विलिखतुगुणशम्भ्राच्यमन्त्रेपलाशे आवीतंलिपि
भिःक्रमोत्क्रमवशात्पाशांकुशाभ्यामपिद्वारागेहविजयेनवेष्टितमिदंयंत्रंगणाधीशितुः लाक्षाकुङ्कुमरोचनामृगमदैर्
ऋौदरेहेम्नि वासंलिख्याभिवद्धदुर्लभेनसकलैःसंप्रार्थनीयांश्रियं ॐ क्लंमहागणपतेर्हि धानंसुरासुरजित सर्वसिद्धिकरंपुंसा
को समस्तपुरुषार्थदं ६ तारंमध्येविलिखतुमनुषट्कोणेषुसंधिष्वगंमायांस्मरमपिलिखेत्कोणाङ्गेषुपश्चात् किंजल्केषुस्व
रगणमथोपत्रमध्येषुमालामन्त्रोत्थार्णान्गुहमुखमितानष्टमेपंचवर्णान् दशाक्षरेणसंवेष्ट्यकादिवर्णैश्चभूपुरे दिग्विदिक्षु
लिखेद्धीजेनरसिंहवराहयोः नमोभगवतेवृन्दावनयाचतुर्थारिघुनंदन रक्षोघ्नविशदाघयात्रेमधुरादिप्रमीरयेत् प्रसन्नवदनाय

तं०सा० २५५ तिपञ्चादिमितनतेजसे वलायपञ्चाङ्गामाय विस्रवेतदनंतरं प्रणवादिनमो न्तोयंमालामनुरुदीरितः जानकीवल्लभायाथभवेत्याव
कवल्लभा कृष्णादिरेवकथितोमममंत्रोदशाक्षरः उपादिमाखितेषैत्रंस्वर्णपद्मादिकल्पितं वहुनाविधिनंद्याद्विजयश्रीपराक्रमः
१ रामयन्त्रमिदं वीजंसाध्यसमन्वितंप्रविलिखेन्मध्येदलपत्रे घयोम न्त्रोपणिनूपस्तुतिशेषविनजपविलिखेल्लिप्यावहिर्वेष्टयेत् वा
ह्येकोणगवीजवध्यवसुधागेहद्वयेनावृतं यन्त्रंरक्षकविषमहामयरिपुत्रध्वंसनंश्रीपदं ८ नरसिंहयन्त्रमिदं पिंडमूलेनवीतंदह
नपुरयुगेकोणषट्कषड्सल्कुर्व्यामयंदमालेंस्फुरितदशदलंकामवीजेनवाह्यं पद्मंकिंजल्कसंस्थस्वरविकृतिदलंप्रोल्लसत्षोडशा
र्णांकिंजल्कव्यंजनाढ्यं विकृतियुगलदलेष्वर्पितानुष्टुवर्णं पाशांकुशाभ्यामावीतंत्रैलोक्यपुरयुगाश्रिषु: अष्टाक्षरेणलसितं
यन्त्रंगोविंददेवतं धर्मार्थकामफलदंसर्वरक्षाकरंस्मृतं पञ्चाक्षरकोणसंस्थोमनुविन्दुविभूषितः पिंडवीजमितिप्रोक्तंसर्वार्थसिद्धि
दंपरं स्मरकृष्णायठद्वन्द्वंषडक्षर्णेमनुरीरितः गोपीजनपदस्यान्तेवल्लभायद्विठावधिः प्रपंदशाक्षरोमन्त्रोदशाद्दषफलप्रदः
वंहृदयंवक्षसंठेःत्रंस्युस्ताततःपरं नाहशांदेवीकीपुत्रंहूंफट्स्वाहासमन्वितः षोडशाक्षरमन्त्रोयंगोविन्दस्यसमीरितः पिंडंरतिं राम
वीजंनमोभगवतेततः नंदपुत्रायवालादिवपुषेश्यामलायच गोपीजनपदस्यान्तेवल्लभायद्विठावधिः अनुष्टुप्मंत्रमाख्यातोगो २५५

पास्यस्यजायते: ॐ नंगकलमगोविन्दोऽङे त्वावशालरोमनुः प्रोक्तःप्रस्य दक्षिणोदग्विधिवदभिलिखेदास्य षट्कोणचतुष्कं कोणेष्वेन्दुकूल
मुक्तं वलययुग्मयुतं मध्यमध्ये तु तदन्तं श्लोकस्यार्णेन पुरस्ताद् अष्टदलविवरेष्वष्टवर्णं लिखित्वा तद्बाह्ये द्वादशार्णैस्तदनुपरिवीतः देव
कीपुत्रयंत्रं तं सुकी देवदेवेशं ततं वेदेवरतोऽरतं तरंतो रूपतोऽख्यातं तत्ख्यातो देवकीसुतं लिखितं भूर्जपत्रादौ यंत्रमेतद्यथाविधि विरंपं
वाङ्क्वारीति सं सर्वकामफलप्रदं पलाशादिदलफलके लिखितं साधुसाधितं गोस्थाने लिखनेदेत हवा वृद्धिर्भवेत्सदा इति गोपालयंत्रं ॥ प
यशिवयंत्रं गोमयस्थाने तत्रादौ षट्कोणमण्डलं लिखित्वा तदंतः साध्यनामयुक्तं प्रासादबीजं विलिख्य षट्कोणेषु प्रणवसहितपञ्चाक्षरं
स्ववर्णं विलिख्य विवरेषु षडंगवर्णान् तद्बहिः पंचदलानि विरचय तद्दलेषु ईशानायनमः तत्पुरुषायनमः अघोरायनमः सद्योजा
तायनमः वामदेवायनमः इति पंचमंत्रान् प्रागादिक्रमेण विलिखेत् तद्बहिरष्टदलानि रचयित्वा तद्दलेषु मातृकाष्टवर्गान् लिखेत् त
द्बहिर्वृत्तं त्र्यंस्रके न वेष्टयेत् तद्यंत्रं जपहोमादिना संपूज्य धारयेत् आयुरारोग्यमैश्वर्यादि चतुर्वर्गादिसिद्धिर्भवति इति शिवयंत्रं
॥ अथ शांतिकादौ नाराधारणयंत्रं लिख्यते तदुक्तं पंचकारीये योनियुग्मं लिखेन्मंत्रमलं हेमशलाकया क्लीं वहीनान्दीर्घवर्णान्मध्ये को
णे विलिखेत्ततः अष्टपत्रे षष्टवर्णान् तद्बहिर्भूपुरद्वयं अष्टवज्रं भूपुरे च विलिखेत् साधको नमः सुवर्णपट्टे भूर्जे वा रूप्ये वाप्यथ सुव्रते

तं॰ सा॰ २५६ विलिखेद्धेमलेखन्यां गंधाष्टकसमन्वितं दूर्वाकाण्डेन वा लिख्यं कुशमूलेन वा पुनः एकवीराकल्पे वेष्टितं पीतवस्त्रेणायन्तुनापरि
वेष्टयेत् वध्नीयात्पीतवस्त्रेण शिखनां कण्ठभूषणं स्त्रीणां वामभुजे चैव मध्ये स्यांद्दक्षिणे भुजे वंध्यापि लभते पुत्रं निर्धनो धनवान्भ
वेत् इयं रक्षा पुरा बद्धा रामनार्घो गोतमादिभिः प्रीत्यर्थं पार्थिवश्रेष्ठान्ये संग्रामे जयकांक्षिभिः अस्यार्थः योनियुग्मेः कक्कोणे तन्मध्ये
हेमशलाकया भूर्जपत्रादौ कुंकुमगोरोचनाचन्दनं जटामांसीभिर्मसीभिधाय पंक्तिक्रमेण मूलमंत्रं लिखित्वा तस्य हृल्लेखारेफमध्ये अ
मुकस्य रक्षां कुरु कुरु अमुकीनां शुभं पुत्रमुत्पादय इति वा अस्य स्थाने कुरु कुरु इत्यादिना साध्यनामसहितं विलिख्य षट्कोणे क्लीवभिन्ना
दीर्घवर्णान् ॰ तदुक्तं स्वराणां मध्यगाय स्तुतं ग्रन्थे नपुंसकं दीर्घवर्णान् आ ई ऊ ऐ औ अः इत्येकैकं लिखेत्तद्दलपत्रेषु अष्टवर्णं
मायां ऐं क्लीं ॐ ऐं ह्रीं फट् स्वाहेति तदुक्तं वाग्भवं कुलदेवीं च तारकं वाग्भवं तथा हृल्लेखा चास्त्रमंत्रान्तं वह्निजायावधिर्मनुः
अष्टाक्षरो मनुः प्रोक्तो मंत्राणां सार ईरितः अथ यन्त्रलेखनद्रव्यं काश्मीररोचनालाक्षामृगमदचन्दनैः विलिखेद्धेमलेख
न्या मंत्राणां मंत्रिणा निर्देशिकः भूमिस्पृष्टं शवस्पृष्टं यन्त्रं निर्माल्यसंगतं विशीर्णं लिखितं मंत्री यंत्रं नैव च धारयेत् सौवर्णे राजते पत्रे ताम्र
भूर्जे वा सम्यग् लिखेत् अथवा ताम्रपट्टे वा गुटिकां कृत्य धारयेत् यावज्जीवं तु सौवर्णे रूप्ये विंशतिवार्षिकं भूर्जे द्वादशवर्षाणि हितं २५६

म्भन्त्रके अथप्रयोगानन्तरंयोगान्मुख्यस्नानं तद्यथा सुरास्त्वामभिषिंचन्तु ब्रह्मविष्णुमहेश्वराः वासुदेवोजगन्नाथस्तेनाशं
कर्षणोविभुः प्रद्युम्नश्चानिरुद्धश्चभवन्तुविभवायते आखण्डलोग्निर्भगवान्यमोवैनैर्ऋतिस्तथा वरुणःपवनश्चैव धनाध्य
क्षस्तथाशिवः ब्रह्मणासहिताह्येतेदिक्पालाःपान्तुवःसदा कीर्त्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धाक्रियामतिः बुद्धिर्लज्जावपुः
शान्तिर्मायानिद्रा चभावना एतास्त्वामभिषिंचन्तुदेवपत्न्यःसमागताः आदित्यश्चन्द्रमाभौमोबुधजीवसितार्कजाः एते
त्वामभिषिंचन्तुराहुःकेतुश्चपूजिताः देवदानवगंधर्वायक्षराक्षसपन्नगाः ऋषयोमनवोगावोदेवमातरएवच देवपत्न्यो
द्रुमानागादैत्याश्चाप्सरसांगणाः अस्त्राणिसर्वशास्त्राणिराजानोवाहनानिच औषधीनिचरत्नानिकालस्यावयवाश्चये
सरितःसागराःशैलास्तीर्थानिजलदानदाः एतेत्वामभिषिंचन्तुसर्वकामार्थसिद्धये इतिवशिष्ठसंहितोक्ताभिषेक
मंत्राः अथसंक्षेपतःसर्वासांदेवानांपूजाविधिर्लिख्यते तदुक्तंयामले आदौभूम्यादिन्यासःकरशुद्धिस्ततःपरं अंगुलि
व्यापकौकृत्वाहृदादिन्यासएवच तालत्रयञ्चदिग्बंधःप्राणायामस्ततःपरं ध्यानंपूजाजपश्चैवसर्वतंत्रेष्वयंक्रमः पूजाचमू
लदेवतायाएवअन्यस्य जपार्थंसर्वमंत्राणांविन्यासंचलिपेर्विना कृतंतद्विफलंविन्द्यात्तस्माद्दौलिपिंन्यसेत् श्रीविद्या

नं० सा०
२५१
२५७

तंत्र
यांतु संक्षेपः तदुक्तं स्वतन्त्रे मन्त्रविशेषान्देवेशि मन्त्रणानि समाप्नोदितान् अशक्तानां तु विस्तारे तथा चापत्सु शस्यते अन्यथा
नर्थकारी स्यात्संकोचार्थीं चनमीश्वरि इतिभिर्मध्यमाद्यं स्याद्द्वितीयं नवयोनिषु चतुर्दशारावध्यन्य च्चतुर्थं प्रोक्तरूपतः पंच
मं सर्वदुःखार्त्तिनाशनं वाञ्छितप्रदं अयमर्थः अशक्तानां हे इतिभिर्मध्यमाद्यं स्यात् हे त्रिचतुष्टये देवताचतुष्टयार्चनं
कामेश्वरी वज्रेश्वरी भगमालिनी श्रीमहात्रिपुरसुंदरीरूपे मंडलाद्यार्चनमित्यर्थः द्वितीयमाह नवयोनिष्विति वशिन्यादि
मध्यमांतमिति तृतीयार्चनमाह चतुर्दशारचक्रस्थितसर्वसंक्षोभिण्यादिमध्यमान्ता सपर्या तृतीया चतुर्थं प्रोक्तरूप इति त
त्प्रोक्तरूपेत्यर्थः षोडशदलादिमध्यममान्त अभ्यर्चनमिति यावत् पंचमं भूगृहादिमध्यमान्तमिति यावत् इति पंचप्र
कारार्चनप्रोक्ता सर्वार्थसिद्धिदा तत्रादौ भूतशुद्धिप्राणायामपुरःसरं करशुद्ध्यासनचक्रचतुष्टयाग वशिन्यादिन्यासचतु
ष्टयं विधाय बालयार्घ्यद्वयं षडासनविद्यया पीठपूजां विधाय विंदौ हृल्लेखया परि चिंतितमावाह्य यथाशक्त्युपचारैः स
र्वसंक्षेपार्चनेकभेदावभ्यर्च्य पूर्ववत् सर्वभूतबलिं दत्वा जपस्तोत्रैः संतोषयेदिति तदुक्तं नवरत्नेश्वरे मासत्रयं समासाद्य राम
चक्रपूजासनेन वै बालयार्घ्यसमासाद्य हृल्लेखामनुनाशिवे चक्रमध्ये समावाह्य संक्षेपार्चनमर्चयेदिति अथवा [illegible] २५१

विष्णुकेश्वरतन्त्रे पूजासंकोचकं चैव कथयामि सुरेश्वरि यत्प्रजावाबोधमात्रेण जीवन्मुक्तः प्रजायते प्रथमाग्रेतु त्रिपुरा द्वितीया
त्रिपुरेश्वरी तृतीया चक्रराजेन्तु त्रिपुरादिसमन्विता देवी प्रजाक्रमेणैव सुंदरी वासिनीति च पंचमे त्रिपुराश्री श्च षष्ठे त्रि… मा
लिनी सप्तमे त्रिपुरासिद्धा चाष्टमे त्रिपुरांबिका मध्यशक्तौ महेशानि महात्रिपुरसुन्दरी इति संक्षेपार्चा अथ नैमित्तिक
विधिः तत्र गौतमीये नारद उवाच कर्मान्तरमथो वक्ष्ये शृणुष्वावहितो मुने यत्कृत्वा मंदभाग्योपि लभेन्मंत्रफलानि च
तत्रैव द्वयमध्यस्थं जपेदयुतसंख्यया त्रिरात्रजपमात्रेण बृहस्पतिसमो भवेत् व्याख्याता सर्वशास्त्राणां वेदानामपि जा
यते रविवारे श्वत्थमूले मासाद्यष्टोत्तरं शतं भूयोभयो भवेच्छांति जीवेदष्टोत्तरं शतं तस्य शांतिर्भवेन्नूनं यथा दृष्टकृता
क्रियाः वस्त्रैकैरर्च्चयेद्विष्णुमासमात्रं तु निर्मलैः रक्तपुष्पैः पापैर्घोरतरैरपि पद्मवस्त्रैर्यजेद्धत्वा संपत्तिमतुलां लभेत् विद्रुमैः पूजये
त्तस्मं त्रैलोक्यं वशमानयेत् माणिक्यैः पूजयेद्धत्वा सार्वभौमसमो भवेत् पद्मरागैः यजेन्नित्यं राजा भवति निश्चितं हैरकैः त्रियः सा
र्वभौमस्यात्साधयेत्सकलां महीं गारुत्मतमयैरत्नैः पूजयन् ज्ञानवान् भवेत् अपिहारकरत्नेन पूजयन् किन्न साधयेत् सुवर्णपु
ष्पैरभ्यर्च्य मासं भक्तिपरायणः कुबेरसमसम्पत्तिं संप्राप्य मोदते चिरं देहांते हविनी प्राप्य निर्वाणपदमृच्छति रविवारसरसिजैः

नं०सा०
२५८

कल्हारैः सोमवारके मंगले रक्तपुष्पैश्च बुधे नागरसंभवैः चंपकैर्गुरुवारे च शुक्रे कुंदसमुद्भवैः शनिवारे शमीपुष्पैः पूजयेद्
क्षितोपतिः रविवारे घृतान्नं तु पयो भक्तं निवेदयेत् सोमवारेऽपि शर्करादिसितया सह योजयेत् मंगले गुडसंमिश्रमन्नं वै कुंकुमान्वि-
तं बुधवारे यावकैस्तु गुरौ सूपसमुद्भवैः शुक्रे चान्नं शुक्रवारे च शनौ सघृतपायसैः वैशाखे मासि विधिवद् दर्शये हिमवज्जलैः
ज्येष्ठे मासि प्रयत्नेन फलैः संपूजयेद्धरिं आषाढे मासि विधिवत् पवित्रैः पूजयेद्धरिं एकैकं स्वर्णपुष्पाणि ग्रन्थियुक्तानि कारयेत् अ-
थवा पट्टसूत्राणि पद्मसूत्राणि वा पुनः पूजान्ते देवराजाय महिषीभ्यो निवेदयेत् विष्णुनेभ्यस्तदा दत्वा महोत्सवं चरेत् नै-
षपेङ्क्ष समोज्यैश्च ब्राह्मणान्नपि भोजयेत् एवं संवत्सरं मंत्री कृत्वाभीष्टमवाप्नुयात् न चेद्दर्शेदनापूजावास्तोर्भद्राय क-
ल्पते श्रावणे मासि लक्ष्मीं तु पूजयेत् केतकोद्भवैः गंधचंदनकस्तूरीकुंकुमादिसुवासितैः एलालवंगकंकोलफलादि-
कुर्धार्प्पयेत् भाद्रे मासि यजेद्विष्णुं भक्ष्यैर्बहुकुंकुमान्वितैः ईषे मासि यजेद्दत्त्या भक्ष्यैर्भोज्यैः सुविस्तरैः कार्प्पासनिर्मितैर्व-
स्त्रैर्नानाभरणसंयुतैः तुलास्थे भास्करे लक्ष्मीं पूजयेन्मासमात्रकं रात्रौ प्रदीपैर्हेमैश्च दुग्धपिष्टादिसंयुतैः घृतदीपमविच्छिन्नं दद्यात्तम-
मासं महोज्वलं एकादश्यामुपवसेत् द्वादश्यां पारणे दिने शुक्लायां विष्णुमभ्यर्च्य वस्त्रालंकरणादिभिः अस्यां तिथौ तु तिमा २५८

नवर्षेनोत्सवमाचरेत् भोज्यानि वहूभक्ष्याणि ब्राह्मणेभ्यो निवेदयेत् एवं कृते देवनाथ्यस्तुष्टा चेष्टं प्रयच्छति सत्यं लोकमवाप्नोति सर्वपाप
विवर्जितं मार्गशीर्षे यजेद्देवं नवान्नैर्वर्जितैः शुभैः नारिकेरफलक्षोदमिश्रितं गुडजीरकैः सुपक्वं देवदेवाय भक्त्या तस्मै निवेदयेत्
पौषमासि तु मासंवेष्टितैः पुष्पैः प्रपूजयेत् ग्रहदोषविवर्जितः प्राप्नुयान्नृपतिसन्निभः माघमासि यजेत्तस्मै अक्षतैः सुगन्धैः सि
तैः दुग्धान्नं शर्करायुक्तं मिष्टान्नं विनिवेदयेत् माघेन्मासि शुभदिने वस्त्रेणाच्छादयेद्धिमं फाल्गुणे देवकीपुत्रं पूजयेद्घस्तुचौ
कैः छत्रसुगन्धिकुसुमैर्धूपैर्दीपैः सुविस्तरैः चैत्रमासि वासुदेवं सर्वपुष्पैः समर्चयेत् पौर्णमास्यां यजेद्दुक्तपादमनेश्वसुगन्ध
कैः अस्मिन्दिने रतिकामं पूजयेद्वक्ति तत्परः न चेन्साम्प्रयंसरीपूजा विफला तस्य जायते भक्ष्मीभूतं स्मरं दृष्ट्वा रुदितासार
ीमती तां दृष्ट्वा कृपया विष्णोवरं दातुं शिवः स्वयं प्रसुवाचरतिर्नेयं सुभगत्वमवाप्नुयात् सुंदरः सर्वलोके पुत्री ड्यार्थं व्रजसुंदरि
ततो भवत्क्रन्दनरूत्यात पुष्पं दमनकं शुभं तेन पूजनमात्रेण संवत्सरफलं लभेत् होमयेल्लक्षमात्रं यः पिष्टकैर्घृतभक्षितैः
तावत्संख्यं जपं कृत्वा लक्ष्मीपस्पतिमंत्रवित् इतीति कथितं सम्यक् पूजनं वार्षिकोद्भवं कृत्वानेन विधानेन किन्न साध्यति भू
तले ज्ञानार्णवे अथ वक्ष्ये महेशानि श्रीविद्यापूजनं महत् ब्रह्महत्यादिदोषाणां पुरश्चरणमुत्तमं ब्रह्मपत्रैर्महेशानि पूज

तं०सा
२५९

येत्क्रममुत्तमं समस्तरश्मिसहितं नित्याम्नायपुरस्कृतं कुलाचारक्रमादेवि कर्पूरक्षोदमंडितं मासमात्रेण देवेशि महापातक
कोटयः जन्मांतरकृतान्सर्वान्नाशयेन्नात्र संशयः लक्ष्मीतस्य गृहे देवि सुस्थिरा सुरवन्दिते जवापुष्पैर्महेशानि पूर्ववत्स
जयेच्छिवां मासमात्रक्रमेणैव तेनैव परमेश्वरी ब्रह्महत्यादिपापानि सर्वजन्मकृतानि च नाशयेन्नात्र सन्देहो धनवान्जायते
बुधः केतकीस्वरूपैः पत्रैः पूर्ववत्पूजयेत्प्रिये उपपातकसंघांश्च मासमात्रेण नाशयेत् सौभाग्यमतुलं तस्य जायते नात्र
संशयः शतपत्रैः सेवती शब्दैर्मनोरम्यैः प्रजयेन्मासमात्रकं पूर्ववत्परमेशानि सर्वपापं प्रनाशयेत् चंपकैः सुमनोरम्यैः पू
र्ववत्सम्पूजयेच्छिवां मासमात्रेण हन्त्येव पातकं शतजन्मजं सौभाग्यवान्भवेन्मंत्री त्रिपुरायाः प्रसादतः श्वेतपद्मैर्महादेवि
सहृद्भिः प्रजयेच्छिवां पूर्वजं नाशयेत्पापं विंशजन्मकृतं प्रिये मासमात्रेण सकलमोदकस्य करे स्थितं बन्धुकाकुसुमैर्दे
वि मासमात्रं प्रपूजयेत् त्रैलोक्यं वशगं तस्य सर्वपापं दहेन्नरः बिल्वपत्रैश्च लाजैश्च सदेव परिपूजयेत् सर्वदा परमे[illegible]
नि मासमात्रं प्रसन्नधी समृद्धिमान्भवेत्सोपि सर्वपापहरः सदा मल्लिकामालती जाती कुन्दैश्च शतपत्रकैः श्वेतोत्पल[illegible] राम
त्यैश्च प्रपूजयेन्मासमात्रकं कुलाचारक्रमेणैव पातकं शतजन्मजं ब्रह्महत्यादिजनितं नाशयेन्नात्र संशयः मुक्तिलक्ष्मीकरे २५९

देविवाचाञ्जीवसमोभवेत् अगरुस्यवाणेवंधकजवारक्तोत्पलैः प्रिये पूर्वक्रमेण संपूज्य मासमेकं प्रसन्नधीः पानयात्राश्रि
येन्मंत्री मासात्कामसमो भवेत् चंपकैः पाटलैर्द्दिविवकुलैर्न्नागकेशरैः कल्हारैः सिंधुवारैः प्रपूजयेत्पूर्ववत् कर्मवि
सौभाग्यमतुलं तस्य मासमात्रेण जायते पापं विनाशयेद्देवि य द्विजन्मसहस्रकं रविवारे रूपांभोजैः सोमे श्वेतैस्तथोत्पि
ये भौमे रक्तोत्पलैश्चैव सौम्ये गतरसंभवैः गुरुवारे चकल्हारैः शुक्रवारे सितांबुजैः उत्पलैः शनिवारे सुपूजयेद्दिष्टमासे
न् निवेदयेत्क्रमोक्तमुरविवारादिसप्तसु पायसं दुग्धकदलीनवनीतं सिता घृतं एवमब्दं समाराध्य देवीं गंधादिभिः क्र
मात् ग्रहपीडां विजित्याशु समुखानि समश्नुते मन्त्रपस्तले अष्टम्यां च चतुर्दश्यां पूजयेच्च प्रयत्नतः यद्यत्प्रार्थय
न्मंत्री तत्तदाप्नोति निश्चयः लभते मंजुलां वाणीं लक्ष्म्याष्टम्यां सदा यजेत् अत्र नित्यार्चनानन्तरं नैमित्तिकं कार्य्यं यत्र
कालनियमो न दृश्यते तत्र मासाद्यामंडलाद्यापि नैमित्तिकानुष्ठानं समापनीयमिति तथा चोक्तं रुद्रयामले मासार्द्धमथ
वा मासमथवा द्विगुणां तथा यावत्फलाप्तिमान्योगी तावद्देवं समाचरेत् अन्यत्रापि नैमित्तिके तथा काम्ये फलाप्तिर्मण्ड
लावधि न चैतद्विगुणं कुर्याद्यथा प्राप्यफलमानसुधीः अष्टम्यां पूजनं देव्याः सर्वकामफलप्रदं रंभापुष्पं वीजपूरं सुगंधिप

तं०वसा०
२६०

त्रिमिश्रितं मित्रीलस्य वलिं दद्यादष्टम्यां च विशेषतः स्वर्णमालां महादेव्यै दद्यात् सुधैर्विशेषतः फलं क्षीरं तथा दद्याद्दधिकं शर्करा
न्वितं तस्मात्सर्वप्रयत्नेन संपन्नो प्रजयेच्छिवां दानं चाल्पं यथाशक्ति धर्मार्थं दद्याद्देव्यै प्रयत्नतः तथा नीलतंत्रे अष्टम्यां च चतु
र्दश्यां प्रजयेत्तु यथाविधि आज्ञासिद्धिमवाप्नोति यवपुष्पं च वर्धरी चन्दनं चार्घकुसुमं दद्यादेवापराजितां यस्तु संप्रजये
दुर्गामष्टम्यां च विशेषतः त्रिजन्मार्जितपापं तत्क्षणादेव नाशयेत् दुर्गेति तारिणीमिति प्रकरणानुकूलत्वात् अथ प्रयो
गविधिर्लिख्यते सर्वप्रयोगेऽयुतजपः तथा च शारदायां अयुतं होमसंख्यायां जपस्तावान्प्रकीर्त्तितः तत्रादौ भुवनेश्व
री प्रयोगः तद्यथा मंत्री त्रिमधुरोपेतैः कृत्वाश्वत्थसमिद्धनैः ब्राह्मनान्वसमये क्षीरं पार्थिवान्प्रकोमतः पलाशपुष्पैस्त
त्पत्रीर्मंत्रितैः कुसुदैरपि पञ्चविंशतिसंजप्ते जले स्नानं दिने दिने आत्मानमभिषिंचेद्यः सर्वसौभाग्यवान्भवेत् पञ्च
विंशति संजप्तं जलं प्रातः पिबेन्नरः अवाप्य महतीं प्रज्ञां कवीनामग्रणीर्भवेत् कृत्वा पलाशकुसुमैः श्रियं च महतीं लभे
त् ब्राह्मी घृतं पिबेद्यस्तु मूलमंत्राभिमंत्रितं कवित्वं लभते मंत्री वत्सरान्नात्र संशयः सिंदूरार्धामलकवणोपेतान् कृत्वा मंत्री राम
ग्रां नयेत् प्रयोगो नरनारीलरपतीर्न्नात्र कार्या विचारणा अथ त्वरिताप्रयोगाः यथा योनिकुंडम्प्रकल्प्याथ हुत्वा २६०

र्यां घृतेच्छया मल्लिकाकुसुमैर्हुत्वा वशयेदखिलं जगत् कर्पासो हादिशमनं पलाशकुसुमैर्हुतान् दण्डैर्दलशतैर्हुत्वा धाम
हतीं वृद्धिमाप्नुयात् दीर्घमायुरवाप्नोति दूर्वाहोमेन साधकः धान्यैः प्रक्षालितैर्हुत्वा प्रियमिष्टामवाप्नुयात् अशोकैः पुत्रानुप्नो
ति मधुकैरिष्टमाप्नुयात् फलैर्जम्बुभवैर्हुत्वा महतीं वृद्धिमाप्नुयात् पुष्पैर्वकुलसंभूतैः कीर्त्तिः स्यादनपायिनी दीर्घमायु
वेदाम्रैस्ताम्रपकैः काञ्चनं भवेत् कुर्वीत सर्षपैर्होमं शत्रुनाशकरं सुधीः पत्रैर्वकुलजैर्हुत्वा शीघ्रं चोत्सादयेदरीन् शाल्मलि
पत्रहोमेन सपत्नं नाशयेद्ध्रुवं मासहोमेन मूकः स्याद्दुर्मन्त्री ऽस्यैर्भवेदरिः अपदुर्ज्जाः वशयेत्तिलहोमेन नरान्नरपती
नपि सिद्धार्थैर्जुहुयान्मन्त्री रोगान्मुञ्चेत तत्क्षणात् पञ्चमूर्हुत्वा जपेच्छत्रून् दूर्वाभिः शान्तिमाप्नुयात् पलाशकुसुमैः पुष्टिं
धान्यैर्धान्यश्रियं व्रजेत् काकपक्षैः कृतो होमो विद्वेषं तनुयान्नृणाम् मरीचहोमान्मरणं रिपुमाप्नोति सर्वथा अथ सर
स्वती पीत्वा नन्मं त्रिसप्ततोयं सहस्रं प्रमहं जपेत् महाकविर्भवेन्मन्त्री वत्सरेण न संशयः ओं रोमात्रोदके स्थित्वा ध्यायेन्मार्त्त
ण्डमण्डले स्थितां देवीं प्रतिदिनं त्रिःसहस्रं जपेन्मनुं लभते मण्डलात्सिद्धिं वाचामप्रतिमामपि पलाशबिल्वकुसुमैर्जुहु
यान्मधुरोत्तनैः समिद्भिर्घृतदुग्धाभिर्यशः प्राप्नोति वाक्पतेः पलाशकुसुमैर्हुत्वा परां वाक्सिद्धिमाप्नुयात् कदम्बकुसुमै

तं०सा० स्तवृत्तफलैः श्रीवृक्षसंभवैः अविराच्छ्रियमाप्नोति वाचां कुंदसमुद्भवैः नद्यावर्त्तप्रसूनैः हुत्वा वाग्वल्लभो भवेत् अथ ल
२६१ क्ष्मी यथा वक्ष्ये प्रमाणेशालिके स्थित्वा मंत्रमिमं जपेत् त्रिलक्षसंयतो मंत्री देवीं ध्यात्वार्कमंडले स भवेदल्पकालेन रमाया
वसतिस्थिरा आराध्योत्तरनक्षत्रे देवीं अकूचंदनादिभिः नंद्यावर्त्तभवैः पुष्पैः सहस्रं जुहुयात्ततः पौर्णमास्यां फलैर्बिल्वैर्जु
हुयान्मधुराप्लुतैः पद्मैर्मध्यां विशदांभोजैः शुक्रवारेषु गंधिभिः अन्यैर्वा विशदैः पुष्पैः प्रतिमासं विशालधीः स भवेद्वत्सरमात्रेण
सर्वदा संपदां निधिः शालिभिर्जुहुतो नित्यमष्टोत्तरसहस्रकं अचिरादेव महतीं लक्ष्मीः संजायते ध्रुवं जपापुष्पाणि जुहुयात्
अष्टोत्तरसहस्रकं गृहीत्वा प्रजपेत् भस्म नागवल्लीरसान्वितं तिलकं तत्तु पात्रेन सर्ववश्यकरं भवेत् नागवल्लीपर्णैः अथ
गणेशः तर्पयेत्स तिलैः शुद्धैः दिने शोणगणनायकं चतुश्चत्वारिंशदाद्यं चतुःशतमतंद्रितः आकृष्याग्मंडलादर्घाकृष्य अभीष्टम
धिकं नरः नारिकेलैः हुतो होमश्चतुर्थ्यां श्रीप्रदो भवेत् शुक्लपक्षे प्रतिपदमारभ्य दिनशः सुधीः चतुर्थ्यन्तं नारिकेलसकुल (कं)
तिलैः क्रमात् चतुःशतं प्रजुहुयात् वश्याः स्युः सर्वजंतवः सतिलैस्तंदुलैर्होमश्चतुर्थ्यां श्रीप्रदो भवेत् पद्महोमेन भूपानां श्री राम
तत्फलैः शुभैः मंत्रिणः कुमुदैः पुष्पैर्विप्रान् पिप्पलसंभवैः समिद्वरैर्न्नृपतीन् उदुम्बरसमुद्भवैः लक्षैर्वश्यान्वटोद्भूतैः [illegible] २६१

मंत्रीवशंनयेत् मधुनास्वर्णलाभःस्यान्नगोदुग्धेनलभेत्तगाः आज्यहोमेनमहतीं श्रियमाप्नोतिमानवः दध्नासर्षसम[illegible]ःस्या
न्मेनैर्नरपतिर्भवेत् अथसूर्यस्य० एवंसंप्रजपविधिवद्भास्करंभक्तिवत्सलं दद्यादर्घ्यंप्रतिदिनंवारेवातस्यचोदितेप्रभातेमंड
लंकृत्वापूर्ववत्पीठमर्चयेत् पात्रंताम्रमयंप्रस्थतोयग्राहिसुमनोहरं निधायतत्रमनुनापूरयेत्तत्शुभोदकैः कुंकुमंरोचना
जीरक्तचंदनवेणवान् करवीरजवाशालिकुशश्यामाकतण्डुलान् निक्षिपेत्तशालिलेतस्मिन्नेकधासंभाव्यभानुना सांगमर्च
यित्वातस्मिन्भास्वत्पद्मेकलशोद्गतं गंधपुष्पादिभिर्वेष्टैर्यथाविधिविधानवित् अपिधायजपेमंत्रंसम्यगष्टोत्तरंशतं पुनः
संपूज्यगंधाद्यैर्जानुभ्यामवनिंगतः आमस्तकसमुद्धृत्यत्रिसाधारलोचनौ दृष्टिंनिधायत्वेकोनमूलमंत्रंधियाजपन्
दद्यादर्घ्यंदिनेशायप्रसन्नेनान्तरात्मना कृत्वापुष्पांजलिंभूयोजपेदष्टोत्तरंशतं० यावदस्तमितोभानुःसम्पाद्यैतैर्निजैःकरैः तेनतत्
प्रतिदिनमर्घ्यंदद्यादस्मैमनोरथान् अर्घ्यदानमिदंपुंसामायुरारोग्यवर्द्धनं धनधान्यपशुक्षेत्रपुत्रमित्रकलत्रदं तेजोवीर्ययशःकान्ति
विद्याविभवभाग्यदं अथनामस्य जातीप्रसूनैर्जुहुयाच्चंदनाम्भसमुक्षितैः राजवश्यायकमलैः धनधान्यादिसंपदे नीलोत्पलानां
होमेनवशयेदखिलंजगत् बिल्वप्रसूनैर्जुहुयादिन्दिरावाप्तयेपुनः दूर्वाहोमेनदीर्घायुर्भवेन्मंत्री निरामयः रक्तोत्पलहुतान्मंत्रीघ

ते० सा०

२६२

धा

नमाप्नोति वाञ्छितं मेधाकामेन होतव्यं पलाशकुसुमैर्नवैः तज्जतमंभयः पिवेत् कविर्भवति वत्सरात् तन्मंत्रितान्नं भुञ्जीत महदारोग्य
माप्नुयात् श्रीलक्ष्मस्य अथ प्रयोगान्वक्ष्यामि मंत्रयोरपि यान्कृत्वा साधकवरो लोकत्रयमुपरजितः वन्दे तं देवकीपुत्रं सद्योज
ताम्बुदप्रभं शंखचक्रगदापद्मधारिणं वनमालिनं एवं ध्यात्वा मनुवरं लक्षं ब्राह्मे मुहूर्त्तके जप्त्वा मेधां परां प्राप्य कवी नाम यशी
भवेत् अथवा स्फटिकाभासं द्विभुजं लेखपुस्तकधारिणं तं विचिन्त्यास्य लक्षं ब्राह्म्ये मुहूर्त्तके जप्त्वा मंत्री त्रिकालज्ञो बृहस्पति
समो भवेत् चलद्दोश्चरणं बालं ध्यात्वा ब्राह्म्ये मुहूर्त्तके जप्त्वा मनुवरो धीमान् सर्वशास्त्रार्थविद्भवेत् सर्ववेदार्थकुशलो ज्ञान
वान्भवति ध्रुवं नंदांगने पर्यटन्तं धूलीनिचयधूसरं दीप्तमणिगणोद्दीप्तं यशोदालोकनोत्सुकं एवं ध्यात्वा मनुवरं जपोन्नि
यममास्थितः लक्षैकजपनादस्य किं न सिध्यति भूतले प्रातः प्रातः पिवेत्तोयमष्टोत्तरशतं जपन् अनेन मूकोमुग्धात्मा जड
पाषाणवत्तथा जलपानेन साक्षात् वाक्पतिप्रतिसन्निभः जायते नात्र संदेहः सत्यं सत्यं न संशयः पञ्चाङ्गविद्धिस्य शकरं तद्
तं प्राकृतं यथा लक्षं जप्त्वादिति ध्यात्वा आपद्भ्यो मुच्यते ध्रुवं शत्रुतो न भयं तस्य राजतो दस्युतो पि वा न तस्य भीतिर्हि चेत् ग्राम
कदाचिदपि मुव्रतः नित्यं कर्म्मरतं लक्षं वन्यपुष्पैः समर्च्चयेत् वश्यो भवति सर्वत्र ब्राह्मणानात्र संशयः गोपालवेशं मनसा जा २६२

लीपुष्पैः समर्च्चयेत् वश्या भवंति राजानो नात्र कार्य्या विचारणा तमेव रक्तपुष्पैस्तु वैश्या वश्या भवन्ति हि नीलोत्पलैश्च
श्यामाङ्गं संलक्ष्म्यं समर्च्चयेत् जुहुयाद्रक्तकुसुमैर्मिश्रितैस्तिलतंडुलैः मंत्रेणाष्टसहस्रं तु जप्त्वा तद्भस्म धारयेत् तिला
टे विघ्नते यस्य सर्ववश्या भवन्ति हि अनेन च शरीरेण राजानो वश्यतामियुः स्त्रियो वैश्या भवन्त्यत्र पुत्रा मासस्य क्ष्रसद्ध्या
विवाहार्थी जपेन्मंत्रं मासमष्टसहस्रकं रासमंडलमध्यस्थं कृष्णं ध्यात्वा व्रते स्थितं विवाहयत्युत्तमांगीं कन्यां सर्वगुणा
त्तमां पुत्रमेरदद्येति द्विजेन प्रार्थितो हरिः लब्धं पुत्रं समालक्ष्य ददौ यस्तं विचिन्तयेत् पुत्रकामो लभेत्पुत्रं मासेनैकेन सुं
दरं दीर्घायुरप्रतिहतं बलवीर्यसमन्वितं कुंदपुष्पैः समाराध्य कृष्णं ध्यायेच्च कन्यका मासद्वयं तथा मंत्रं जपेदष्टसहस्र
कं मनोरथपतिं लब्ध्वा दीर्घकालं च क्रीडति अंजनं कुसुमं वस्त्रं ताम्बूलं चंदनं तथा अन्यान्यप्युपभोग्यानि स्पृष्ट्वा मंत्रं शतं जपे
त् दीयते यस्य यस्येति सो चिरादासवद्भवेत् स्त्रियो वैश्या अनेनैव भवन्ति मुनिसत्तम पुरुषं वशयेन्नारी अनेनैव विधानतः अ
नाद्यकामः श्रीपुष्पैः सितनण्डुलमिश्रितैः अष्टोत्तरसहस्रं तु जुहुयादन्नवान्भवेत् विश्वरूपधरं ध्यात्वा शतमष्टोत्तरं जपेत्
समाहितमना मंत्री यशस्वी कीर्तिमान्भवेत् भूतप्रेतपिशाचेभ्यः स्कंदादिग्रहपीडितः स्वजनान्नपानारं ध्यात्वा मंत्रशतं जपेत्

तं०सा० प्रणश्यंतिमहादुष्टापलायन्ते द्रुतन्ततः सर्प्पमंडलदष्टेश्च मन्त्रविकारे च सदंशितैः कृष्णं कालीयदमनं चिन्तयित्वा जपेन्न
२६३ रः तर्ज्जयंतं विषं घोरं हूंकारेण विनाशयेत् अत्राप्यन्यं मनुं वेहुं बीजाद्यं शृणुतत्त्वतः कालीयस्य फणामध्ये दिव्यं नृत्यं क
रोतितं नमामि देवकीपुत्रं नृत्यराजानमच्युतं ज्वरार्त्तोऽर्च्चयये मंत्री जपेद्दशशतं तथा ज्वरेणसंस्तुतं कृष्णं बलप्रद्युम्नसंयुतं
दहन्तं वाननगरीं गरूडोपरिसंस्थितं निजज्वरेणसंपिष्टं ध्यात्वा नाशयते क्षणात् शीतलाकामलादीनि तथा चातुर्थि
कोद्भवान् प्लीहगुल्मज्वरकृद्वायुपस्मारभयं तथा नाशयेन्नात्र संदेहो दृष्टिमात्रेण मान्त्रिकः गोपालं यष्टिपाशं च वेनु
मादाय संस्थितं ध्यात्वा कृष्णं जपन्मंडलाल्लभेत् महैश्वर्यमथ प्राप्य विश्वख्यातो भवेद्ध्रुवं गोवर्द्धनधरं कृष्णं ध्यात्वा मं
त्रं जपेन्नरः वातवर्षादिभिर्घोरैः भये सम्प्युपस्थिते भयमाप्नुविनश्येत् तनात्र कार्य्या विचारणा वृन्दावनगतं कृष्णं वृ
ष्टिकामो विचिन्तयत् जपेद्दशसहस्रं तु वृष्टिमाप्नोत्यसंशयः एवं च मनसा ध्यात्वा वृष्टिवर्षार्थमाहरेत् एवं जलाशये ध्या
त्वा जपेद्दशसहस्रकं वृष्टिर्भवति कालेऽल्पे महतीनात्र संशयः गायन्तं वेनुना कृष्णं गणकामो विचिन्तयेत् आज्यमष्टशतं हुं राम
त्वा किंनरैः सह गीयते जयकामो जपेद्यस्तु हरन्तं कल्पकं द्रुमं संस्तुतं देवनाभिश्च गरुडारूढमच्युतं ध्यात्वा चकरवीरेषु सामि २६३

263

द्भिर्जुहुयाद्वशी अष्टोत्तरसहस्रं तु मासात्पराजितो रिपुः राजादिभयमापन्ने ग्रामसये दुर्जसंसदि हुत्वा दशसहस्रं तु गन्ध
तोयाभ्यां प्रायेत ध्रुवं नीलोत्पलादिभिर्हुत्वा अष्टोत्तरसहस्रकं शंखादिनिधिसंयुक्तं द्वारकामध्यगं हरिं ध्यात्वा तु ष्टकल
दूर्वाभिः हुत्वा शान्तिकमारभेत् कदंबमूले गायन्तं गोपालं वनमालिनं कदम्बपुष्पैः संस्पृष्टं चिन्तयित्वा जनार्दनं अष्ट पा
र्ज्जयाते हुत्वा जपेदष्टसहस्रकं सर्वान्लोकान्वशीकृत्य अक्षुविक्षोभविष्यति राजद्वारे सभायां च व्यवहारे च मंत्रवित् त्र
मष्टशतं जप्त्वा प्रथमं वाक्यमुच्चरेत् अनेनैव विधानेन सर्वत्र विजयी भवेत् मोक्षकामो जपेद्यस्तु पुण्डरीकाक्षमव्ययं सनका
दिमुनिसंघसंस्तुतं पीताम्बरधरं परं शंखचक्रधरं ध्यात्वा मंत्रं लक्षं जपेन्नरः नारत्संपुटितं कृत्वा विविक्तस्थानमाश्रितः चंद्रा
र्कमंडले पद्मे रजये भभिमावहन् संसारसागरात्क्षिप्रो मुच्यते नात्र संशयः अथ दधिवामनस्य पायसान्नेन जुहुया
त्सहस्रं श्रियमाप्नुयात् धान्यहोमेन धान्यादिः शतपुष्पी मधुत्रयैः वीजैः सहस्रसंख्यातो होमो भयविनाशनः दध्यो
दनेन मधुपुष्पैर्न हुत्वा मुच्येत दुर्गतेः स्मृत्वा त्रैविक्रमं रूपं जपेन्मंत्रमनन्यधीः मुक्तो विघ्नाद्भवेत् क्षिप्रो नात्र कार्या विचारणा
य अथ हयग्रीवस्य बिल्वैः फलैः कृतो होमः श्रीपदः परिगीयते कुन्दपुष्पाणि जुहुयादिछन्त्वाकु श्रियमव्ययं मनुनानेन स

तं० सा० तसंद्भूतं ब्राह्मीरसेश्रुतं कवितामावहेत्सुंसामनूर्ज्जलविजृंभिनी वचामनेनसंजप्तं भक्षयेत्प्रातरन्वहं सर्ववेदागमादीनां व्याख्याता
२६४ जायतेऽचिरात् अथनृसिंहस्य श्रीपुष्पैर्जुहुयान्मंत्री विल्वकाष्ठेद्धितेनलेसहस्त्रं श्रियमाप्नोतिपत्रैर्वाविल्वसंभवैः प्रसूनैर्वाफ
लैस्सद्घृतदूर्वाहोमाद्रोगनाशः दुःस्वप्नेनिशिसंजातेस्नात्वामंत्रममुंजपेत् अभिमंत्रवित्पश्चात्सुस्वप्नस्तस्यजायते व्याघ्रचौ
रमृगादिभ्योमहारण्येभयाकुले रक्षेन्मनुरयंजप्तोभयेष्वन्येषुमंत्रिणां अनेनमंत्रितंभस्मविषग्रहमहाभयान् नाशयेदचिरादेव
मंत्रस्यास्यप्रभावतः घोराभिचारेसोन्मादेमहोत्पातेमहाभये जपन्मंत्रंस्मरेद्देवं दुःखान्मुक्तोभवेन्नरः सिंहरूपंमहाभीमंनखदं न
ष्ट्रातिभीषणं स्मृत्वात्मानंविभुंपश्चात् ध्यायेन्मृगशिशुंरिपुं गृहीत्वागलदेशेतंपुनर्दिक्षुक्षिपेद्ध्रुवं पुत्रमित्रकलत्राद्यैः रक्षा
रोजायतेध्रुवं सर्वमस्तुपदेशाध्यानामकृत्वास्वयंहरिः निशितैर्नखदंष्ट्राग्रैः खाद्यमानंरिपुंस्मरेत् नित्यमष्टोत्तरशतंजपे
न्मंत्रमतंद्रितः जायतेमंडलाद्दर्वाक्शत्रुसेनाविदारणे विभीतकाष्ठैर्ज्वलितेपावकेरिपुमर्द्दनं विचिन्त्यदेवंनृहरिंसंपूज्यकुसुमा
दिभिः सम्यक्चूर्णंजुहुयाद्वैदशशतावधि रिपुंखादयन्निवजपेद्दिद्दन्निवचनान्क्षिपेत् कृत्वासप्तदिनंमंत्रीसेनाशेषं राम
महीपतेः प्रस्थापयेद्धुमेलग्नेपरराष्ट्रंजपेद्धया तस्याःपुरस्तान्नृहरिंनिघ्नंतंरिपुमंडलं स्मृत्वाप्रयोगंकुर्वीतयावदायातिसत्पुनः ॥ २६४

विजित्य निखिलाञ्छत्रून्सह वीरश्रिया सुखं आगत्य विजयी राजा ग्रामक्षेत्रधनादिभिः प्रीणयेन्मंत्रिणं सम्यग्विभवैः प्रीतमानसः
मंत्रीयदि न संतुष्येदनर्थः स्यान्महीपतेः अथ वाराहस्य रवौ सिंहगते कृष्णां शुक्लपक्षे सितां शिलां पञ्चगव्येषु निक्षिप्य स
प्ताहं ताम युतं जपेत् उत्तराभिमुखो भूत्वा तां शिलां निखनेद्भुवि शत्रुचोरमहाभूतैः कृतां बाधां विनाशयेत् भानूदये भौमवारे
साध्यक्षेत्रात्समाहरेत् मृत्तिकां संजपेन्मंत्रं तां पुनर्विभजेत्त्रिधा चुल्ल्यामेकां समालिख्य पाकपात्रेण थापरं गोदुग्धे परमालोड्य
तां स्तंडुलान्विक्षिपेत् संस्कृतेऽग्नौ पचेत्सम्यक्चरुं मंत्री जपेत्ततु अवतार्य चरुं पश्चाद्दग्नौ देवं यथाविधि धूपदीपादिकैरिष्ट्वा पुन
ज्वलितं चरुं जुहुयाद्देधिते वह्नौ यावद्दृष्टो नरं शतं एवं सप्तवारवारे सुजुहुयात्क्षेत्रसिद्धये प्रातःकाले भृगोर्वारे मृदं साध्य
महीतलात् आदाय हविरापाद्य शर्वं वज्जुहुयात्सुधीः विरोधो न भूपति क्षेत्रे सह चौरोपद्रवैः राजवक्त्रसमुत्थाभिः समिद्भिर्मनु
नामुना त्रिः सहस्रं प्रजुहुयात्तस्य स्युः सर्वसंपदः शालिभिर्जुहुयान्मंत्री नित्यमष्टोत्तरशतं सप्ताहे दुर्गमं संघातैः शोभनैस्तु सप्तमं
दिनं तावदाज्येन जुहुयान्मंडलात्स्वर्णमाप्नुयात् लाजैः कन्यामवाप्नोति मध्वक्तैर्निजवाञ्छितां मधुरत्रयसंयुक्तैर्जुहुयाद्दुग्ध कु
लैर्नरः महतीं श्रियमाप्नोति मण्डलात्सर्वसंख्यया अथ मंत्रजयः दुग्धासिक्तैः सुधाखण्डैर्मंत्री मासं सहस्रकं आराधितेऽग्नौ जु

तं० स्ता० जुहुयात् विधिवद्धि जितेंद्रियः संतुष्टः शंकरस्तेन सुधाप्लावितविग्रहः आयुरारोग्यसम्पत्तिर्यशः पुत्रान्विवर्द्धयेत् सुधाव
२६५ ल्लीतिलादूर्वापयसर्पिः पयोहविः द्रव्यैः सप्तभिरेभिर्जुहुयात्सप्तवासरं क्रमाद्दशशतं नित्यमष्टोत्तरमतन्द्रितः सप्ताधिका
न्द्विजान्नित्यं भोजयेन्मधुरान्वितान् विकारानुग्रमन्त्री वर्द्धये होमवासरान् होमान्ते दक्षिणां दद्याद्रुक्मणाः पयस्विनीं गु
रुं संपूज्य विधिवत् धनाद्यैर्देवताधिया अनेन विधिना साध्यः लूत्याद्रोहज्वरादिभिः विमुक्तः सुचिरंजीवेच्छरदां शतमंजसा
अभिचारे ज्वरे तीव्रे घोरोन्मादे शिरोरोगदे आसाध्यरोगे ह्रुचेडान्त्रे मोहे दाहे महोभये होमोयं शान्तिदः प्रोक्तः सर्वसंपत्प्रदायकः
द्व्यैरेतैः प्रजुहुयात् त्रिजन्मसु यथाविधि भोजयेन्मधुरैर्भक्ष्यैर्ब्राह्मणान्वेदपारगान् दीर्घमायुरवाप्नोति वाञ्छितं विंदते श्रि
यं एकादशाहुतीर्नित्यं दूर्वाभिर्जुहुयाद्बुधः अपमृत्युजिदेषस्यादायुरारोग्यवर्द्धनः त्रिजन्मसु सुधावल्लीकाश्मीरीवकुलोद्भवैः
समिद्वरैः कृतो होमः सर्वमृत्युगदापहः सिद्धार्थैर्विहितो होमो महाज्वरविनाशनः अपामार्गसमिद्धोमः सर्वामयनिषूदनः प्र
प्रदक्षिणामूर्त्तेः भिक्षाहारो जपेन्मासं मनुमेनं जितेन्द्रियः नित्यं सहस्रमष्टोर्ध्वं परां विन्दति वाक्श्रियं त्रिवारं सप्तमेते मन्त्राणुना राम
सलिलं पिबेत् नित्यशो दक्षिणामूर्त्तिं ध्यायन् साधकसत्तमः शास्त्रव्याख्यानसामर्थ्यं लभते वत्सरान्तरे ब्राह्मीसैन्धवसिद्धार्थव २६५

वाकुष्टकपोत्पलैः सुगंधिसंयुतैः कल्कैश्शतं ब्राह्मीरसे घृतां मनुनानेनसंजप्तमयुतं साधुसाधितं निपीतं कवितां कांतिरत्ना
युः श्रीधृतिप्रदं अश्वमेरव्याः जुहुयाद्रूपाम्भोजैस्त्रिदिशैर्मधुराप्लुतैः लक्षसंख्यं ततदर्द्धं न्वा प्रत्यहं भोजयेद्द्विजान् स्त्रि
तायुवतीरम्याः प्रीणाये देवताधिया होमान्ते घनधीमान्द्वेषिणो वश्ये कुरु स्वात्मनः एवं कृते जगद्वश्यं घोरमायाभवनं भवेत् सौ
गलैस्त्रिमध्वक्तैररुणैर्वाहयारिजैः पुष्पैपयोन्ते सघृतैः होमो विश्वं वशं नयेत् वाक्सिद्धिं लभते मंत्री पलाशकुसुमैर्हुत्वा
तुः कर्पूरागुरुसंयुक्तं गुग्गुलुं जुहुयात्सुधीः ज्ञानं दिव्यमवाप्नोति तेनैव स भवेत्कविः ह्रीराक्षैरमृतारव्यैर्देहोमैः सर्वापमृत्यु
जित् दूर्वाभिरायुषे होमः ह्रीराक्षाभिर्दिनत्रयं गिरिकर्णी भवेः पुष्पैः ब्राह्मणान्वशयेद्धुतान् कल्हारैः पार्थिवान्पुष्पैस्त
द्धधत्त्वकर्णिकारजैः मल्लिकाकुसुमैर्हुत्वा राजपुत्रान्वशं नयेत् कोरंडकुसुमैर्वैश्यान्वशं बलात्पाटलोद्भवैः अनुलोमविलो
मन्त्रः स्थितः साध्याकृष्यान्वितः मंत्रमुच्चार्य जुहुयान्मंत्री मधुरलोडितैः सर्षपैः कटुसंमिश्रैर्वशयेत्पार्थिवान्क्षणात् अ
नेनैव विधानेन तु मंत्री स्त्रिसुतानपि जातिबिल्वभवैः पुष्पैर्मधुरत्रयलोडितैः नरनारीन्नरपतीन् होमतो वशयेद्ध्रुवं मालती
वकुलोद्भूतैः पुष्पैश्चंदनलोडितैः जुहुयात्कवितां मंत्री लभते वत्सरान्तरे मधुरत्रयसंयुक्तैः फलैर्बिल्वसमुद्भवैः जुहुयाद्ध

तं० सा० शयेल्लोकं स्त्रियमाप्नोति वांछितां पाटलैः कुसुमैः कुन्दैरुत्पलैर्नागचंपकैः नंद्यावर्त्तैर्विकसितैः स्वतमालै र्जुहोतियः जाय
ते वत्सरादर्वाक् स्त्रियमा विजितपार्थिवः साज्यमन्नं प्रजुहुयात् भवेदन्नसमृद्धिमान् कस्तूरीकुंकुमोपेतं कर्पूरं जुहुयाद्धवी
कं दद्याद्दधिकं सद्यः सौंदर्य्यमधिगच्छति लाजान्प्रजुहुयान्मंत्री दधिक्षीरमधुप्लुतान् विजितपरो मानरविलान्सजीवेच्छरदां
शतं पादद्वयं मलयजं पादं कुंकुमकेशरं पादं गोरोचनायाश्च तानि पिष्टा हिमाम्बुना विदध्यात्तिलकं भालेयान्पश्येद्विलो
कयेत् यान् स्पृशेत्स्पृशन्ते यैर्द्रावं पासुःतस्य तेऽचिरात् कर्पूरकपिचोराणि समभागानि कल्पयेत् चतुर्भागाज्जटामांसी ना
तीरोचनामता कुंकुमं सप्तभागं स्यादिक्कभागं चंदनं मतं अगुरुर्नवभागस्यादितिभागक्रमेणच हिमाद्रिःकन्यया पिष्टमेतत्सर्व
मनुसाधितं आदाय तिलकं भाले कुर्य्याद्भूमिपतीन्नरान् वनितामदगर्वाढ्यं मदोन्मत्तान्मतंगजान् सिंहान्व्याघ्रान्महासर्प्पान्भूतवे
तालराक्षसान् दर्शनादेव वश्यये त्तिलकं कारयेन्नरः अथसुंदरी स्नानार्थे वै मालतीमल्लिकाजातीकुसुमैर्मधुमिश्रितैः
हुते लक्ष्मीर्देवि वागीशत्वं प्रजायते मूकस्यापि हि मूढस्य प्रतिलारूपस्य चान्यथा यवापुष्पैराज्ययुक्तैः करवीरैस्तथाविधैः हु राम
वनान्मोहयेन्मंत्री लोकत्रयनिवासिनः कर्पूरं कुंकुमं देवि मिश्रं मृगमदेन हि हवनान्मदनो देवि मंत्रिणा विजितो भवेत् सोभा २६६

ग्येन विलासेन सामर्थ्येनापि सुव्रते चम्पकैश्च पाटलैर्हुत्वा श्रियं प्रोल्लसितां वरं प्राप्नोति मंत्री महतीं लक्ष्म्ये जगतीं मिमां । पीरवणं
गुग्गुलुं चंदनं अगुरुं होमयेत्ततः नागेन्द्रासुरदेवानां पुरंध्रीर्वशमानयेत् सर्वलोकाः वशं यान्ति तस्य भवने वन संशयः लाक्षा होमा
ल्लभेद्राज्यं दारिद्र्यभयपीडितः दुर्गोपशमनं देवि मत्स्यैस्त्रिमधुहोमतः रुधिराक्तेन छागस्य मांसेन निशि होमतः मधुरत्र[illegible]
क्तेन गुग्गुलेन विधानतः परराष्ट्रं महादुर्गं समस्तं स्ववशं नयेत् क्षीरं च मधु दध्याज्यं पृथक् कृत्वा वरानने आयुर्वृद्धिं नमथा[illegible]पं
समृद्धिर्जायते नृणां क्रमेण शैलजे क्षीरमधुभ्यां मृत्युनाशनं दधिमधुक होमेन सौभाग्यं धनमाप्नुयात् सितया केवलं
होमो वैरिस्तंभनकारकः होमो दधिमधुक्षीरलाजैश्च वीरवंदिते रोगहन्नाकालहंतारम् सुहन्तानसंशयः कमलैरक्तैर्हो
मः सम्पक्कसंपत्तिदायकः रक्तोत्पलैर्जगद्वश्यं राज्ञा नो वशमाः क्षणात् नीलोत्पलैः महादुष्टावश्यमायान्ति नान्यथा श्वेतो
त्पलैः श्रियं वाचं लभते हवनात्प्रिये तथाक्षमालां प्रगृह्याथ चंदनेन प्रपूजितां समाश्रित्य जपेद्विद्यां लक्षमात्रं यदा सुधीः
योषितो भ्रामयन्त्येव मन्मनस्य सु निश्चितं तदा द्वितीयलक्षं तु प्रजपेत्साधकोत्तमः पातालतलनागेन्द्रकन्यका क्षोभयन्ति तं नासा
कराद्वजालेषु नमो हयतिसाधकं तदा लक्षत्रयं कुर्यात्साधकस्थिरमानसः तृतीयलक्षे संप्राप्ते भ्रामयन्ति सुरांगणाः श्रमिमा

तं०स्रा० नेनसौंदर्य्यसौभाग्यमदकारिणी साधकं द्रावयंत्येवतदा सौस्थिरमानसः तदालक्तत्रयंसाधुसर्वपापनिकृन्तनं एवंलक्तत्रयं
२६१ जप्तेसाधकःस्वस्थमानसः संक्षोभयतित्रैलोक्यंमर्त्यलोकंतलवासिनः पुरुषायोषितोवश्याश्चलोचरमपिप्रिये गोरोचनादिभि रो
ईदृशैश्चक्रराजंसमालिखेत् अतीवसुंदरंरम्यंतन्मध्येप्रतिमांरमां ज्वलन्तीन्नामसाहितांमहावीजविदर्भितां चिन्तयेत्तुनततो
देवि-योजनासहस्रतः अदृष्टपूर्वादेवेशिश्रुतमात्रापिदुर्ल्लभा राजकन्याऽथवाभार्य्याभयलज्जाविवर्जिता आयातिसाध
कंसम्यक्मंत्रमूर्छासतीप्रिये चक्रमध्यगतोभूत्वासाधकश्चिन्तयेत्सदा उद्यत्सूर्य्यसहस्राभमात्मनमरुणंतथा साध्य
मप्यरुणीभूतंचिन्तयेत्परमेश्वरी अनेनक्रमयोगेणस्वयंकंदर्प्परूपवान् सर्वसौभाग्यसुभगःसर्वलोकवशंकरः सर्वरक्तोपचा
रेश्चमुद्रासहितविग्रहः चक्रंसंपूज्ययेद्यस्तुयस्यनामविजृंभितं सभवेत्तदासवत्देविधनाढ्योवापिभूपतिः चक्रमध्यगतांकु
र्य्यान्नामयस्यास्तुयोषितः अदृष्टायामहेशानियोनिमुद्राधरोबुधः हठादानयतेशीघ्रंयक्षिणींराजकन्यकां नागकन्यामप्सरसं
खेचरींवासुरांगनां विद्याधरींदिव्यरूपांऋषिकन्यांरिपुस्त्रियं मदनोद्भवसंतापस्फुरज्जघनमंडलां कामवान्नांप्रभिन्नां कर राम
लांलोलचक्षुषं महाकामकलांध्यात्वासोगाधीमुखंदिते क्षोभयेत्स्वर्ग्गमर्त्यलोकपातालतलयोषितां रोचनाभागमेकंभाग २६१

मेकं च कुंकुमं अथ भागद्वयं देवि चंदनं मर्दयेत्समं एकत्र तिलकं कुर्यात् त्रैलोक्यवशकारिणं अष्टोत्तरशतं विद्यां मंत्रयित्वाव
शांनयेत् राजानं नगरं ग्रामं येन यद्यत्प्रदृश्यते मंत्रिणा परमेशानि तत्सर्वं तस्य वश्यगं तांबूलधूपमुदकं पत्रं पुष्पं फलं द
धि दुग्धं घृतं चूर्णमात्रं वस्त्रं कर्पूरमेव च कस्तूरी घुसलं चैलालवंगं जातीपत्रकं जलं वा वस्तु सकलं यद्यत्तु परमेश्वरि अ
ष्टोत्तरशतं जप्त्वा यस्मै यस्मै प्रयच्छति स वश्यो जायते देवि नात्र कार्या विचारणा स्त्रियस्तु सकला वश्याः पाताले भूतले भवंति
हि हवा कार्ष्णेमे न मुक्ते यितं नान्यथा भवेत् आयव द्सेमहेशानि महापातकनाशनं शिवां संपूज्य जपेद्देवि सुगंधैः कुसुमैः
प्रिये महापातकयुक्तात्मा तत्क्षणात्पापहा भवेत् शमीदूर्वांकुराश्वत्थपल्लवैरथवार्कजैः मासेन हन्ति कलुषं सप्तजन्म
कृतं नरः मुद्रासंबद्धयोगस्थः पूर्वोक्तध्यानयोगतः लक्षमात्रं जपेद्यस्तु महापापैः प्रमुच्यते लक्षद्वयेन पापानि सप्तजन्मभवानि
पि महापातकमुख्यानि नाशयेन्नात्र संशयः चतुर्लक्षं जपेद्देवि महावाग्मीश्वरो भवेत् कुबेर इव देवेशि पंचलक्षान्न संशयः
त्री षट्लक्षं जपमात्रेण महाविद्याधरो भवेत् सप्तलक्षं जपेन्मंत्री खेचरीमेलको भवेत् अष्टलक्षजपान्मंत्री देवपूज्यो भवेन्नरः
अणिमाद्यष्टसिद्धीनां नायको भवति प्रिये वशगास्तस्य राजानो योषितस्तु विशेषतः नवलक्षप्रमाणेन जपेद्देवि सुंदरि रु

तं०व०सा० मूर्त्तिः स्वयं कर्त्ता हर्त्ता सा शान्तसंशयः सर्वैर्वंद्यः सदा स्वस्थः सर्वसौभाग्यवान्भवेत् अथ श्यामा कालीतंत्रे अथ काम्यवि
२६८ धिं वक्ष्येयेन सर्वत्र पारगाः साधकः साधयेत्सिद्धिं देवानामपि दुर्ल्लभं कुलागारं पुष्पितायाः दृष्ट्वा यो जपेत्तेनरः अयु
तैकप्रमाणेन साधकः स्थिरमानसः केवलं गुप्तभावेन सतु विद्यानिधिर्भवेत् संस्कृताः प्राकृताः शब्दाः लौकिका वैदिका
स्तथा वशमायान्ति ते सर्वसाधकस्य न चान्यथा अथवा मुक्तकेशः श्मशाने हविर्भुक्त्वा मुसंयतः प्रजपेदयुतं प्राज्ञः स तद्देवफलं ल
भेत् नग्नां परलतां पश्यन्नयुतं यस्तु साधकः प्रजपेत्स भवेच्छ्रीमान्विद्यापावकलोभः स्वयम् तस्य दर्शनमात्रेण वादिनः कुंठ
तां गताः गद्यपद्यमयी वाणी सभायां तस्य जायते तस्मात्सुधियः सर्वे प्रणमन्ति मुदान्विता तस्यावाक्यपरिचयाज्जड
ो भवति वाङ्मनः कुलचूडामणौ रजोयुक्तां समासाद्य तत्क्षात्रे विशिष्टदेवतां प्रजपित्वा महारात्रौ त्रिदिनं प्रजपेन्मनुं लक्षपी
ठफलं देवि लभते नात्र संशयः वेतालपादुकासिद्धिः खड्गसिद्धिं च भैरवि अंजनं तिलकं गुप्तं साधयेत्साधकोत्तमः प्रजपे
त्प्रतिदिनमष्टोत्तरसहस्रमित्यर्थः यत्र जापे च होमे च संख्या नोक्ता मनीषिभिः तत्रैव गणना प्रोक्ता गजान्तकसहस्रमिति राम
विद्यावाप्तिर्होतव्यं पद्मैर्मधुसमन्वितैः धनकामेन होतव्यं तिलाज्यमधुसंयुतं वंधूकपुष्पहोमेन दासं च कुरुते नृपं ससखि २६८

र्लवणे होमेन सदाकर्षति कामिनीं वकुलै होममात्रेण सौभाग्यं लभते नरः मल्लिकाजातिपुन्नाग कदम्बैः पुष्टिमाप्नुयात् ह्री
राज्ये नगरे होमात् समहतीं कवितां लभेत् चन्दनागुरुकाश्मीरकर्पूरहोमतः पुनः मंत्री नीलसरस्वत्याः सर्वाभीष्टमवाप्नुयात् नील
सरस्वतीपदमुत्पलदलं कर्पूरहोमतो मंत्री सर्वाभीष्टानि साधयेत् सम्मूल्यमूलमंत्रेण बिल्वपत्रैर्घृतान्वितैः सहस्त्रप्रमहं कृत्वा
प्राप्नोति परमां गतिं प्रतिदिनमिति मंडलपतिं घृताक्तमालतीपुष्पहोमाद्दुजकविर्भवेत् यत्र यत्र होमसंख्यानोक्ता तत्र तत्रा
युत होमसंख्या वोद्धव्या तदुक्तं तत्रैव सर्वस्यैव तु होमस्य नियतो युतसंख्यकः अथ तर्पणम् मत्स्यसत्त्वे मधुना तर्पणं
कुर्यात् सर्वकामप्रदायकं मंत्रसिद्धिकरं साक्षान्महापातकनाशनं नीलतन्त्रे कर्पूरमिश्रिते स्तोयैर्मासमात्रं प्रतर्पयेत् व
शीकुर्यान्नृपान्सर्वान् भोगी स्याद्यावदायुषं घृतैः पूर्णायुषः सिद्धो दुग्धैरारोग्यसिद्धये अगुरुमिश्रिते स्तोयैः सर्वकालं सुखी
भवेत् नारिकेलोदके मिश्रैः स्तोयैः सर्वार्थसिद्धये मरीचिमिश्रिते स्तोयैः सथा शत्रून्विनाशयेत् केवलेरूत्सनोयेश्च शत्रुमु
ट्ये हृणात् ज्वराविद्धो भवेत्तेन दुग्धसेकात्समं भवेत् सिद्धिसारस्वते शताभिजप्तमात्रेण रोचनातिलकं नरः लत्वा परपतिं यं
मंत्री तं कुर्याद्दासवत्सुधीः फेत्कारीयो उपचारविशेषेण राजपत्नीं वशं नयेत् राजं नं जपमात्रेण वलिना सकलं जगत् उपचारैर्व

तं० सा० २६९

शेषेत्येतिश्च अधिकारिभेदेन बोद्धव्यं जपमात्रेणेति पूजाभावेनेत्यर्थः बलिद्रव्यं तु मांसमत्स्ये रंभाजानीबीजपूरं सुगंधिपरि
मिश्रितं मिश्रीकृत्य बलिं दद्याद् रम्यां च विशेषतः बलिमंत्रास्तु प्रणवं पूर्वमुद्धृत्य उग्रतारे ततः परं विकटदंष्ट्रे मोहय पदद्वं हंस
मुच्चरेत्ततः मारय खादय क्षोभय पचद्वंद्वं द्वंद्वं वदेत्ततः येमां हिंसितुमुद्यतायोगिनी चक्रेसहितैस्तान् दारय हूं फट् स्वाहा पर
विद्यामाकर्ष्य यंत्रु बद्धयं कपाले गृह्ण २ स्वाहेति० अयं तारा विषये कालिकादौ न तत्पटलोक्तबलिमंत्रो बोद्धव्यः अथ
निग्रहाद्युपाया तदुक्तं वीरतंत्रे श्मशानांगारमादाय मंगले वासे निशि कृष्णवस्त्रेण संवेष्ट्य बध्नीयाद्रक्तसूत्रेण शताभिमं
त्रितं कृत्वा निक्षिपेद्वैरिवेश्मनि स सद्य एव म्रियते तस्य उच्चाटनमिदं महत् तदुक्तं फेत्कारीये नरास्थिनि लिखेन्मंत्रं ताररयु
क्तं हरिद्रया सहस्रं परिसंजप्य निशायां शनिवासरे निक्षिपेद्यस्य चागारे सुतस्य त्रिमासतः क्षेत्रे तु शस्यहानिस्स्या
ज्ज्वहानिस्तुरंगमे धनहानिर्धनागारे ग्राममध्ये तु तत्क्षयः तारस्तु शेपनाविद्युक्तपञ्चपल्लवगं हृल्लेखाधोगतरेफ
मध्ये अमुकामुकयोर्महद्वेषं कुरु २ इति तदुक्तं द्वेषे तु विलिखेन्मंत्रं प्रेतकर्पटके सुधीः द्वेष्यद्वेषकयोर्नाम्ना जस्य द्वेषाय साम
ह्या भवेत् लिखेन्मंत्रमिति मंत्रो लिखित्वा हृल्लेखारेफमध्ये अमुकुमारय २ इत्यादिसाध्यसहितमित्यर्थः अथवाऽस्या २६९

घ्यं लिखित्वा तदग्रे मंत्रं लिखेत् सहस्रं परिजप्येति अमुकं मारय मारयेति अनेन मंत्रजापः द्वेषे तु अमुका अमुकयोर्द्वेषं कुरु कुरु हूं फ
स्वाहेति मंत्रमुच्चार्य्य सहस्रं जपेत् अथ वेतालादिसिद्धिः तदुक्तं कुलचूडामणौ भैरव उवाच वेतालादिमहासिद्धिः कथं भवति
चेद्गुरो तन्मे कथय देवेशि यदि स्नेहोऽस्ति मां प्रति देव्युवाच निश्चलदोऽद्वैकाष्टश्मशाने साधको गमः भौमवारे मध्यरात्रौ
गत्वा गुरुकुलान्वितः खनित्वा चाष्टलक्षैर्जपेन्माहिषमर्दिनीं ततः सहस्रं हुनेत् तत्रैव पितृकानने काष्ठमुद्धृत्य तस्मिन्वेद
डं पादुकं चिन्हितं कृत्वा दुर्गाष्टमीरात्रौ श्मशाने निक्षिपेत्ततः तस्योपरि शिवं कृत्वा प्रजपित्वा यथाविधि शवासनगतो धीरो
जपेदष्टसहस्रकं ततो मांसबलिं दत्वा काष्ठमामंत्रयेत्ततः स्फें स्फें दं डमहाभाग योगिनीहृदयप्रिय मम हस्ते स्थितो नाथ ममा
ज्ञां परिपालय एवमामंत्र्य वेतालं यत्र यत्र प्रयुज्यते तत्तत्पूर्णं विधायाथ पुनरायाति वै कालिकम् गच्छ गच्छ महाभागे पादुके
वरवर्णिनि मत्प्रसादस्पर्शमात्रेण गच्छ त्वं शतयोजनं अष्टलोहसमासाद्य पश्चात्प्रादंगुलीवृतिं खड्गं कृत्वा तत्र मंत्रं लिखित्वा प्रज
पेन्मनुं तत्सहस्रं ततो कृत्वा महाशवकलेवरे खनित्वा जीववल्लारेवध्वास्तुष्क तु भावयेत् कुलाष्टम्यां निशि रात्रौ च चितामध्ये
स्मशास्थितः प्रीतिपूर्वं मम मंत्र हुनेत् तिलतण्डुलैः ततः मधुत्रयसमं युक्तं बिल्वपत्रेण संयुतं पादादिमूर्द्धपर्य्यन्तं होमान्ते बलिमाह

270

५५

रेत् वत्संतेपरमामायादेवीमहिषमर्दिनी आयातिवलिपूर्णोस्यावरहस्ताहसन्मुखी गर्द्धवन्मेतिशब्दंवैरवक्रमुत्तोल्य धारये
त् घोरदंष्ट्रेमहाकालिकरवालस्वरूपिणि आँ ग्रौं ह्रौं ह्रूँ ईं ऊँ कुरु कल्याणं विपद्ध्वंसे देवि क्षरं एवमामंत्र्यखड्गं तु यमुद्दिश्य पद्मि
पेन्नरः छिन्नच्छित्वा पुनः छित्वा गच्छत्पावार्श्वयेमुनः अथवा कृष्णमार्ज्जारमेकघातेन घातयेत् कुजे चतुःपथे रात्रौ निखनेत्त
त्रितंततः तत्रमोचांसमारोप्य यावत्पुत्रं प्रजायते तावद्भुक्त्वा हविष्यान्नं प्रतिरात्रं जपेद्विभीः अष्टोत्तरसहस्रं तु एकाकी दीपवर्ज्जि
तः उत्पन्नं पत्रमालोक्य छित्वा तिच्छिद्रमानयेत् तत्र भुक्त्वा हविष्याशी तद्दिने हृदिनीतटे नमानीयस्तु हत्संगः क्षालयेन्मंत्रमुच्च
रन् ततः श्रोतो मिश्रखंवत्सपदक्ष्यिप्रतिगच्छति तदानीयजपेत्तत्र कालिकां घोरनिस्वनीं अभिमंत्र्यसहस्रं तु कालीमंत्रं प्रयत्नतः
सिद्धमंत्रो भवेन्मंत्री नात्र कार्या विचारणा चंदनागुरुकस्तूरीमिश्रितं चाण्यिघर्षितं कृत्वा तिलकमादाय सर्वं जयति सा
धकः कुलमीनेकुलान्नं च कुलमद्यं कुलेश्वरः कुलस्थाने समानीय दद्याद्देव्यै प्रयत्नतः अष्टोत्तरसहस्रं तु जप्त्वा भूमितले स्थितः
भूमौ फूत्कारमात्रेति विवरं तत्र जायते शतयोजनदूरे वा यत्र साध्यस्थितिर्भवेत् तत्रैव गमनं तस्य भूतलान्तः प्रसर्पिनः एवं वि रम
वरमध्येतु गवाक्षकुहरे पिवा का प्यसंकोचमासाद्यगच्छेत्स विकलो नरः दुर्गामंत्रं विना वत्स कालीमंत्रं तथैव च सिद्धपं कु २९०

लनाधे शजायंतेन कथंचन अथ बालकसंस्कारो यथा मधुलाजाभ्यां नाडीछेदात् प्राक् स्वर्णशलाकया श्वेतदूर्वया वाथवा य
दारुशिषयबालकस्य जिह्वामोष्ठं वा दक्षिणपाणिना त्रिवारं संमार्ज्य तत्र पितापि स्वयमाकारेण मूलमंत्रं विलिखेद्देवीं पूजयेत् त
दुक्तं मत्स्यसूक्ते अथ वा मधुलाजाभ्यां जिह्वायां बालकस्य च नाडीछेदाद्यथा पूर्वं लिखेत्स्वर्णशलाकया मूलमंत्रं लिखेन्मं
त्रीयस्याधिष्ठे तद्दूर्वया वाक्यो च्चारणेनो वालो वाग्मी द्रुतकविर्भवेत् महोग्रतारा कल्पे तु नैमित्तिकसंस्कारान् न्तरमेवमंत्रलिख
नकार्यं तदुक्तं तत्रैव जन्मसंस्कारकं नाम पुत्रे जाते प्रशस्यते जिह्वायां तु लिखेन्मंत्रं यज्ञदारुशलाकया वारत्रयं तु संमार्ज्य द
क्षिणेनैव पाणिना मूलमुच्चार्य यत्नेन कंपन्ति कुर्याद्धि शोभनं आदौ संस्कारकर्त्तव्यः तदा त्रैविलिखेन्मनुं गंधचंदनपुष्पै
श्च पूजयेत्तारिणीं शिवाम् उत्तराभिमुखो भूत्वा स्थापयेत्पीठमुत्तमं पूजयेत्तारिणीं देवीं बलिभक्षैः सुशोभनैः कविर्वाग्मी
भवेत्पुत्रः सत्यवादी जितेन्द्रियः अत्र तारिणीमुपलक्षणं देवीमात्रमेव बोद्धव्यम् वृहच्छ्रीक्रमादिनं त्रै बालकसंस्कारदर्शनात् त
दुक्तं तत्रैव बालकस्य तु जिह्वायां त्रिदिनाभ्यन्तरे लिखेत् मधुना श्वेतदूर्वाभिः लिखेत्स्वर्णशलाकया अनु वाग्भवकूटं वालि
खेद्धि जननान्तरे एतेनाशक्तौ त्रिदिनाभ्यन्तरमिति सूचितं अनुमतिश्चोभैरव्या वाग्भवकूटमित्यर्थः अथैकादशाहे देवतां संपूज्य

तं॰ सा॰ मंत्रं लिखेदिति कश्चित् अथ पिता यदि दूरस्थो भवति तदा पितृव्यो मातुलो वा मंत्रं लिखेदिति तदुक्तं महोग्रे पितुर्भ्राता लिखेन्मं
२७१ त्रं मातुर्भ्राताथवा पुनः पिता वा विलिखेन्मंत्रं नान्य एव कदाचन मातुः क्रोडे पि संस्थाप्य दर्भानास्तीर्य्य ततः शान्तिं कुर्या
त्तु बालकस्य ब्राह्मणैः सह साधकः अथ शान्तिमन्त्रो यथा इमं पुत्रं कामयतः कामयानां इहैवेति देवेभ्यः पुष्पाणि सर्वमि
मिदं मज्जननम् शिवशान्तिस्ताराये केशवेभ्यस्ताराये शिवाय शिवयशसे इत्यनेन कुशोदकाभ्यां शान्तिं कुर्यात् अथ
छागादिबलिः तत्र सलक्षणं पशुं देव्यग्रे संस्थाप्य अर्घोदकेन संप्रोक्ष्य अस्त्रेण संरक्ष्य कवचेनावगुंठ्य धेनुमुद्रयामृतीकृत्य
गंधपुष्पाक्षतैः संपूज्य कर्णे इमं मंत्रं पठेत् पशुपाशाय विद्महे विश्वकर्मणे धीमहि तन्नो जीवः प्रचोदयात् ततो क्रीं कालि
कालि वज्रेश्वरि लोहदंडाय नमः इति मंत्रेण खड्गं संपूजयेत् ततः खड्गस्याग्रमूलमध्यक्रमेण पूजयेत् यथा हूं वागीश्वरीब्रह्मभ्यां
नमः ह्रूं लक्ष्मीनारायणाभ्यां नमः ह्रूं उमामहेश्वराभ्यां नमः ततो ब्रह्मविष्णुशिवशक्तियुक्ताय खड्गाय नमः इति सर्वत्र पूजयेत्
खड्गाय खरनाशाय शक्तिकार्य्यार्थतत्परः पशुः छिद्यतां त्वया शीघ्रं खड्गनाथ नमोस्तु ते ततो महावाक्यं लत्वा अमुकदेवताप्रीति काम
कामो ऽमुकदेव इमं पशुं तुभ्यमहं संप्रददे ततो निवेदयेत् यथोक्तेन विधानेन तुभ्यमस्तु समर्पितं ततो बलिं दद्यात् ततो रुधि २७१

२७१

रसमांसं देव्यै दत्वा वक्षिप्यं वटुकादिभ्यो वलिं दद्यात् यथा ह्रूं वां वटुकाय नम इति गंधादिभिः संपूज्य पूर्वमंत्रेणो वायव्ये वलिं
दद्यात् ह्रूं यां योगिनीभ्यो नम इति संपूज्य पूर्वमंत्रेण ईशाने वलिं दद्यात् ह्रूं क्षौं क्षेत्रपालाय नम इति संपूज्य पूर्वमंत्रेणो वलिं
दद्यात् ह्रूं गां गणपतये नम इति संपूज्य आग्नेय वलिं दद्यात् इति वलिविधिः अथ कुलाचारो निरूप्यते तत्र कालीतंत्रे
अथाचारं प्रवक्ष्यामि यत्कृते ऽमृतमश्नुते सर्वभूतहिते युक्तः समयाचारपालकः अनित्यकर्म्मसंत्यागी नित्यानुष्ठानत
त्परः मंत्राराधनमात्रेण शिवभावेन तत्परः परस्यां देवतायां तु सर्वकर्म्मनिवेदकः अन्यमंत्रार्च्चनं त्यक्त्वा ह्यन्यमंत्रस्य चिन्त
नं कुलस्त्रीवीरनिंदां च तत्तद्द्रव्यस्यापहारणं स्त्रीषु रोषं प्रहारं च वर्जयेन्मतिमान्सदा स्त्रीमयं च जगत्सर्वं स्वयं भावतथाभ
वेत् पेयं चर्वितं चाचोष्यं भक्ष्यं लेह्यं गंधं सुखं सर्वं च युवतीरूपं भावयन्मतिमान्सदा कुलजां युवतीं वीक्ष्य नमस्कुर्य्यात्स
माहितः यदि भाग्यवशाद्देवि कुलदृष्टिः प्रजायते न देवमानसीं पूजां तत्र तासां प्रकल्पयेत् तासां भगादि देवीनां वालां वा यौ
वनोन्मत्तां वा वृद्धां वा सुंदरीं तथा कुत्सितां वा महादुष्टां नमस्कृत्य विभावयेत् तासां प्रहारं निंदां च कौटिल्यमप्रियं तथा स
र्वथा च न कर्त्तव्यमाचान्यथा सिद्धिरोधकृत् स्त्रियो देवाः स्त्रियः प्राणाः स्त्रिय एव विभूषणं स्त्रीसंगिना सदा भाव्यं अन्यथा स्व

तं० व० सा० स्त्रियामपि विपरीतरतामनुभावितादृदयोपरि न कुसुमरचितं पुष्पं तत्कुसुमरचितं जलं न कुसुमारचितं भोज्यं देवताभ्यो निवेदयेत् स्त्री
२१२ दृष्टो नैव कर्तव्यो विशेषात्पूजनं महत् जपस्थाने महाशंखं निवेश्य पार्श्वे जपं चरेत् स्त्रियं गच्छन् स्पृशन् पश्यन् विशेषात्कुलजां शुभां
भक्षयन्नाम्बूलमन्यांश्च तत् सद्यव्याप्यपाकूचीन् मन्त्राद्यशेषभक्ष्याणि मुक्त्वा भक्षन् जपश्चरेत् वीरतंत्रे दिकालनियमो ना ति
स्ति स्थित्यादि नियमो न च जपे न कालनियमो नार्चादिषु बलिष्वपि स्वेच्छानियम उक्तोऽत्र महामंत्रस्य साधने वस्त्रासनदेहगेहसंस्प
र्शादिस्थ धारणः शुद्धिं न चाचरेत्तत्र निर्विकल्पं मनश्चरेत् कुलार्णवे कुलाचारगृहं गत्वा मन्त्रापापविशुद्धये याचयेदमृतं कौ
लं तदभावे जलं पिबेत् कुलाचारेण यद्गत्वा मद्यं दत्तं पात्रं नु भक्षितः नमस्कृत्य तु गच्छेद्यादन्यथा नरकं व्रजेत् अन्यत्रापि नव
भागमये काले चूतत्रेडादिना सुधीः गम्ये देवतापूजाजपयोगस्तवादिना वीराणां जपयज्ञस्तु सर्वकाले प्रशस्यते स
र्वदेशेषु सर्वपीठे कर्तव्यो नात्र संशयः शिवागमे शक्तिः शिवः शिवः शक्तिः शक्तिर्ब्रह्मा जनार्दनः शक्तिरिन्द्रो रविः शक्तिः श
क्तिश्चन्द्रो ग्रहा ध्रुवं शक्तिरूपं जगत्सर्वं यो न जानाति पातकी वीरतंत्रे स्नानादिमानसं शौचं मानसः प्रवरो जपः पूजनं मानसं रामः
दिव्यं मानसं तर्पणादिकं सर्वमेव शुभः कालो नाशुभो विद्यते क्वचित् न विशेषो दिवारात्रौ न संध्यायां महानिशि सर्वदा पूज २१२

येदेवीमस्नातःकृतभोजनः महानिशपमुचौदेशेवलिंमंत्रेणदापयेत् यत्नुस्नावेवमहापूजाकर्त्तव्यावीरवंदिते नदिनेसर्वथाका
र्यीश्मशानसनात्ममसुव्रते तत्कुलपूजाविषयम् महानिशान्तुतत्रैव अर्द्धरात्रात्परंयत्तमुहूर्तद्वयमेवच सामहारात्रिरुद्दिष्टा
तत्कृतंचाक्षयंभवेत् गांधर्व पृथ्वींक्रतुमतींवीक्ष्यसहस्त्रंयदितिष्ठसः नदावादीसुसिद्धान्तहृन्तःस्थितितलंव्रजेत् नित्यशः
तिथोडशदिनंयावत् पद्यैतेहस्तमारोप्यनिर्भयोजितमानसः कवितालभतेसोपिअमरत्वंचगछति अत्रापिसहस्त्रमितिसंवंधः
पृथिवींकुलंपर्वतंस्तनं अन्यच्चनीलतंत्रोपप्रदंद्दष्ठातथाविम्बं-- खंजनंशिखरंतथा चामरंरविम्बंचतिलपुष्पंसरोरुहं त्रि
शूलंवीक्ष्यजपाचशतशःसुद्धभावतः सुखंप्रसादंसुमुखंसुलोचनंसुहास्यकं सुवेशंसुगीतंगंधंसुखमेवच लभतेचयथा
संख्यंशृणुपार्वतिसादरं पद्मंमुखंअधरंचकर्णपिस्तकंकेशांस्तिदूरं नासिकानाभिंत्रिवलीमितिवोद्धव्यं भावचूडामणौ ए
काकीनिर्जनेदेशेश्मशानेविजनेवने शून्यागारेनदीतीरेनिःसंगोविहरेत्सदा महाचीनक्रमेदेवीन्ध्यात्वातत्रप्रपूजयेत्
तत्तुक्रमोत्थितपुष्पेनपूजयेद्भक्तिभावतः सभवेत्कुलदेवेशाकुलक्रमगतःसुचिः प्रसन्नतरोर्महापद्मेदेवींध्यात्वायाविधि त
त्सुधीरसधारेणतर्पयेन्मातकाननेमहाचीनद्रुमलतावेष्ठितःसाधकोत्तमः रात्रौयदिजपेन्मंत्रंसेवकल्पलताभवेत् तिथिस

त

तं०सा० मेणसंख्याभिर्लक्षाभिर्दीक्षितोयदि तदामासेनसिद्धिःस्यात्सहस्त्रत्रयमाश्रितः अष्टम्यांश्चचतुर्दश्यां द्विगुणंयदिदृश्यते
२७३ तत्रैवमहतीसिद्धिर्देवतानांसुदुर्लभा कुलचूडामणौ श्रणुपुत्ररहस्यंमेसमयाचारसंभवं येनहीनानसिद्ध्यन्तिजन्मकोटिश
तैरपि मानवःकुलचर्यानुचारिणं उदारचित्तःसर्वत्रवैष्णवाचारतत्परः परनिंदासहिष्णुःस्यादुपकाररतःसदा पर्व्वतेविपि
नेवापिनिर्ज्जनेशून्यमंडपे चतुःपथेजनशून्येयदिदैवाद्गतिर्भवेत् तदांध्यात्वामनुंजप्त्वानत्वागच्छेद्यथासुखं गृध्रंवीक्ष
महाकालींनमस्कुर्य्यादलक्षितं क्षेमंकरींतथावीक्ष्यजम्बुकींजमदूतिकां कुरवंश्येनभद्रकाकौ कृष्णमार्ज्जारमेवच
कृशोदरिमहाचंडेमुक्तकेशिवलिप्रिये कुलाचारप्रसंनास्येनमस्तेशंकरप्रिये श्मशानंचशवंदृष्ट्वाप्रदक्षिणमनुव्रज
न् प्रणम्यानेनमंत्रेणमंत्रीसुखमवाप्नुयात् घोरदंष्ट्रेकरालास्येकिटिशब्दप्रणादिनि घोरघोररवास्फालेनमस्तेचि
तिवासिनि रक्तवस्त्रंतथापुष्पंविलोक्यत्रिपुरात्मिकां प्रणमेद्दंडवद्भूमौइममंत्रंपठेन्नरः वंधूकपुष्पसंकाशेत्रिपुरेभयनाशिनि
भाग्योदयसमुत्पन्नेनमस्तेवरवर्णिनि रक्तवस्त्रंतथापुष्पंराजानंराजपुत्रकं हस्त्यश्वरथशस्त्राणिकनकान्वीरपुरुषान् म ग्राम
द्विपंकुलदेवंचदृष्ट्वामहिषमर्द्दिनीं प्रणम्यजयदुर्गांम्वासर्वविघ्नैर्नलिप्यते जयदेविजगद्धात्रित्रिपुरान्येत्रिदैवते भक्तेभ्योवर २७३

देदेवि महिषघ्नी नमोस्तुते मद्यमांडंसमालोकयमत्स्यमां संवरस्त्रियम दृष्ट्वा च भैरवीं देवीं प्रणम्य विमृषन्मनुं घोरविघ्नविना
शायकुलाचारसमस्थये नमामि वरदे देवि मुंडमालाविभूषिते रक्तधारासमाकीर्णे वदने त्वां नमाम्यहं सर्वविघ्नहरे देवि नमस्ते
हरवल्लभे एतेषां दर्शने नैव यद्दिनैवं प्रकुर्वते शक्तिमंत्रं पुरस्कृत्य तस्य सिद्धिर्न जायते तथा कुलचूडामणौ कुलवारे कुलाष्ट
म्यां चतुर्दश्यां विशेषतः योगिनीपूजनं चैव प्रधानं कुलपूजनं यथा विष्णुतिथौ विष्णुः पूजितो वांछितप्रदः तथा कुलति
थौ दुर्गा पूजिता वरदायिनी कुलवारादिनियमस्तु जामले रविश्चंद्रो गुरुः सौरिः चत्वारश्चाकुला इमे भौमशुक्रौ कुलाख्यौ
तु बुधवारः कुलाकुलं द्वितीया दशमी षष्ठी कुलाकुलमुदाहृतं विषमाश्चाकुलाः सर्वाः शेषाश्च तिथयः कुलाः वारुणार्द्रामि
ज्रिन्मूलं कुलाकुलमुदाहृतं कुलानि समधिष्ण्यानि शेषाण्येवाकुलानि च तिथिवारे च नक्षत्रे अकुले स्याज्जयिनो जयः कुला
स्त्वे जयिनो नित्यं समं चैव कुलाकुले एवं कुलवारादिकं ज्ञात्वा साधकः कर्म कुर्य्यात् अथ शिवाबलिः तदुक्तं कुलचूडाम
णौ बिल्वमूले प्रान्तरे वा श्मशाने वापि साधकः मांसप्रधानं नैवेद्यं संध्याकाले निवेदयेत् कालि कालीति वक्तव्ये तत्रामाशि
वरूपिनी पशुरूपधरा याति परिवारगणैः सह भुक्त्वा रौति यदेशान्यां मुखमुत्तोल्य सुस्वरं तदैव मंगलं तस्य नान्यथा कुल

तं०वसा०
२१४
४७५

दूषणं अवश्यमन्त्रदानेन नियतं तोषयेच्छिवां नित्यश्राद्धं यथासंध्यावंदनं पितृतर्पणम् तथैव कुलसेव्यानां नित्यता कुलपू
जने पशुरूपां शिवां देवीं यो नार्च्चयति निर्जने शिवारावेण तस्यास्तु सर्वं नश्यति निश्चितं जपपूजाविधानानि यत्किंचि
सुकृतानि च गृहीत्वा पुण्यमादाय शिवा रोदिति निर्जने एकया भुज्यते यत्र शिवया देवभैरवः तत्रैव सर्वशक्तीनां
प्रीतिः परमदुर्लभा पशुशक्तिः पक्षिशक्तिर्नरशक्तिर्यथाक्रमात् पूजनादिगुणं कर्मसगुणं साधयेद्यतः तेन सर्वप्र
यत्नेन कर्तव्यं पूजनं महत् राजादिभयमापन्ने देशान्तरभयादिके शुभाशुभानि कर्म्माणि विचिन्त्य बलिमाहरेत् गच्छ देवि
महाभागे शिवे कालाग्निरूपिणी शुभाशुभफलं व्यक्तं ब्रूहि गृह्णन्बलिं तव एवमुच्चार्य दातव्यो बलिः कुलजनप्रिये
प्रदिन भुज्यते वत्स तद्दाने वशुभं भवेत् शुभं यदि भवेत्तत्र भुज्यते तदशेषतः एवं ज्ञात्वा महादेवेशानि स्थापयनं चरेत् दु
ति शिवाबलिः कुलधर्मं सर्वत्रैव गोपनीयम् तथा तन्त्रे निर्जने चैव कर्तव्यं न चैव जनसान्निधौ किं वा पक्षिपतंगादिदर्शने
नैव कारयेत् पातालमण्डपे वापि गह्वरेषु नियंत्रिते निर्छिद्रमण्डपे वापि कर्तव्यं जलसंनिधौ कुलपुष्पं कुलद्रव्यं कुलपूजा राम
कुलजपं कुलं कुलपतिं चैव कुलमालां कुलाकुलं कुलचक्रं कुलध्यानं सर्वथा न प्रकाशयेत् प्रकाशात् सिद्धिहानिः स्यात् प्र २१४

काशान्निधनादिकं प्रकाशान्मंत्रनाशः स्यात्प्रकाशात्कुलहिंसनं प्रकाशान्मृत्युलाभः स्यात्तन्न प्रकाशयेत्कदाचन पूजाकाले च दे
वेशि यदि कोऽप्यत्र गच्छति दर्शयेद्वैष्णवीं मुद्रां विष्णुन्यासं तथास्तवं प्रकाशाद्धानादिगुप्तिः स्यात्तत्प्रकाशान्न दूषणम् गोप
नेयदि व्यक्तः स्यात्तद्गुप्तिः सा विधीयते कदाचिद्देहहानिस्तु न च व्यक्तिः कदाचन वरं प्रज्ञानकर्त्तव्या न च व्यक्तिः कदा
चन इति कुलाचारं अथ प्रातःकृत्यं साधकः प्रातरुत्थाय कुलवृक्षं प्रणम्य च मूलाद्दिब्रह्मरंध्रान्तं कुलं ध्यात्वा गुरुं
स्मरेत् प्रह्लादानंदनाथाख्यं सनकानंदमेव च कुमारानंदनाथाख्यं वशिष्ठानंदनाथकं क्रोधानंदसुखानंदौ ज्ञानानंदस्ततः
परं बोधानंदसमाख्यं च ध्यायेत्कुलमुखोपरि महारसरसोल्लाससहृदयानंदलोचना कुलालिंगननिर्भिन्नाः चूर्णिता
शेषतामसाः कुलशिष्योपरिकृपापूर्णनेत्रकरोद्यताः वराभयोद्यतःकराः कुलतंत्रार्थवेदिनः एवं गुरुं कुले ध्यात्वा
विसृज्य कुलनायिकां कुलस्थानं समानीय स्नानार्थं तीर्थमाश्रयेत् तत्र स्नानं कुलचूडामणौ प्राचंतः कुलदर्भेण
सदर्भः कुलपुंड्रकः कुलपात्रे सदूर्वा हिसतिलं सजलं ततः गृहीत्वा कुलदेव्याश्च प्रीतये स्नानमाचरेत् कृतसंकल्प एवा
दौ कुलचक्रं जले न्यसेत् कुलस्थानात्समानाय कुलमुद्रां कुशेन च कुलतीर्थानि तत्रैव सामावाह्य शिवात्मकं तत्रोपं च वि

तं०सा० धापीत्वा त्रिधा च प्रोद्दलणं जनोः स्वतंत्रेपि मूलं पठन्मूर्द्धिनो यंमुद्रया कुंभसंज्ञया द्विल्वावारत्रयं देवि आचामेत्साधकाग्रणी
२९५ आत्मविद्याशिवैस्तत्वैस्ततो न्यासान्समाचरेत् ज्ञानार्णवे कुलसूर्याय देवाय त्रिरर्घ्यं तु प्रदापयेत् देवान्‌षीन्पितृंश्चैव तर्पये
त्कुलवारिणा अथ तृतीयो योगो निरूप्यते तत्रादौ विजयास्वीकारः तथा च विजयाकल्पे सच्चिदासवयोर्मध्ये संविदेव गरीयसी
875 संविद्प्रयोगस्तेन हृत्पूजादौ साधकोत्तमैः कर्तव्या महापूजा करणीया मुनिश्रितैः अयं प्रयोगः पूजादौ कुलीनैः सर्वत्र कर्तव्यः
अन्यत्रापि आनंदेन विना भ्रंशो न तृप्यन्ति देवताः सा च ब्राह्मणी क्षत्रिया वैश्या शूद्रा शुक्लारक्तपीतलक्ष्मपुष्पभेदैस्तेषां शुद्धि
स्तु विजयाकल्पे संविदे ब्रह्मसंभूते ब्रह्मपुत्रि सदानघे भैरवाणां च तृप्त्यर्थं पवित्रा भव सर्वदा ॐ ब्राह्मण्यै नमः स्वाहा इति शो
धयेत् सिद्धिमूलकरे देवि मूलबोधप्रबोधिनि राजपुत्रवशंकरि शत्रुकंठत्रिशूलिनी ऐं क्षत्रियायै नमः स्वाहा शोधयेदपरां
ततः अज्ञानेधनदीप्ताग्नि ज्ञानाग्निज्वलरूपिणि आनंदाद्याहुतिं मत्वा सम्यक्ज्ञानं प्रयच्छ मे क्लीं वैश्यायै नमः स्वाहा वैश्यां च शो
धयेत्ततः नमस्यामि नमस्यामि योगमार्गप्रदर्शिनि त्रैलोक्यविजये मातः समाधिफलदा भव श्रीं शूद्रायै नमः स्वाहा शूद्रां राम
च शोधयेत् ततः सर्वशोधनं ॐ अमृते अमृतोद्भवे अमृतवासिनि पदं ततः अमन माकर्षय द्वंद्वं सिद्धिं देहि ततः परं अमुकांघे २९५

ततो शृद्ध्या द्रव्यमानयततः परं द्विगान्तेयंमनुः प्रोक्तः सर्वासामिह शोधने प्रत्येकेनानुमंत्रेण शोधयित्वा अनेन समुदायं शो
धयेत् उत्तरतंत्रे मूलमंत्रं सप्तवारं तस्योपरि नियोजयेत् आवाहनादि मुद्रांश्च धेनुयोनी ततः परं द्विगवं धनं छोटिकाभि
स्तालत्रयपुरःसरं दिग्बन्धं पार्ष्णिघातैः सर्वान्विघ्नान्निरस्य च सप्तधा तर्पयेत् ब्रह्मरन्ध्रे मूलं जपेन्मनुं गुरुं पद्मे सहस्रारे तथा रंध्रे ३
शंकेतमुद्रया त्रिवारं तर्पयेत् तत्रासाधकः सिद्धिहेतवे मूलमिष्टदेवता मंत्रमुच्चार्य्यामुदकदेवतां तर्पयामि एवं गुरुं च ततः
संकेतमुद्रां तत्वततः मुद्रास्वीकुर्य्यात् तथा च एवं देवदेवपदं भूयाद्यास्वादि निपदं ततः मम जिह्वाग्रे स्थिरीति भवसर्वपदं ततः
सलवश्वं वारिस्वाहा मंत्रेणानुकृयान्मुखे तंत्रचूडामणौ विना हेतुकमासाद्य लोभयुक्तो महेश्वरः नपूजा मम संकुर्य्या
न्न ध्यानं नापि चिन्तनं तस्मात् हुत्वा च पीत्वा च पूजयेत् परमेश्वरी पीत्वेति विजयामेव प्रकरणात् अथ जयन प्रकार ततो
रात्रौ प्रहरेगते ताम्बूलपूरितमुखः सन् कुलनायिकां पूजयेत् उत्तरतंत्रे याममात्रे गते रात्रौ कुलगेहं ततः पुमान् ताम्बूलपूरि
तमुखो धूपामोदसुगंधिभिः रक्तचंदनदिग्धांगो रक्तमाल्यानुलेपितः रक्तवस्त्रपरीधानो लास्यरसगृहं ततः रक्तमाल्यैर्नव
वीतो रक्तपुष्पविभूषितः पंचीकरणसंकेतैः पूजयेत् कुलनायिकां कुलनायिका यथा तदुक्तं तंत्रे वा नटी कापालिनी वेश्या पु

तं०स्मा०१
२१६

क्षत्रीनापितांगना रजकी रंजकी चैव सैरंध्री चर्म्मवासिनी घटिका खट्टिका चैव तथा गोपालकन्यका: विशेषवैदग्ध्ययुता: सर्व्वा ए
ता: कुलांगना: गुरुभक्ता देवभक्ता घृणालज्जाविवर्ज्जिता संगोपनरता: प्रायस्त्वरूपे: सर्वसिद्धिदा: अलंकृताचारसंपन्नां शी
लसौभाग्यशालिनी सदानुष्ठाननिरतांसात्विकींभक्तिसंयुतां कालुष्यरहितां कुर्य्यात्समयाभक्तवत्सलां चातुर्य्यौदार्य्य
शिल्पकरुणादिगुणान्वितां रूपयौवनसंपन्नां शीलसौभाग्यशालिनीं सदापति गृहीतावायद्वासंकेतमागतां अथवा तत्
दृग्णायातांमदनानलतापितां विलिप्तां रक्तगंधेन रक्ताम्बरविभूषितां सुगंधिरक्तकुसुमां सर्व्वाभरणभूषितां सुधूपितां त
न्वीं दूतीकर्म्मसु योजयेत् कुमारीतंत्रे नटी कापालिनी वेश्या रजकी नापितांगना ब्राह्मणी शूद्रकन्या च गोपालस्य च क
न्यका मालाकारस्य कन्या च नवकन्या प्रकीर्त्तिता: ब्राह्मणी तु ब्राह्मणविषयं एवंभूतां यजेत्तां तु प्रस्तुततूलिकोपरि अंगां
गींविहृतां गीम्चास विकल्पकमानसां वर्षीयांसीं पापरतां कुंकारामर्थलोलुपां अभक्तमानसां दीनां वर्ज्जयेत्साधकोत्तम: अ
र्थाद्वा कामतो वापि सौख्यादपि च यो नर: लिंगयोनिरतो मंत्री रौरवान्न निवर्त्तते उपदेष्टा यदा देवी तदा पुत्री तु कन्यका पूजार्हा रामा
च यदा देवी तदा माता न संशय: एवं विधिं कुलमानीय उद्वर्त्तनादिकं विधाय प्र*तुततूलिकोपरि नियोजयेत् तथोत्तरतन्त्रे तदानी २१६

स्र

श्रां

पकुलं सम्यग् उद्वर्त्तनमनंतरं स्नातं मृदुकूलादिभिरनुलेपनशोभितं अलंकृतां गतश्रांतां स्वागतं चासनं तथा निवेशपत्रलिका
मध्ये नानापुष्पसुगंधिना चंदनागुरुकर्प्पूरकस्तूरीकुंकुमादिभिः समाकीर्णे निवेश्य पाद्यमर्घ्ये कुलनायिकां ततोमृतमुद्रा
दिकं विधाय तत्र कुलांगे न्यासं कुर्य्यात् तद्यथा अंगन्यासकरन्यासौ प्राणायामस्ततः परं विधाय मातृकान्यासं कुलांगोपि प्रवि
न्यसेत् ततः पंचमकारमानीय शोधयेत् तत्र सुरायाः शोधनं एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवं कचोद्भवां ब्रह्महत्यां तेन ते
नाशयाम्यहं सूर्य्यमंडलसंभूते वरुणालयसंभवे अमाबीजमये देवि शुक्रशापाद्विमुच्यतां देवानां प्रणवो बीजं ब्रह्मानंदमयं य
दि तेन सत्येन ते देवि ब्रह्महत्यां व्यपोहतु ॐ रां रीं रूं रैं रौं रः ब्रह्मशापविमोचितायै सुधायै देव्यै नमः इति त्रिः परिदशधा जपे
त् क्रां क्रीं क्रूं क्रैं क्रौं क्रः शुक्रशापं विमोचय स्वाहा इति दशधा जपेत् तेन मूलमंत्रेण त्रिः परिविधा जप्त्वा देवतामयं विभावयेत् इति
व्यशुद्धिः। एतत् द्रव्यदानं तु शूद्रस्यैव तथा च श्रीक्रमे न दद्याद् ब्राह्मणो मद्यं महादेव्यै कथंचन वामकामोपि ब्राह्मणो मद्यमांसं
न मर्दयेत् देव्यास्तु पश्चिमे भागे चक्रे पार्श्वे निवेदयेत् एतद्द्रव्यं तु शूद्रस्य नान्येषां तु कदाचन वैश्यस्य माध्विकं सुरं क्षत्रियस्य तु स
ज्यकं ब्राह्मणस्य गवां क्षीरं ताम्रे वा विसर्जनं मधु नारिकेरोदकं कांस्ये सर्वेषां द्रव्यशोधनं क्षत्रियवैश्ययोस्तु गौडीमाध्वी च दातव्ये न तु तयो

श्र

तं०सा०
२११

रधिकारात् तदाभावे हनुकल्प विधानं तथा चागोरं ब्राह्मणे दद्यात् द्रव्यमाज्यं च वाङ्कुरः वैरूप श्रमाक्षिकं द्रव्यं शूद्रः पोष्टा
दिकं पुनः तेन शूद्रस्याप्यनुकल्पः कुलार्णवे जले क्षीरे घृते मद्ये मधुमैरेयमेव वा पोष्टं तरु भवं धान्यसंभवं चक्रनिर्मितं म
हकार भवं देवि त्रिविधं वक्रभेदकं मद्यकं सर्वदा वर्ज्यं माघमासी मूलेचने ज्ञानेन संस्कृतं तन्तु महापातकनाशनं तद्दानेपातका
भावः दिव्य भावं विषयं वा माकंदफलजं रम्यं द्रव्यं सेव्यं द्विजातिभिः अमादकत्वाद्देवेशि ऐक्षवं सेव्यते बुधैः एतेन क्षत्रियादि
भिरमादकं सेव्यं मादकस्य पातकहेतुकत्वमुक्तं भैरवतंत्रे मत्स्यमांसं विनावत्सयत्किंचित्कुलसाधनं शान्नैवेद्यं ख्यातः शेषं तु
रवेतन्निवेदयेत् तदनु ब्राह्मणे द्विजकल्पाशेषमात्म नियोजयेत् तेन क्षत्रियादीनां मुख्यस्य दानेऽधिकारः न पाने यत्तु पुनः पीत्वा
पीत्वा पुनः पीत्वा पुनर्जन्म न विद्यते भैरवतंत्रे पाने भ्रान्तिर्भवेद्यस्य घृणा यस्याद्रकेरेतसी शुद्धौ चाशुद्धता भ्रान्तिः पापशंका च
मैथुने सुभ्रष्टः प्रजयेद्देवीं चंडीमंत्रं कथं जपेत् तथा मादिरायां मैथुने च जातिवर्जितं चाचरेत् एतत्तु वर्णाश्रमिपरं तत्र द्रव्य
स्वीकरणे जातिविज्ञानं कारयेत् एतेषां शोधनस्यावश्यकत्वात् तथा च संशोधनमनाचर्य पञ्चमुद्रा साधकः आयसिद्धि राम
हानिः स्यात्क्रुद्धा भवति सुंदरी मद्ये सुमो ह्यस्यानुकल्पे सुतथा तेन रक्तायामावश्यकत्वं तथा चागमधु मांसं विना देवि कुलपूजां स २११

माचरेत् जन्मान्तरसहस्रस्यसुकृतंतस्यनश्यति अथमांसादिशोधनं मांसन्तुत्रिविधंज्ञेयंजलखेचरभूचरम् त्रिविधं
मांसंसंप्रोक्तंदेवताप्रीतिकारकं मत्स्यंतुत्रिविधंदेवि उत्तमाधममध्यमं उत्तमंत्रिविधंदेविशालपाठीनरोहितं प्रवीनंकंट
कैर्हीनं तैलाक्तंशष्कुलान्वितं देव्याः प्रीतिकरंचैवमध्यमंतच्चतुर्विधं लघुकालितान्सर्वालि अधमानिविदुर्बुधा मांसाभावे
ऽनुकल्पः समयाचारे लवणार्द्रकपिन्याकगोधूमतिलमाषकं लशुनंचमहादेविमांसप्रतिनिधिः स्मृतः मुद्रान्तुद्विविधाकु
लार्णवे व्रीहेयमंडलाकारंचंद्रबिंबनिभंशुभं चारुपद्मकमनोहारिशर्करादिभिस्सुपूरितं पूजाकालेदेवतायामुद्रैषापरिकीर्तिता
यामले न्त्रसधान्यादिकंयावच्चर्वणीयंप्रकल्पयेत् तेमांसंद्रावन्ताजुद्रासहामोदप्रदायिनी एतेषांशोधनन्तुस्वतंत्रतं
त्रे ॐ प्रपतोद्विस्पृतित्यादिमांसं ॐ अम्बकमित्यादिमीनं ॐ तद्विष्णोरितिमुद्रां अथशिक्षिशोधनं भावचूडामणौ अदी
क्षितकुलासंगात्सिद्धिहानिःप्रजायते तत्कथाश्रवणंचेत्स्यात्तत्त्यागमणंयदि सकुलीनःकथंचेत्स्यात्तत्पूजयेत्पर
मेश्वरीम् श्रीक्रमे संशोधनमनाचर्य्येति कौलिकतंत्रे अभिषेकाद्भवेच्छुद्धिर्मत्रस्योच्चारबिंदुभिः वलाद्दायत्नतोवापि
अभिषेकंसमाचरेत् अभिषेकमंत्रस्तु आदौमायांसमुच्चार्य्यत्रिपुरायैसमुद्धरेत् नमःशब्दसमुच्चार्य्य इमांशक्तिंतनोत्व

तं०सा
२१८
278

देत् पवित्रीकुरु शब्दान्ते मम शक्तिं कुरु प्रिये वह्निजायां समुच्चार्य्य शुद्धिमंत्रः सुरेश्वरि तस्याः करोऽमेद्बुध्या मायावी
जं समुच्चरेत् इति शक्तिशोधनं ततः शोधितद्रव्यं अर्घे क्षिपेत् श्रीक्रमे अर्घ्यविधौ० सर्वशोधितद्रव्यं च गृह्येनैव सं
क्षिपेत् सुतंत्रतंत्रे आद्यद्रव्यमर्घ्यपात्रे निःक्षिप्य प्रयतः सुधीः कुंडगोलोद्भवं द्रव्यं स्वयंभूकुसुमं तथा अर्घ्यं दत्वा
महेशानि सर्वसिद्धीश्वरो भवेत् सुधयाचार्घ्यदानेन योगिनीनां भवेत्प्रियः महायोगी भवेद्देवि पीठप्रक्षालिते जलैः मे
रुतंत्रे पंचमात्तु परं नास्ति शास्त्राणां मुखमोक्षयोः केवलैः पंचमेनापि सिद्धो भवति साधकः तेन पंचमकारेण पूजा क
र्तव्या ततोर्घ्यस्थापनानन्तरं पर्य्यंकमध्ये पूजयेत् मंडूकाय नमः इत्यादि तदुक्तं पूजयेदथ पर्य्यंकमध्ये मंडूकमग्रतः
कालाग्निरुद्रमाधारशक्तिं कूर्म्ममनन्तरं वराहपृथिवीकंदं स्वनालं केशरालिं च पद्मं च कर्णिकां चैव मंडलं च समर्चये
त् धर्मं वैराग्यमैश्वर्य्यं ज्ञानमज्ञानमेव च अनैश्वर्य्यमवैराग्यं अधर्म्ममपि पूजयेत् ज्ञानविद्यात्मकं चैवमात्मानं चापि पू राम
जयेत् गंधपुष्पाक्षतादीनि दत्वा तत्रैव पूजयेत् तथा तत्कर्णिकोपरि कुलं स्थापयित्वा प्रपूजयेत् तथा च तस्योपरि कुलं स्था २१८
प्य पूजानुष्ठानमेव च पूजयेच्च ततस्तस्य पंचकामान्समाहितः क्लीं चैव कामराजं च ह्रूं कंदर्पं ऐं च मन्मथं ब्लूं मकरध्वजं स्त्रीं

चैव हिमनोभवं ॐकारादिनमोन्तं च कुसुमैर्गंधसंयुतैः पूजयित्वा चतुर्दिक्षु पूजयेत्कुलनायिकां वटुकं भैरवं चैव दुर्गां
श्च क्षेत्रपालकं पूजावाक्यन्तु ॐ क्लीं कामराजाय नमः इत्यादि तत ऐं क्लीं स्त्रीं क्लीं ह्सूं आधारशक्तिपीठपादुकां पूजया
मितस्या ललाटे त्रिकोणं लिखेत् तथा च तंत्रांतरे वाग्भवं कामबीजञ्च स्त्रीं बीजं कामराजकं ह्सूमात्मकं दत्वाधारशक्तिं समु
द्धरेत् श्रीपादुकां ततो दत्वा पूजयाभिवंदेत्ततः अनेन मनुना तस्या ललाटे सुमनोहरं त्रिकोणं तत्र संलिख्य सिंदूराद्यैर्वरान
ने उत्तरतंत्रे तस्यामूर्ध्नि त्रिकोणं च यंत्रं मालिख्य साधकः महाप्रेतासनं मध्ये बालां च पूजयेत्ततः तत एवं च ह्सौः सदाशिव
महाप्रेतपद्मासनाय नमः इति पूजयेत् ततो बालां च कामेश्वरीं च पूजयेत् ज्ञानार्णवे। गणेशं च कुलाध्यक्षं दुर्गां लक्ष्मीं स
रस्वतीं त्रिकोणेषु संयोज्यं वसंतं मदनप्रिये स्तनयोः पूजयेत्स्यात्मुखे तस्याः सुधाकरं उत्तरतंत्रे मौलौ गणेशं केशाग्रे कुला
ध्यक्षं ललाटके दुर्गां भ्रुवोस्तत्वाल लक्ष्मीं रसनायां सरस्वतीं इति यत्स्थानवैपरीत्यं तद्देशिकं ज्ञानार्णवे दक्षपादादि मूर्द्ध
न्तं वाममूर्द्धादि सुंदरि पादान्तं पूजयेत्सर्वाः कला वै कामसोमयोः श्रद्धा प्रीती रती चैव भूतिः कान्तिर्मनोरमाः मनोहरा मनोरमाः
मनोहरा मनोरमा मदनोन्मादिनी तथा मोहनी दीपनी चैव शोषणी च वशंकरी रंजिनी चैव देवेशि षोडशी प्रियदर्शना स्वरषो

तं०रा०
२१९

ङशासंयुक्ताः एताः कामकलायजेत् वाक्यन्तु ॐ श्रद्धायै नमः आं प्रीत्यै नमः इत्यादि ततश्चंद्रकलाः पूज्याः शिरसश्चरणावधि
पुषा वमा च सुमना रतिः प्रीतिस्तथा धृतिः श्रुद्धा सौम्या मरीचिश्च शैलजे चांशुमालिनी अंगिरा वशिनी चैव छाया संपूर्णमंडला त
था तुष्टिरमृते चैव कलाः सोमस्य षोडश अंगीरस्थाने मंदिरा इति पाठः उत्तरतंत्रे सुरैरेव प्रपूज्या हि सर्वकार्य्यसुसिद्धये ललि
तातंत्रे भगोत्तदीये विज्ञेया नाड्यस्तिस्रः प्रवाहिकाः एकानुवाहिका चन्द्री सौरी चान्यानुवाहिका आग्नेयी चापरा ज्ञेया पूजयेत्ता
स्तु साधकः अमृतं स्रवति चांद्री सा पुष्पं स्रवति भानवी बीजं स्रवति चाग्नेयी तास्तु नामानि संपूजयेत् वाग्भवाद्यैर्मनोयुक्तैः पूज
येत्तु प्रसन्नधीः तेनाऐं चांद्र्यै नमः ऐं सौर्य्यै नमः १ ऐं आग्नेय्यै नमः उत्तरतंत्रे पूजयेन्मदनागारे रक्तचंदनचर्चिते भगमा
लामनुप्रोच्य त्रितारानंतरं तथा ऐं ह्रीं श्रीं उं क्लूं क्लिन्ने ततः परं सर्वाणीति विभागानि श्वति वशमानयेत्ततः स्त्रीं क्लीं ब्लीं भ
गमालिन्यै नमः ऐं ह्रीं श्रीं इति मंत्रेण गंधाद्यैस्तानर्चयेत् ततस्तत्रैव मूलं पूजयेत् तंत्रांतरे इहाप्यरोपणं नास्ति जीवन्यास महे
श्वरि तथैव च विधानेन ततो षोडशोपचारकैः इष्टदेवी प्रपूज्याथ सर्वसिद्धीश्वरो भवेत् ततः स्वलिंगं पूजयेत् तथा च वायवीये ऽघ राम
पुष्पाद्यैः स्वशिवं तदनंतरम् मूलमंत्रं ततः ॐ नमः शिवाय ततः परं ततः सत्पुरुषाघोरसद्योजातादिमंत्रकैः श्रीविद्यायां तु तारे २१९

च भुवनेशानी तथा त्रिपुरसुंदरी नमः शिवाय विद्येयं दक्षार्णोपरिकीर्त्तिता इति विशेषः सुंदरीसुंदरी त्रिकूटं तत्पुरूषादिमंत्र
स्तु सर्वोक्तनिवृत्तिं च प्रतिष्ठां च विद्यां च तदनंतरं शक्तिं च शान्त्यतीतां च तदंगेन तदनंतरं समयविद्यासु त्वार्यां त्रिकोणं चैव पूज
येत् अवधूतेश्वरीं कुब्जां कामाख्यां समयामपि वज्रेश्वरीं कालिकां च तथा शंकरवासिनीं तथा चंडेश्वरीं तारां पूजयेदत्र साध
कः तदनु ज्ञात्वा ततो लब्ध्वा दत्वा ताम्बूलमेव च शिवं च तत्र निक्षिप्य गजतुंडाख्यमुद्रया धर्म्माधर्म्म विहवीतमात्मा ज्योमनसा स्रुवा
सुषुम्नावर्त्मना नित्यमक्ष वृत्तीर्जुहोम्यहं स्वाहांतोयं महामंत्र आरंभे परिकीर्त्तितः ततो जपेत् स्त्रियं गच्छन् विद्यां त्रिभुवनेश्व
रीं जपेदिति अष्टोत्तरसहस्रं शतं वा अरुं धोजपेत् ॐ प्रकाशाकाशहस्ताभ्यामवलम्ब्योन्मनी स्रुचा धर्म्माधर्म्मकलास्ने
ह पूर्णमग्नौ जुहोम्यहं स्वाहा तोयं महामंत्रं प्रयुक्तस्त्यागे प्रकीर्त्तितः विशेषस्तु ज्ञानार्णवे शिवशक्तिसमायोगो योग एव न संश
यः शीत्कारो मंत्ररूपश्च वचनं स्तवनं भवेत् आलिंगनं तु कस्तूरी कर्पूरं चुंबनं भवेत् नखदंष्ट्राक्षतादीनि पुष्पाणि विविधानि
च मथनं तर्प्पणं स्निग्धं बीजपातो विसर्जनं कुलार्णवे आलिंगनं चुम्बनं स्तनयोर्म्मर्द्दनं ततः दर्शनं स्पर्शनं योनेर्विकारं लिंगघ
र्षणं प्रवेशं स्थापनं शक्तेर्नूतनपुष्पानिषूजने यामले संयोगाज्जायते सौख्यं परमानंदलक्षणं कुलामृतं त्रयं तत्र नगण्हीयादुल्ले

तं०सा० भं नरः तेनामृतेन दिव्येन सर्वे तुष्टा भवन्ति हि यत्कामं कुरुते मंत्री तत्क्षणादेव सिध्यति ज्ञानार्णवे कुलद्रव्यं च संशोध्य शिवशक्तिसमन्वि
२८० ये जीवामृतं परं ब्रह्म रूपं निर्लिप्य सुंदरि अर्घ्यपात्रामृते दृष्ट्वा निर्विकल्पः सदानघे श्रीविद्याक्रममभ्यर्च्य परं ब्रह्मसमो भवेत्
श्रीविद्येत्युपलक्षणं इति ते कथितं ज्ञानसारं स्पष्टं वरानने सविकल्पस्तु शंकातः पापभाग्जायते नरः विचिकित्सापरो मंत्री जायते गु
रुतल्पगः अत एव वरारोहे निर्विकल्पः सदा भवेत् समयाचारे कुलामृतं समादाय तद्दृष्टिं निक्षिपेद्बुधः तदर्घ्येन समाराध्य पूजा
शेषं समापयेत् कुलामृतं शोधितं शोधनमंत्रस्तु श्रीक्रमे ॐ अमृते अमृतोद्भवे अमृतवर्षिणि प्रिये देवीपदं पश्चात् करणं प्रमोचय प
दद्वयं अमृतं स्रावय द्वन्द्वं अमृतं कुरु युग्मकं स्वाहा पदं ततो देवि शुक्रशुद्धिर्भवेत्प्रिये पुष्पैरक्षततण्डुलैः सुगंधैः कुसुमान्वि
तैः अर्घ्यद्रव्यैश्च देवेशि योनौ देवीं प्रपूजयेत् उत्तरतंत्रे धूपदीपैश्च नैवेद्यैर्विविधैः कुलसाधकः विधाय वंदितां लां च तदुच्छिष्टं
स्वयं चरेत् शिवागमे च अविचार्य शिवोच्छिष्टं यदि ब्रह्मपुरोगमा यदि हरं चेन्नरकं याति कुलमार्गोऽयमिति ध्रुवं तस्माद्विचार्य यत्नेन शक्त्युच्छि
ष्टं भजेत्सुधीः आनंदकारणे क्षीरे स्नात्वा निर्भ्रान्तितः पिबेत् इति कुलपूजा नैवेद्यं यामले नैवेद्यं त्रिपुरादेव्याः वांछंति विबुधाः स राम
दा तस्मादेवं कुरुष्वेष्टं ग्रहणो विष्णवे शिवाय महास्कंदाय तत्पर्यायगणेशाय यमाय च वह्नये च वरुणाय वायवे धनदाय च ईशा २८०

नायमहादेविसाधकायप्रदापयेत् त्रिपुरेसुपलक्षणं अथवीराणांपुरश्चरणंनिरूप्यते तत्रादौवरकीयनारींदीक्षितां
स्त्रजयेत् तथाकुलचूडामणौ पुरश्चरणकालेपिपरयोषांप्रपूजयेत् दीक्षितांवस्त्रभूषाद्यैर्भोज्यैः पायससंभवैः आरंभका
लेनियमंस्वयंपंञ्चायाम्रुतमलं नानाविधंपिष्टकंचनानारससमन्वितं दुग्धंदधिघृतंभक्तंनवनीतंसशर्करं उपलाखंडचू
र्णंनिनानाविधरसान्वितं नारिकेलंकपित्थंचनागरंगसुपर्शन लिंप्पाकंवीजपूरंचदाडिमीफलमुत्तमं नानारूपफलंचैवना
नागंधविलेपनं चंदनंमृगनाभिंच श्रीखंडंनवपल्लवं टंकनंलोध्रकंचैवजलजंवनजंतथा नानाशैलसमुद्भूतंनानालंकारभू
षितं भूतलगेहेसमानीयचार्घोदकविशोधितं अमृतीकरणंकृत्वाशक्तिंचाभिमुखींनयेत् ब्राह्मणीक्षत्रियावैश्याशूद्राचकु
लभूषणा वैश्यानापिताकन्याचरजकीनटकीतथा विशेषवेदग्धयुताःसर्वाएवकुलांगना अथदीक्षिताअष्टशक्तीःक्र
मेणतस्याग्रार्घपात्रंस्थापयित्वा अर्घोदकेनतामभ्युक्ष्यनिजिधेनुमुद्रयाअमृतीकृत्यअष्टशक्तिरूपमेदंकृत्वा ब्राह्मण्याद्य
ष्टशक्तीनांनामभिःकृतसंज्ञका आसनंप्रथमंदत्वास्वागतंचपुनःपुनः अर्घंपाद्यंचपानीयंमधुपर्कंजलंततः स्नापयेद्गंधपु
ष्पादिकेशसंस्कारमेवच धूपयित्वाततःकेशान्कौशेयंचनिवेदयेत् स्नानार्थेवै पीठमास्तीर्यपादुकाद्वयंदत्वातत्रसमासी

गं० सा० २८१ नानानालंकारभूषणैः भूषयित्वानुलेपनं गंधमालं निवेदयेत् ततस्तासां शक्तीं यथाक्रमेण ब्राह्म्यादिरूपां समावाह्य ज्ञी
वन्यासादिकं कृत्वा गंधपुष्पधूपदीपान्नव्यंजनादिकं दत्वा तासां सव्यकर्णे क्रमेण स्तोत्रं पठेत् तदुक्तं तत्रैव नानाशक्तिसमा
वाह्य मूर्ध्नि तासां समाचरेत् मोक्षमंडलम् ध्येत् स्वर्णपात्रे सुशोभने च वर्णचोस्थले ह्येयं भक्त्या नोज्यं निवेदयेत् श्री
ह्लिता भवेद्यानुजदामायां निवेदयेत् तासां सव्ये तु कर्णे तु ततः स्तोत्रं समाचरेत् मातर्देवि नमस्तेस्तु ब्रह्मरूपधरेनघे कृपया हि
दिवि घ्नेमं मंत्रसिद्धिप्रपद्यस्व माहेश्वरदे देवि परमानंदरूपिणि कृपयेत्यादि कौमारि सर्वविघ्नेशि कुमारक्रीडनेरते कृपये
त्यादि विष्णुरूपधरे देवि विनतासुतवाहिनि कृपयेत्यादि वाराहि वरदे देवि दंष्ट्रोद्धृतवसुंधरे कृपयेत्यादि नृसिंहरूपधरे
देवि दैत्यदानवसूदिनि कृपयेत्यादि शक्ररूपधरे देवि शक्रादिसुखदिने कृपयेत्यादि पितृमातृमये देवि पितृमातृवहिः
कृते एकवक्त्रविधे देवि विश्वरूपे नमोस्तु ते एतत्स्तोत्रं पठेद्यस्तु कर्म्मारंभे सुसंयतः विघ्नचायं वामलोकस्य तस्य विघ्नं न जायते कुलो
नस्य ब्रह्मादेवाः कथिता स्वव पुत्रक दीक्षाकाले नित्यपूजासमये नार्हये यदि तस्य प्रजाफलं वक्तुं नीयजेय हरराक्षसैः यदि श्री राम
डापरासानुभोजने तद्गृहाद्बहिः स्थितस्तावत्पठेत्स्तोत्रं यावत्तृप्तिः प्रजायते आचम्य मुखवासादि ताम्बूलं च निवेदयेत् ततोद २८१

घासुनर्म्मा ल्यंगं धचंदनपंकिलं विसृज्य चुनमस्तत्पवरं प्रार्थ्य सुखी भवेत् अन्यायदिन गच्छेन्तु निजकन्या निजानुजा अथ आ
मातुलानी वा माता वा तत्सपत्निका सर्व्वाभावे परयोऽपि मदंशो योषिता मता: सर्वाभावे एकतरा: पूजनीया: प्रयत्नत: एकाश्चित् कुल
शास्त्रज्ञा पूजाहस्तित्र भैरव सर्वा एव स्त्रिया: पूज्या ब्रह्म विष्णु शिवादय: एका च युवती तत्र पूजिताश्चावलोकिता सर्वा एव परा देवा:
पूजिता: कुलभैरव आदावन्ते च मध्ये च लक्षपूर्त्तौ विशेषत: न पूजयति चेत् कांतां तदा विघ्नैर्विलिप्यते सर्वार्जितफलं नाशि
त्वा कथया परजन्मनि तस्मात्सर्वप्रयत्नेन पूजयेत्कुलसुंदरी तत्र एवं लक्षजपादौ मध्ये अन्ते च शक्तिं प्रपूजयेत् लक्षमित्युपल
क्षणं ततो रात्रौ पश्चिमेन देवीं संपूज्य परहस्य मालया कुलमुक्तो गुरुं शिरसि हृदये देवी च ध्यात्वा शिवो हमिति भावयन् जपं कुर्या
त् मुंडमालायां गते तु प्रहरे यामे तृतीयप्रहरावधि निशायां च पजपं संख्यात्रिशेषे जपेन्न च स्वतंत्रे रात्रौ मांसासवैर्देवीं पूजयि
त्वा विधानत: ततो नग्नां स्त्रियं नग्नो रमन् लक्षयुतो पिवा जपेल्लक्षं तदा देवी होमये ज्वलदिंधने योनिकुंडस्थिते सर्पिर्मत्स्य
मांसयुतं भृशं दशांसं तर्प्ययेद्दैव्यैर्मा न मिश्रैस्तु साधक: तर्प्पणस्य दशांशेन अभिषिच्य जगन्मयीं दशांसं भोजयेत्साकं साध
कं देवताप्रियं द्रव्यं मांसं च मत्स्यं च घर्ष्णां तु प्रदापयेत् ततस्तु तोषयेद्रत्नैर्गुरुं स्वर्णादिभि: प्रिये एतत्कल्यान्महादेवि मंत्रसि

तं० सा०
२८२

ध्यातिनिश्चितं इतिकुलपुरश्चरणं अथयोगिनांमंत्रस्नानादि तंत्रांतरे स्नायात्सुविमलेतीर्थेपुष्करेहृदयाश्रिते विन्दुतीर्थे
भ्रुवामध्ये त्वात्मज्ञानं निविद्यते इडासुषुम्ना शिवतीर्थकेस्मिन् स्नानान्मुक्तश्चैवहतः शरीरे ब्रह्माम्बुभिः स्नातितयोः सदायः कि
नस्यगांगेरविपुष्करैर्वा इतिस्नानं अथसंध्या शिवशक्त्योः समायोगोयस्मिन्कालेप्रजायते सासंध्या कुलनिष्ठानांसमाधि
स्थैः प्रजायते तर्पणंतु मूलाधारात् सोमसूर्याग्निरूपिणीं कुंडलिनींसमुत्थाप्य परविंदुनिवेशपथ तदुद्भवामृतेनेह तर्पये
देहदेवतां तदुक्तं नवचक्रेश्वरे चंद्रार्कानलसंयुगाद्गलितंयत्परामृतं तेनामृतेनदिव्येनतर्पयेदिष्टदेवतां ब्रह्मरन्ध्रादधोभा
गेयच्चांद्रंपात्रमुत्तमं कलासारेणसंपूर्णंतर्पयेत्तेनसुंदरी ध्यानंतुकिरणस्थंयदग्निस्थंचंद्रभास्करमध्यगं महासूक्ष्मेल
यंकत्वापूर्णं क्लिष्टतियोगिराट् अथवानिरालंबेपदेशून्येयल्लिज्जउपपद्यते तज्जं भमध्यसेन्नित्यंध्यानमेतद्धियोगि
नां तज्जृंभमित्यंतःकरणस्थंअभ्यसेदिति अथान्तरयजनं मूलाधारात्कुंडलिनीमुत्थाप्यहृदयादर्कमंडलंनीत्वासहस्रक
मलकर्णिकान्तर्गतं चंद्रामृतधारयामूलमंत्रस्मरणाभिषिंचेत् अर्चयन्विषयैःपुष्पैस्तत्स्वरूपेणतन्मयोभवेत् स्वात्मस्तन्मय राम
तावुद्धिः सोहंभावेनपूजयेत् तन्मयेतितदेकत्वज्ञानंसोहमितिमंत्राक्षराणि विद्धक्रोप्रात्राणिपरिभावयेत् तामेवपरम २८२

ब्योम्नि परमात्मन्त्र वं हृत्ते ईर्शयत्यात्ममडावं भक्ताहोमादिभिर्विनेति अथ होमः आत्मान्तरात्मनि परमात्मज्ञानात्मा स्वरूपं
चतुरस्रं कुंडमानंदमेखलायुतं अर्द्धमात्राकृतियोनिविभूषितं नाभौ ध्यात्वा तन्मध्यस्थ ज्ञानाग्नौ जुहुयात् यथा मूलान्ते चै
तन्यरूपाग्नौ हविषा मनसा स्रुचा ज्ञानप्रदीपिते नित्यं मम कर्तोर्जुहोम्यहम् अनेन प्रथमाहुतिं दद्यात् धर्माधर्म हवि
र्दीप्ते आत्माग्नौ स्वाहा इति द्वितीयाहुतिं मूलान्ते प्रकाशे मनसा स्रुचा सुषुम्नावर्त्मनानित्यं मम दृष्टिर्जुहोम्यहं शब्दस्नाप्यांश्रवलं
ब्योमलोस्रुचा धर्माधर्मकलास्नेहपूर्णमग्नौ जुहोम्यहं स्वाहा अनेन तृतीयाहुतिं दद्यात् ततो मूलान्ते अगरनिरंधानिवध
नमेधमाने धामानेमायान्धकारपरिपन्थिनि सं ज्विदग्नौ कस्मिंश्चिदद्भुतमरीचिविकाभूमौ विश्वं कुहोमि वसुधादितृणा
वसानं इत्यन्तर्यजनं कृत्वा साक्षाद्ब्रह्मतन्मयो भवेत् न तस्य पापपुण्यानि जीवन्मुक्तो भवेन्नरः अथ त्वन्तर्यागो ज्ञानिनामेव अथा
तः पंचमकारयजनप्रकारः तदुक्तं कुलार्णवे सुरा शक्तिः शिवो मांसं तद्भोक्ता भैरवः स्वयं तयोरैक्यं समुत्पन्न आनंदो मोक्ष उच्य
ते आनंदं ब्रह्मणो रूपं तच्च देहे व्यवस्थितं तस्याभिव्यंजनं द्रव्यं योगिभिस्तेन पीयते लिंगत्रयविशेषज्ञः षडूर्मिक्रमवेदिनः पी
ठस्थानानि चागत्य महापद्मवनं व्रजेत् आमूलाधारमाब्रह्मरंध्रं गत्वा पुनः पुनः चिच्चंद्रकुंडलीशक्तिः सामरस्यसुखोदयः ब्योमपं

तं०रहा० कत्तनिस्पन्दंसुधापानरतोनरः मधुपानमिदंदेवि चेतरंमद्यपानकम् पुण्यापुण्यपशुंहत्वा ज्ञानखड्गेनयोगवित् परेलयन्न
२८३ येच्चित्रपलाशीतिनिगद्यते मनसाइंद्रियगणंसंयम्यात्मनियोजयेत् मांसाशीसभवेद्देवि इतरेप्राणिघातिकाः परशक्त्या
त्ममिथुनसंयोगानंदनिर्भरा युक्तास्तेमैथुनंतत्स्यादितरेस्त्रीनिषेवकाः अथकुमारीपूजा तत्रकुमारीनिर्णयः यामले
एकवर्षाभवेत्संध्याद्विवर्षाचसरस्वती त्रिवर्षात्रिविधामूर्तिश्चतुर्वर्षातुकालिका सुभगापंचवर्षातुषड्वर्षाचउमाभवेत् सप्त
भिर्मालिनीसाक्षादष्टवर्षातुकुब्जिका नवभिःकालसंदर्भादशभिश्चापराजिता एकादशेचरुद्राणीद्वादशाब्देतुभैरवी
त्रयोदशेमहालक्ष्मीर्द्विसप्तापीठनायिका क्षेत्रज्ञापंचदशभिःषोडशेचांबिकातथा एवंक्रमेणसंपूज्ययावत्पुष्पंनविद्यते प्रतिपद
दिपूर्णान्तंवृद्धिभेदेनपूजयेत् महापर्वसुसर्वेषुविशेषाच्चपवित्रके महानवम्यांदेवेशिकुमारीश्चप्रपूजयेत् तत्रपूजाक्रमः
कुमारीमानीयऐंकारेणजलंतत्त्रलाम्मादेवीकुर्यात् क्लींकारेणपाद्यंश्रीकारेणार्घ्यंहूंकारेणचंदनं क्लींकारेणपुष्पाणि ह्सौः
मंत्रेणधूपयेत्दीपादिचदद्यात् ततःषडंगेनपूजयेत् तद्यथा ऐंक्लींश्रींह्रौंह्रैंकुलकुमारिकेहृदयायनमः ह्रैंरैंऐंक्लींश्रींऐं राम्
स्वाहाशिरसेस्वाहा ॐशिखायैवषट् ऐंकुलवागीश्वरवागीश्वरिकवचायहुं ऐंवाग्भवकुलेश्वरिनेत्रत्रयायवौषट् तत्ऐंसि २८३

ह्रं जयाय पूर्ववक्त्राय नमः ऐं जयाय उत्तरवक्त्राय नमः ऐं ह्रां श्रीं कुब्जिके पश्चिमवक्त्राय नमः ऐं कालिके दक्षिणवक्त्राय नमः वाग्भ
वेन पुरः क्षोभं मायाबीजे गुणाष्टकं श्रियो बीजे श्रियो लाभः क्लीं बीजे चाखिलं हृदयः भैरवेन नु बीजेन खगत्वममरादिभिः
कुमारिका त्वहं नाथ सदा त्वं हि कुमारिका अष्टोत्तरशतं वापि एकां वापि प्रपूजयेत् पूजिताः प्रतिपूज्यन्ति निर्दहेद्देवमानि
ता कुमारी योगिनी साक्षात् कुमारी परदेवता असुरा अष्टनागाश्च ये ये दुष्टग्रहा अपि भूतवेतालगंधर्वडाकिनीयक्ष
राक्षसाः यश्चान्या देवताः सर्वा भूर्भुवःस्वश्च भैरवाः पृथिव्यादीनि सर्वाणि ब्रह्मांडं सचराचरं ब्रह्मा विष्णुश्च रुद्रश्च
ईश्वरश्च सदाशिवः ते तुष्टाः सर्वतुष्टाश्च यस्तु कन्यां प्रपूजयेत् विधियुक्तं कुमारीभिः भोजयेच्चैव भैरवी पाद्यमर्घ्यं तथा
धूपं कुंकुमं चंदनं शुभं भक्तिभावेन संपूज्य कुमारीभ्यो निवेदयेत् प्रदक्षिणत्रयं कुर्यात् तस्मादोमध्येत यात्रातः पश्चात् दक्षि
णां दद्यात् रजतस्वर्णमौक्तिकैः दक्षिणां च कुमारीभ्यो निवेदयेत् दद्यात् क्रमतस्तथा विवाहयेत् स्वयं कन्यां ब्रह्महत्यां विनश्यति गो
हत्यां स्त्रीहत्यां च सर्वपापं प्रणश्यति यो यश्च पुण्यकाले च कन्यादानं प्रकल्पयेत् भुक्तिमुक्तिफलं तस्य सौभाग्यं सर्वसंपदः रुद्र
लोके च से नित्यं त्रिनेत्रो भगवान्हरः बदरिकोटिसहस्राणि अश्वमेधशतानि च तत्फलं लभते सद्यो यस्तु कन्यां विवाहयेत् बालु

नं० स्का० ७
२८४

कामागारं त्रेयं तावद्वर्षसहस्रकं एकैकं कुलमुद्धृत्य कुण्डलोके महीयते कन्यादानं तु तत्र देवताप्रीतये इति संप्रदाय वस्तु तत्तु तत्र दर्षीया
स्तत् बुद्ध्या शिवरूपस्य प्रदानीये विभावत्दद्यादिति रहस्यार्थः अथ योगप्रक्रिया गौतमीये देवर्षे योगमुक्तात्मयोगानुभवद
र्शक सांख्ययोगविशेषज्ञ कर्मयोगनिषेधक विना योगेन सिद्धेत्तु कुंडलीकं क्रमः प्रभो मूलपद्मे कुंडलिनी यावन्निद्रायिता प्रभो
तावत्किंचिन्न सिद्ध्येत मंत्रयंत्रार्चनादिकं जागर्त्ति यदि सा देवी बहुभिः पुन्यसंचयैः तदा प्रसादमायान्ति मंत्रयंत्रार्चनादयः
शिववद्विहरेल्लोके दृष्टैश्वर्य्यसमन्वितः योगयोगाद्भवेन्मुक्तिर्मंत्रसिद्धिरखंडिता सिद्धे मनोपशावादिरिति शास्त्रार्थनिर्णयः
तस्मात्कात्यायं परं योगं कथयस्व मुनीश्वर मुक्तात्मा येन विहरेत्स्वर्गमर्त्यरसातले जीवन्मुक्तश्च देहान्ते परं निर्वाणमाप्नु
यात् नारदउवाच कथयामि तवस्नेहात् योगयोग्योसि गौतम संसारोत्तरणे मुक्तियोगशब्देन कथ्यते ऐक्यं जीवात्मनोराहु
र्योगं योगविशारदः तत्समूहाः समाख्याताः योगविघ्नकरा मुने कामक्रोधलोभमोहमदमत्सर्य्यसंज्ञिकाः योगांगैरेभिर्निर्जि
त्यातान् योगिनो योगमाप्नुयु यमनियमासनौ प्रोक्तौ प्राणायामस्ततः परं प्रत्याहारं धारणाख्यं ध्यानं सर्द्धसमाधिना अष्टांगान्याहु
रेतानि योगिनो योगसाधने अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यं दयार्ज्जवं क्षमाधृतिर्मिताहारः शौचं चेति यमादयः तपः संतोष आस्ति २८४

कंदानं देवस्यपूजनं सिद्धांतश्रवणं चैव ह्रीर्मतिश्च जपो हुतं दशैते नियमाः प्रोक्ता योगशास्त्रविशारदैः आसनानि पूर्वोक्तानि
इडयाकर्षयेद्वायुं वाह्यं षोडशमात्रया धारयेत्पूरितं योगी चतुःषष्ट्या च मात्रया सुषुम्नामध्यगं सम्यक् द्वात्रिंशन्मात्रया शनैः
नाड्यां पिंगलया चैनं रेचयेद्योगवित्तमः प्राणायाममिमं प्राहुः योगशास्त्रविशारदाः भूयो भूयः क्रमात्तस्य व्यत्यासेन समाच
रेत्. मात्रा वृद्धिक्रमेणैव सम्यग्द्वादश षोडश जपध्यानादिभिर्युक्तं सगर्भं तं विदुर्बुधाः तदपेतं विगर्भं च प्राणायामं परं विदुः क्र
मादभ्यसतः पुंसो देहे स्वेदोद्गमोऽधमः मध्यमः कंपसंयुक्तो भूमित्यागः परो मतः उत्तमस्य गुणावाप्तिः यावच्छीलनमिष्यते इं
द्रियाणां विचरतां विषयेषु निरर्गलं बलादाहरणं तेभ्यः प्रत्याहारो विधीयते अंगुष्ठगुल्फजानूरुसीमनीलिंगनाभिषु हृ
द्ग्रीवाकंठदेशेषु लंबिकायां ततो नसि भ्रूमध्ये मस्तके मूर्ध्नि द्वादशान्ते यथाविधि धारणं प्राणमरुतो धारणेति निगद्यते समा
हितेन मनसा चैतन्यान्तरवर्तिना आत्मन्यभीष्टदेवानां ध्यानं ध्यानमिहोच्यते समत्वभावनां नित्यं जीवात्मपरमात्मनोः समा
धिमाहुर्मुनयः प्रोक्तमष्टांगलक्षणं दृष्टादिकल्पितं विघ्नकामादिषट्कनाशनं इदानीं कथये ते हं मंत्रयोगमनुत्तमं विश्वं शरी
रमित्युक्तं पंचभूतात्मकं मुने चंद्रसूर्याग्नितेजोभिर्जीवब्रह्मैककरूपिणं तिस्रः कोट्यस्तदर्द्धेन शरीरे नाडयो मताः तेषु मुख्या

तं०सा० दशप्रोक्तास्तासु तिस्रो व्यवस्थिता प्रधाना मेरुदंडे तु चंद्रसूर्याग्निरूपिणी इडा वामे स्थिता नाडी कला तु चंद्ररूपिणी शक्ति
२२५ रूपा च सा नाडी साक्षादमृतविग्रहा दक्षिणे पिंगलाख्या तु पुंरूपा सूर्यविग्रहा। दाडिमीकेसरप्रख्या विख्याता नाम्नि निःस्व
ता मेरुमध्ये स्थिता या तु मूलाद्ब्रह्मविग्रहा सर्वतेजोमयी सा तु सुषुम्ना वह्निरूपिणी तस्या मध्ये विचित्राख्या अमृतस्रा
विणी शुभा सर्वदेवमयी सा तु योगिनां हृदयंगमा विसर्गाद्बिंदुपर्यंतं व्याप्य तिष्ठति तत्वतः मूलाधारे त्रिकोणाख्ये इच्छा
ज्ञानक्रियात्मके मध्ये स्वयंभूलिंगं तु कोटिसूर्यसमप्रभं तदूर्ध्वे कामबीजं तु कलास्याद्बिंदुनादकं तदूर्ध्वे तु शिखाकारा कुं
डली ब्रह्मविग्रहा तद्बाह्ये हेमवर्णाभं वसवर्णं चतुर्दलं द्रुतहेमसमप्रख्यं पद्मं तत्र विभावयेत् तदूर्ध्वेऽग्निसमप्रख्यं षट्दलं
हीरकप्रभं वादिलांतषड्वर्णेन युक्तं चाधिष्ठानसंज्ञकं मूलमाधारषट्कानां मूलाधारं ततो विदुः स्वशब्देन परं लिंगं स्वाधिष्ठानं
ततो विदुः तदूर्ध्वे नाभिदेशे तु मणिपूरं महत्प्रभं मेघाभं विद्युताभं च बहुतेजोमयं ततः मणिवद्भिन्नं तत्पद्मं मणिपूरं तथोच्य
ते दशभिश्च दलैर्युक्तं डादिफांताक्षरान्वितं शिवेनाधिष्ठितं पद्मं विश्वालोकनकारकं तदूर्ध्वे नाहतं पद्मसुद्यदादित्यसन्नि
भं कादिठांताक्षरैरर्कपत्रैश्च समधिष्ठितं तन्मध्ये बाणलिंगं तु सूर्यायुतसमप्रभं शब्दब्रह्ममयं शब्दानाहतस्तत्र दृश्य २२५

ते तेनाहतारव्यंपद्मं तन्मुनिभिः परिकीर्त्तितैः आनंदसदनं तत्तु पुरुषेणाधिष्ठितं परं तदूर्द्ध्वं तु विशुद्धाख्यं दलषोडशपंकजं स्व
रैः षोडशकैर्युक्तं धूम्रवर्णं महत्प्रभं विशुद्धं तनुते यस्माज्जीवस्य हंसलोचनात् विशुद्धं पद्ममाख्यातमाकाशाख्यं महदद्भुतं
आज्ञाचक्रं तदूर्द्ध्वं तु आत्मनाधिष्ठितं परं आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्त्तितम् कैलाशाख्यं तदूर्द्ध्वं तु रोधनी तु तदूर्द्ध्व
तः एवं तु शिवचक्राणि प्रोक्तानि तव सुव्रत। सहस्रारं बुजं विंदुस्थानं तदूर्द्ध्वमीरितं इत्येतत्कथितं सर्वं योगमार्गमनु
त्तमं आदौ पूरकयोगेन आधारे योजयेन्मनः गुदमेढ्रान्तरे शक्तिं तामाकुंच्य प्रवर्त्तयेत् लिंगभेदक्रमेणैव विंदुचक्रं च प्रा
पयेत् शंभुना तां परां शक्तिमेकीभावं विचिन्तयेत् तत्रोत्थितामृतं तं वक्तुं द्रुतं लाक्षारसोपमं पाययित्वा च तां शक्तिं षट्
चयोगसिद्धिदां षट्चक्रदेवतास्तत्र संतर्प्यामृतधारया आनयेत्तेन मार्गेण मूलाधारं ततः सुधीः एवमभ्यस्यमानस्याप्य
हन्यहनि मातृतं जरामरणदुःखाद्यैर्मुच्यते भवबंधनात् पूर्वोक्ता दुःखितामंत्राः सर्वे सिध्यन्ति नान्यथा ये गुणाः संति देवस्य पंचकृ
त्यविधायिनः ते गुणाः साधकवरे भवन्त्येव न चान्यथा इत्येतत्कथितं विप्र वायोर्धारणमुत्तमं इदानीं धारणाख्यां तु शृणुष्वावहितो मम
दिक्कालाद्यनवच्छिन्ने सम्यक् चेतो निधाय च तन्मयो भवति क्षिप्रं जीवब्रह्मैक्ययोजनात् अथवा समलं चित्तं यदा क्षिप्रं न सिद्ध्यति तदा

वयवयोगेणयोगी योगान्समभ्यसेत् पादांभोजेमनोदध्यान्नखकिंजल्कशोभिते जंघायुग्मेतथारामकदलीकांडशोभिते ऊरुद्व
येमत्तहस्तिकादंडसमप्रभे गंगावर्त्तगभीरेतुनाभौनिर्झरलोततः उदरेहारवलसितथाहारेश्रीवत्सकौस्तुभे पूर्णचंद्रायुत
प्रख्येललाटेचारुकुंतले शंखचक्रगदांभोजदोर्दंडपरिमंडिते सहस्रादित्यसंकाशकिरीटकुंडलोद्वये स्थानेनियोजयेन्मंत्री
विष्णुरूपःशुद्धचेतसा मनोनिविश्यपादस्थेवेतन्मयोभवतिध्रुवं यावन्मनोलयंयाति कृष्णेस्वात्मनि चिंतयेत् कृष्णेदृष्टुपलब्धे
तावदिष्टमनुर्मंत्री जपहोमंसमभ्यसेत् अतःपरंनकिंचिच्चकृत्यमस्तिवशेहरेः विदितेपरतत्त्वेतुसमस्तेनियमैरलं तलवृंते
नकिंकुर्य्यं लब्धेमलयमारुते मंत्राभ्यासेनयोगेनज्ञेयंज्ञानायकल्पते नयोगेनविनामंत्रोनमंत्रेणविनाहिसः द्वयोर
भ्यासयोगोहिब्रह्मसंसिद्धिकारणं तमःपरिवृतेगेहेघटोदीपेनदृश्यते एवंमायावृतोह्यात्मामनुनागोचरीकृतः एवंनेक
स्थितंब्रह्मनंत्रयोगमनुत्तमं दुर्लभंविषयासक्तैःसुलभंतादृशामपि अथप्रकारान्तरधारणायां षण्णवत्यंगुलायामंशरी
रमयात्मकं गुदध्वजान्तरेकंदमुत्सेधाद्व्यंगुलंविदुः तस्यद्विगुणविस्तारंवर्त्तरूपेणसेवितं नाड्यस्तत्रसमुद्भूतामुख्यास्तिस्रःप्रकी राम
र्तिताः इडावामेस्थितानाडीपिंगलादक्षिणेस्थिता तयोर्मध्येगतानाडीसुषुम्नाधःसमाश्रिता पादांगुष्ठद्वयंघ्राता शिफाभ्यांशि २८६

एसापुनः ब्रह्मस्थानंसमारूढासोमसूर्याग्निरूपिणी तस्यामध्यगतानाडीचित्राख्यायोगवल्लभा ब्रह्मरंध्रंविदुस्तस्यांपद्मसूत्र
निभंपरं आधारंच विदुस्तत्रमतभेदादनेकधा दिव्यमार्गमिमंप्राहुरमृतानंदकारणं इडायांसंचरेच्चंद्रः पिंगलायांदिवाकरः
श्रोतोयोगेनिदानं वै सुषुम्नायांचतावुभौ आधारकंदमध्यस्थंत्रिकोणमतिसुंदरं ज्योतिषांनिलयंनित्यंप्राहुरागमवेदिनः त
त्रविद्युल्लताकाराकुंडलीपरदेवता प्रतिस्फुरतिसर्वात्मासूक्ष्माहृत्सदृशाकृतिः विभर्त्तिकुंडलीशक्तिरात्मानंहंसमाश्रिता हंसः
प्राणश्चयेतितंप्राणोनाडीयथाश्रयः आधारदुर्लभोवायुर्यथावत्सर्वदेहिनां देहव्याप्यस्तुनाडीभिःप्रयाणंकुरुतेवहिः
द्वादशांगुलमानेनतस्मात्प्राणइतीरितः स्वेमठासनेसुखेपट्टानितकुशान्तरे बद्धैकमासनंयोगीयोगमार्गपरोभवेत् ज्ञात्वा
हृतोदयंदेहेयथावत्प्राणवायुना तत्रद्रुतंयतौ अज्ञे देहे हृदुत्त्वावायुमयेत्सुधी आसनभूतोदयेप्राग्युक्ते अंगुलीभिर्दृढंबध्वाकरणा
निःसमाहितः अंगुष्ठाभ्यामुभेश्रोत्रेतर्जनीभ्यांविलोचने नासारंध्रेचमध्याभ्यांमध्याभिर्वदनंदृढं बध्वात्मप्राणमनसासोमकलांस
मनुस्मरणं धारयेन्मारुतंसम्यक्योगोयंयोगिवल्लभः नादःसंजायतेसम्यक्क्रमादभ्यसतःशनैः मत्तभृंगावलीगीतसदृशः
प्रथमोध्वनि वंशिकास्पर्शनिलापूर्णवंशध्वनिनिभःपरः घंटारवसमःपश्चात् धनमेघस्वनोपरः एवमभ्यसतांपुंसांसंसारध्वा

नं०स्ता० नाशले इत्यनुमाध्यते सर्वं हंसलक्षणमव्ययं पुंप्रकृत्यात्मकौ प्रोक्तौ बिंदुसर्गौ मनीषिभिः ताभ्यां क्रमात्समुद्भूतौ बिंदुसर्गाव
२८१ सानकौ हंसोतो पुंप्रकृत्याख्यो हंपुमान्प्रकृतिस्तु सः अजपा कथिता ताभ्यां जीवैर्या समुपास्यते पुरुषं चाश्रयं मन्वा प्रकृतिर्लिप्तमात्म
नः यदा तज्ञावमाप्नोति तदा सोऽहमियं भवेत् सकारान्तं हकारान्तं लोपयित्वा ततः परं सन्धिं कुर्यात्पूर्वरूपां तदासौ प्रणवो भवेत्
परानंदमयं नित्यं चैतन्यैकगुणात्मकं आत्माभेदस्थितं योगी प्रणवं भावयेत्सदा आम्नायवाचामतिदूरमाद्यं वेद्यं स्वसंवेद्यगुणेन
मंत्रः आत्मानमानंदरसैकसिंधुं पश्यंति तारात्मकमात्मनिष्ठः सत्यं हेतुविवर्जितं श्रुतिशिरामाद्यं जगत्कारणं व्याप्तं स्थावर
जंगमं निरूपमं चैतन्यमन्तर्गतं आत्मानं रविचंद्रवह्निवपुषं तारात्मकं संततं नित्यानंदगुणालयं सुकृतिनः पश्यन्ति कूर्चे
न्द्रिया तारस्य सत्त्वविभवैः परिचीयमानं मानैरप्यमानि शब्दनिमीलितमग्र्यं सच्चित्सुखमकमगमनश्वरमच्युतं तत् तेजः परम
जतसान्द्रसुधाम्बुराशिं हिरण्मयं दीप्तमनेकवर्णं त्रिमूर्तिमूलं निगमादिबीजं ओंगुप्तमात्रं पुरुषं भजन्ते चैतन्यमात्रं रवि
मंडलस्थं ध्यायन्ति दुग्धाब्धिभुजंगभोगे शय्यालसमाद्यं कमलासहायं प्रोत्फुल्लनेत्राम्बुजमंजनाभं चतुर्मुखेनाश्रितपादप राम
सं आम्नायगंधिचरणं घननीलमुग्धश्रीवत्सकौस्तुभगदाम्बुजशंखचक्रं हृत्पुंडरीकनिलयं जगदेकमूलमालोकयन्ति २८१

लितेन पुरुषं पुराणं विन्दोर्नादसमुद्भवः समुद्दितेनादेजगत्कारणम् नारं तत्त्वमुखाम्बुजं परिव्रतं वर्णात्मकैर्भूवज्रैः आम्नायां प्रिच
मुघयं सुरत्रिकोणानंद मूलं वपुः पायाद्वोमुकुन्दुखंडविलासदिव्यामृतौघाप्लुतं पिंडं भवेत्कुंडलिनी [illegible] त्मापदं तु हंसः सकला
त्मात्मा रूपं भूतो विदुरमन्दकान्तिरतीतरूपं शिवसाम्यरूपं पिंडादियोगं शिवसाम्यवस्यात् संजीवयोगं प्रवदंति मन्त्राः शिवे
लयन्नित्यगुणाभियुक्तो निर्बीजयोगं फलनिर्व्ययेऽस्मिं मूलोन्निद्रभुजंगराजमहिषीं यान्तीं सुषुम्नान्तरां भित्वाधारसमूहमाशु वि
लसत्सौदामिनीसन्निभां व्योमांभोजगतेन्दुमंडलगलद्दिव्यामृतौघैः प्लुतिं संभाव्य स्वगृहं गतां पुनरिमां संचिंतयेत्कुंडलीम्
हंसं नित्यमनन्तमव्ययगुणं स्वाधारतो निर्गता शक्तिः कुंडलिनी समस्तजननी हस्ते गृहीत्वा च तं याता रंध्रणि केतने परं
सुखं तेनानुभूयाः स्वयं यान्ती स्वाश्रयमर्ककोटिरुचिरा ध्येया जगन्मोहिनी अव्यक्तं परविन्दुमाश्रितरुचिं मीत्वा शिव
[illegible]लयं शक्तिः कुंडलिनी गुणत्रयमयी विद्युल्लतासन्निभा सानन्दामृतमध्यगं पुरमिदं चंडार्ककोटिप्रभं संवीक्ष्य पुरं गता
[illegible] वती ध्येया नवघातुगैः मध्ये वर्त्मसमीरणद्वयमिथः संघट्टसंक्षोभजं शब्दस्तोममतीत्य तेजसि तडित्कोटिप्रभाभास्वरे
उ[illegible]ति समुपास्महे नवजवास्निं दूरसन्ध्यारुणां सांद्रानंदसुधामयीं परशिवं प्राप्तां परां देवताम् गमनागमने [illegible] शक्तिकीस्सा

[illegible] कुंडली मुदिताकुलकामधेनुरेषाभिजनाकाङ्क्षितकल्पवल्लरी वेदादिसाद्धैर्परिज [illegible]

[illegible]तनलोपमवेदसमातः ततरू८ करी विषदीकरणोज्ञानान्दोधानलमस्वतवपदद्युंमेधुयाचे मनसा [illegible] मू८ तु

स्यचीकृतंतल्लिमवंतितंत्रे लुंतव्यमेत करुणानिधाने क्रोधानवाहि खलुयामरेषु श्रीलक्ष्मानन्द [illegible] रामभ

[illegible]संग्रहं तल्लाश्र धीत्यप्राप्य [illegible] धीराध्याय तनुमांपतं ७ इति श्रीमहामहोपाध्याय श्रीके [illegible] दलागि

महाचार्य्यकृततंत्रसारः समाप्तः शुभंभवतु ७ संवत १९४३ आवल्लेलक्षमप लै ४ भृगुवा [illegible] सितितवाश्मं

राम

२८